Srimadh Bhagvat Gita bhav Prakash tikka sahit;
Sadanonda Press.— Kashi

25448

॥ अथश्रीमद्भगवद्गीताभावप्रकाशटीकायांप्रथ० प्रारभ्यते ॥

INDIAN INSTITUTE OF ADVANCED
Acc. No. 25118
Date 13.6.60
SIMLA.

॥ श्रीः ॥

उपोद्घातः ।

इह खलु श्रुतिस्मृतिपुराणव्याकरणतर्कयोगसांख्यादीनि निदर्शनानि नृणामिहामुत्र सुखप्रदकर्मबोधकानि संति । तन्मध्ये जीवानामनादिसंसारसंचितकर्मकोटिबीजाऽविद्यावभर्जनद्वारात्यंतिकनिःश्रेयसाधिगमसाधनभूतं वेदांतशास्त्रमेवाखिलजनाज्ञानध्वांतविध्वंसने ज्ञानचंडांशुरूपकत्वेन वरीवर्ति । तद्विविदिषूणां मुमुक्षूणामनायासतः कुतर्कादिनिरासपूर्वकमखंडानंदानुभवसिद्ध्यर्थमस्मिन्कलावपि विक्रमादित्याद्गतेषु चतुश्चत्वारिंशदधिकाष्टशतसंख्याकवत्सरेषु कलापिग्रामेऽवतीर्णैः श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भगवत्पूज्यपादस्वामिश्रीमच्छंकराचार्यैरधिकारिणां तत्तदधिकारानुरूपं कर्मोपासनादिसाधनोपदेशपूर्वकं साधनचतुष्टयादिसंपन्नानां मुमुक्षूणामात्मतत्त्वविचारसाधनभूतमुपनिषद्भाष्यब्रह्मसूत्रभाष्यगीतादिस्मृतिभाष्यात्मकं प्रस्थानत्रयमकारि । तत्रगद्यात्मकगीताभाष्यगूढार्थमेवस्फुटीकर्तुं श्रीकाशीक्षेत्रआनंदेनकृताधिवासैः सारस्वतद्विजकुलोत्पन्नैःश्रीकृष्णभक्तिघनरसाभिवृष्टिसुशांताध्यात्मिकादितापैर्वैराग्यशांतिदांत्यादिसाधनसंपन्नैः स्वतो विषयविमुखैरपि परेषामखंडानंदानुभवबोधनसंमुखैःसंपादिताद्वैतानंदसाक्षात्कारैःसदानंदाभिधानैः सुबोधपद्यरचनया रचिता भावप्रकाशाभिख्यैषा व्याख्या । अन्येप्येतैः प्रत्यक्तत्त्वचिंतामणिशंकरविजयसारादयोऽत्युत्तमवेदांतग्रंथाः संग्रथिताःसंति । अस्यांगीताव्याख्यायांतु श्रुतियुक्तिप्रमाणप्रदर्शनपूर्वकं स्पष्टार्थवद्भिः पद्यैर्यः स्पष्टीकृतोऽर्थोऽस्ति स मुमुक्षूणामात्मतत्त्वविचारे बहुतरोपयोगीति भूतपूर्वनेपालदेशाधिवासैरमानित्वादिसद्गुणसंपत्समृद्धिसमन्वितैः सरहस्यवेदांतशास्त्रतात्पर्याभिज्ञैर्ब्रह्मविद्याधिगतात्मसाक्षात्कारैः श्रीमत्परमहंसस्वामिश्रीमत्कैलासाचलाभिधानैर्निश्चित्य तस्य ग्रंथस्य मुद्रणतो बहुपुस्तकतयाप्रसिद्धीकरणरूपस्वाभीष्टस्व-

चकपत्रसहितं तत्पुस्तकं संप्रेष्य तन्मुद्रणकरणे नियुक्ता वेदांतरसास्वादनतत्पराः स्वानुभवप्रदर्शकस्वरूपानुसन्धानग्रन्थग्रथनशालिनः परोपकारशीला भावनगरकृतवसतयः सुमतयो मुख्यप्रधानपीठाधिष्ठिता उदयशंकरात्मजगौरीशंकराभिख्या आसन् । तेच भावप्रकाशव्याख्यामुद्रणार्थं स्वतएवद्रव्यव्ययकरणे बद्धपरिकरा अप्ययं ग्रंथो मुद्रणयोग्यो नवेति संमत्यर्थं तत्पुस्तकं निजाभिलषितार्थसूचनपत्रसहितं मुम्बय्याख्यराजधान्यांकृतनिवासान् समस्तोपनिषत्तात्पर्यज्ञानावासान् शांतदांतस्वांतवृत्तीन् सौजन्यसौशील्यसारल्यशेवधीन् मुमुक्षूणांतत्त्वोपदेशार्थमेवोर्वरितनिजजीवितसंयोजनैकनिश्चयान् श्रीव्यासावटंकान् श्रीजीवनरामात्मजान् श्रीजयकृष्णसंज्ञकान्प्रति संप्रेषितवंतः । तेच परमहर्षभरितास्तत्पुस्तकं साग्रमवलोक्य मुद्रणद्वारातत्प्रसिद्धीकरणाय स्वकीयं सदभिप्रायंदत्तवंतः । उतचाकस्मात्स्मृतिपथमागतेन पूर्वदृष्टेन पुस्तकांतरेणैतत्संयोज्यसंशोधनीयमितिनिश्चयवंतः संजाताः । ततस्तत्पुस्तकांतरं रत्नागिरिसंज्ञके पत्तनेऽस्तीतिसंचिंत्य पत्रप्रेषणेन तत्रस्थानां तत्त्वज्ञानसंपादनैकतानानां गीताभाष्योत्कर्षदीपिकाप्रसिद्धिकर्दृणामाठल्योपाव्हहरिरामसूनुवासुदेवशर्मणां पुस्तकसंग्रहालयात्तदानाय्य ततस्तदेव सुव्यक्ताक्षरंपुस्तकं भावनगरादागतपुस्तकसंयोजनेनान्यविपश्चित्साहाय्येनच संशोध्यमुद्रणार्थमदद्युः । ततएतत्पुस्तकं पूर्वोक्तैर्भावनगरस्थैर्गौरीशंकराभिधानैः प्रधानैर्मुंबापुर्यां निर्णयसागराख्यमुद्रणयंत्रालये १८०८ मितेशाके १९४२ मितेसंवत्सरेमधावसितेद्वितीयायां मुद्रापयित्वाप्राकाश्यंनीतम् । आशास्महे यदस्मिन् विचारपूर्वकंसंशोधितेऽपिग्रंथेऽज्ञानाद्दृष्टिदोषाद्वास्थितमस्त्यशुद्धादितत्सारासारविवेकवद्भिर्विद्वद्भिर्दयार्द्रदृष्ट्यासंशोधनीयमिति ॥

गोरेइत्युपनामकनारायणतनयविष्ठलः शास्त्री.

धर्मानोयथाभवेत् ॥ संप्रदायमुखेनैवतथाकार्यंमयाधुना ॥ १७ ॥ इतिसंचिंत्यगोविंदोनिमित्तीकृत्यचार्जुनम् ॥ संग्रामेऽवसरंलब्ध्वाद्विविधं
धर्ममीश्वरः ॥ १८ ॥ तस्मादुपदिदेशेदंचउत्तमायाधिकारिणे ॥ धर्मोऽनुष्ठीयमानश्चगृहीतःसन्गुणाधिकैः ॥ १९ ॥ स्वयमेवहिकालेनप्रच
यंप्रगमिष्यति ॥ इत्यतोऽर्जुनमुद्दिश्यधर्मसंप्रोक्तवान्हरिः ॥ २० ॥ जंतूनांशोकमोहौद्वौसंसारानर्थकारणम् ॥ ताभ्यामनर्थहेतुभ्यामर्जुनः
पांडुनंदनः ॥ २१ ॥ अभिभूतविवेकःसन्क्षत्रधर्मरणेस्वतः ॥ प्रवृत्तोऽपततोधर्म्याद्युद्धादुपरामह ॥ २२ ॥ परधर्मंतथाभिक्षाजीवनादि
कमाकुलः ॥ कर्तुंप्रववृतेमोहान्निषिद्धःक्षत्रियस्ययः ॥ २३ ॥ तथाचसर्वजंतूनांशोकाद्याविष्टचेतसाम् ॥ स्वधर्मत्यागोनिंद्यस्यसेवाचस्या
त्स्वभावतः ॥ २४ ॥ स्वधर्मेऽपिप्रवृत्तानांप्रवृत्तिर्मूढचेतसाम् ॥ फलाभिसंधिपूर्वैवसाहंकाराचजायते ॥ २५ ॥ तत्रैवंसतिसंसारोजन्ममृत्या
दिलक्षणः ॥ सदानुपरतोनृणांधर्माधर्मनिबंधनः ॥ २६ ॥ पुण्यपुंजोदयात्कश्चित्तितीर्षुर्दुस्तरंतमः ॥ विवेकादियुतोभूत्वाश्रेयोऽभिमुखमा
श्रितः ॥ २७ ॥ दुस्त्यजःशोकमोहादिसंसारोऽयमनर्थकः ॥ केनोपायेनहीयेततापत्रितयसंकुलः ॥ २८ ॥ कथंबद्धोऽस्म्यहंकेनसंसारेविनि
पातितः ॥ केनोपायेनमुक्तःस्यामितिमोक्षोन्मुखंनरम् ॥ २९ ॥ विबोधयिष्यराहेदंगीताशास्त्रंहरिर्विभुः ॥ सर्वलोकहितार्थायनिमित्तीकृत्यपां
डवम् ॥ ३० ॥ तमर्थंभगवान्व्यासःसर्वज्ञःसप्तभिःशतैः ॥ श्लोकानांभगवद्गीताभिधैर्वेदार्थगोचरैः ॥ ३१ ॥ निबबंधस्वयंसाक्षाद्गोविंदमुखनिः
सृतैः ॥ प्रसंगार्थंस्वयंकांश्चिच्छ्लोकान्व्यरचयन्मुनिः ॥ ३२ ॥ गीताख्यंतदिदंशास्त्रंकैवल्यैकप्रयोजनम् ॥ सर्ववेदार्थसारांशसंग्रहात्मकमुत्तमम्
॥ ३३ ॥ तत्त्वंश्रीव[illegible]रेवाख्यंब्रह्मास्यविषयःपरः ॥ विशिष्टफलसंबंधाभिधेयान्वितमद्भुतम् ॥ ३४ ॥ दुर्ज्ञेयार्थमिदंशास्त्रंव्याख्यातंभगवत्पदैः॥
पदशोयस्यविज्ञानात्स[illegible]तद्धिर्महात्मनाम् ॥ ३५ ॥ तन्मतंसम्यगालोच्यतथातदनुयायिनाम् ॥ भृशमुत्सहतेचेतोव्याख्यातुंतन्ममाधुना ॥
॥ ३६ ॥ गद्यैरेवपुराचार्यैर्व्याख्यातंगूढभावतः ॥ स्पष्टपद्यैरहंकुर्वेतद्व्याख्यानंयथामति ॥ ३७ ॥ समस्तंकुमतंयद्यत्कल्पितंमूढबुद्धिभिः ॥
श्रुतिस्मृतिनयैस्तत्तन्निरस्तंभगवत्पदैः ॥ ३८ ॥ तन्निरासायमेनास्तिप्रवृत्तिरधुनाकिल ॥ भाष्यकारीयसारांशंसमादायैवकेवलम् ॥ ३९ ॥

ग्रंथस्यार्जवभावेनव्याख्यानार्थमहंयते ॥ स्वबुद्धिशुद्धयेकृष्णपादप्रेमैकयंत्रितः ॥ ४० ॥ एतद्भावप्रकाशाख्यंव्याख्यानंसुगमंपरम् ॥ मुमुक्षू
णामुपादेयंस्वयमेवभविष्यति ॥ ४१ ॥ तत्रवेदांतसिद्धांताखंडवाक्यार्थउत्तमः ॥ गीताशास्त्रेविनिर्णीतोव्याख्येयःक्रमशःपरः ॥ ४२ ॥ कां
डत्रयात्मकंगीताशास्त्रंभागवतंमतम् ॥ तत्राद्यकांडेहरिणात्वंपदार्थस्यशोधनम् ॥ ४३ ॥ महामोहसमुच्छेदसिद्धयेकृतमादरात् ॥ तत्रापिप्रथमे
ऽध्यायेशोकमोहादिकारणम् ॥ ४४ ॥ ममाहमित्यविद्याख्यंमिथ्याज्ञानंनचेतरत् ॥ वैराग्याद्यर्थसंसिद्धयैमुनिर्व्यासोजगाविति ॥ ४५ ॥ तदु
च्छेदायभगवान्द्वितीयेस्वात्मबोधनम् ॥ कृत्वातत्रैवजीवानांमोहाधिक्यंविचार्यच ॥ ४६ ॥ स्वधर्मंबोधयामासनिष्कामंकामनिंदया ॥ ई
श्वराराधनंधर्ममुपदिश्यातिसाम्यतः ॥ ४७ ॥ तत्फलंमनसःशुद्धिस्तथारागादिमार्जनम् ॥ ततोज्ञानसमुत्पत्तिस्तयास्थैर्यंनिजात्मनि ॥ ४८ ॥
द्विप्रकारमिमंधर्मंनिःश्रेयसप्रयोजनम् ॥ पुरस्कृत्यप्रवृत्तंतद्गीताशास्त्रमशेषतः ॥ ४९ ॥ उपोद्घाततयाप्रोक्तःशास्त्रार्थःप्रथमेखलु ॥ द्वितीयेसू
त्रितःसम्यक्तथैवात्रनिदर्श्यते ॥ ५० ॥ निष्कामकर्मनिष्ठादौसत्वशुद्धिस्ततःपरम् ॥ ततश्चकर्मसन्यासोवैराग्यादिपुरःसरः ॥ ५१ ॥ ततोवे
दांतवाक्यानांविचारसहितापरा ॥ भगवद्भक्तिनिष्ठास्यात्पुरुषार्थैकजन्मभूः ॥ ५२ ॥ ततस्तत्त्वैक्यविज्ञाननिष्ठातस्याःपरंफलम् ॥ अविद्या
दिनिवृत्त्यास्याज्जीवन्मुक्तिर्निरंकुशा ॥ ५३ ॥ प्रारब्धभोगपर्यंतासमताद्यैरलंकृता ॥ तदंतेस्याद्विदेहाख्यामुक्तिर्वाचामगोचरा ॥ ५४ ॥
जीवन्मुक्तिदशायांचपुरुषार्थावलंबनात् ॥ परवैराग्यप्राप्तिःस्याद्वैतृष्ण्याख्यपराभिधा ॥ ५५ ॥ दैवीसंपदुपादेयावैराग्याद्युपकारिणी ॥ आसु
रीसंपदाहेयासर्वश्रेयोविरोधिनी ॥ ५६ ॥ कारणंसात्विकीश्रद्धाप्रधानंदैवसंपदः ॥ राजसीतामसीश्रद्धाहेयासुर्याश्चकारणम् ॥ ५७ ॥ हेयादे
यविभागेनशास्त्रार्थस्याखिलस्यच ॥ सूत्ररूपेद्वितीयेहिसमाप्तिःसमुदाहृता ॥ ५८ ॥ निदर्श्यतेतदेवात्रसुखबोधायसन्नृणाम् ॥ योगस्थःकुरुक
र्माणीत्यादिनातत्रसूत्रिता ॥ ५९ ॥ निष्कामकर्मनिष्ठायासत्वशुद्धयेककारणम् ॥ सासामान्येनरूपेणतृतीयेसंप्रपंचिता ॥ ६० ॥ पुनर्विशे
षरूपेणचतुर्थेसंप्रपंचिता ॥ ततोविशुद्धसत्वस्यवैराग्यादिपुरःसरा ॥ ६१ ॥ विहायकामान्यःसर्वान्नित्यादीयाचसूत्रिता ॥ कर्मसंन्यासनिष्ठा

धर्मानोयथाभवेत् ॥ संप्रदायमुखेनैवतथाकार्यंमयाधुना ॥ १७ ॥ इतिसंचिंत्यगोविंदोनिमित्तीकृत्यचार्जुनम् ॥ संग्रामेऽवसरंलब्ध्वाद्विविधं
धर्ममीश्वरः ॥ १८ ॥ तस्मादुपादिदेशेदंचउत्तमायाधिकारिणे ॥ धर्मोऽनुष्ठीयमानश्चगृहीतःसन्गुणाधिकैः ॥ १९ ॥ स्वयमेवहिकालेनप्रच
यंप्रगमिष्यति ॥ इत्यतोऽर्जुनमुद्दिश्यधर्मसंप्रोक्तवान्हरिः ॥ २० ॥ जंतूनांशोकमोहौद्वौसंसारानर्थकारणम् ॥ ताभ्यामनर्थहेतुभ्यामर्जुनः
पांडुनंदनः ॥ २१ ॥ अभिभूतविवेकःसन्क्षत्रधर्मरणेस्वतः ॥ प्रवृत्तोऽपततोधर्म्याद्युद्धादुपरारामह ॥ २२ ॥ परधर्मंतथाभिक्षाजीवनादि
कमाकुलः ॥ कर्तुंप्रववृतेमोहान्निषिद्धःक्षत्रियस्ययः ॥ २३ ॥ तथाचसर्वजंतूनांशोकाद्याविष्टचेतसाम् ॥ स्वधर्मत्यागोनिंद्यस्यसेवाचस्या
त्स्वभावतः ॥ २४ ॥ स्वधर्मेऽपिप्रवृत्तानांप्रवृत्तिर्मूढचेतसाम् ॥ फलाभिसंधिपूर्वैवसाहंकाराचजायते ॥ २५ ॥ तत्रैवंसतिसंसारोजन्ममृत्या
दिलक्षणः ॥ सदानुपरतोनृणांधर्माधर्मनिबंधनः ॥ २६ ॥ पुण्यपुंजोदयात्कश्चित्तितीर्षुर्दुस्तरंतमः ॥ विवेकादियुतोभूत्वाश्रेयोऽभिमुखमा
श्रितः ॥ २७ ॥ दुस्त्यजःशोकमोहादिसंसारोऽयमनर्थकः ॥ केनोपायेनहीयेततापत्रितयसंकुलः ॥ २८ ॥ कथंबद्धोऽस्म्यहंकेनसंसारेविनि
पातितः ॥ केनोपायेनमुक्तःस्यामितिमोक्षोन्मुखंनरम् ॥ २९ ॥ विबोधयिष्यराहेदंगीताशास्त्रंहरिर्विभुः ॥ सर्वलोकहितार्थायनिमित्तीकृत्यपां
डवम् ॥ ३० ॥ तमर्थंभगवान्व्यासःसर्वज्ञःसप्तभिःशतैः ॥ श्लोकानांभगवद्गीताभिधैर्वेदार्थगोचरैः ॥ ३१ ॥ निबबंधस्वयंसाक्षाद्गोविंदमुखनिः
सृतैः ॥ प्रसंगार्थंस्वयंकांश्चिच्छ्लोकान्व्यरचयन्मुनिः ॥ ३२ ॥ गीताख्यंतदिदंशास्त्रंकैवल्यैकप्रयोजनम् ॥ सर्ववेदार्थसारांशसंग्रहात्मकमुत्तमम्
॥ ३३ ॥ तत्त्वंश्रीवासुदेवाख्यंब्रह्मास्यविषयःपरः ॥ विशिष्टफलसंबंधाभिधेयान्वितमद्भुतम् ॥ ३४ ॥ दुर्ज्ञेयार्थमिदंशास्त्रंव्याख्यातंभगवत्पदैः॥
पदशोयस्यविज्ञानात्सर्वसिद्धिर्महात्मनाम् ॥ ३५ ॥ तन्मतंसम्यगालोच्यतथातदनुयायिनाम् ॥ भृशमुत्सहतेचेतोव्याख्यातुंतन्ममाधुना ॥
॥ ३६ ॥ गद्यैरेवपुराचार्यैर्व्याख्यातंगूढभावतः ॥ स्पष्टपद्यैरहंकुर्वेतद्व्याख्यानंयथामति ॥ ३७ ॥ समस्तंकुमतंयद्यत्कल्पितंमूढबुद्धिभिः ॥
श्रुतिस्मृतिनयैस्तत्तन्निरस्तंभगवत्पदैः ॥ ३८ ॥ तन्निरासायमेनास्तिप्रवृत्तिरधुनाकिल ॥ भाष्यकारीयसारांशंसमादायैवकेवलम् ॥ ३९ ॥

ग्रंथस्यार्जवभावेनव्याख्यानार्थमहंयते ॥ स्वबुद्धिशुद्धयेकृष्णपादप्रेमैकर्यंत्रितः ॥ ४० ॥ एतद्भावप्रकाशाख्यंव्याख्यानंसुगमंपरम् ॥ मुमुक्षू
णामुपादेयंस्वयमेवभविष्यति ॥ ४१ ॥ तत्रवेदांतसिद्धांताखंडवाक्यार्थउत्तमः ॥ गीताशास्त्रेविनिर्णीतोव्याख्येयःक्रमशःपरः ॥ ४२ ॥ कां
डत्रयात्मकंगीताशास्त्रंभागवतंमतम् ॥ तत्राद्यकांडेहरिणात्वंपदार्थस्यशोधनम् ॥ ४३ ॥ महामोहसमुच्छेदसिद्धयेकृतमादरात् ॥ तत्रापिप्रथमे
ऽध्यायेशोकमोहादिकारणम् ॥ ४४ ॥ ममाहमित्यविद्याख्यंमिथ्याज्ञानंनचेतरत् ॥ वैराग्याद्यर्थसंसिद्धयैमुनिर्व्यासोजगाविति ॥ ४५ ॥ तदु
च्छेदायभगवान्द्वितीयेस्वात्मबोधनम् ॥ कृत्वातत्रैवजीवानांमोहाधिक्यंविचार्यच ॥ ४६ ॥ स्वधर्मंबोधयामासनिष्कामंकामनिंदया ॥ ई
श्वराराधनंधर्ममुपदिश्यातिसाम्यतः ॥ ४७ ॥ तत्फलंमनसःशुद्धिस्तथारागादिमार्जनम् ॥ ततोज्ञानसमुत्पत्तिस्तयास्थैर्यंनिजात्मनि ॥ ४८ ॥
द्विप्रकारमिमंधर्मंनिःश्रेयसप्रयोजनम् ॥ पुरस्कृत्यप्रवृत्तंतद्गीताशास्त्रमशेषतः ॥ ४९ ॥ उपोद्घाततयाप्रोक्तःशास्त्रार्थःप्रथमेखलु ॥ द्वितीयेसू
त्रितःसम्यक्तथैवात्रनिदर्श्यते ॥ ५० ॥ निष्कामकर्मनिष्ठादौसत्वशुद्धिस्ततःपरम् ॥ ततश्चकर्मसन्यासोवैराग्यादिपुरःसरः ॥ ५१ ॥ ततोवे
दांतवाक्यानांविचारसंहितापरा ॥ भगवद्भक्तिनिष्ठास्यात्पुरुषार्थैकजन्मभूः ॥ ५२ ॥ ततस्तत्त्वैक्यविज्ञाननिष्ठातस्याःपरंफलम् ॥ अविद्या
दिनिवृत्त्यास्याज्जीवन्मुक्तिर्निरंकुशा ॥ ५३ ॥ प्रारब्धभोगपर्यंतासमताद्यैरलंकृता ॥ तदंतेस्याद्विदेहाख्यामुक्तिर्वाचामगोचरा ॥ ५४ ॥
जीवन्मुक्तिदशायांचपुरुषार्थावलंबनात् ॥ परवैराग्यप्राप्तिःस्याद्वैतृष्ण्यास्यपराभिधा ॥ ५५ ॥ दैवीसंपदुपादेयावैराग्याद्युपकारिणी ॥ आसु
रीसंपदाहेयासर्वश्रेयोविरोधिनी ॥ ५६ ॥ कारणंसात्विकीश्रद्धाप्रधानंदैवसंपदः ॥ राजसीतामसीश्रद्धाहेयासुर्याश्चकारणम् ॥ ५७ ॥ हेयादे
यविभागेनशास्त्रार्थस्याखिलस्यच ॥ सूत्ररूपेद्वितीयेहिसमाप्तिःसमुदाहृता ॥ ५८ ॥ निदर्श्यतेतदेवात्रसुखबोधायसन्नृणाम् ॥ योगस्थःकुरुक
र्माणीत्यादिनातत्रसूत्रिता ॥ ५९ ॥ निष्कामकर्मनिष्ठायासत्वशुद्धयेककारणम् ॥ सासामान्येनरूपेणतृतीयेसंप्रपंचिता ॥ ६० ॥ पुनर्विशे
षरूपेणचतुर्थेसंप्रपंचिता ॥ ततोविशुद्धसत्वस्यवैराग्यादिपुरःसरा ॥ ६१ ॥ विहायकामान्यःसर्वान्नित्यादीयाचसूत्रिता ॥ कर्मसंन्यासनिष्ठा

साषष्ठेप्रोक्ताचपंचमे ॥ ६२ ॥ संक्षेपात्पंचमेप्रोक्ताषष्ठेविस्तरशःपुनः ॥ एतावताभगवतात्वंपदार्थोनिरूपितः ॥ ६३ ॥ यज्ज्ञानात्तत्पदार्थेऽस्य
भक्तिरुत्पद्यतेपरा ॥ ततोवेदांतवाक्यानांविचारेणयुतापुरा ॥ ६४ ॥ सूत्रितायुक्तआसीतमत्परश्रेतियारतिः ॥ भगवद्भक्तिनिष्ठासानेक
धाप्रतिपादिता ॥ ६५ ॥ मध्यमाध्यायषट्केनपुरुषार्थैकजन्मभूः ॥ तावतातत्पदार्थोऽपिध्येयोज्ञेयोऽर्च्यआदरात् ॥ ६६ ॥ मुमुक्षोरुपकारा
यहरिणासन्निरूपितः ॥ अवांतरफलंतद्वत्संगतिश्चाप्यवांतरा ॥ ६७ ॥ आदरात्तत्रतत्रैवप्रत्यध्यायंप्रवक्ष्यते ॥ ततस्तत्त्वंपदार्थैक्यरूपाविद्या
विरोधिनी ॥ ६८ ॥ वेदाविनाशिनंनित्यमित्यादौसूत्रिताचया ॥ अद्वैततत्त्वविज्ञाननिष्ठासाऽसौत्रयोदशे ॥ ६९ ॥ क्षेत्रक्षेत्रज्ञयोःसम्यग्वि
वेकेनप्रपंचिता ॥ फलंचज्ञाननिष्ठायाःसूत्रिताहरिणापरा ॥ ७० ॥ निस्त्रैगुण्योभवेत्यादौनिवृत्तिस्त्रिगुणस्यया ॥ सावैचतुर्दशेऽध्यायेजीवन्मु
क्तिरितीरिता ॥ ७१ ॥ गुणातीतस्यचिन्हानांकथनेनप्रपंचिता ॥ परवैराग्यनिष्ठायाजीवन्मुक्तेरलंकृतिः ॥ ७२ ॥ तदागंतासिनिर्वेदमित्या
दौसूत्रिताचसा ॥ संसारवृक्षविध्वंसद्वारापंचदशेस्मृता ॥ ७३ ॥ दुःखेष्वनुद्विग्नमनाइत्यादौसूत्रिताचया ॥ दैवीसंपदुपादेयास्थितधीलक्षणे
नहि ॥ ७४ ॥ वशीकाराभिधेयस्यवैराग्यस्योपकारिणी ॥ यामिमांपुष्पितांवाचमित्यादौसूत्रिताचया ॥ ७५ ॥ आसुरीसंपदाहेयावैरा
ग्यादिविरोधिनी ॥ एतेउभेभगवताषोडशेसंप्रपंचिते ॥ ७६ ॥ कारणंसात्विकीश्रद्धाप्रधानंदैवसंपदः ॥ निर्द्वंद्वोनित्यसत्वस्थइत्यादौसूत्रिता
परा ॥ ७७ ॥ तद्विरोधिनिरासेनप्रोक्तासप्तदशेचसा ॥ सफलाज्ञाननिष्ठैवंपंचकेनप्रपंचिता ॥ ७८ ॥ अष्टादशेनपूर्वोक्तसर्वस्याप्युपसंहृतिः ॥
इत्थंसमस्तगीताख्यशास्त्रस्येहार्थसंगतिः ॥ ७९ ॥ द्वितीयेसूत्रितासर्वशास्त्रेऽस्मिन्संप्रपंचिता ॥ अशोच्यानन्वशोचस्त्वमित्यारभ्योपदेशनम् ॥
॥ ८० ॥ शोकमोहापनुत्त्यर्थंकृतंभगवतास्फुटम् ॥ सर्वसाधारणोविष्णोरुपदेशोमहानयम् ॥ ८१ ॥ संवादःकृष्णयोर्ब्रह्मविद्यास्तुत्यर्थमुच्यते ॥
वैदेहयाज्ञवल्क्यादिसंवादोऽस्तियथाश्रुतौ ॥ ८२ ॥ शोकोपलक्षितोबंधस्तन्निवृत्तिकरीत्वियम् ॥ ब्रह्मविद्यापुराजिष्णोःप्राप्तामुक्तस्तयेतिसः ॥
॥ ८३ ॥ महाप्रयोजनाविद्येत्येवंसंस्तूयतेततः ॥ अर्जुनस्योपदेशेनाधिकारीदर्शितोऽत्रच ॥ ८४ ॥ उपोद्घाततयातस्यधृतराष्ट्रनृपस्यच ॥

ॐ श्रीगणेशायनमः॥ ॐ नमः सच्चिदानंदाय॥ ॐनमः सरस्वत्यै॥ ॐनमःशिवायसपरिवाराय॥ ॐनमोब्रह्मणे ॐनमोब्रह्मादिभ्योब्रह्मविद्यासंप्रदायकर्तृभ्योनमोवंशर्षिभ्योनमोगुरुभ्यआचार्येभ्यः॥ ॥ ॐसत्यंज्ञानंविशुद्धंपरमसुखवपुर्नित्यमुक्तस्वभावंस्वाध्यस्ताज्ञानशक्तिंप्रविशतिकलयाब्रह्मयद्वेदवेद्यम् ॥ अंतर्यामीतिगीतंशतपथवचनैस्तन्महोऽनंतमीड्यंश्रीमत्कृष्णाभिधानंनिखिलभयहरंसंश्रयेऽहंहृदिस्थम् ॥ १ ॥ कृष्णाकृष्टासभायांसपदिकुरुपतेर्यैशरण्यंश्रितासीन्मुक्ताद्दुःखाद्गजेंद्रोजलचरविवशोयंस्मरन्पाशमुक्तः ॥ कारागारेनिरुद्धाःशरणमुपगतायंनृपामुक्तबंधाआसंस्तंश्रीमुकुंदंसततमहमजंनौमिमुक्तेर्निधानम् ॥ २ ॥ अद्वैतबोधाब्जसहस्ररश्मिः शांतेर्लतायाःकिलकल्पवृक्षः ॥ संसारसंतापविनाशचंद्रःकृष्णःसदाल्हादकरोममास्तु॥ ३ ॥ नत्वाश्रीभाष्यकारंश्रुतिकमलरवितन्मतेसंप्रविष्टान्ब्रह्माद्वैतात्मनिष्ठान्सकलशुभगुणान्श्रीगुरूंश्चप्रणम्य ॥ व्यासंकृष्णावतारंविमलगुणयुतंभूरिभावेननत्वागीताभावप्रकाशंस्फुटविमलपदंकृष्णमाराध्यकुर्वे ॥ ४ ॥ सृष्टेःपूर्वंपरंब्रह्मनारायणपदाभिधम् ॥ आसीत्तदीक्षणाज्जातंजगत्सर्वंचराचरम् ॥ ५ ॥ अपएवससर्जादौतास्ववात्सीद्यतःस्वयम् ॥ तेननारायणःप्रोक्तःपरब्रह्माख्यईश्वरः ॥ ६ ॥ ससृष्ट्वेदंजगत्सर्वंचिकीर्षुस्तस्यचस्थितिम्॥ ससर्जब्रह्मरूपेणमरीच्यादिप्रजापतीन् ॥ ७ ॥ प्रवृत्तिलक्षणंधर्मंग्राहयामासतान्मुनीन् ॥ ससंसारस्थितेर्हेतुर्धर्मःस्वर्गादिसाधनम् ॥ ८ ॥ निवृत्तिलक्षणंधर्मंसनकादीनकल्मषान् ॥ सृष्ट्वातान्ग्राहयामासमोक्षहेतुंसवैदिकम् ॥ ९ ॥ गृहीतोद्विविधोधर्मोमुनिभिस्तत्त्वदर्शिभिः ॥ प्रवर्तितोयथाशास्त्रंलोकेऽस्मिन्नधिकारिषु ॥ १० ॥ कृतादिषुयुगेष्वेषधर्मःसद्भिःप्रवर्तितः ॥ क्षीणप्रायोऽभवल्लोकेकालेनार्चित्यवर्त्मना ॥ ११ ॥ कामादीनांचबाहुल्याद्वैचित्र्यात्कर्मणांतथा ॥ हीयमानेक्षितौधर्मेवर्धमानेह्यधर्मके ॥ १२ ॥ धर्मगोप्तामहाविष्णुरादिकर्तामहेश्वरः ॥ सपिपालयिषुर्धर्मंक्षितावततारह ॥ १३ ॥ स्वांमायांवैष्णवींशक्तिंवशीकृत्यगुणात्मिकाम् ॥ अजोऽव्ययोऽक्रियोनित्यःशुद्धोबुद्धःसचेश्वरः ॥ १४ ॥ अनंतकल्याणगुणोमंगलानांपरोऽवधिः॥ स्वेच्छयासंबभूवाद्योदेवक्यांवसुदेवतः ॥ १५ ॥ निहत्यासुरपक्षीयान्धर्मशत्रूननेकधा ॥ धर्मःप्रवर्तितोलोकेस्वमूर्त्याद्भुतरूपया ॥ १६ ॥ सधर्मोद्विविधोऽपीहव

शाखाशकुनिरीरितः ॥ १५ ॥ दुःशासनःपुष्पफलेमूलंस्यात्तत्पितांधदृक् ॥ आसुरीसंपदत्रासौक्रोधाद्यानिखिलेरिता ॥१६॥ इत्थंसंपद्वयंन्यस्य तयोरन्योन्यमाग्रहात् ॥ युद्धंप्रदर्शितंसम्यग्विस्तरान्मुनिनाखलु ॥ १७ ॥ प्रतिपाद्यंपरंब्रह्मभारतेवेदसंग्रहे ॥ तज्ज्ञानसाधनंधर्मः प्रतिपाद्योमुनेर्मतः ॥ १८ ॥ दैवीसंपदुपादेयापांडवानांजयाज्जनैः ॥ आसुरीसंपदाहेयाधार्तराष्ट्रपराजयात् ॥ १९ ॥ यतोधर्मस्ततःकृष्णोयतःकृष्णस्ततोजयः ॥ इत्येवंरूपकेणार्थोभारतेमुनिनेरितः ॥ २० ॥ अत्रापिप्रथमेश्लोकेतद्रूपकप्रदर्शनम् ॥ गीताशास्त्रसमारंभेकृतंव्यासेनवेधसा ॥ ॥ २१ ॥ कुरूणांकरणानांयत्क्षेत्रंदेहोऽधिकारिणः ॥ अनुग्राहकभावेनक्षेत्रवत्क्षेत्रमुच्यते ॥ २२ ॥ सर्वेषांचैवधर्माणामुत्पादकतयातथा ॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनम् ॥ २३ ॥ आत्मज्ञानमयोधर्मःसाध्यतेऽत्रमुमुक्षुभिः ॥ क्षयात्समस्तधर्माणामपवर्गैकलाभतः ॥ २४ ॥ त्राणभूतंमुमुक्षोस्तद्धर्मक्षेत्रंशरीरकम् ॥ क्षेत्राणांपरमंक्षेत्रंशरीरंक्षेत्रमुच्यते ॥ २५ ॥ वध्यघातकभावेनतस्मिन्क्षेत्रेपरस्परम् ॥ रागवैराग्यसंतोषतृष्णादीनांसमागमः ॥ २६ ॥ येस्थितामामकास्तत्रह्यविद्यापुरुषोचिताः ॥ अविद्यामयसंकल्पाआसुराःश्रुतिबोधिताः ॥ २७ ॥ ममेतिकार्यमित्युक्तामामकाभ्रांतिशालिनः ॥ कामक्रोधादयःसर्वेमहामोहात्मजाःशठाः ॥ २८ ॥ शुद्धिःपांडुरितिप्रोक्तातत्पुत्राःपांडवाःस्मृताः ॥ क्षमावैराग्यसंतोषमुखाविद्यामयाःशुभाः ॥ २९ ॥ केकैर्जिताइतिप्रोक्तंकिमकुर्वतशब्दतः ॥ मुमुक्षोरेषप्रश्नोऽस्तिसंजयंज्ञानिनंप्रति ॥ ३० ॥ यद्वामोहस्यप्रश्नोऽयंस्वयंत्रात्ममनःप्रति ॥ इतिरूपकमादायबोधितामुनिनाजनाः ॥ ३१ ॥ अतएवोपसंहारेसंजयोक्तिर्नृपंप्रति ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः ॥ ३२ ॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥ तथाछांदोग्यवेदांतगिरामप्यत्रसंमतिः ॥ ३३ ॥ इंद्रियवृत्तयोदेवाअसुराश्चश्रुतौश्रुताः ॥ शास्त्रानुगाःसुराःप्रोक्ताःस्वाभाविक्यस्तथासुराः ॥ ३४ ॥ स्वाभाविक्यस्तमोरूपाइंद्रियाणांप्रवृत्तयः ॥ प्रवृत्ताःशास्त्रसिद्धार्थप्रकाशाभिभवायताः ॥ ३५ ॥ शास्त्रानुगाःसुरास्तत्रशांतिदांतिपुरःसराः ॥ भ्रांतिसिद्धप्रवृत्तीनामासुरीणांक्षयावहाः ॥३६॥ अनादिकालमारभ्यदेवासुरसमागमः ॥ प्रतिदेहंप्रवृत्तोऽसौसर्वप्राणिषुसंगरः ॥ ३७ ॥ एवमेवमुनेर्भावोदर्शितोऽयमथाधुना ॥ आर्जवेनप्रसंगं

प्रश्नोव्यासप्रसादाप्तविज्ञानंसंजयंप्रति ॥ ८५ ॥ धृतराष्ट्रउवाचेतिवैशंपायनगीरियम् ॥ युद्धवृत्तांतबोधार्थंनृपंजन्मेजयंप्रति ॥ ८६ ॥ श्रुत्वा बहुविधंपूर्वंपांडवानांजयंनृपः ॥ स्वपुत्रराज्यविभ्रंशाद्भीतःपप्रच्छसंजयम् ॥ ८७ ॥ ॥ धर्मस्योत्पादकेक्षेत्रेधर्मवृद्धयैककारणे ॥ श्रुतिस्मृतिप्रसिद्धेऽस्मिन्कुरुक्षेत्रेरणेप्सवः ॥१॥ दुर्योधनादयोंऽधस्यममपुत्रास्तथापरे ॥ युधिष्ठिरादयःपांडोः पुत्राराज्यफलेप्सवः ॥२॥ कृतवंतःकिमिखेतेसंघीभूताहिसंजय ॥ धर्मक्षेत्रपदेनोक्तंपांडवाधार्मिकाः स्वतः ॥ ३ ॥ हिंसाभियानिवर्तेरन्यदिबंधुपरिक्षयात् ॥ प्राप्तराज्यास्ततःपुत्रामदीया इतिभूभुजा ॥ ४ ॥ यद्वावेदेकुरुक्षेत्रंकर्मकांडेप्रसिद्धिमत् ॥ अन्यद्देवयजनाख्यंधर्मक्षेत्रमुदाहृतम् ॥ ५ ॥ अविमुक्तंकुरुक्षेत्रंदेवानामितिवाक्यतः ॥ अन्यद्ब्रह्मसदनाख्यंमुक्तिक्षेत्रमुदाहृतम् ॥ ६ ॥ यत्रप्राणपरित्यागाज्जंतुमात्रस्यमोक्षणम् ॥ संसारबंधतःप्रोक्तंश्रुतौतत्काशिकाभिधम्

धृतराष्ट्रउवाच ॥ धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः ॥
मामकाःपांडवाश्चैवकिमकुर्वतसंजय ॥ १ ॥

॥ ७ ॥ प्राणप्रयाणसमयेश्रीरुद्रस्तारकंपदम् ॥ व्याचष्टेब्रह्मतेनासौमोक्षंप्राप्नोतिबोधतः ॥ ८ ॥ इत्येवंवाक्यशेषेणकुरुक्षेत्रंविलक्षणम् ॥ अविमुक्तंयतःप्रोक्तमेतद्व्यावृत्तिसिद्धये ॥ ९ ॥ धर्मक्षेत्रइतिप्रोक्तंकुरुक्षेत्रंप्रसिद्धिमत् ॥ भारतेसर्ववेदार्थोभारतार्थश्चकृत्स्नशः ॥ १० ॥ गीतायामस्तितेनेयंसर्वशास्त्रमयीमता ॥ अतोव्याख्यापराप्यत्रभातिसाहिनिदर्श्यते ॥ ११ ॥ आरंभेभारतस्यापिरूपकद्वयमीरितम् ॥ छांदोग्यश्रुतिसंसिद्धमथाध्यात्ममितिस्थले ॥ १२ ॥ युधिष्ठिरोधर्ममयोवृक्षस्तस्यप्रकल्पितः ॥ अर्जुनःस्कंधरूपेणशाखात्वेनवृकोदरः ॥ १३ ॥ माद्रीसुतौ पुष्पफलेमूलंकृष्णोद्विजाःश्रुतिः ॥ दैवीसंपत्समग्रात्रधर्माद्यामुनिनेरिता ॥ १४ ॥ दुर्योधनोमन्युमयोवृक्षस्तत्रप्रकल्पितः ॥ कर्णश्चस्कंधरूपेण

विक्रांतोऽस्तियुधामन्युरुत्तमौजाश्चवीर्यवान् ॥ अभिमन्युस्तथापंचप्रतिविंध्यादयस्तथा ॥ १ ॥ एतेसप्तदशप्रोक्ताघटोत्कचमुखास्तथा ॥ सर्वे महारथाएवनैकोऽप्यर्धरथोरथः ॥ २ ॥ अत्यंतसुप्रसिद्धायेपांडवास्तेमहारथाः ॥ एकोदशसहस्राणियोधयेद्यस्तुधन्विनाम् ॥ ३ ॥ अस्त्रशस्त्रप्र वीणश्चमहारथइतिस्मृतः ॥ अमितान्योधयेद्यस्तुसंप्रोक्तोऽतिरथस्तुसः ॥ ४ ॥ रथस्त्वेकेनयोयोद्धातन्यूनोऽर्धरथःस्मृतः ॥ ५ ॥ ६ ॥ दृष्ट्वारिसे नांभीतश्चेत्तर्हिसंधिर्विधीयताम् ॥ इत्याशंकांसआलक्ष्ययुरोराहवचोनृपः ॥ १ ॥ तुशब्देनांतरुत्पन्नांभीतिमाच्छादयन्नृपः ॥ द्योतयत्यात्मनो धाष्टर्यंयुरोरग्रेमहत्तरम् ॥ २ ॥ मध्येऽस्माकंसमस्तानांयेविशिष्टगुणान्विताः ॥ तान्मयाप्रोच्यमानांस्त्वंमद्वाक्यादवधारय ॥ ३ ॥ ममसैन्यस्य

युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान् ॥ सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः ॥ ६ ॥
अस्माकंतुविशिष्टायेतान्निबोधद्विजोत्तम॥ नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते॥७॥
भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः ॥ अश्वत्थामाविकर्णश्चसौमदत्तिस्तथैवच॥८॥
अन्येचबहवःशूरामदर्थेत्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ॥ ९ ॥

नेतारोयेचतांस्तेब्रवीम्यहम् ॥ गृहीत्वानामभिःकांश्चिच्छिष्टाञ्ज्ञापयितुंस्फुटम् ॥ ४ ॥ द्विजोत्तमेतिशब्देनब्राह्मणानामदक्षताम् ॥ संग्रामेसञ्च चयत्येषदुष्टभावेनभूपतिः ॥ ५ ॥ संज्ञार्थमितिशब्देनप्रियशिष्यचमूंतव ॥ दृष्ट्वाहर्षवशान्मास्तुस्वीयवीरप्रविस्मृतिः ॥ ६ ॥ ७ ॥ केतेस्युरित्यपे क्षायांप्राहचत्वारआदरात् ॥ भवत्प्रभृतयःशूराःसर्वेसंग्रामकोविदाः ॥ १ ॥ अश्वत्थामादयोयेचतेऽपिशूरामहत्तमाः ॥ २ ॥ ८ ॥ अन्येशल्या दयोऽनेकेशूरामत्प्रीतिसाधकाः ॥ मत्प्रयोजनसिद्ध्यर्थंजीवितंत्यक्तुमुद्यताः ॥ १ ॥ एवंस्वसैन्यबाहुल्यंस्वस्मिंस्तस्यरतिःपरा ॥ युद्धोद्योगोरणे दाक्ष्यंचतुर्भिर्दर्शितंपदैः ॥ २ ॥ ९ ॥

स्वसन्याधिक्यमेवाहराजादुर्योधनोऽधुना ॥ अनंतंसैन्यमस्माकंसंख्ययाशूरवत्तया ॥ १ ॥ सर्वतोरक्षितंयस्माद्भीष्मेणोदारबुद्धिना ॥ पांडवानां
बलंस्वल्पंयत्सप्ताक्षौहिणीयुतम् ॥ २ ॥ रक्षितंसर्वतोयस्माद्भीमेनात्यल्पबुद्धिना ॥ यद्वापांडवसैन्यंतन्निवर्त्यंसूक्ष्मबुद्धिना ॥ ३ ॥ अस्मदीयंतुत
त्सैन्यंनिवर्त्यंचलबुद्धिना ॥ असमर्थमिदंतेषांबलमस्मत्पराभवे ॥ ४ ॥ समर्थंतुतदस्माकंबलमेतत्पराभवे ॥ इतिवान्यत्समानंतत्सर्वमत्रापियोज्य
ताम् ॥ ५ ॥ निश्चयेनततोऽस्माकंजयएवभविष्यति ॥ ६ ॥ १० ॥ एवंचेन्निर्भयोऽसित्वंकिंवृथाबहुजल्पसि ॥ इत्यत्राहतुशब्देनकर्तव्यंद्यो
तयन्नृपः ॥ १ ॥ संग्रामारंभसमयेयुद्धभूमौयथायथम् ॥ पूर्वादिदिग्विभागेनवीराणांस्थितिभूमयः ॥ २ ॥ नियम्यंतेहिताःप्रोक्ताअयनानीति

अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितम् ॥पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितम्॥१०॥
अयनेषुतुसर्वेषुयथाभागमवस्थिताः ॥ भीष्ममेवाभिरक्षंतुभवंतःसर्वएवहि ॥ ११ ॥
तस्यसंजनयन्हर्षंकुरुवृद्धःपितामहः ॥ सिंहनादंविनद्योच्चैःशंखंदध्मौप्रतापवान् ॥ १२ ॥

तत्रच ॥ सर्वसैन्यमधिष्ठायमध्येतिष्ठतिसैन्यपः ॥ ३ ॥ यथाभागंविभक्तांस्वांस्वामत्यक्त्वारणक्षितिम् ॥ भवंतोऽवस्थिताःसंतःपुरतःपृष्ठतोऽन्य
तः ॥ ४ ॥ निरीक्ष्यमाणंभीष्मंतेसर्वैरक्षंतुसैन्यपम् ॥ भीष्मेसेनापतौसर्वैरक्षितेस्यात्सुरक्षितम् ॥ ५ ॥ ११ ॥ एवंसंस्तुवतोभीष्मंराज्ञोविजय
सूचकम् ॥ उल्लासंजनयन्नुच्चैःसिंहनादंमहारवम् ॥ १ ॥ कृत्वाप्रतापयुक्तत्वाच्छंखंवादितवांस्ततः ॥ कुरुवृद्धतयाचार्यभूपयोराशयज्ञता ॥ २ ॥
राज्ञोऽनुपेक्षणंतस्यपितामहतयोच्यते ॥ ३ ॥ १२ ॥

ततःसेनापतेःशंखवादनानंतरक्षणे ॥ सहसाशंखभेर्याद्यावाद्यभेदाश्चवादिताः ॥ १ ॥ सशब्दोऽपिमहानासीत्क्षोभकर्तृतयाक्षितौ ॥ २ ॥ १३ ॥
ततःश्वेतैरितिश्लोकेरथस्थत्वस्यकीर्तनात् ॥ माधवार्जुनयोःप्रोक्तमजेयत्वमसह्यता ॥ १ ॥ १४ ॥ पांडवानांसहायोऽस्तिसर्वेंद्रियनियामकः ॥ रा
ज्ञोजित्वाखिलान्युद्धेधनमाहृतवान्जयः ॥ १ ॥ दिव्यप्रभावौतावुक्तौहृषीकेशधनंजयौ ॥ केशवार्जुनयोर्युद्धाभिमुख्यंवीक्ष्यहर्षतः ॥ २ ॥ स्वार
स्याद्भीमसेनोऽपियुद्धेऽतिरसिकोबली ॥ समराभिमुखोह्यासीदित्याहवचनंवरम् ॥ ३ ॥ रक्षोवधादिकंकर्मयस्यशत्रुभयावहम् ॥ वृकोदरत्वाद्वव्हन्न

ततःशंखाश्चभेर्यश्चपणवानकगोमुखाः ॥ सहसैवाभ्यहन्यंतसशब्दस्तुमुलोऽभवत्॥१३॥
ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ ॥ माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः ॥ १४ ॥
पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः ॥ पौंड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः ॥ १५ ॥
अनंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः ॥ नकुलःसहदेवश्चसुघोषमणिपुष्पकौ ॥ १६ ॥
काश्यश्चपरमेष्वासःशिखंडीचमहारथः ॥धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः॥१७॥
द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते ॥ सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथक्पृथक् ॥१८॥

पाकाद्भीमोमहाबलः ॥४॥१५॥ महतातपसाकुंत्यालब्धोधर्मात्सुतोषितात् ॥ राजाचराजसूयस्ययाजित्वेनस्वयंमहान् ॥१॥ जयभागितयायुद्धे
स्थिरश्चेतियुधिष्ठिरः ॥ पांचजन्यादिशंखास्तेप्रसिद्धाःस्वस्वनामभिः ॥ २ ॥ उक्ताःपांडवसेनायांभवत्सैन्येनकोऽपिहि ॥३॥ १६ ॥ महाधनुर्धरः
काशिराजश्चान्येमहारथाः ॥ शिखंडीधृष्टद्युम्नाद्याजयशीलश्चसात्यकिः ॥ १ ॥ दध्मुःशंखान्द्रुपदाद्याःशृणुराजन्समाहितः ॥२॥ १७ ॥ १८ ॥

तंव्याख्यास्यामोयथाक्षरम् ॥ ३८ ॥ १ ॥ ममत्वाभिनिविष्टस्यप्रश्नंश्रुत्वानृपस्यसः ॥ उवाचसंजयोवाक्यंदिव्यदृष्ट्यासमन्वितः ॥१ ॥ पाडवानां चनिर्दौष्टयंदौष्टयंदुर्योधनस्यच ॥ पांडवोत्कर्षताचैवद्योत्यतेऽत्रतुशब्दतः ॥ २ ॥ सैन्यंपांडुसुतानांतुदृष्ट्वादुर्योधनोनृपः ॥ व्यूढंचकृतविन्यास विशेषंशास्त्रदृष्टितः ॥ ३ ॥ संग्रामावसरेद्रोणमाचार्यंभीतमानसः ॥ गत्वातदंतिकेवाक्यमवदद्राजनीतिवित् ॥ ४ ॥ पांडवेषुस्वशिष्येषुप्रियेष्व त्यंतरागतः ॥ नकरिष्यतिसंग्राममितिबुद्धौनिधायच ॥ ५ ॥ २ ॥ तस्यतेषुयथावज्ञाक्रोधाधिक्यंभवेद्यथा ॥ तथोवाचसपश्येत्यारभ्यश्लो कैस्त्रिभिस्त्रिकैः ॥ १ ॥ अत्यासन्नामिमांसेनामनेकाक्षौहिणीयुताम् ॥ पश्यपांडसुतानांत्वमाचार्यपरमास्त्रवित् ॥ २ ॥ त्वद्बधार्थंप्रजातेनधृष्ट

संजयउवाच ॥ दृष्ट्वातुपांडवानीकंव्यूढंदुर्योधनस्तदा ॥ आचार्यमुपसंगम्यराजावचनमब्र वीत् ॥ २ ॥ पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूम् ॥ व्यूढांद्रुपदपुत्रेणतवशिष्येणधीम ता ॥ ३ ॥ अत्रशूरामहेष्वासाभीमार्जुनसमायुधि ॥ युयुधानोविराटश्चद्रुपदश्चमहारथः ॥४॥ धृष्टकेतुश्चेकितानःकाशिराजश्चवीर्यवान् ॥ पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः॥५॥

द्युम्नेनधीमता ॥ व्यूहनिर्माणतःसम्यक्स्थापितावैरिणातव ॥ ३ ॥ अथवापांडुपुत्राणांगुरोपश्यातिरागवान् ॥ यतस्तेषुत्वमित्येवंहार्दंदुर्योध नस्यच ॥ ४ ॥ यस्यप्राप्यकुरुक्षेत्रमाचार्यैऽपीदृशीमतिः ॥ किमुवाच्यंभवेत्तस्यदौष्टयमाहात्म्यमद्भुतम् ॥ ५ ॥ ३ ॥ एकेनधृष्टद्युम्नेनाप्रसि द्धेनाश्रितांचमूम् ॥ अस्मदीयोऽपियःकश्चिज्जेष्यतीतिनतर्क्यताम् ॥ १ ॥ यतोऽस्यांशत्रुसेनायांशूरादृढधनुर्धराः ॥ युद्धेभीमार्जुनाभ्यांयेतु ल्याःसंग्रामदुःसहाः ॥ २ ॥ सात्यक्यादित्रयोऽप्येतेभीष्मप्रोक्तामहारथाः ॥ ३ ॥ ४ ॥ वीर्यवंतस्त्रयश्चान्येधृष्टकेतुमुखानृपाः ॥ पुरुजित्प्रमु खाश्चान्येत्रयोऽपिनरपुंगवाः ॥ १ ॥ ५ ॥

मध्येकिंस्थापनस्यास्तिफलमत्राहपांडवः ॥ योद्धुकामान्नचास्माभिःसंधिकामानवस्थितान् ॥ १ ॥ भीष्मद्रोणादिकानेतान्यावद्वत्वानिरीक्षितुम् ॥ क्षमोऽहंस्यांरथंतावत्प्रदेशेस्थापयाच्युत ॥ २ ॥ योद्धात्वमसिनोयुद्धप्रेक्षकःकिंदिदृक्षया ॥ तवैषामितिशंकायामर्जुनःप्राहसद्वचः ॥ ३ ॥ अन्योन्यमेवबंधूनांयुद्धोद्योगेमयासह ॥ कैर्योद्धव्यंमयाप्यत्रयोद्धव्यंकैःसहेतिवा ॥ ४ ॥ २२ ॥ संधिंतेकारयिष्यंतिबंधवोऽन्योन्यमेवचेत् ॥ कुतोयुद्धंभवेदेवमाशंक्याहार्जुनोवचः ॥ १ ॥ यएतद्रोणभीष्माद्याधार्तराष्ट्रस्यदुर्मतेः ॥ प्रियंचिकीर्षवोयुद्धेनतुदुर्मतिनाशने ॥ २ ॥ योत्स्यमानानहंतानुपलभेनतुसंधिकान् ॥ अतःकौतुकसिद्ध्यर्थंप्रतियोग्यवलोकनम् ॥ ३ ॥ युक्तमित्याशयोभातिपार्थस्यात्रविपश्चितः

यावदेतान्निरीक्षेऽहंयोद्धुकामानवस्थितान् ॥ कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहंयएतेऽत्रसमागताः ॥ धार्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः ॥२३॥ संजयउवाच ॥ एवमुक्तोहृषीकेशोगुडाकेशेनभारत ॥ सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमम् ॥२४॥ भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षिताम् ॥ उवाचपार्थपश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥

॥ ४ ॥ २३ ॥ भगवान्प्रेरितोह्येनंयुद्धाद्व्यावर्तयिष्यति ॥ अहिंसाधर्ममाश्रित्येत्येवमाशंक्यसंजयः ॥ १ ॥ प्राहहेभारतेत्येवंस्ववंशोचितमाचर ॥ सर्वत्रसावधानेनजितनिद्रेणकेशवः ॥ २ ॥ एवमुक्तोऽप्ययंभूत्वोमांनियोजयतीतिच ॥ दोषमासज्यनाकुप्यन्नतंयुद्धान्न्यवर्तयत् ॥ ३ ॥ यथोक्तंसेनयोर्मध्येभीष्मद्रोणादिसंमुखे ॥ अग्रिदत्तंरथंदिव्यंस्वयंभगवताश्रितम् ॥ ४ ॥ स्थापयित्वासमस्तानांगूढभावज्ञईश्वरः ॥ अर्जुनस्यापिविज्ञायशोकमोहाद्युपस्थितौ ॥ ५ ॥ सोपहासमुवाचेदंस्वभक्तंप्रियमर्जुनम् ॥ पृथायाःस्त्रीस्वभावेनशोकमोहनिमग्नता ॥ ६ ॥ तवापितत्सुतत्वेनतद्वत्तास्तीतिसूचयन् ॥ युयुत्सूंस्त्वंकुरून्पश्यनिःशंकत्वेनतानिति ॥ ७ ॥ २४ ॥ २५ ॥

यःसैन्येधार्तराष्ट्राणांशंखादीनाध्वनिर्महान् ॥ पाडवानांसनैवाभूत्क्षोभकोबलिनांसताम् ॥ १ ॥ पाडवानासजातस्तुशंखघोषोमहत्तरः ॥
तवसंबंधिनांभीष्मद्रोणादीनामपिव्यथाम् ॥ २ ॥ हृदयाणामजनयद्विदारणसमांपराम् ॥ अतितीव्रोनभोभूमिंपूरयन्प्रतिशब्दतः ॥ ३ ॥
॥ १९ ॥ इत्येवंधार्तराष्ट्राणांभयप्राप्तिंप्रदर्श्यसः ॥ संजयःपांडवानांतुमहत्त्वंदर्शयत्यथ ॥ १ ॥ धार्तराष्ट्रान्रणोद्योगेदृष्ट्वावस्थितान्रिपून् ॥
प्रवर्तमानेसत्येषशस्त्रसंपातउद्यतः ॥ २ ॥ ध्वजरूपतयास्यंतवीरेणास्तिहनूमता ॥ अर्जुनोऽनुगृहीतश्चगांडीवंधनुरुत्तमम् ॥ ३ ॥ उद्यम्याहृष्ट

सघोषोधार्तराष्ट्राणांहृदयानिव्यदारयत् ॥ नभश्चपृथिवींचैवतुमुलोव्यनुनादयन् ॥१९॥
अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्वजः ॥प्रवृत्तेशस्त्रसंपातेधनुरुद्यम्यपांडवः ॥२०॥
हृषीकेशंतदावाक्यमिदमाहमहीपते ॥ सेनयोरुभयोर्मध्येरथंस्थापयमेऽच्युत ॥ २१ ॥

षीकेशंसर्वधीवृत्तिसाक्षिणम् ॥ वक्ष्यमाणमिदंवाक्यंनीतियुक्तंमहीपते ॥ ४ ॥ स्वपक्षप्रतिपक्षात्मसेनयोरुभयोरथम् ॥ मध्येसंस्थापयेत्येवं सर्वे
शोऽपिनियुज्यते ॥ ५ ॥ किमशक्यंहिभक्तानांकृष्णपादानुरागिणाम् ॥ यदीश्वरोऽपिभक्तानांनियोगमनुतिष्ठति ॥ ६ ॥ पांडवानांजयो
ऽवश्यमित्येवंतेनसूच्यते ॥ मांरथंस्थापयंतंतेच्यावयिष्यंतिशत्रवः ॥ ७ ॥ रथादित्येवमाशंक्यसंबोध्याहाच्युतेतिच ॥ देशकालाद्यनुस्यूतंक
श्च्यावयितुमर्हति ॥ ८ ॥ सर्वथानिर्विकारत्वान्ननियोगेऽपिकोपवान् ॥ ९ ॥ २० ॥ २१ ॥

वामाक्षिस्फुरणादीनिनिमित्तान्यन्यथान्यथा ॥ विपरीततयादुःखदायीन्यनुभवाम्यहम् ॥ १ ॥ अहचानात्मवित्त्वेनदुःखित्वाच्छोकहेतुकम् ॥ क्लेशंत्वनुभवामीतिसदानंदतयाभवान् ॥ २ ॥ शोकक्लेशाद्यसंसर्गीत्येवंकृष्णेतिसूचितम् ॥ मामशोकमतःकृष्णकुरुत्वमितिचाशयः ॥३॥ कोब्रह्मासृष्टिकर्तास्यादीशःसंहारकोहरः ॥ अनुकंप्यतयातौद्वौवातियातिसकेशवः ॥४॥ एवंलिंगमुखेनैवशोकंज्ञाननिरोधकम् ॥ प्रोक्त्वेदानींस्वधर्मेऽपियुद्धेऽधर्ममतिंगतः ॥५॥ प्राहपार्थोमहामोहजन्याध्यासावृतोवचः ॥ विचारेणाप्यदृष्टंवादृष्टंश्रेयःकथंचन ॥६॥ पश्चादपिनपश्यामिहत्वा स्वजनमाहवे ॥ द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ॥७॥परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः॥ इत्यत्रोक्तंहतस्यैवश्रेयोहंतुर्नकिंचन॥८॥३१॥

निमित्तानिचपश्यामिविपरीतानिकेशव ॥ नचश्रेयोऽनुपश्यामिहत्वास्वजनमाहवे ॥ ३१ ॥
नकांक्षेविजयंकृष्णनचराज्यंसुखानिच ॥ किंनोराज्येनगोविंदकिंभोगैर्जीवितेनवा ॥ ३२ ॥
येषामर्थेकांक्षितंनोराज्यंभोगाःसुखानिच ॥ तइमेऽवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच ॥३३॥
आचार्याःपितरःपुत्रास्तथैवचपितामहाः ॥मातुलाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्तथा॥३४॥

मास्त्वदृष्टफलंकिंचिद्दृष्टंत्वस्तिजयादिकम् ॥ इत्यत्राहनमेवांछाजयादौक्षुद्रगोचरे ॥ १ ॥ राज्यादिभिर्नचास्माकमीषदस्तिप्रयोजनम् ॥ त्वमिंद्रियाण्यधिष्ठानतयाप्राप्तोषिसर्वदा ॥ २ ॥ फलेरागंविरागंचजानासीत्येवसूचयन् ॥ गोविंदेत्याहराज्यादेराक्षेपेहेतुमाहच ॥ ३ ॥ एकाकिनोनराज्याद्यपेक्षितंतदपेक्षितम् ॥ येषामर्थेतएतेऽद्यप्राणाशांचधनैषणाम् ॥ ४ ॥ त्यक्त्वाचार्यादयोयुद्धेमृत्युवक्त्रेस्वयंस्थिताः ॥ तेसर्वेसंगरेयर्हिहताआचार्यकादयः ॥ ५ ॥ किंनस्यात्तर्हिराज्यादिभोगैःपापकरैर्वृथा ॥ ६ ॥ ३२ ॥ ३३ ॥ ३४ ॥

ननुत्वंकृपयाविष्टोयदितान्नहनिष्यसि ॥ राज्यलोभाद्धनिष्यंतित्वामेतइतिचेच्छृणु ॥१॥ त्रैलोक्यराज्यसंसिद्ध्यैनैतान्हंतुंग्रतोऽप्यहम् ॥ कुर्या
मिच्छामपिस्वीयान्किंनुहन्यांमहीकृते ॥२॥ मधुसूदनवेदाध्वसंप्रदायप्रवर्तक ॥ मामपिप्रेरयश्रौतमार्गेमोक्षप्रदेशुभे ॥ ३॥ विनिवर्त्याशुभान्मा
र्गादितिभावोऽर्जुनस्यच ॥ ४ ॥ ३५ ॥ नन्वन्यान्संपरित्यज्यदुर्योधनमुखाःखलाः ॥ हंतव्याःक्रूरनाशेत्वात्प्रीतिरित्यतआहसः ॥ १ ॥ दुर्यो
धनमुखान्भ्रातॄन्निहत्यास्माकमीदृशान् ॥ नकापिप्रीतिराभातिहिंसाकुत्रापिनोवरा ॥ २ ॥ क्षणिकानंदलोभेननैतेषामुचितोवधः ॥ यदिव
ध्यास्त्वयातर्हिहंतव्याःखलनाशिना ॥ ३ ॥प्रलयेसर्वसंहारकर्तृत्वेनाप्यसंगिना ॥ जनार्दनपदेनेतिसूचितंसूक्ष्मबुद्धिना ॥४॥ नन्वाततायिनां

एतान्नहंतुमिच्छामिघ्नतोऽपिमधुसूदन ॥ अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते ॥ ३५ ॥
निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन ॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥
तस्मान्नार्हावयंहंतुंधार्तराष्ट्रान्स्वबांधवान् ॥ स्वजनंहिकथंहत्वासुखिनःस्याममाधव ॥ ३७ ॥

हिंसानचपापकरीस्मृता ॥ अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः ॥ ५॥ क्षेत्रदारापहारीचषडेतेह्याततायिनः ॥ आततायिनमायांतंहन्यादेवावि
चारयन् ॥६॥ नाततायिवधेदोषोहंतुर्भवतिकश्चन ॥ इतिशास्त्रेणहंतव्याःशत्रवश्चेतिचेच्छृणु ॥७॥ पापमेवाश्रयेदस्मान्नश्रेयोऽपिकथंचन ॥ पा
पिनांनसुखंकिंचिद्दृष्टंनादृष्टमण्वपि ॥ ८ ॥ नहिंस्यात्सर्वभूतानीत्येवंधर्मानुशासनात् ॥ अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्मृतेः ॥ ९ ॥ अस्मा
न्युद्धयतोहत्वैतान्नंततातायिनः ॥ पापमेवाश्रयेन्नान्यच्छ्रेयइत्यर्थएववा ॥ १० ॥ ३६ ॥ परहिंसानकर्तव्यासर्वश्रेयोऽभिघातिनी ॥ ततोनै
तान्वयंहंतुंयोग्याःस्वीयानघानपि ॥ १ ॥ नैवतेषांवधेदृष्टंसुखंनोभातिमाधव ॥ नास्मिन्कर्मण्यलक्ष्मीकेप्रवर्तयितुमर्हसि ॥ २ ॥ ३७ ॥

कथंतर्हिपरेषांहिधर्मशास्त्रविदामपि ॥ कुलक्षयेप्रवृत्तिश्चेत्यतआहार्जुनोवचः ॥ १ ॥ लोभाच्छादितबुद्धित्वाद्दोषेऽपिबलवत्तरे ॥ भवत्वेषांप्रवृत्तिश्चनास्माकंसोचिताभवेत् ॥ २ ॥ नवेदमूलिकासास्तिप्रवृत्तिर्लोभमूलिका ॥ शिष्टानामपिनग्राह्याभीष्मादीनांविवेकिभिः ॥ ३ ॥ ३८ ॥ यद्यप्येतेप्रवृत्ताःस्युर्लोभात्तदपिशास्त्रतः ॥ तवप्रवृत्तिरुचितायुद्धेचाव्हानतःपरैः ॥ १ ॥ आहूतोननिवर्तेतद्यूतादपिरणादपि ॥ क्षत्रियस्यास्तिधर्मोऽयमित्यत्राहार्जुनोवचः ॥ २ ॥ श्रेयःसाधनताज्ञानंपुरुषस्यप्रवर्तकम् ॥ अश्रेयोऽननुबंधित्वाच्छ्रेयोनोदृष्टमात्रकम् ॥ ३ ॥ अन्यथाधर्मतापत्तिःश्येनादीनामपीष्यताम् ॥ फलतोऽपिचयत्कर्मनानर्थेनानुबद्ध्यते ॥ ४ ॥ केवलंप्रीतिहेतुत्वात्तद्धर्मत्वेनकीर्त्यते ॥ यदियेनेष्टसिद्धिः

यद्यप्येतेनपश्यंतिलोभोपहतचेतसः ॥ कुलक्षयकृतंदोषंमित्रद्रोहेचपातकम् ॥ ३८ ॥
कथंनज्ञेयमस्माभिःपापादस्मान्निवर्तितुम् ॥ कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन ॥३९॥
कुलक्षयेप्रणश्यंतिकुलधर्माःसनातनाः ॥ धर्मेनष्टेकुलंकृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥

स्यादनिष्टाननुबंधिना ॥ ५ ॥ तस्यधर्मत्वमिष्येततःश्येनादिवर्जनम् ॥ यदातुचोदनागम्यःकार्याकार्यानपेक्षया ॥६॥ धर्मःप्रीतिनिमित्तंस्यात्तदाश्येनेऽपिधर्मता ॥ अतोऽश्रेयोनुबंधित्वाच्छास्त्रतोऽपिरणेननः ॥ ७ ॥ प्रवृत्तिरुचितावंधुवधरूपेकुलक्षये ॥ ८ ॥ ३९ ॥ महापापादिहेतुत्वाद्गुरुपित्रादिहिंसनात् ॥ सिद्धयैद्युपरिरंसायाःप्राहवाक्यानिशास्त्रवित् ॥ १ ॥ धर्माःपरंपराप्राप्ताःप्रणश्यंतिकुलोचिताः ॥ कुलक्षयेयतःकर्तुरभावोदृश्यतेक्षितौ ॥ २ ॥ धर्मक्षयेकुलंसर्वमाबालमपिसर्वथा ॥ अधर्मःस्ववशेकृत्वाव्याप्नोतिभ्रंशयत्यतः ॥ ३ ॥ ४० ॥

एवंभगवताप्रोक्तेसेनयोरुभयोरपि ॥ पार्थोऽपश्यत्स्थितान्भूरिश्रवआदीन्पितॄंस्तथा ॥ १ ॥ पितामहान्भीष्ममुख्यान्कृपद्रोणमुखान्गुरून् ॥ शल्यादीन्मातुलान्भ्रातॄन्दुर्योधनमुखान्बहून् ॥ २ ॥ लक्ष्मणप्रभृतीन्पुत्रानश्वत्थाममुखान्सखीन् ॥ पौत्राँल्लक्ष्मणपुत्रादीन्श्वशुरान्बहुधा स्थितान् ॥ ३ ॥ सुत्दृदःकृतवर्मादीनेवमेवस्वसैन्यके ॥ एवंस्थितेऽन्यथाबुद्ध्यास्वधर्मेधर्मरूपया ॥ ४ ॥ ममत्वाविष्टयात्यंतमोहग्राहगृहीतया ॥ अभिभूतविवेकस्यस्वधर्मादर्जुनस्यच ॥ ५ ॥ धर्म्याद्युद्धात्पुरारब्धान्महानर्थावसानिका ॥ संजातोपरिरंसेतिदर्शयत्यधुनास्फुटम् ॥ ६ ॥ कृपया

तत्रापश्यत्स्थितान्पार्थःपितॄनथपितामहान् ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि ॥ तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनवस्थितान् ॥२७॥ कृपयापरयाविष्टोविषीदन्निदमब्रवीत् ॥ अर्जुनउवाच ॥ दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितम् ॥२८॥ सीदंतिममगात्राणिमुखंचपरिशुष्यति ॥ वेपथुश्चशरीरेमेरोमहर्षश्चजायते ॥२९॥ गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते ॥ नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः ॥ ३० ॥

कर्तृरूपिण्याकर्मभूतोऽर्जुनोऽवशः ॥ व्याप्तोऽनादिमहामोहजन्ययाध्यासरूपया ॥७॥ स्वकीयानुपलभ्यैतेममेत्याक्रांतमानसः ॥ संतापंप्राप्तुवन्नाहवक्ष्यमाणमिदंवचः ॥ ८ ॥ स्वधर्मकरणेहेतुभूतज्ञाननिरोधकृत् ॥ महाशोकोऽर्जुनस्यासीन्ममाहमितिचेतसा ॥ ९ ॥ इतिताङ्गितोवक्तिपार्थोक्तिंसंजयस्त्रिभिः ॥ बंधुवर्गमिमंस्वीयंयुद्धेप्सुंयुद्धभूगतम् ॥ १० ॥ पश्यतोमेश्लथंतेऽगान्याननंपरिशुष्यति ॥ कंपःपुलकितत्वंचगांडीवभ्रंशनंतथा ॥ ११ ॥ त्वग्दाहोधैर्यदौर्बल्यमंतःसंतापहेतुकाः स्वशरीरंनशक्नोमिमनोधारयितुंतथा ॥ १२ ॥ २६ ॥ २७ ॥२८॥ २९ ॥ ३० ॥

यदीदृशीमतिस्तेऽभूत्कुतस्तर्हिरणक्षितौ ॥ त्वंयुद्धाभिनिवेशेनेहागतोऽसीतिचेच्छृणु ॥ १ ॥ अविचार्यमयौद्धत्यंकृतंमौढ्यंममेत्यहो ॥ नन्वेवंतव वैराग्येऽपीमादीनांरणोत्सुका ॥ २ ॥ अस्तितैरेवबंधूनांवधस्याद्यदिपापदः ॥ किंविधेयंत्वयातर्हीत्याशंक्याहयदीतिच ॥ ३ ॥ अहिंसाप्राणिनांधर्मःप्रकृष्टःप्राणरक्षणात् ॥ जीवनापेक्षयात्यंतंहितंमेमरणंमतम् ॥ ४ ॥ स्वप्राणरक्षणेहेतुंव्यापारंमांमनागपि ॥ अकुर्वाणंरणेहन्युस्तदाहंस्यामकल्मषः ॥ ५ ॥ ४६ ॥ ततःकिंवृत्तमित्यत्राकांक्षायामाहसंजयः ॥ संग्रामेपूर्वमेवासौयुद्धार्थंदर्शनायच ॥ १ ॥ भीष्मादीनांरथस्योर्ध्वभागे

यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः॥धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्॥४६॥संजयउवाच॥
एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत् ॥ विसृज्यसशरंचापंशोकसंविग्नमानसः ॥ ४७ ॥
इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेअर्जुनविषादोनाम प्रथमोऽध्यायः ॥ १ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

पार्थःसमुत्थितः ॥ शोकेनाविष्टभावत्वात्रीडितंयस्यमानसम् ॥ २ ॥ सबाणंधनुरुत्सृज्यरथोपस्थउपाविशत् ॥ ३ ॥४७॥ मेघश्यामोऽवदातःस्मितमधुरमुखस्तोत्रवेत्रैकपाणिर्बीभत्सोःसंमुखेऽजःश्रुतिसुरभिपयोदोहनार्थंप्रवृत्तः॥ लोकानुद्धर्तुकामःश्रुतिविशदयशाभक्तिवश्योऽमलात्मास्वामी सर्वस्वकृष्णोवसतुममममतौब्रह्मविद्याश्रितोऽसौ ॥ १॥ २७३ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ शास्त्रोपोद्घातनामायंप्रथमःपूर्णतांगतः ॥ २७४ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

अस्मदीयैश्चपतिभिरतिक्रम्यस्वधर्मतः ॥ कुलक्षयःकृतोयर्हितर्ह्यस्माभिरिहाधुना ॥ १ ॥ व्यभिचारेकृतेकःस्याद्दोषइत्थंकुतर्कतः ॥ कुलस्त्रियः
प्रदुष्येयुरधर्माधिक्यहेतुना ॥ २ ॥ तासुदुष्टासुनीचाभिगमनात्संकरोभवेत् ॥ वृष्णिवंशेऽवतोर्णत्वाद्रक्षास्मान्घोरदोषतः ॥ ३ ॥ ४१ ॥
कुलस्यसंकरोयस्मात्कुलघ्नानामवीचिदः ॥ नकेवलंकुलघ्नानांपितॄणामपिनस्तथा ॥ १ ॥ पुत्रादीनांहिकर्तॄणामभावादेवसर्वथा ॥ लुप्तायेषांक्रियाः
सर्वाःपिंडस्याप्युदकस्यच ॥२॥ कुलघ्नानांपतंत्येवपितरोनरकेचिरम् ॥३॥४२॥ येत्वसाधारणाधर्माःस्वकुलस्यचिरंतनाः ॥ उत्साद्यंतेजातिधर्माः

अधर्माभिभवात्कृष्णप्रदुष्यंतिकुलस्त्रियः ॥ स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः ॥ ४१ ॥
संकरोनरकायैवकुलघ्नानांकुलस्यच ॥ पतंतिपितरोह्येषांलुप्तपिंडोदकक्रियाः ॥ ४२ ॥
दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः ॥ उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः ॥ ४३ ॥
उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन ॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम ॥ ४४ ॥
अहोबतमहत्पापंकर्तुंव्यवसितावयम् ॥ यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः ॥ ४५ ॥

क्षत्रियत्वादिहेतुकाः ॥१॥ ४३ ॥ ततःप्रेतत्वमुक्त्यर्थंकारणाभावतश्चिरम् ॥ नरकेचैववासःस्याद्ध्रुवंनातःसुनिष्कृतिः ॥ १ ॥ आचार्याणांमुखा
दित्थंश्रुतवंतोवयंपुरा ॥ जनानांदेवशत्रूणांप्राणादीनांवियोगतः ॥ २ ॥ यातनागमयितृत्वाद्यतस्त्वंश्रीजनार्दनः ॥ अतोमांप्रेरयस्वेवंकिंत्वां
शरणमागतम् ॥ ३ ॥ ४४ ॥ स्वकुलक्षयकारित्वात्पापिष्ठोयुद्धनिश्चयः ॥ किंयुद्धस्यपुनर्वाच्यंदुष्टत्वमितिभावनात् ॥ १ ॥ शोकमोहैकपाथोधौ
निमग्नःप्राहदुःखितः ॥ अहोबतेतिधर्मेऽपिपापबुद्धिमतोवचः ॥ २ ॥ ४५ ॥

तदेवसंजयोवाक्यमवतारयतिस्फुटम् ॥ समग्रैश्वर्यसंपन्नउवाचभगवानिति ॥ १ ॥ ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णांभगइतींगना ॥ २ ॥ नित्यमप्रतिबंधेनवर्ततेयत्रषड्विधम् ॥ समग्रैश्वर्यमुख्यंतद्भगाख्यंभगवानिति ॥ ३ ॥ शुद्धेमहाविभूत्याख्येपरेब्रह्मणिवर्तते ॥ श्रीकृष्णेभगवच्छब्दःसर्वकारणकारणे ॥४॥ अन्यत्रभगवच्छब्दउपचारेणवर्तते ॥ उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिम् ॥ ५ ॥ वेत्तिविद्यामविद्यांचसवाच्योभगवानिति ॥ ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ ६ ॥ भगवच्छब्दवाच्यानिविनाहेयैर्गुणादिभिः ॥ इदंस्वधर्माद्वैमुख्यंव्यामोहैकनिबंधनम् ॥ ७ ॥ शिष्टैर्विगर्हितत्वाच्चमलिनंकुतआगतम् ॥ संग्रामेक्षत्रियश्रेष्ठंत्वाविमृश्यैवकारणम् ॥ ८ ॥मोक्षेच्छातोऽथवास्व

श्रीभगवानुवाच ॥ कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितम् ॥
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

र्गकामतोवाकिमागतम् ॥ किंकीर्तिकामतोवात्वांकिंशब्देनेतिसूचितम् ॥९॥ त्रिभिर्विशेषणैर्हेतूंस्त्रीनेवेशोनिरस्यति ॥ आर्यैर्मुमुक्षुभिर्नैतत्सेवितंशुद्धिमिच्छुभिः ॥ १० ॥ यतःस्वधर्मत्यागेनचित्तशुद्धिर्नजायते ॥ नवास्वर्गेच्छयासेव्यंस्वर्गहेतुविरोधतः ॥ ११ स्वधर्मत्यागिनांस्वर्गःस्वप्नेऽप्यसंतदुर्लभः ॥ नवाकीर्तीच्छयासेव्यंकीर्तिनाशकरंयतः ॥ १२ ॥ तस्मात्स्वधर्मवैमुख्यंवर्जनीयंशुभेप्सुभिः ॥ मोक्षकीर्तिफलेप्सुस्त्वंकिमहोसेवसेमलम् ॥ १३ ॥ २ ॥

नन्वहंत्यक्तधैर्योऽस्मिनधनुर्धारणेक्षमः ॥ स्वजनावेक्षणेनैवक्कयुद्धंचातिदुःसहम् ॥ १ ॥ इत्याशंक्याहमागच्छाऽधैर्यंतेजोसुखापहम् ॥ देवप्रसादा त्पृथयालब्धस्त्वंवीर्यवत्तरः ॥ २ ॥ साक्षान्महेश्वरेणापिकृतयुद्धेऽर्जुनेत्वयि ॥ महाप्रभावेकातर्यंनचैतद्युज्यतेमलम् ॥ ३ ॥ क्षुद्रताहेतुकंबुद्धेरधैर्यंस्व विवेकतः ॥ त्यक्त्वायुद्धायशीघ्रंत्वंसज्जीभवरणक्षितौ ॥ ४ ॥ यतस्त्वंशत्रुसंतापकारीशूरतमोमतः ॥ ५ ॥३॥ ननुस्वधर्मसंत्यागोनायंशोकवशा

क्लैब्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते ॥ क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप ॥३॥ अर्जुनउवा च ॥ कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन ॥ इषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन ॥ ४ ॥

त्कृतः ॥ किंतुयुद्धस्यधर्मत्वाभावाच्चाधर्मरूपिणः ॥ १ ॥ मयास्यक्रियतेत्यागइत्याहार्जुनआंतरम् ॥ भीष्मंपितामहंद्रोणमाचार्यंसायकैरणे ॥ २ ॥ नजातुप्रहरिष्यामिपूजार्हौकुसुमादिभिः ॥ पूजार्हाभ्यांसहक्रीडास्थानेवाचापिलीलया ॥ ३ ॥ हर्षार्थमपिसंग्रामोनोचितःकिंशरैरणे ॥ प्राणत्यागकरोयुद्धभूमौवाच्यमितिस्फुटम् ॥ ४ ॥ संबोधनद्वयंमोहादेकार्थकमुदाहृतम् ॥ ५ ॥ ४ ॥

नन्वेषांभीष्ममुख्यानापूज्यत्वंसांप्रतंकथम् ॥ युद्धगर्वेणदृप्तानांकार्याकार्यमजानताम् ॥ १ ॥ गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः ॥ उत्प
थंप्रतिपन्नस्यपरित्यागोविधीयते ॥ २ ॥ इतिस्मृतेर्वधःश्रेयाञ्छिष्यद्रोहवतामिति ॥ एवमाशंक्यसद्युक्त्यावाक्यमाहगुरूनिति ॥ ३ ॥ अह
त्वातावदस्त्येवपरलोकसुखंहिनः ॥ अस्मिँल्लोकेनृपादीनांनिषिद्धंभैक्ष्यमप्युत ॥ ४ ॥ उचितंभोक्तुमस्माकंनगुरूणांवधोवरः ॥ उत्कृष्टोऽध्यय
नाचारतपआदिनिबंधनः ॥ ५ ॥ येषांप्रभावस्तेषांतुमहापुण्यवतांसताम् ॥ नक्षुद्रैरवलिप्तत्वादिभिर्दोषैःक्षतिर्मनाक् ॥ ६ ॥ अपहंतिहिमंयो
ऽग्निरादित्योवास्तितत्समम् ॥ येषांसामर्थ्यमेतेषांक्षुद्रैर्दोषैर्नवाक्षतिः ॥ ७ ॥ धर्मव्यतिक्रमोदृष्टईश्वराणांचसाहसम् ॥ तेजोयसांनदोषायवन्हेःसर्व
भुजोयथा ॥ ८ ॥ नन्वर्थलोभिनःसंतःप्रवृत्तायेरणेऽधुना ॥ तेषांविक्रीतदेहानांकुतोऽयंमहिमाद्भुतः ॥ ९ ॥ तथैवोक्तंरणोद्योगेभीष्मेणापियुधि

गुरूनहत्वाहिमहानुभावाञ्छ्रेयोभोक्तुंभैक्ष्यमपीहलोके ॥ हत्वार्थकामांस्तुगुरूनि
हैवभुंजीयभोगान्रुधिरप्रदिग्धान् ॥ ५ ॥ नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेम
यदिवानोजयेयुः ॥ यानेवहत्वानाजिजीविषामस्तेऽवस्थिताःप्रमुखेधार्तराष्ट्राः ॥ ६ ॥

ष्ठिरम् ॥ अर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित् ॥ १० ॥ इतिसत्यंमहाराजबद्धोऽस्म्यर्थेनकौरवैः ॥ इत्याशंक्याहसद्वाक्यंगुरुभक्तिसमन्वि
तः ॥ ११ ॥ अर्थलुब्धानपिगुरून्हत्वाभुंजीयकेवलम् ॥ विषयानेवनोमोक्षंतेऽपीहनपरत्रच ॥ १२ ॥ इहाप्यपयशोव्याप्तानिंद्यारक्तयुता
इव ॥ १३ ॥ ५ ॥ ननुभिक्षाशनंनिंद्यंक्षत्रियंप्रतिशास्त्रतः ॥ धर्म्ययुद्धंचविहितंश्रेयोनेत्याहनेतिच ॥ १ ॥ एतन्नापिवयंविद्मोमध्येसंग्रामभै
क्ष्ययोः ॥ कतरच्छ्रेष्ठमस्माकंभैक्ष्यंसंग्रामएववा ॥ २ ॥ इदंचापिनजानीमःप्रारब्धेऽस्मिन्रणेवयम् ॥ जयेमयदिवास्मांस्तेजयेयुःशत्रवोरणे ॥ ३ ॥
सिद्धोऽपिचेज्जयोऽस्माकंफलतःस्यात्पराजयः ॥ स्वजनान्यान्वयंहत्वानेच्छामश्चापिजीवितुम् ॥ ४ ॥ किंपुनर्विषयान्भोक्तुंतएतेऽवस्थिता
रणे ॥ भीष्मद्रोणादयःसर्वेतथादुर्योधनादयः ॥ ५ ॥ धृतराष्ट्रनृपस्यैतेसंबंधिनइहापरे ॥ तस्माद्भैक्ष्याद्रणस्यापिश्रेष्ठत्वंनैवसिद्ध्यति ॥ ६ ॥ ६ ॥

॥ श्रीगणेशायनमः ॥ अथद्वितीयाध्यायव्याख्याप्रारंभः ॥ पीतंवासोदधानंविजयरथगतंब्रह्मरुद्रादिवंद्यंभूमेर्भारंजिहीर्षुंनवजलदरुचशं
खचक्राब्जहस्तम् ॥ पार्थव्याजेनलोकंनिगममतसृतौयोजयंतंमहेशंध्यायेन्नित्यंसुसेव्यंसुजनमतिगृहंकृष्णमानंदकंदम् ॥ १ ॥ लक्ष्मीपतिःकृष्णस
खोनियंताब्रह्मादिलोकस्यचनंदसूनुः ॥ गोपीप्रियोगोपवयस्यआत्माखिलस्यकृष्णोमतिदोममास्तु ॥ २ ॥ अहिंसापरमोधर्मोमहान्दोषःकुलक्षये
॥ आकांक्षामेनराज्यादावर्जुनस्येतियन्मतम् ॥ ३ ॥ धृतराष्ट्रस्तदाकर्ण्यममत्वाभिनिवेशतः ॥ राज्यदार्ढ्यस्वपुत्राणामवधार्यातिहर्षतः

संजयउवाच ॥ तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ॥ विषीदंतामिदंवाक्यमुवाचमधुसूदनः ॥ १ ॥

॥ ४ ॥ अभूत्स्वस्थमनाइत्थमवलोक्याहसंजयः ॥ शृणुराजन्यथावृत्तंसमाधानेनचेतसा ॥ ५ ॥ व्यामोहोयोममैतेऽहमेतेषामितिदुःखदः ॥
स्नेहभेदःकृपासोक्तातयाध्यासस्वरूपया ॥ ६ ॥ स्वभावसिद्धयाव्यासंशोचंतंतंतथाविधम् ॥ तद्वशादश्रुभिःपूर्णेआकुलेदर्शनाक्षमे ॥ ७ ॥
ईक्षणेयस्यतंमोहाद्बुद्धिमंचार्जुनंप्रति ॥ इदंसयुक्तिकंवाक्यंवक्ष्यमाणमुवाचह ॥ ८ ॥ नतूपेक्षितवानीशोयतोऽसौमधुसूदनः ॥ स्वयंदुष्टनिहंताज
स्रथावक्ष्यतितंप्रति ॥ ९ ॥ १ ॥

ननुत्वंश्रुतिसंपन्नःस्वयंश्रेयोविचारय ॥ परशिष्यतयाकिंतेइत्याशंक्याहसद्वचः ॥ १ ॥ यच्छ्रेयःकर्तृप्रार्थंसन्ममशोकंनिवारयेत् ॥ तन्नपश्याम्यहं यस्मात्तस्मान्मांशाधिशोकिनम् ॥ २ ॥ शोकंसंतापकंनित्यमिन्द्रियाणामपाकुरु ॥ नन्वाजौयतमानस्यशोकस्तेलयमेष्यति ॥ ३ ॥ जेष्यसित्वंत दाराज्यप्राप्त्यावास्वर्गतोऽन्यथा ॥ इत्यत्राहारिभिर्हीनंराज्यंसस्यादिसंयुतम् ॥ ४ ॥ हिरण्यगर्भपर्यंतमैश्वर्यंप्राप्यसर्वतः ॥ यत्स्थितस्यापिमे शोकमपनुद्यान्नतल्लभे ॥ ५ ॥ तद्यथेहेतिवेदेनकृतकेनास्तिनित्यता ॥ कृतकंयन्नतन्नित्यंयुक्त्यापीतिविनिश्चितम् ॥ ६ ॥ नैहिकामुष्मिकौभो गौममशोकनिवर्तकौ ॥ इहामुत्रफलेतेनविरागोदर्शितःपुनः ॥ ७ ॥ ८ ॥ ततःकिंकृतवान्पार्थइत्यत्रोवाचसंजयः ॥ जितालस्योऽर्जुनःशत्रुता

नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणाम् ॥ अवाप्यभूमावसपत्नमृद्धंराज्यंसुराणा मपिचाधिपत्यम् ॥ ८ ॥ संजयउवाच ॥ एवमुक्त्काहृषीकेशंगुडाकेशःपरंतपः ॥ नयोत्स्यइतिगोविंदमु क्त्कातूष्णींबभूवह ॥ ९ ॥ तुमवाचहृषीकेशःप्रहसन्निवभारत ॥सेनयोरुभयोर्मध्येविषीदंतमिदंवचः१०

पनश्चेंद्रियेश्वरम् ॥ १ ॥ सर्वज्ञंभगवंतंतमेवमुक्त्कावचोव्रजम् ॥ कथंभीष्ममहंचेतिस्वरूपायोग्यतांरणे ॥ २ ॥नयोत्स्यइतियुद्धस्यफलाभावंत तःपरम् ॥ उक्त्कातूष्णींबभूवेत्थंनिर्व्यापारतयास्थितः ॥ ३ ॥ स्वभावतोजितालस्येसर्वशत्रुप्रतापने ॥ अतापकत्वमालस्यंतदाधास्यतिनास्प दम् ॥ ४ ॥ इतिद्योतयितुंहेतितथानायासतोहरेः ॥ बोधाच्छोकापनेतृत्वंगोविंदेतिपदध्वनिः ॥ ५ ॥ ९ ॥ एवमप्यर्जुनेयुद्धमुपेक्षितवतीश्व रः ॥ नैवोपेक्षितवानित्थमंधंप्रत्याहसंजयः॥ १ ॥ आगत्यसेनयोर्मध्येयुद्धोद्योगेनचार्जुनम्॥प्राप्तुवंतंविषादंचसंमोहंयुद्धरोधकम् ॥ २ ॥ त च्चेष्टायाह्यनौचित्यंहसनेनप्रकाशयन् ॥ अंतर्यामीतमाहेशोलज्जाब्धौमज्जयन्निव॥ ३ ॥वक्ष्यमाणमिदंचातिगंभीरंसारवद्वचः॥ ४ ॥ १० ॥

तदेवंपूर्वसंदर्भेसंसारोदोषवारिधिः ॥ उक्तस्तेनविवेकादिसाधनान्यधिकारिणः ॥ १ ॥ प्रोक्तानिमोक्षशास्त्रस्योपोद्घातत्वेनकृत्स्नशः ॥ नच श्रेयोऽनुपश्यामीत्यत्रश्रेयोपवर्गकम् ॥ २ ॥ उपन्यस्तंततोऽन्यत्रश्रेयइत्यर्थतःस्फुटम् ॥ नित्यानित्यविवेकोऽसौदर्शितःशुद्धिहेतुकः ॥ ३ ॥ नकांक्षेविजयंकृष्णेत्यत्रैहिकफलेरतिः ॥ अपित्रैलोक्यराज्यस्येत्यत्रामुत्रफलेरतिः ॥ ४ ॥ किंनोराज्येनचेत्यत्रशमःप्रोक्तस्तथादमः ॥ यद्यप्येतेनपश्यंतीत्यत्रनिर्लोभतात्मनः ॥ ५ ॥ तन्मेक्षेमतरंत्वत्रतितिक्षासाधनांतरम् ॥ भोक्तुंभैक्ष्यमपीत्यत्रभिक्षाचर्योपलक्षितः ॥ ६ ॥ संन्यासोदर्शितोऽत्राथगुरूपसदनंस्फुटम् ॥ ज्ञातसंसारदोषस्यनिर्विण्णस्याधुनोच्यते ॥ ७ ॥ तदेवंद्रोणभीष्मादिवधसंकटहेतुकाम् ॥ भिक्षाचर्यैर्जुनस्येच्छांप्रद

कार्पण्यदोषोपहतस्वभावःपृच्छामित्वांधर्मसंमूढचेताः ॥ यच्छ्रे
यःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेऽहंशाधिमांत्वांप्रपन्नम् ॥ ७ ॥

र्श्याथयथाविधि ॥ ८ ॥ तत्संकटच्छलेनैवमुपसत्तिःप्रदर्श्यते ॥ कृपणोऽनात्मवित्तस्यभावःकार्पण्यमुच्यते ॥ ९ ॥ तन्निमित्तोममैतेऽहमेतेषामितिनिश्चयः ॥ दोषस्तेनावृतःक्षात्रःस्वभावोयस्यशूरता ॥ १० ॥ निर्णायकप्रमाणस्यादर्शनाद्धर्मगोचरे ॥ किमेतेषांवधोधर्मःकिमेतत्परिपालनम् ॥ ११ ॥ इत्यादिसंशयग्रस्तंचेतोयस्याहमीदृशः ॥ त्वांपृच्छाम्यधुनाश्रेयआत्यंतिकमसंशयम् ॥ १२ ॥ यन्निश्चितंस्यात्तन्मह्यंब्रूहिश्रेयोऽर्थिनेपरम् ॥ ननुत्वंमेसखाचासिनशिष्योऽसीतिचेच्छृणु ॥ १३ ॥ तवानुशासनार्हत्वाच्छिष्यएवभवाम्यहम् ॥ नसखान्यूनबोधत्वादतस्त्वां शरणंगतम् ॥ १४ ॥ कृपयाशिक्षयत्वंमांनोपेक्ष्योऽशिष्यशंकया ॥ १५ ॥ ७ ॥

सिकिंतेस्यादनौचित्यमतःपरम् ॥ यद्वाप्रज्ञावतावादान्भाषसेनतुबुद्ध्यसे ॥ १३ ॥ मौढ्यंपांडित्यमेकत्रत्वयिदृष्टंतदद्भुतम् ॥ ननुबंधुवियोगेनशो
कःस्याद्धीमतामपि ॥ १४ ॥ मैवंधीमत्त्वमेतद्धीःप्रहासायैवकल्पते ॥ येपंडितायुरोःश्रुत्वावेदांतविषयंपदम् ॥ १५ ॥ ब्रह्मैक्यंयुक्तिभिर्मत्वानि
दिध्यास्यनिरंतरम् ॥ साक्षात्कृतात्मतत्त्वास्तेनष्टाविद्यामलाबुधाः ॥ १६ ॥ मृतान्वाजीवतोबंधून्नानुशोचंतिकल्पितान् ॥ एतेसर्वंपरित्यज्यग
तास्तिष्ठंतिकुत्रते ॥ १७ ॥ जीविष्यंतिकथंचैतेजीवंतोबंधवोमम ॥ बंधुविच्छेदतश्चैवंनव्यामुह्यंतिपंडिताः ॥ १८ ॥ यथास्वप्नेमृतोबंधुर्जी

गतासूनगतासूंश्चनानुशोचंतिपंडिताः ॥ ११ ॥

वन्वाशोच्यतांगतः ॥ नतन्निमित्तकोमोहोजागरेऽप्यनुवर्तते ॥ १९ ॥ एवमज्ञानजभ्रांत्याकल्पितावंधवोमृताः ॥ जीवंतोवानतेबोधेशोकमोह
प्रदाःसताम् ॥ २० ॥ देहादेर्नेश्वरात्मत्वान्नित्यत्वात्प्रत्यगात्मनः ॥ नशोच्याःप्राणिनःसर्वेस्वात्मतत्त्वविदांसताम् ॥ २१ ॥ एवंत्वंपंडितोभू
त्वामाकार्षीःशोकमांध्यजम् ॥ स्वात्मतत्त्वेसदास्थैर्यंप्राप्नुहीत्याशयोहरेः ॥ २२ ॥ ॥ ११ ॥

अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे ॥ इतिपादद्वयस्यैवविवृतिःक्रियतेऽधुना ॥ १ ॥ नेत्याद्येकोनविंशत्यापादस्याद्यस्यविस्तरः ॥ स्वधर्ममित्याद्यष्टाभिर्द्वितीयस्योच्यतेतथा ॥ २ ॥ मोहद्वयंनिराकार्यंष्टथग्यत्नेनदुःखदम् ॥ स्थूलदेहात्पृथक्कर्तुमात्मानंसाक्षिणंपरम् ॥ ३ ॥ वक्त्यादौतस्यनित्यत्वंत्वमःशुद्ध्यर्थमीश्वरः ॥ देहादिभ्यस्तुशब्देनव्यतिरेकोऽस्यसूच्यते ॥४॥ नैवाहंजात्वितःपूर्वंनासंकिंत्वासमेवहि ॥ तथैवत्वंपुराप्यासीरासन्नेतेजनाधिपाः ॥ ५ ॥ एतेनप्रागभावस्याप्रतियोगित्वमीरितम् ॥ तथाहंत्वमिमेभूपानभविष्यामएवकिम् ॥ ६ ॥ अतऊर्ध्वंतनोःपातादवश्यंभाविनोनच ॥ किंतुसर्वेभविष्यामोवयंनित्यतयात्मनः ॥ ७ ॥ एतेनैवात्मनःप्रोक्ताध्वंसस्याप्रतियोगिता ॥ अतःकालत्रयेसत्तायोगित्वात्प्रत्यगात्मनः ॥ ८ ॥ नित्यत्वेनाऽस्यसंसिद्धंवैलक्षण्यंशरीरतः ॥ देहाद्युपाधिभेदेनभेदोऽहंत्वमिमेत्विति ॥ ९ ॥ नात्रस्वाभाविको

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः ॥ नचैवनभविष्यामःसर्वेवयमतःपरम् ॥ १२ ॥

भेदोऽप्यात्मनोहरिणेरितः ॥ त्वंपदार्थविशुद्ध्यर्थंभेदमुद्दिश्यलौकिकम् ॥ १० ॥ आत्मनोनित्यताद्वारावैलक्षण्यंशरीरतः ॥ शास्त्रस्योपक्रमेयस्मात्तिसाधयिषितंहरेः ॥ ११ ॥ यत्त्वत्राभिमतोविष्णोर्भेदःस्वाभाविकःकिल ॥ अन्यथेहोपदेशस्यावसरेकथमीरयेत् ॥ १२ ॥ अहंत्वंवयमित्यादिभेदमित्याहुरित्यसत् ॥ उपदेश्योपदेशादिव्यवहारेऽस्तिकल्पितः ॥ १३ ॥ भेदस्तेनैवतत्सिद्धिर्नवास्तवइहेष्यते ॥ ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः ॥ १४ ॥ नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थता ॥ इत्यादिश्रुतिनिर्णीताद्वैततत्त्वाविमर्शनात् ॥ १५ ॥ भेदवादोऽसतामिष्टोनसतत्त्वविमर्शिनाम् ॥ १६ ॥ १२ ॥

ननुस्थूलोऽहमित्यादिप्रत्यक्षंमार्जितंभवेत् ॥ आत्मनोदेहभिन्नत्वेस्वीकृतेतच्चनोचितम् ॥ १ ॥ विष्णुशर्मामृतोजातइतिप्रत्यक्षमानतः ॥ शरीरजन्मनाशाभ्यांसहैवास्यात्मनोऽपितौ ॥ २ ॥ जन्मनाशौप्रसिद्धौस्तइत्याशंक्याहमाधवः ॥ देहाःसर्वेत्रिकालस्थाजगन्मंडलवर्तिनः ॥ ३ ॥ अस्यसंतीतिदेहीस्यात्तस्यैकस्यात्मनोविभोः ॥ ब्रह्मादिस्थावरांतेषुशरीरेष्वखिलेष्वपि ॥ ४ ॥ व्यापिनोनास्तिभेदस्यगंधइत्यपिदर्शितम् ॥ हरिणैकत्वनिर्देशाद्देहिनोऽस्मिन्नितिस्फुटम् ॥ ५ ॥ देहभेदानुवृत्त्योक्तंवयंसर्वेपुरात्विति ॥ तस्यैकस्यात्मनोदेहेवर्तमानेस्तोयथा ॥ ६ ॥ कौमारंयौवनंजीर्णाचेत्यवस्थात्रयंयतः ॥ परस्परविरुद्धंतत्तद्भेदान्नात्मनोभिदा ॥ ७ ॥ बाल्येयएवपितरावन्वभूवंसएवहि ॥ वार्धकेऽहंप्रणष्ट्रादीनेताननुभवाम्यसौ ॥८॥ प्रत्यभिज्ञाभवत्येषाप्रत्यगात्मैक्यगोचरा ॥ येषुव्यावर्त्यमानेषुनैवव्यावर्ततेतुयः ॥ ९ ॥ सतेभ्योभिद्यतेसूत्रंकुसुमेभ्यइवस्वतः ॥ निर्विकारस्यबाल्याद्यायथासंत्यत्रदेहिनः ॥ १० ॥ तद्वद्देहांतरप्राप्तिर्नविकारस्यवस्तुतः ॥ एतस्माद्देहतोऽत्यंत

देहिनोऽस्मिन्यथादेहेकौमारंयौवनंजरा ॥ तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति ॥ १३ ॥

भिन्नदेहाप्तिरात्मनः ॥ ११ ॥ योगैश्वर्यंतथास्वप्नेनास्तितेनभिदात्मनः ॥ सोऽहमित्येवविज्ञानंप्रत्यभिज्ञात्मकंयतः ॥ १२ ॥ प्रत्यगात्मनितेनायंदेहादतिविलक्षणः ॥ आत्मैकःकेवलःशुद्धोदेहाध्यासादयंभ्रमः ॥ १३ ॥ स्थूलोऽहममुकोजातोमृतइत्यादिकोनृणाम् ॥ बाल्याद्याजाग्रदाद्याश्चव्यावृत्तास्ताःपरस्परम् ॥ १४ ॥ अवस्थाःकल्पिताभ्रांत्याप्रत्यगात्मनिकेवले ॥ जातमात्रस्यहर्षादिःपूर्वसंस्कारजोभवेत् ॥ १५ ॥ अन्यथास्तन्यपानादौप्रवृत्तिःस्यान्नदेहिनाम् ॥ अदृष्टाद्वाप्रवृत्तिःस्याद्वेष्टसाधनताधिया ॥ १६ ॥ तथाचात्मैक्यसंसिद्धिः पूर्वापरशरीरयोः ॥ अन्यथाकृतनाशादिदोषोऽपिस्याद्दुरुद्धरः ॥ १७ ॥ एवंदेहाद्विभिन्नात्मज्ञानाद्धीमान्नमुह्यति ॥ शोकमोहाद्यसंस्पृष्टोधीरधीस्त्वमतोभव ॥ १८ ॥ १३ ॥

तत्रार्जुनस्यसंग्रामेप्रवृत्तिरभवत्स्वतः ॥ मोहेनद्विविधेनैषाप्रतिबद्धासचद्विधा ॥ १ ॥ मोहआदौनिराकार्यस्तत्स्वरूपंप्रदर्श्यते ॥ स्वप्रकाशेपरानंदेशुद्धेऽसंसारिणिस्वतः ॥ २ ॥ शरीरत्रितयाध्यासात्संसारेसत्यतामतिः ॥ अनात्मनिशरीरादावात्मताधीर्भ्रमात्मिका ॥ ३ ॥ सर्वसाधारणोमोहएकोऽसाधारणोऽपरः ॥ स्वधर्मेऽधर्मताबुद्धिर्युद्धेपार्थस्ययाऽभवत् ॥ ४ ॥ मोहोऽयमपरोऽप्यत्रासाधारणपदाभिधः ॥ देहत्रयाद्विविच्यात्मतत्त्वंप्रत्यंचमागमैः ॥ ५ ॥ योबोधःस्यात्सआद्यस्यमोहस्यविनिवर्तकः ॥ स्वधर्मत्वेनयुद्धस्यहिंसादीनांनदोषता ॥ ६ ॥ एवंबोधोद्विती

श्रीभगवानुवाच ॥ अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे ॥

यस्यसंमोहस्यनिवर्तकः ॥ हेतुनाशे नशोकस्यविनिवृत्तिःस्वतोभवेत् ॥ ७ ॥ इत्यभिप्रेत्यभगवांस्तद्वयंकमशोवदन् ॥ उवाचसर्वशोकाद्यध्यासमूलंनिवर्तयन् ॥ ८ ॥ भीष्मादीनात्मसहितानयोग्यानेवशोचितुम् ॥ पंडितःसन्नहोतांस्त्वमनुशोचितवानसि ॥ ९ ॥ म्रियंतेमन्निमित्तंतेकिंकरिष्यामितैर्विना ॥ किंनोराज्यादिनेत्यादिवचोभिर्बहुधाभ्रमात् ॥ १० ॥ शोच्यभ्रमस्तवाशोच्येसामान्यस्तिर्यगादिभिः ॥ अत्यंतपंडितस्यायंनोचितःसर्वथाभवेत् ॥ ११ ॥ प्राज्ञैर्वक्तुमयोग्यांश्चशब्दान्वदसिनैकधा ॥ कथंभीष्ममहंसंख्येइत्यादींस्त्वंनलज्जया ॥ १२ ॥ तूष्णींभव

सितः ॥ १५ ॥ पात्रस्थसलिलेष्वर्कोयथैवप्रतिबिंबितः ॥ स्वच्छेषुस्वच्छवद्भातिमलिनेषुतथाऽऽबिलः॥ १६ ॥ चलेषुचलवद्भातिस्थिरेषुस्थिरवत्तथा ॥ चंचलत्वादयोधर्माःसूर्यैसंतिनतावता ॥ १७ ॥ तथासुखादयोबुद्धेर्नात्मत्वात्स्युरनेकधा ॥ आत्मनोनैवतेसंतिसूर्यस्येवाविकारिणः ॥ १८ ॥ एतेनस्वर्गनरकौबंधमोक्षौभवाभवौ ॥ व्याख्यातौमातृनिष्ठत्वान्मातॄणांबुद्धिभेदतः ॥ १९ ॥ भिन्नत्वान्नैवतैरात्मालिप्यतेव्योमसूर्यवत् ॥ एकस्मिन्नपिदेहेऽस्मिन्मातुर्दुःखसुखेयथा ॥ २० ॥ पादाद्यंगेषुभिन्नेषुभिन्नेतद्वज्जगत्सुच ॥ पादेमेसुखमस्त्यद्यवेदनाशिरसीतिच ॥ २१ ॥ अनुभूतिस्तयानासौभिद्यतेजीवएकलः ॥ तथात्मास्त्येकएवासौसर्वदेहेषुभासकः ॥ २२ ॥ उपाधेरेवभिन्नत्वान्नभेदःप्रत्यगात्मनि ॥ श्रुतिसिद्धात्मनोभेदेमानमन्यन्नदृश्यते ॥ २३ ॥ येनभेदप्रसिद्धिःस्यात्तस्माद्भेदोनवास्तवः ॥ अध्यक्षादेःप्रमाणस्यविषयत्वंनचात्म

आगमापायिनोऽनित्यास्तांस्तितिक्षस्वभारत ॥ १४ ॥

नः ॥ २४ ॥ तद्भेदस्यकथंयुक्त्यातस्यगोचरताभवेत् ॥ प्रतियोग्यात्मविज्ञानाधीनज्ञानभिदायतः ॥ २५ ॥ अतआत्मैकएवास्तिसिद्धमित्युपपत्तिभिः ॥ शीतंजातुसुखेहेतुःकदाचिद्दुःखकारणम् ॥ २६ ॥ एवमुष्णमतोभिन्नतयास्वीकारएतयोः ॥ अतोऽत्यंतास्थिरांस्त्वत्तोभिन्नस्यैवविकारिणः ॥ २७ ॥ धर्माश्चित्तस्यदुःखादिदायिनःक्षणभंगुरान् ॥ मात्रास्पर्शास्तितिक्षस्वनैतेकिंचित्करामम ॥ २८ ॥ एवंतांस्त्वमुपेक्षस्वविवेकेनचिदात्मनः ॥ देहाद्यध्यासतोमात्वंजानीहिस्वंचदुःखिनम् ॥ २९ ॥ कुलद्वयविशुद्धस्यतवाज्ञानंनचोचितम् ॥ कौंतेयभारतेत्येवंसंबोधनयुगध्वनिः ॥ ३० ॥ १४ ॥

नन्वात्मनोनित्यत्वेविभुत्वेवाविकल्पना ॥ एकत्वंतुकथंसिद्धयेज्जीवत्सुद्वैतवादिषु ॥ १ ॥ वैशेषिकादयःसर्वेतार्किकाःकापिलास्तथा ॥ देह
भेदेनभिन्नत्वमात्मनस्तेप्रपेदिरे ॥ २ ॥ अन्यथासुखदुःखादिसंकरःसर्वदेहिनाम् ॥ एवंभीष्मादिभिन्नस्यनित्यत्वेममसत्यपि ॥ ३ ॥ सुखदुःखा
दियोगित्वात्तत्संयोगवियोगजौ ॥ शोकमोहौकथंनस्तामित्याशंक्याहमापतिः ॥ ४ ॥ मीयंतेविषयाआभिर्मात्राःस्युरिंद्रियाणिताः ॥ तासां
स्पर्शास्तुविषयैःसंबंधाःक्षणभंगुराः ॥ ५ ॥ परिणामाधियःसर्वेतत्तदाकारवृत्तयः ॥ बुद्धेराद्यंतवंतस्तेसुखदुःखप्रदाःशठाः ॥ ६ ॥ शीतोष्णा
दिमुखेनैतेनतुनित्यस्यदेहिनः ॥ कौटस्थ्यान्निर्गुणत्वाच्चसाक्षिणःस्युःकथंत्विमे ॥ ७ ॥ नित्यस्यानित्यधर्माणामाश्रयत्वंनसंभवेत् ॥ साक्ष्यस्य

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः ॥

साक्षिधर्मत्वानुपपत्तेश्चसर्वथा ॥ ८ ॥ नर्तेस्याद्विक्रियांदुःखीसाक्षिताक्वविकारिणः ॥ धीविक्रियासहस्राणांसाक्ष्यतोऽहमविक्रियः ॥ ९ ॥
इत्युक्तंवार्तिकेतस्मात्साक्षिणोनैवविक्रियाः ॥ अंतःकरणधर्मास्तेसुखदुःखादयोऽखिलाः ॥ १० ॥ नात्मनोनिर्विकारस्यतेनभेदविकल्पना ॥
एकस्मिन्नद्वितीयेऽस्मिन्भेदोनास्तिमनागपि ॥ ११ ॥ वैशेषिकादयोभ्रांत्यामन्यंतेविक्रियांभिदाम् ॥ आद्यंतवत्त्वाद्दृश्यत्वात्सुखाद्याःक्षणभं
गुराः ॥ १२ ॥ परिणामाधियःसर्वेभिन्नायाःसाक्षिणोदृशः ॥ वैलक्षण्यमतःसिद्धमात्मनोलिंगदेहतः ॥ १३ ॥ सर्वेसुखादिवैचित्र्यंलिंगधर्मो
नचात्मनः ॥ प्रतिदेहमसौबुद्धिर्भिन्नादुःखादिधर्मिणी ॥ १४ ॥ तत्रकूटस्थआत्मैकोभानुवत्प्रतिबिंबितः ॥ प्रमातृत्वंगतोनानारूपेणप्रतिभा

नन्वस्तुपुरुषैकत्वंतथाप्यस्यनमुक्तता ॥ शीतोष्णादेश्चबंधस्यसहेतोर्वस्तुतावशात् ॥ १ ॥ एवंकथंतितिक्षास्यात्कथंवाबंधनाशनम् ॥ सत्या
मपितितिक्षायांजातुस्यादात्मनःक्षयः ॥२॥ इत्याशंक्याहभगवान्मंगलायतनोहरिः ॥ समस्तस्यप्रपंचस्यसहेतोर्बंधरूपिणः ॥ ३ ॥ स्वाज्ञाना
त्कल्पितत्वेनस्वात्मबोधोदयात्क्षयः ॥ कल्पितस्यभुजंगस्यरज्जौतज्ज्ञानतःक्षयः ॥ ४ ॥ दृष्टोयथातथैतस्यशीतोष्णादेःक्षयोधिया ॥ अन्यो
न्याध्यासतोयस्मात्सदात्मानात्मनोर्द्वयोः ॥ ५ ॥ शीतोष्णादिजगत्सर्वंभातितस्मान्मृषाजगत् ॥ अन्योन्याध्यासतुल्यत्वेकथमेकस्यसत्य
ता ॥ ६ ॥ इतरस्यैवमिथ्यात्वमितिचेच्छृणुयुक्तितः ॥ परिच्छिन्नंहियद्वस्तुदेशतःकालतोऽर्थतः ॥ ७ ॥ तज्जन्मनाशशीलत्वादसद्रज्जुभु

नासतोविद्यतेभावोनाभावोविद्यतेसतः॥

जंगवत् ॥ यथास्वाप्नंमृषासर्वंमृत्कुंभादिकमीक्ष्यते ॥ ८ ॥ तथेदंबंधशब्देनप्रोक्तंविश्वंमृषाखिलम् ॥ नाध्यस्तंसत्कदाचित्स्यात्स्वाप्नंकुंभादिकं
यथा ॥ ९ ॥ असतोविद्यमानस्यशीतोष्णादेर्नचास्तिता ॥ सहेतोर्निष्प्रमाणत्वाद्विकारत्वाच्चलत्वतः ॥ १० ॥ घटांकुरादियत्कार्यंदृष्टंसत्का
रणंहितत् ॥ आकाशादिचनःकार्यंतदप्येवंप्रतीयताम् ॥ ११ ॥ असतश्चेदिदंकार्यंसर्वंस्यादसदन्वितम् ॥ असतःकारणत्वंचनिरात्मत्वान्नसि
द्धचति ॥ १२ ॥ ध्रुवःसत्कुरुतेकार्यमयस्कांतोमणिर्यथा ॥ कारणत्वंभवेदेवंकुर्वतोऽतिशयःकुतः ॥ १३ ॥ इत्येवंवार्तिकेऽध्यस्तकार्यस्यगति

रीरिता ॥ अधिष्ठानस्यसत्यत्वसिद्धयैनत्वन्यसिद्धये ॥ १४ ॥ यथाघटादिसंस्थानंमृदोभिन्नंनचक्षुषा ॥ गृह्यतेसकलंतद्वत्सतोभिन्नंजगन्नहि॥१५॥
शीतोष्णादेःप्रपंचस्यसहेतोर्नास्तिसत्यता ॥ अन्योन्यव्यभिचारित्वात्कल्पितत्वाच्चिदद्वये ॥ १६ ॥ अज्ञातज्ञापकत्वंहिप्रामाण्यंशास्त्रविन्मतम् ॥
नाज्ञातत्वंप्रपंचस्याज्ञानकार्यस्यजाड्यतः ॥ १७ ॥ सर्वत्रानुगतेसत्येकल्पितंव्यभिचारियत् ॥ विश्वंरज्जौयथासर्पदंडादिसन्नतत्तथा ॥ १८ ॥
सन्घटःसन्पटोहीत्थमनुस्यूतेसदद्वये ॥ नघटःपटइत्येवंव्यभिचारिप्रकल्पितम् ॥ १९ ॥ सामानाधिकरण्यंतुमिथ्यासद्वस्तुनोरपि ॥ दृष्टंनीलंन
भोवारिमरीच्यादाविदंयथा ॥ २० ॥ तस्माद्बंधस्यदेहादेःसहेतोर्नास्तिसत्यता ॥ तथासतश्चिदानंदापरिच्छिन्नस्यवस्तुनः ॥ २१ ॥ अभावो

उभयोरपिदृष्टोऽतस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥

ऽसत्यतानास्तिपरिच्छिन्नत्वलक्षणः ॥ सर्वत्राव्यभिचारित्वादनुस्यूतस्यचित्सतः ॥ २२ ॥ एवंसदसतोरात्मानात्मनोरनयोर्द्वयोः ॥ निर्णयःस
त्सदेवासदसदेवेतिनान्यथा ॥ २३ ॥ दृष्टस्तद्ब्रह्मतद्भावोयाथात्म्यंब्रह्मणःसतः ॥ तत्त्वंद्रष्टुंसदाशीलंयेषांतैस्तत्त्वदर्शिभिः ॥२४॥ त्वमप्येवंसमा
श्रित्यदृष्टिंतांतत्त्वदर्शिनाम् ॥ शोकमोहौपरित्यज्यतितिक्षस्वगतागतम् ॥ २५ ॥ दृश्यंस्वरूपतोऽध्यस्तंचिद्धनेऽतोऽनृतात्मकम् ॥ संसर्गमात्र
मध्यस्तमात्मनोऽस्मिन्ननात्मनि ॥२६॥ प्रातीतिकशरीरत्वाद्दृश्यंमिथ्याजडंक्षरम् ॥ अबाध्यत्वाच्चिदात्मत्वादात्मासत्यःस्वयंप्रभः॥२७॥१६॥

ननुज्ञानात्मकंसत्स्याज्ज्ञानमाद्यंतवत्किल ॥ घटज्ञानंसमुत्पन्नंनष्टंचेतिप्रतीतितः ॥ १ ॥ घटंवेद्मीत्यतोभानात्साश्रयंचसकर्मकम् ॥ दिक्काल
वस्तुविच्छिन्नंज्ञानंस्याद्व्यापकंकथम् ॥ २ ॥ इत्यत्राहाविनाशीत्यपरिच्छिन्नंचिदद्वयम् ॥ जानीहिस्फुरणंसत्तद्येनैकेनचिदात्मना ॥ ३ ॥ नि
त्येनविभुनासर्वमिदंव्याप्तंजडानृतम् ॥ स्वसत्तास्फूर्तिदानेनसर्वंस्वस्मिन्निवेशितम् ॥ ४ ॥ परिच्छेदंनकोऽप्यस्यापरोक्षस्याव्ययस्यच ॥ स
र्वानुस्यूतरूपस्यसतःकर्तुमिहार्हति ॥ ५ ॥ नाश्रयोविषयोनोनसन्निकर्षादिकारणम् ॥ परिच्छेत्तुंसमर्थोऽस्त्यपरिच्छिन्नस्यकर्हिचित् ॥ ६ ॥

अविनाशितुतद्विद्धियेनसर्वमिदंततम् ॥

तुनाऽसतोविभिन्नत्वंसूच्यतेसच्चिदात्मनः ॥ सत्यंज्ञानमनंतंचापरिच्छिन्नमबाधितम् ॥ ७ ॥ श्रुत्याज्ञानंविनिर्णीतंसंविद्रूपंसदद्वयम् ॥ यात्वाद्यं
तवतीकाचिद्बुद्धिवृत्तिर्मताहिसा ॥ ८ ॥ स्फुरणस्यास्यनित्यस्याभिव्यंजकतयाखिले ॥ घटादौजन्मनाशादिप्रतीतिविषयेरिता ॥ ९ ॥ तद्यु
त्पत्तिविनाशाभ्यामनाशिस्फुरणेपरे ॥ जन्मनाशप्रतीतेश्चोपपत्तेर्नस्वतःसतः ॥ १० ॥ साश्रयादिपरिच्छेदवतोभवतुतेनहि ॥ नक्षतिःस्फुरण

नन्वंतःकरणस्यैवभोक्तृत्वेसुखदुःखयोः ॥ तस्यैवचेतनत्वात्स्यादात्मत्वंनततःपरे ॥ १ ॥ भोक्तुरन्यस्यचात्मत्वेमानंनैवेहदृश्यते ॥ स्याद्वैयधिकरण्यंचह्यन्यथाबंधमोक्षयोः ॥ २ ॥ बद्धंमनोविमुक्तोऽन्यआत्मेत्यत्राहमाधवः ॥ यंस्वतःस्वप्रकाशत्वात्प्रसिद्धंपूर्णमद्वयम् ॥ ३ ॥ मात्रास्पर्शानकुर्वंतिविक्रियांवस्तुतोऽण्वपि ॥ दृश्यधर्मतयायस्यसुखदुःखेसमेदृशः ॥ ४ ॥ धीरंधीप्रेरकंस्वात्मतादात्म्याध्यासतोविभुम् ॥ चिच्छायाद्वारतोबुद्धिसाक्षिणंवस्तुतःपरम् ॥ ५ ॥ अध्यस्तबंधाधिष्ठानतद्भुक्तंसांप्रदायिकैः ॥ यतोमानानिसिद्ध्यंतिजाग्रदादित्रयंतथा ॥ ६ ॥ भावाभावविभागश्चसब्रह्मास्मीतिबोध्यते ॥ अतःसपुरुषःसाक्षीब्रह्मात्मैक्यधियाखिलम् ॥ ७ ॥ सविलासमहामोहंध्वस्त्वामोक्षायकल्पते ॥ अ

यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ ॥ समदुःखसुखंधीरंसोऽमृतत्वायकल्पते ॥ १५ ॥

नात्मन्यात्मताध्यासाद्बंधस्तत्रैवकल्पितः ॥ ८ ॥ तन्निवृत्त्यैक्यविज्ञानान्मुक्तइत्युपचर्यते ॥ वस्तुतोबंधमोक्षादिनास्त्येवाद्वैतवस्तुनि ॥ ९ ॥ स्वाभाविकत्वेबंधस्यमुक्तिर्नस्यात्ततोविभोः ॥ नस्वभावविपर्यासःप्रमाणानांशतैरपि ॥ १० ॥ तस्माद्बंधस्यमिथ्यात्वंतदुक्तंवार्तिकेस्फुटम् ॥ आत्माकर्त्रादिरूपश्चेन्माकांक्षीस्तर्हिमुक्तताम् ॥ ११ ॥ नहिस्वभावोभावानांव्यावर्तेतौष्ण्यवद्ग्वेः ॥ मिथ्याज्ञानप्रयुक्तोऽयंबंधोऽध्यस्तश्रिदात्मनि ॥ १२ ॥ सम्यगद्वैतबोधेनतन्निवृत्त्यास्यमुक्तता ॥ स्वप्रकाशपरानंदरूपत्वेनैवपूरुषः ॥ १३ ॥ ऋषभःसर्वतःश्रेष्ठोद्वैतास्पष्टश्रिदद्वयः ॥ इत्याव्हानेनहरिणाबोधितःपुरुषर्षभः ॥ १४ ॥ अज्ञात्वैतादृशंवस्तुरूपंतंपुरुषर्षभम् ॥ शोचसीत्येवतात्पर्यंगम्यतेश्रीहरेर्विभोः ॥ १५ ॥ १५ ॥

नासतोविद्यतेभावइत्येतद्विवृणोत्यजः ॥ स्वप्नमायाशरीरादिवदेतेकल्पिताजडाः ॥ १ ॥ देहाविनाशिनःसर्वेदेवतिर्यङ्नरादयः ॥ नित्यस्या
नाशिनोऽध्यस्तदेहयुक्तस्यचात्मनः ॥ २ ॥ दृश्यत्वेनदृशःप्रोक्ताःश्रुतिभिर्ब्रह्मवादिभिः ॥ नित्यत्वस्यचनाशस्यद्विविधत्वात्तयोर्यथा ॥ ३ ॥
भस्मीभूतोमृतोदेहोनष्टश्चादर्शनंगतः ॥ तद्व्यावृत्त्यर्थमत्रोक्तंनित्यस्येतिशरीरिणः ॥४॥ यथाव्याध्यादिभिर्युक्तोदेहोनष्टइतीर्यते ॥ तन्निवृत्त्यर्थ
मत्रोक्तमनाशिनइतिस्फुटम् ॥५॥ अन्यथापरिणाम्येवनित्यःक्षित्यादिवद्भवेत् ॥ नित्यःकूटस्थआत्मेतिसिद्धमित्याशयोहरेः ॥६॥ नन्वेतादृश

अंतवंतइमेदेहानित्यस्योक्ताःशरीरिणः ॥

चिद्रूपेमानमस्तिनवास्तिचेत् ॥ भास्यत्वेनजडत्वंस्यात्तर्ह्यस्यापिघटादिवत् ॥ ७ ॥ नास्तिचेत्तर्ह्यलीकत्वं खपुष्पादेरिवास्यच ॥ इत्यत्राहाप्र
मेयस्यापरिच्छेद्यस्यवस्तुनः ॥ ८ ॥ स्वप्रकाशस्यचिद्धातोर्मानापेक्षास्वभासने ॥ नास्तिसर्वावभासस्यमानंतेनावभास्यते ॥ ९ ॥ स्वभानार्थं
स्वभास्यस्यापेक्षानैवोपपद्यते॥स्वप्रकाशस्वभावस्यमानाभावेपिनक्षतिः ॥१०॥मानाभावेह्यलीकत्वनियमोऽस्तिजडेक्षरे॥अन्यथास्यादलीकत्वं
मानस्याप्यवभासिनः ॥११॥ मातृमानप्रमेयाणांयौगपद्येनभासकः ॥ साक्षीतत्रप्रमाणस्याकांक्षास्यादित्यहोभ्रमः॥ १२ ॥ प्रमाणमप्रमाणंवा

स्यास्यापरिच्छिन्नस्यवस्तुनः ॥ ११ ॥ यथाघटाद्यविच्छेदादाकाशेभेदकल्पना ॥ तथाधीवृत्त्यविच्छेदात्स्फुरणेभेदकल्पना ॥ १२ ॥ सुप्तौ धीवृत्त्यभावेऽपिसतःस्फूर्तिःस्वतोयतः ॥ अतऔपाधिकस्तस्यपरिच्छेदोनवास्तवः ॥ १३ ॥ तदुक्तंवार्तिकेसम्यक्सत्यादिपदनिर्णये ॥ ननु सत्यमनंतंचकथंसम्यक्प्रतीयते ॥ १४ ॥ देशकालादिहेतुत्वात्तदिदानींविभाव्यते ॥ वस्तुतोदेशतश्चैवकालतश्चत्रिधोच्यते ॥ १५ ॥ आनंत्यंब्रह्मणश्चातःसत्याद्यपिचसिद्ध्यति ॥ नानंतंदेशतोव्योमदेशवत्प्रकृतित्वतः ॥ १६ ॥ कारणेनैकदेशंहिकार्यंनान्यत्रवर्तते ॥ कार्यत्वात्कालतो

विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति ॥ १७ ॥

नास्यवस्तुतश्चविहायसः ॥ १७ ॥ वस्त्वंतरस्यसद्भावादानंत्यंवस्तुतोऽपिन ॥ कालाकाशादियोनित्वात्सर्वात्मत्वात्तथात्मनः ॥ १८ ॥ वस्त्वंतरस्यचासत्वान्मुख्यानंत्यंपरात्मनः ॥ कल्पितेनपरिच्छेदोनह्यकल्पितवस्तुनः ॥ १९ ॥ कल्पितश्चेहकालादिवाचारंभणशास्त्रतः ॥ कल्पितानामधिष्ठानतयासत्यमबाधितम् ॥ २० ॥ देहादिसर्वविश्वस्यासत्यत्वंसिद्धमित्यलम् ॥ २१ ॥ १७ ॥

ननुत्वदुक्तरीत्येत्थंमास्तुशोकस्तथापिमे ॥ भीष्मादिवधकर्तृत्वनिमित्तैनोदुरुद्धरम् ॥ १ ॥ कर्ताहंप्रेरकस्त्वंचहिंसायांपातकंद्वयोः ॥ युद्धचस्वेतिवचस्तस्मादयुक्तमितिचेच्छृणु ॥ २ ॥ यएनंदेहिनंशुद्धमक्रियंनिष्कलंपरम् ॥ हननाख्यक्रियायाश्चकर्तारंवेत्तिमूढधीः ॥ ३ ॥ अस्यहंताहमित्येवंयश्चैनंमन्यतेहतम् ॥ हतोऽहंतत्क्रियायाश्चकर्मत्येवंहितावुभौ ॥४॥ देहाभिमानिनावेनंनजानीतोविवेकतः ॥ यतोऽयंतत्क्रियायानोकर्ता

यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतम् ॥ उभौतौनविजानीतोनायंहंतिनहन्यते ॥ १९ ॥

नैवास्तिकर्मवा ॥ ५ ॥ कर्मैनंवेत्तिचार्वाकोदेहमात्रात्मविज्जडः ॥ बुद्ध्यादिगुणमात्मानंकर्तारंवेत्तितार्किकः ॥ ६ ॥ इत्थंवादिभिदासम्यक्ख्यापनायष्टथक्पुनः ॥ उपन्यासःपदानांवाशूरादिख्यापनायवा ॥ ७ ॥ अतश्चार्वाककाणादपक्षंत्यक्त्वातिदूरतः ॥ वेदांतमतमाश्रित्ययुद्धचस्वेत्याशयोहरेः ॥ ८ ॥ १९ ॥

हननाख्यक्रियायानोकर्तात्मानैवकर्मवा ॥ कुतएवमपेक्षायामविकारितयोच्यते ॥ १ ॥ नजायतेयतोनायमभूत्वाभवितापुनः ॥ योह्यभूत्वाभवत्येनामुत्पत्तिंभजतेसच ॥ २ ॥ यतोऽयंसत्यएवास्तिततोनोत्पद्यतेह्यजः ॥ कालत्रयेऽपिसत्यत्वाज्जनिर्नैवास्ययुज्यते ॥ ३ ॥ तथात्माप्येषभूत्वाप्राक्पुनर्नभवितेतिन ॥ योहिभूत्वापुरापश्चान्नभवत्येषमृत्युभाक् ॥ ४ ॥ अयंतूत्तरकालेऽपिसत्वान्नम्रियतेयतः ॥ अतोनित्योननाशार्हः कदाचिदपिचिद्धनः ॥ ५ ॥ नजायतेम्रियतेवाप्रतिज्ञावाक्यमिष्यते ॥ कदाचिदितितस्यैवोपपादनमिहोच्यते ॥ ६ ॥ अजोनित्यइतीहोपसंहा

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः ॥ अजो नित्यःशाश्वतोऽयंपुराणोनहन्यतेहन्यमानेशरीरे ॥ २० ॥

रइतिभागशः ॥ आद्यंतयोर्निषेधेननिषेधोमध्यवर्तिनाम् ॥ ७ ॥ विकाराणांस्वतःसिद्धस्तथापिवृद्ध्यपक्षयौ ॥ स्वशब्देननिषिद्ध्येतेशाश्वतश्चेत्यपक्षयः ॥ ८ ॥ पुरापिनवएवासौततोनायंविवर्धते ॥ अवस्थांनूतनांयस्तुयातिवर्धतएवसः ॥ ९ ॥ अयंसदैकरूपत्वान्नोपचीयतआंतरः ॥ अस्तित्वविपरीणामौजन्यतांतर्गतौयतः ॥ १० ॥ निषिद्धौनष्टथक्तस्मात्षड्विकारविवर्जितः ॥ आत्मानशक्यतेहंतुंहन्यमानेशरीरके॥ ११॥२०॥

इत्थंनिषिद्धंकर्मत्वमात्मनोऽत्राविकारिणः ॥ इदानींतुक्रियामात्रेकर्तृत्वंप्रतिषिद्ध्यते ॥ १ ॥ नविनष्टस्वभावोऽस्यनव्ययोपचयात्मकः ॥ गुणाद्य
पचयादेवविनाशोदृश्यतेयतः ॥ २ ॥ यथाकस्तूरिकादीनांगुणनाशेव्ययोभवेत् ॥ नाशोऽवयवतोयद्वत्तंतुनाशेपटव्ययः ॥ ३ ॥ नाशःस्याद्ध
र्मतोयद्वत्कटकादिविनाशतः ॥ हेमनाशोभवेत्तद्वन्निर्धर्मकइहात्मनि ॥ ४ ॥ निर्गुणेनिष्कलेनाशस्तदभावान्नयुज्यते ॥ नजायतेयतोनित्योवि
द्यमानतयासदा ॥ ५ ॥ तंसर्वविक्रियाशून्यंस्वात्मानंयस्तुसाक्षिणम् ॥ शास्त्राचार्योपदेशाभ्यामहमस्मीतिचाक्रियम् ॥ ६ ॥ साक्षात्करो
तिसज्ञानीपूर्णोऽसौहंतिकंकथम् ॥ आक्षेपेऽस्यत्रकिंशब्दोनकथंनकिमप्यसौ ॥ ७ ॥ हंतिवानकथंकंचिन्नैवघातयतीहसः॥ शुद्धमक्रियमात्मा

वेदाविनाशिनंनित्यंयएनमजमव्ययम् ॥ कथंसपुरुषःपार्थकंघातयतिहंतिकम् ॥ २१ ॥

नंविदुषोऽध्यासहानतः ॥ ८ ॥ कर्तृत्वप्रेरकत्वादेरभावंदर्शयन्नजः ॥ अयमत्राशयोविष्णोर्वासुदेवस्यमापतेः ॥ ९ ॥ निर्विकारतयात्यंतशुद्ध
त्वाच्चिद्घनोऽव्ययः ॥ नकर्तापेरकोनायंकुत्रापिपरमार्थतः ॥ १० ॥ देहाद्यध्यासतःपुंसोभ्रांत्याकर्तृत्वभोक्तृते ॥ अतःसर्वाणिशास्त्राणिह्यविद्व
द्विषयाणिच ॥ ११ ॥ समूलाध्यासबाधान्नविद्वानात्मनिविक्रियाम् ॥ कर्तृत्वाद्यात्मिकांकांचिदभिमन्यतउत्तमः ॥ १२ ॥ अर्जुनःकर्तृतां
स्वस्मिन्विष्णौप्रेरकतांतथा ॥ आरोप्यचोभयत्रापिदोषंहिंसानिमित्तकम् ॥ १३ ॥ आशशंकेऽथभगवाञ्ज्ञाताभिप्रायईश्वरः ॥ हंतिघातयती
त्येवमाचिक्षेपद्वयंहितत् ॥ १४ ॥ आत्मन्यारोप्यकर्तृत्वंप्रेरकत्वंमयीश्वरे ॥ माकार्षीर्दोषशंकांत्वमित्यभिप्रायईशितुः ॥ १५ ॥ २१ ॥

प्रमाभासस्तथैवच ॥ कुर्वेत्येवप्रमांयत्रतदसंभावनाकुतः ॥१३॥ इत्युक्तंसंप्रदायज्ञैर्वार्तिकेश्रीसुरेश्वरैः ॥ ननुव्यर्थस्तदाशास्त्रारंभोमानानपेक्षणे ॥ १४ ॥ शास्त्रयोनित्वसूत्रस्यवैयर्थ्यंचेतिचेन्नहि ॥ कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थमपेक्ष्यते ॥ १५ ॥ कल्पितंमानमेतेनस्वप्रकाशस्यकाक्षतिः कल्पितस्यैवसाजात्याकल्पितस्यविरोधिता ॥ १६ ॥ विरुद्धयोरधिष्ठानभूतस्यनविरोधिता ॥ तथाचकल्पितस्यैवाज्ञानादेर्विनिवर्तकः॥ १७ ॥ वृत्तिभेदस्तदुत्पत्त्यैशास्त्रारंभोऽपिसार्थकः ॥ तस्यतत्त्वमसीत्यादिवाक्याधीनतयैवच ॥ १८ ॥ शास्त्रयोनित्वसार्थक्यंतस्मात्सच्चित्सुखात्मनः॥

अनाशिनोऽप्रमेयस्यतस्माद्युद्ध्यस्वभारत ॥ १८ ॥

सर्वदाभासमानत्वात्स्वतःसिद्धस्वभास्वतः ॥ १९ ॥ सर्वाधिष्ठानभावेनतुच्छत्वंचनिराकृतम् ॥ यस्मात्पूर्वोक्तरीत्यास्तिचिदात्माव्यापको ऽच्युतः ॥ २० ॥ सर्वदैकरसोनित्यस्ततस्तन्नाशशंकया ॥ स्वधर्मेप्राक्प्रवृत्तस्ययुद्धेतस्मात्तवाधुना ॥ २१ ॥ नयुक्तोपरतिस्त्वेवमाहयुद्धाभ्य नुज्ञया ॥ युद्ध्यस्वेतिविधिर्नायंपूर्वप्राप्तानुवादतः ॥ २२ ॥ १८ ॥

INSTITUTE OF ADVANCED

शस्त्रादेरात्मनोनाशासामर्थ्यैहेतवोह्यमी ॥ अच्छेद्यत्वादयस्तेननित्यआत्माक्षरोऽव्ययः ॥ १ ॥ अन्योन्यनाशहेतूनिभूतान्यात्मानमांतरम् ॥ नोत्सहंतेयतोहंतुंनाशशंकामतस्त्यज ॥ २ ॥ नित्यत्वात्सर्वगोव्यापीव्यापित्वात्स्थाणुवत्स्थिरः ॥ स्थिरत्वाच्चक्रियाशून्यस्तस्मादात्माचिरं तनः ॥ ३ ॥ नित्यत्वान्नायमुत्पाद्योनप्राप्यःसर्वगोयतः ॥ स्थाणुत्वादविकार्योऽयमसंस्कार्योऽचलत्वतः ॥ ४ ॥ संस्कारस्तुगुणाधानंदोषापन

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्यएवच ॥ नित्यःसर्वगतःस्थाणुरचलोऽयंसनातनः ॥ २४ ॥

यनंचवा ॥ निर्गुणेनगुणाधानंस्वतःशुद्धेनचापरः ॥ ५ ॥ सत्तास्फूर्तिप्रदातास्तिशस्त्रादीनामयंयतः ॥ प्रेरकोऽतर्यामितयाकथमेनमिमा न्यपि ॥ ६ ॥ शस्त्रादीनिप्रकुर्युस्तंस्वव्यापारैकगोचरम् ॥ ७ ॥ २४ ॥

ननुमास्त्वात्मनोनाशस्तथाप्येषांमहात्मनाम् ॥ कथंभीष्मादिदेहानांनाशःकार्योमयेतिचेत् ॥ १ ॥ त्यक्त्काजीर्णानिवस्त्राणियथागृण्हात्यविकियः ॥ जनोनवानिश्रेष्ठानिजीर्णानिवयसातथा ॥ २ ॥ भीष्मादिकशरीराणित्यक्त्काभीष्मादिदेहिकः ॥ सर्वोत्कृष्टानिदेवादिशरीराणिप्रयात्यसौ ॥ ३ ॥ यावज्जीवंहिभीष्माद्याधर्मानुष्ठानखेदतः ॥ जर्जरीभूतदेहास्तेसर्वेस्वर्गाभिलाषिणः ॥ ४ ॥ जर्जराणिशरीराणिपातयित्वारणे भवान् ॥ दिव्यदेहप्रदानेनतेषामुपकृतिंपराम् ॥ ५ ॥ करोत्येवंहियुद्धेऽस्मिन्धर्म्येसर्वोपकारिणि ॥ माकार्षीर्दोषबुद्धित्वमित्यभिप्रायईशितुः

वासांसिजीर्णानियथाविहायनवानिगृण्हातिनरोऽपराणि ॥ तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही ॥ २२ ॥ नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः ॥ नचैनंक्लेदयंत्यापोनशोषयतिमारुतः ॥ २३ ॥

॥ ६ ॥ २२ ॥ ननुदेहविनाशेनकुतोनाशोनचात्मनः ॥ गृहदाहेयथादाहस्तद्भ्यंतरवर्तिनः ॥ १ ॥ तथेत्याशंक्यभगवानाहसर्वज्ञईश्वरः ॥ शस्त्राण्यंगविभागेनद्विधाकर्तुंचिदात्मकम् ॥ २ ॥ नशक्नुवंतिवन्हिर्नोभस्मीकर्तुंक्षमोविभुम् ॥ नचार्द्रीकरणेऽप्यापःशक्नुवंत्येनमांतरम् ॥ ३ ॥ विश्लिष्टांगकमात्मानंकर्तुंतद्वन्नमारुतः ॥ आत्मानंनीरसंकर्तुंशक्नोतिबलवत्तरः ॥ ४ ॥ प्रसिद्धानाशकाएतेप्रभवंतिनचात्मनि ॥ पृथिव्यब्वन्हिवायूनांनाशकत्वप्रसिद्धितः ॥ ५ ॥ तेषामप्यांतरोह्यात्मातंविनातेमृषात्मकाः ॥ ६ ॥ २३ ॥

इत्यात्मनोविकारित्वादशोच्यत्वमुदाहृतम् ॥ स्वीकृत्यापिविकारित्वमुच्यतेऽशोच्यताधुना ॥ १ ॥ यदिदुर्बोधमात्मानंश्रुत्वात्वंमन्मुखादपि ॥ नावबोद्धुंसमर्थोऽसिस्वीकरोषिमतांतरम् ॥ २ ॥ जातंप्रतिक्षणंनष्टंमन्यसेसौगतानुगः ॥ जातोऽयंवाविनष्टोऽयंमन्यसेलौकिकानुगः ॥ ३ ॥ तथापिनोचितःशोकःकिंपुनर्वैदिकेमते ॥ त्वयीदृशीकुदृष्टिर्नसंभवेत्पुरुषर्षभे ॥ ४ ॥ सौगतेवाथचार्वाकेमतेजन्मांतरंनहि ॥ कुतस्तेपापभीतिःस्यादृष्टदुःखंनसौगते ॥ ५ ॥ यदीदृशेमतेदुष्टेनैवशोकस्तवोचितः ॥ किंपुनःश्रौतसिद्धांतविदस्तेशोकितानहि ॥ ६ ॥ २६ ॥ ननु नित्यत्वपक्षेऽहंशोचामीहात्मनोयतः ॥ दृष्टादृष्टमहादुःखसंभवोऽस्तीतिभीतितः ॥ १ ॥ मैवंयतोऽस्यजातस्यस्वकृतैःसुकृतादिभिः ॥ लब्ध

अथचैनंनित्यजातंनित्यंवामन्यसेमृतम् ॥ तथापित्वंमहाबाहोनैवंशोचितुमर्हसि ॥ २६ ॥
जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच ॥ तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि ॥ २७ ॥

देहादियोगस्यस्थिरस्याप्यात्मनोध्रुवः ॥ २ ॥ तच्छरीरादिविच्छेदस्तद्धेतोःकर्मणःक्षये ॥ तथामृतस्यप्राग्देहकृतकर्मफलस्यच ॥ ३ ॥ भोगार्थंस्याद्ध्रुवंजन्मदेहिनोऽज्ञस्यसंसृतौ ॥ परिहर्तुमशक्येऽस्मिन्मृत्युजन्मादिगोचरे ॥ ४ ॥ तस्मादेवंविजानंस्त्वंकथंशोचितुमर्हसि ॥ जीवेयुश्चेत्सदैवैतेऽहन्यमानास्त्वयारणे ॥ ५ ॥ तदायुद्धायशोकस्तेयोग्यःस्यात्तन्निवृत्तये ॥ एतेस्वयंमरिष्यंतियदाकर्मक्षयेतदा ॥ ६ ॥ अवश्यंभावि निह्यर्थेनैवशोकस्तवोचितः ॥ ७ ॥ २७ ॥

तदेवमात्मनोयुक्त्याऽशोच्यत्वंप्रतिपादितम् ॥ अथेदानीमशोच्यत्वेऽप्यात्मनोभौतिकानिमान् ॥ १ ॥ देहानुद्दिश्यशोचामीत्याशंक्याहाच्युतोऽर्जुनम् ॥ जन्मनःप्राक्शरीराणिभूतकार्याणिसर्वथा ॥ २ ॥ अदृष्टानितथामध्येजनेरूर्ध्वंमृतेःपुरा ॥ उपलब्धानिसंत्यंतेऽप्यदृष्टानिभवंति च ॥ ३ ॥ यथास्वप्नेंद्रजालादौप्रतिभाससमानिवै ॥ भूतानीहतथाज्ञानात्प्रागूर्ध्वंनस्थितानिच ॥ ४ ॥ आदावंतेचयन्नास्तिवर्तमानेऽपितत्त

अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत ॥ अव्यक्तनिधनान्येवतत्रकापरिदेवना ॥ २८ ॥

था ॥ इतिन्यायेनमध्येऽपिनसंत्येतानिसर्वशः ॥ ५ ॥ तथाचात्यंततुच्छेषुतेषुतत्त्वविदस्तव ॥ कोवाद्युःखप्रलापोऽयंनकोऽपीहोचितस्तव ॥६॥ नहिस्वप्नेस्वपुत्रादीनुपलभ्यप्रबुद्धस्तद्वियोगेनशोचतित्वंकिमप्यहो ॥ ७ ॥ अदर्शनादापतितःपुनश्चादर्शनंगतः ॥ नासौतवनतस्य त्वंवृथाकापरिदेवना ॥ ८ ॥ शुद्धवंशोद्भवत्वेनशास्त्रीयंज्ञानमर्हसि ॥ प्राप्तुंत्वमत्रभगवानाहभारतशब्दतः ॥ ९ ॥ २८ ॥

दुर्विज्ञेयोऽयमात्माकिंत्वामेवैकमुपालभे ॥ साधारणेहिविभ्रांतिर्निमित्तेसतिदुःखदे ॥ १ ॥ शृणुत्वमात्मतत्त्वस्यदुर्ज्ञेयत्वमिहोच्यते ॥ एनंप्रकृतमात्मानमाश्चर्येणाद्भुतेनहि ॥ २ ॥ तुल्यंमायाविपर्यासकल्पनाधारमक्षतम् ॥ शास्त्राचार्योपदेशाभ्यांसर्वद्वैतनिषेधतः ॥ ३ ॥ वेदांतवाक्यजन्यायांधीवृत्तौप्रतिबिंबितम् ॥ समाधिपरिपाकेनकश्चिच्छांत्यादिसंयुतः ॥ ४ ॥ पश्यत्येनंनसर्वोऽपिदौर्लभ्यंतत्त्वदर्शिनः ॥ यत्पश्यतितदाश्चर्यवदित्येवंक्रियान्वयि ॥ ५ ॥ तथात्मदर्शनंयच्चतदप्याश्चर्यवद्यतः ॥ यत्स्वरूपान्मृषाभूतंसत्यस्यव्यंजकंविभोः ॥ ६ ॥ यःपश्यतिसआश्चर्यवन्निरीक्ष्योमुमुक्षुभिः ॥ यतोऽसौतत्त्वविद्ब्रह्मीभूतोऽप्यज्ञवदेवच ॥ ७ ॥ सदाचारेप्रवृत्तःसन्देहवानिवलक्ष्यते ॥ आत्मातद्विच्चतज्ज्ञानमेतदाश्चर्यवच्चयम् ॥ ८ ॥ दुर्विज्ञेयमतोह्येनंजानीयाःकथमंजसा ॥ तथोपदेष्टुर्दौर्लभ्याद्दुर्विज्ञेयइतोऽप्यसौ ॥ ९ ॥ यआत्मानंविजानातिसब्रूयान्ने

आश्चर्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः ॥

तरोजनः ॥ यतोऽज्ञस्योपदेष्टृत्वासंभवोभ्रांतिशालिनः ॥१०॥ ज्ञानीयस्तुसमाधिस्थःसकथंप्रायशोवदेत् ॥ व्युत्थितोऽपिपरेणासौज्ञातुंशक्यःकथंसुधीः ॥ ११ ॥ यथाकथंचिज्ज्ञातोऽपिपूजाख्यात्यादिकेफले ॥ निःस्पृहत्वाच्चनब्रूयात्कथंचित्करुणावशात् ॥१२॥ ब्रुवन्नीशवदेवासौदैशिकोऽत्यंतदुर्लभः ॥ यथावेत्तितथावक्तियएनंसाक्षिणंपरम् ॥ १३ ॥ सर्वाज्ञजनभिन्नोऽसौसआश्चर्यवदेवहि॥अनिर्देश्यस्यशुद्धस्यनिर्विकल्पस्यसाक्षिणः ॥ १४ ॥ आत्मनोवचनंयत्स्यात्तदाश्चर्यवदेवच ॥ विनाशक्त्यादिनातत्त्वमादिवाक्यैःप्रबोधनम् ॥ १५ ॥ यद्द्वैतात्मतत्त्वस्यतदाश्चर्यवदित्यहो ॥ शब्दशक्तेरचिंत्यत्वात्तदुक्तंब्रह्मविद्वरैः ॥ १६ ॥ दुर्बलत्वादविद्यायाआत्मत्वाद्बोधरूपिणः ॥ शब्दशक्तेरचिंत्यत्वाद्विघ्नस्तं

मानातीतंयतोब्रह्मवस्तुदुर्बोधमद्वयम् ॥ तस्मात्प्रसंगमापाद्यतदेवाहपुनःपुनः ॥ १ ॥ कथंनुनामजीवानांमग्नानांशोकसागरे ॥ बुद्धिगोचर
मापन्नंतत्त्वंबंधाद्विमुक्तये ॥ २ ॥ स्यादेवंभगवान्स्वीयंकृपालुत्वंव्यनक्त्यजः ॥ पौनरुक्त्यमतोनैषांश्लोकानांशब्दतोऽर्थतः ॥ ३ ॥ इंद्रियै
र्व्यज्यतेस्थूलदेहादिर्व्यक्तमुच्यते ॥ आत्मारूपादिहीनत्वान्नायंप्रत्यक्षगोचरः॥ ४ ॥ प्रत्यक्षेणगृहीतोऽर्थोऽनुमेयःस्यात्सवैकचित् ॥ नाप्रत्यक्षे
ऽनुमेयत्वमचिंत्येऽतींद्रियेभवेत् ॥ ५ ॥ रूपादिभानकार्येणचिंताहींलिंगदेहकः ॥ चक्षुरादिसमूहात्मातद्भिन्नोऽयमिहाथवा ॥ ६ ॥ नवासा

अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ॥ तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि ॥ २५ ॥

मान्यतोदृष्टानुमानविषयोऽप्ययम् ॥ निर्धर्मकतयावाचामगोचरतयातथा ॥ ७ ॥ यद्विक्रियावदक्ष्यादितदर्थापत्तिगोचरम् ॥ अयंतुविक्रिया
शून्योनार्थापत्त्यादिगोचरः ॥ ८ ॥ वेदेनापिसआत्मायमव्यक्तादिस्वरूपतः ॥ प्रतिपाद्यतआबोधंतात्पर्येणनशक्तितः ॥ ९ ॥ विकारंस्थूल
सूक्ष्माख्यंकार्यभावादवस्थितिम् ॥ अर्हतीतिविकार्यवाऽस्त्वज्ञानंत्रिगुणात्मकम् ॥ १० ॥ कारणाख्यंशरीरंयत्सुप्तौसाक्ष्येकगोचरम् ॥ तदन्यः
प्रत्यगात्मायमविकार्यउदाहृतः ॥ ११ ॥ एवंदेहत्रयादन्यमात्मानंसर्वसाक्षिणम् ॥ ज्ञात्वानैवंमृषाशोकंकर्तुमर्हसिबोधवान् ॥ १२ ॥ २५ ॥

इदानींसकलप्राणिसमानस्यभ्रमस्यच ॥ निवृत्तिसाधनंप्रोक्तमुपसंहरतीश्वरः ॥१॥ सर्वस्यप्राणिजातस्यवद्ध्यमानेऽपिदेहके ॥ देहीनवद्ध्यतेय
स्मान्नियतंशुद्धवंशज ॥ २ ॥ तस्मात्सर्वाणिभूतानिभीष्मादीनिममत्वतः ॥ उद्दिश्यत्वंनयोग्योऽसिशोचितुंमूढबुद्धिवत् ॥ ३ ॥ नाशस्यापरि
हार्यत्वात्स्थूलस्याशोच्यतेरिता ॥ लिंगस्याशोचिताचात्मवदवद्ध्यत्वहेतुना ॥ ४ ॥ आमोक्षंनविनाशोऽस्यलिंगदेहस्यसंभवेत् ॥ सुषुप्तौप्र
लयेचास्यसूक्ष्मरूपेणसंस्थितिः ॥ ५ ॥ नस्थूलस्यनसूक्ष्मस्यनात्मनोवास्तिशोच्यता ॥ अतोनिरास्पदःशोकोनकार्यःसुविवेकिभिः ॥६॥ तदेवं
स्थूलसूक्ष्माभ्यांतादात्म्याद्ध्यासतोनृणाम् ॥ मिथ्याभूतोऽपिसंसारःसत्यवद्भासतेभ्रमात् ॥७॥ अविद्याकारणंतत्रसर्वानर्थैकबीजभूः ॥ सर्वसा
धारणाभ्रांतिरर्जुनस्यापिबोधतः ॥ ८ ॥ निराकार्यातताह्येवंदेहत्रयविवेकतः ॥ आत्मस्वरूपंभगवानुक्तवान्स्वकृपावशात् ॥ ९ ॥ ३० ॥

देहीनित्यमवध्योऽयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि ॥ ३० ॥
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि॥धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यते ॥ ३१ ॥

देहत्रयविवेकेनसर्वसाधारणोभ्रमः ॥ निराकृतोऽथयुद्धाख्येस्वधर्मेऽधर्मताभ्रमम् ॥१॥ अर्जुनस्यनिराकर्तुमसाधारणमीश्वरः ॥ स्वधर्मत्वेनयुद्ध
स्याधर्मत्वाभावमाहवै ॥ २ ॥ वस्तुतत्त्वमवेक्ष्यैवकार्ययुद्धंनकेवलम् ॥ किंतुयुद्धादवैमुख्यंक्षात्रंधर्महिशास्त्रतः ॥ ३ ॥ पर्यालोच्यस्वधर्मात्त्वंन
निवर्तितुमर्हसि ॥ यस्माद्रणादवैमुख्यधर्मयुक्तान्नृपस्यच ॥ ४ ॥ नश्रेयःसाधनंसम्यग्विद्यतेऽन्यद्धिशास्त्रतः ॥ जयद्वारेणसंग्रामःप्रजारक्षणतस्त
था ॥ ५ ॥ विप्रभक्त्यायतःक्षात्रधर्मनिर्वाहकोभवेत् ॥ तथोक्तोमनुनाधर्मोराज्ञोयुद्धादिलक्षणः ॥ ६ ॥ समोत्तमाधमैराजाचाहूतःपालयन्प्रजाः॥
ननिवर्तेतसंग्रामात्क्षात्रंधर्ममनुस्मरन् ॥ ७ ॥ नचश्रेयोऽनुपश्यामीत्येतेनैवनिराकृतम् ॥ ८ ॥ ३१ ॥

मोहहानतः ॥ १७ ॥ अगृहीत्वैवसंबंधमभिधानाभिधेययोः ॥ हित्वानिद्रांप्रबुद्धयंतेसुषुप्तेर्बोधिताःपरैः ॥ १८ ॥ जाग्रद्वन्नयतःशब्दंसुषुप्तेवे त्तिकश्चन ॥ ध्वस्तेऽतोवचसाज्ञानेब्रह्मास्मीतिभवेत्फलम् ॥ १९ ॥ अविद्याघातिनःशब्दाद्याहंब्रह्मेतिधीर्भवेत् ॥ नश्यत्यविद्ययासार्धंहत्वारोग मिवौषधम् ॥ २० ॥ एवंवक्तव्यआत्मायंवक्ताचवचनक्रिया ॥ त्रयमाश्चर्यवद्यस्माद्दुर्विज्ञेयइतोऽपिसः ॥ २१ ॥ अन्योमुमुक्षुर्वक्तारंयथाशा स्त्रमुपेत्ययः ॥ वेदांतवाक्यतात्पर्यंनिश्चिनोतिविचारतः ॥ २२ ॥ श्रुत्वाचैनंतथामत्वानिदिध्यास्यनिरंतरम् ॥ साक्षात्करोतितुर्यंस्वंतदाश्चर्यव दित्यपि ॥ २३ ॥ श्रोतव्यंश्रवणंश्रोताचैतदाश्चर्यवच्चयम् ॥ ननुशृणोतियश्चैनंमनुतेध्यायतीहयः ॥ २४ ॥ सवेदात्मानमित्यत्रकिमाश्चर्यमिवे

आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९ ॥

तिचेत् ॥ कश्चिदेनंमुमुक्षुर्हिश्रवणादिपरोऽपिसन् ॥२५॥ प्रतिबंधवशान्नैनंवेदस्वात्मानमद्भुतम् ॥ ननुतर्हिनकोऽप्येनंजानीयादितिचेन्नहि॥२६॥ जायतेतत्त्वविज्ज्ञानंश्रवणादिप्रकुर्वताम् ॥ प्रतिबंधक्षयादेवतदुक्तंवार्तिकेस्फुटम् ॥ २७ ॥ कुतस्तद्ज्ञानमितिचेत्तद्धिबंधपरिक्षयात् ॥ असाव पिचभूतोवाभावीवावर्ततेऽथवा ॥ २८ ॥ भूतोहिरण्यगर्भस्यवामदेवस्यभाव्ययम् ॥ वर्ततेश्वेतकेतोश्चतत्क्षयोऽप्यतिदुर्लभः ॥ २९ ॥ नचैवक श्चिदित्यस्यसर्वत्रैवान्वयोऽस्तुवा ॥ कश्चित्पश्यतिनोवक्तिकश्चित्पश्यतिवक्तिच ॥ ३० ॥ कश्चिच्छृणोतितद्वाक्यंतदर्थंवेत्तितत्त्वतः ॥ कश्चि च्छ्रुत्वापिनोवेत्तिकश्चित्सर्वंबहिष्कृतः ॥ ३१ ॥ एवंपंचप्रकाराश्चप्रोक्ताभगवतास्फुटम् ॥ ३२ ॥ २९ ॥

एवंयुद्धपरित्यागाद्धर्मत्यागश्चतिंपराम् ॥ उच्चैदानींसतांनिंदाफलंदुःसहमुच्यते ॥ १ ॥ देवर्ष्यादीनिभूतानिदीर्घकालामनर्थदाम् ॥ नधर्मात्मान शूरोऽयमित्येवंहिपरस्परम् ॥ २ ॥ अकीर्तिंकथयिष्यंतिगुणैःसंभावितस्यते ॥ ननुस्वमृत्युसंदेहाद्रणेतद्वर्जनायच ॥ ३ ॥ अकीर्तिरपिसोढव्याप्रिया ःप्राणाहिदेहिनाम् ॥ तथाचमृत्युभीतस्यकिमकीर्त्येतिचेच्छृणु ॥ ४ ॥ धर्मात्माशूरइत्येवमादिभिःप्रवरैर्गुणैः ॥ लोकेबहुमतस्यास्याधिकाकीर्तिर्मृतेरपि ॥ ५ ॥ महादेवादिसंग्रामेत्वंचसंभावितोयतः ॥ अतोऽप्यकीर्तिजंदुःखंजातुसोढुंनशक्ष्यसि ॥ ६ ॥ ३४ ॥ ननुनिंदंतुमांलोकाउदासी

अकीर्तिंचापिभूतानिकथयिष्यंतितेऽव्ययाम् ॥ संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ॥३४॥
भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः ॥ येषांचत्वंबहुमतोभूत्वायास्यसिलाघवम् ॥ ३५ ॥

नाःपृथग्जनाः ॥ भीष्मद्रोणादयःशूरास्तोष्यंत्येवेतिचेच्छृणु ॥ १ ॥ शल्यकर्णादिशूरेभ्योभयाद्युद्धात्पराङ्मुखम् ॥ मंस्यंतेत्वांनकृपयाभीष्मद्रोणादयोऽपिते ॥ २ ॥ बहुमन्यंतएतेमांजिष्णुंभीष्मादयोरणे ॥ कथंभीतंहिमंस्यंतइत्याशंक्याहकेशवः ॥ ३ ॥ येषात्वंभीष्ममुख्यानांगुणैराढ्यतरोमतः ॥ अभूस्तेषांपरावृत्तोलघुतामेवयास्यसि ॥ ४ ॥ ३५ ॥

ननुभीष्मादयःशूरामामन्यंतांगुणैर्युतम् ॥ शत्रवोबहुमंस्यंतेमांतुदुर्योधनादयः ॥ १ ॥ यतोयुद्धनिवृत्त्यैषाप्राणरक्षेतिचेच्छृणु ॥ तवलोकप्र
सिद्धंयत्सामर्थ्यंशत्रवस्तव ॥ २ ॥ निंदंतस्तेवदिष्यंतिबहुशब्दांश्चनिंदितान् ॥ एतेषंढतिलाएवमादीन्वक्तुमयोग्यकान् ॥ ३ ॥ किंततो
ऽधिकंदुःखमिहलोकेपरत्रवा ॥ ४ ॥ ३६ ॥ ननुतर्ह्यकृतेयुद्धेनिंदाशत्रुकृताभवेत् ॥ कृतेमध्यस्थनिंदास्याद्भीष्मादीनांवधादपि ॥ १ ॥ इत्ये
वंस्यादुभयतःपाशारज्जुर्ममेतिचेत् ॥ स्वधर्मकरणान्निंदानमध्यस्थकृताभवेत् ॥ २ ॥ नहिस्वधर्मनिष्ठानांनिंदाकुत्रापिकाचन ॥ जयेपराजयेवा
तेलाभश्रौव्याद्रणायभोः ॥ ३ ॥ उत्थातुमुचितंतस्मादुत्तिष्ठनचतेक्षतिः ॥ जेष्यामिवामरिष्यामीत्येवंकृत्वाविनिश्चयम् ॥ ४ ॥ ३७ ॥

अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः ॥ निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिम् ॥ ३६ ॥
हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीम् ॥ तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः ॥३७॥
सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ ॥ ततोयुद्धायय्युज्यस्वनैवंपापमवाप्स्यसि ॥ ३८ ॥

तत्रस्वधर्मइत्येवंयुद्ध्यमानस्यतेपरम् ॥ उपदेशंशृणुत्वंमेसुखदुःखेसमेइति ॥ १ ॥ सुखेतत्कारणेलाभेतन्निमित्तेजयेऽपिच ॥ अकृत्वारागमेवंचदुः
खेतत्कारणेक्षतौ ॥ २ ॥ तन्निमित्तेऽजयेचाप्यकृत्वाद्वेषंततःपरम् ॥ युद्धायभवसन्नद्धोनैवंपापमवाप्स्यसि ॥ ३ ॥ फलाभिलाषयाकुर्वन्गुरु
विप्रवधादिकम् ॥ प्राप्नोतिकिल्बिषंघोरंतन्निमित्तमयंपुमान् ॥ ४ ॥ विनाफलाभिलाषंतुधर्मइत्येवमाचरन् ॥ नैवंपापमवाप्नोतिमहेशाज्ञानु
पालनात् ॥ ५ ॥ हतोवेत्यादिनाप्रोक्तंफलंतच्चानुषंगिकम् ॥ नकाम्यंकर्मसंग्रामःकिंतुनित्यंस्वधर्मतः ॥ ६ ॥ ३८ ॥

ननुधर्मधियामास्तुयुद्ध्यमानस्यमेशुभम् ॥ तथापियुद्धकार्यत्वोपदेशस्तेनमांप्रति ॥ १ ॥ योग्योयस्मात्पुराज्ञस्यकर्माक्षेपस्त्वयोदितः ॥ न ह्यकर्तृस्वरूपोऽहमितिज्ञानेपुनर्भवेत् ॥ २ ॥ युद्धंकृत्वाफलंभोक्ष्यइतिज्ञानंविरोधतः ॥ तस्मात्तेयौगपद्येनमांप्रतिज्ञानकर्मणोः ॥ ३ ॥ उपदेशःकथंयोग्यःस्यादित्यत्राहमाधवः ॥ ज्ञानकर्मोपदेशःस्यादवस्थाभेदतोयतः ॥ ४ ॥ एकंप्रत्यपिशास्त्रीयांव्यवस्थांशृण्वतोऽर्जुन ॥ नत्वेवेत्य तआरभ्यतुभ्यमेषापुरोदिता ॥ ५ ॥ तत्त्वंसंख्यायतेसर्वोपाधिशून्यतयानया ॥ संख्योपनिषदेतस्यांप्रतिपाद्यःपरःपुमान् ॥ ६ ॥ सांख्यस्त न्मात्रविषयंज्ञानमज्ञाननाशकम् ॥ मयोक्तंत्वांप्रतीत्येवंज्ञानिनःकर्मनोच्यते ॥ ७ ॥ यद्येवंतेमदुक्तेऽर्थेचित्तदोषान्नधीर्भवेत् ॥ तदातद्दोषनाशा

एषातेऽभिहितासाख्येबुद्धिर्योगेत्विमांशृणु ॥ बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि ॥ ३९ ॥

र्थंतत्त्वज्ञानोदयायच ॥ ८ ॥ कर्मयोगोह्यनुष्ठेयस्त्वयाधीशुद्धिकारकः ॥ तस्मिन्योगेतुकर्तव्यामिमांनिष्कामशालिनीम् ॥ ९ ॥ सर्वत्रसमता रूपांबुद्धिंत्वंविस्तराच्छृणु ॥ तुनाबुद्धेःपुरोक्तायाभेदोऽस्याःसूच्यतेधियः ॥ १० ॥ तेनशुद्धधियोज्ञानंकर्माशुद्धधियःस्मृतम् ॥ ययानिश्चयरू पिण्याबुद्ध्यायुक्तःस्वकर्मसु ॥ ११ ॥ बंधंकर्मनिमित्तंत्वमाशयाशुद्धिलक्षणम् ॥ प्रतिबंधंनिजज्ञानेप्रकर्षेणैवहास्यसि ॥ १२ ॥ धर्माधर्माख्य कर्मैववंधंतंत्वंप्रहास्यसि ॥ ईशप्रसादतस्तत्त्वज्ञानलाभसुखेनवा ॥ १३ ॥ ३९ ॥

ननुभीष्मादिभिःसार्धंगुरुभिर्नोचितोरणः ॥ स्वधर्मोऽप्यतिनिंद्यत्वादित्याशंक्याहकेशवः ॥ १ ॥ स्वप्रयत्नंविनैवेत्थंभीष्मादिप्रतियोगिकम् ॥ कीर्त्यादिसाधनंयुद्धंप्रतियोगितयाचये ॥ २ ॥ लभंतेक्षत्रियास्तेवैभवंतिसुखभागिनः ॥ प्रतिबंधंविनास्वर्गहेतुर्युद्धमिदंयतः ॥ ३ ॥ आततायितयातेषांभीष्मादीनांवधेतव ॥ नदोषोऽस्तितदेवोक्तंमनुनाधर्मभास्वता ॥ ४ ॥ गुरुंवाबालवृद्धंवाब्राह्मणंवाबहुश्रुतम् ॥ आततायिनमायांतंहन्यादेवाविचारयन् ॥ ५ ॥ आततायिनमायांतमपिवेदांतपारगम् ॥ जिघांसंतंजिघांसीयान्नतेनब्रह्महाभवेत् ॥ ६ ॥ नाततायिवधेदोषोहंतुर्भवतिकश्चन ॥ गुरुणाब्राह्मणेनापिबहुज्ञेनमहर्षिणा ॥ ७ ॥ भीष्मस्याप्यभवद्युद्धंजामदग्न्येनतेगुरोः ॥ अतस्तवापिशास्त्रेणयुद्धंकार्यतयेष्यते ॥

यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतम् ॥ सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशम् ॥ ३२ ॥
अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ॥ ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ॥ ३३ ॥

८ ॥ ३२ ॥ ननुयुद्धफलंनाहमाकाक्षेतन्मयाकथम् ॥ युद्धंकार्यंवृथेत्येवमाशंक्याहात्रदूषणम् ॥ १ ॥ यदिधर्म्यमिमंभीष्मद्रोणादिप्रतियोगिकम् ॥ आहूतोऽपिपरैरेवंसंग्रामंनकरिष्यसि ॥ २ ॥ भविष्यसिपरावृत्तोभीतोधर्मात्स्वयंतदा ॥ बहुजन्मार्जितंधर्ममित्यक्त्वाकीर्तिंचशाश्वतीम् ॥३॥ र्ननिवर्तेतसंग्रामादितिशास्त्रनिषेधतः ॥ विहिताचरणत्यागात्त्वंहिपापमवाप्स्यसि ॥ ४ ॥ यस्मात्तेत्वांपरावृत्तंहनिष्यंत्येवशत्रवः ॥ स्वधर्मत्याग तस्तस्मान्मात्वंदुष्कृतभाग्भव ॥ ५ ॥ ३३ ॥

एकस्यतूभयार्थत्वेस्यात्संयोगपृथक्त्वतः ॥ क्रत्वर्थस्यचयूपस्यपुमर्थत्वंयथेष्यते ॥ १२ ॥ नहिकश्चिद्विशेषोऽस्तिकाम्यनित्याग्निहोत्रयोः ॥ स्वतः किंतुफलेच्छायाभावाभावकृताभिदा ॥ १३ ॥ इदंपक्षद्वयंन्यस्तंवार्तिकेश्रीसुरेश्वरैः ॥ वेदानुवचनादीनामैकात्म्यज्ञानजन्मने ॥१४॥ तमेतमितिवाक्येननित्यानांवक्ष्यतेविधिः ॥ यद्वाविविदिषार्थत्वंकाम्यानामपिकर्मणाम् ॥ १५ ॥ तमेतमितिवाक्येनसंयोगस्यपृथक्कृतः ॥ तथाचकाम्यकर्मापिसर्वांगैःसंयुतंयतः ॥ १६ ॥ फलाभिसंधिनाकार्यंनतुनिष्कामबुद्धिना ॥ एवंसत्यंगवैगुण्यहेतुकःप्रत्यवायकः ॥ १७ ॥ नास्त्येवासेश्वरा

स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ॥ ४० ॥

र्थस्यकर्मणःशुद्धिकारिणः ॥ शुद्ध्यर्थस्यास्यधर्मस्यस्वल्पमप्येषुकर्मसु ॥ १८ ॥ तमेतमितिवाक्येनविहितेष्वप्यनुष्ठितम् ॥ यथाशक्तीश्वरार्थंसच्चा यतेसंसृतेर्भयात् ॥ १९ ॥ हरिप्रसादसंसिद्ध्याकर्तारंपरिरक्षति ॥ सर्वपापप्रसक्तोऽपिध्यायन्निमिषमच्युतम् ॥ २० ॥ भूयस्तपस्वीभवतिपंक्ति पावनपावनः ॥ इत्युक्तत्वादतोहेतोःकर्मबंधंप्रहास्यसि ॥ २१ ॥ ४० ॥

ननुतमेतमित्यादि श्रुत्याविविदिषाधियौ ॥ उभेउद्दिश्यसंयोगष्टथक्त्वात्सर्वकर्मणाम् ॥ १ ॥ विनियोगःकृतस्तत्रधीशुद्धेर्द्वारभावतः ॥ तया मांप्रत्यनुष्ठानंकर्मणांचविधीयते ॥ २ ॥ तद्यथेहेतिवाक्येनफलनाशस्यसंभवात् ॥ बुभुत्सादिफलंकर्मकाम्यंसर्वांगसंयुतम् ॥ ३ ॥ अनुष्ठेयं चयत्किंचिदंगासंपत्तिहेतुकम् ॥ स्याद्यतस्तत्रवैगुण्यंकिंचैकेननरेणच ॥ ४ ॥ यज्ञेनेत्यादिवाक्येनविहितानाहिकर्मणाम् ॥ सर्वेषामायुषोंऽतेप्य शक्यत्वात्कर्तुमेवच ॥ ५ ॥ बंधंप्रहास्यसीत्येवंफलस्याशाकुतोमम ॥ इत्याशंक्याहभगवान्नारायणउदारधीः ॥ ६ ॥ इहनिष्कामकर्माख्येश्रे

नेहाभिक्रमनाशोऽस्तिप्रत्यवायोनविद्यते ॥

योमार्गेसुनिश्चिते ॥ अभिक्रमःकर्मफलंकर्मणारभ्यतेयतः ॥ ७ ॥ तद्यथेहेतिवाक्येनतस्यनाशोनहीरितः ॥ एतत्फलस्यधीशुद्धेर्भोग्यत्वाभाव तोऽपिच ॥ ८ ॥ तद्यथेहेतियानिंदासाफलेनतुकर्मणि ॥ फलेच्छांतुपरित्यज्यकृतंकर्मविशुद्धिकृत् ॥ ९ ॥ प्रत्यवायोंऽगवैगुण्यंहेतुर्वैगुण्यमत्रन ॥ तमेतमितिवाक्येननित्यानांविनियोगतः ॥ १० ॥ बुभुत्सांप्रतिहेतुत्वंकाम्यानामपिकर्मणाम् ॥ संयोगस्यष्टथक्त्वाच्चफलसंगविवर्जनात् ॥११॥

अनिश्चयवतांनानाप्रतिबंधवशान्नसा ॥ व्यवसायात्मिकाबुद्धिर्भवतीत्याहमापतिः ॥ १ ॥ यामिमांवक्ष्यमाणांहिवाचंश्रवणशोभनाम् ॥ आपातरमणीयांचप्रपुष्पितपलाशवत् ॥ २ ॥ देहेंद्रियादिसंबंधरूपंजन्मददातिया ॥ तदधीनंचयत्कर्मतदधीनंफलंतथा ॥ ३ ॥ ददातीतिघटी यंत्रवदविच्छेदतश्रताम् ॥ सुधापानोर्वशीक्रीडासुगंधादिनिबंधनः ॥ ४ ॥ भोगस्तद्धेतुरैश्वर्यंदेवादिस्वामितातयोः ॥ प्राप्तिंप्रतिक्रियाभेदाः साधनत्वेनयेमताः ॥ ५ ॥ तैर्विस्तृतांकर्ममयींप्रवदंत्यविपश्चितः ॥ विचारजन्यतात्पर्यज्ञानशून्याःसुरागिणः ॥ ६ ॥ येऽर्थवादाःश्रुतौसंतिरोचनार्थाहिकर्मणाम् ॥ अस्त्यक्षय्यंहवैचातुर्मास्ययाजिनइत्यपि ॥ ७ ॥ तेष्वेववेदतात्पर्यमितिविश्वासतत्पराः ॥ पशुपुत्रादिहेतुभ्यःकर्मभ्योनान्य

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः ॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनः ॥ ४२ ॥
कामात्मानःस्वर्गपराजन्मकर्मफलप्रदाम् ॥ क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ॥ ४३ ॥
भोगैश्वर्यप्रसक्तानांतयापहृतचेतसाम् ॥ व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ॥ ४४ ॥

दस्तितत् ॥ ८ ॥ ज्ञानंवातत्फलंवानश्रुतेःकर्मपरत्वतः ॥ प्रतिबंधात्तइत्येवंविरुद्धार्थैकभाषिणः ॥ ९ ॥ विषयाकुलचित्तत्वात्सदाकाममयाःशठाः ॥ स्वर्गएवपरोयेषांपुरुषार्थतयामतः ॥ १० ॥ वैराग्यादिबहिर्भूतामूढामोक्षकथामपि ॥ नक्षमंतेततस्तेषांभोगादौलग्नचेतसाम् ॥ ११ ॥ तयापूर्वोक्तयावाचायेषामाच्छादितंमनः ॥ समाधिविषयाबुद्धिर्नास्त्येषांनिश्चयात्मिका ॥ १२ ॥ अहंब्रह्मेत्यवस्थानंसमाधिस्तन्निबंधना ॥ व्यवसायात्मिकाबुद्धिस्तेषांनोत्पद्यतेऽथवा ॥ १३ ॥ ४२ ॥ ४३ ॥ ४४ ॥

ननुमाभूत्सकामानांव्यवसायात्मिकामतिः ॥ निष्कामानांतयाबुद्ध्यानित्यकर्मादिकुर्वताम् ॥ १ ॥ स्वर्गाप्तौकर्मसामर्थ्यात्प्रतिबंधःसमोभवेत् ॥
तेषामप्यात्मविज्ञानेइत्याशंक्याहसर्वभूः ॥ २ ॥ गुणानांकर्मसंसारस्त्रयाणांकाममूलकः ॥ सप्रकाश्यतयायेषांविषयस्तादृशास्त्रयः ॥ ३ ॥ कर्म
कांडात्मकावेदास्तत्तत्कामानुसारतः ॥ बोधयंतिफलंकामाभावेनिष्कामतापराः ॥ ४ ॥ अवदाततयात्वंतुनिष्कामोभवसर्वदा ॥ एतेनकर्मसा
मर्थ्यात्संसारोऽस्तीत्यपाकृतम् ॥ ५ ॥ ननुद्वंद्वप्रतीकारसिद्धयेऽपेक्ष्यतेऽखिलम् ॥ वस्त्राशनादिचेत्तर्हिकथंनिष्कामतेतिचेत् ॥ ६ ॥ मात्रास्पर्शा

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन ॥ निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान् ॥ ४५ ॥

स्तिवहेत्युक्तन्यायेनैवविवेकतः ॥ भवद्वंद्वसहिष्णुस्त्वमालंब्यासंगसाक्षिणम् ॥ ७ ॥ सोढव्यंवाकथंदुःखमसह्यमितिचेच्छृणु ॥ यत्सत्त्वमचलंधैर्यं
तदालंबीसदाभव ॥ ८ ॥ अलब्धलाभोयोगःस्यात्क्षेमोलब्धस्यरक्षणम् ॥ तच्छून्योभवधीवृत्तिविक्षेपकमलंत्यज ॥ ९ ॥ जीविष्यामिकथंनैवंचिंताका
र्यायतोहरिः ॥ सर्वांतर्यामिरूपेणयोगक्षेमकरस्तव ॥ १० ॥ आत्माध्येयतयायस्यपरमेश्वरसंज्ञकः ॥ वर्ततेपालकत्वेनसदासत्वंभवात्मवान् ॥ ११ ॥
सदाकृष्णपदालंबियस्यचेतःसमाहितम् ॥ सनिर्द्वंद्वःससत्वस्थोनिःसंकल्पःसदासुखी ॥ १२ ॥ ४५ ॥

सर्वकामपरित्यागाद्वंचितोऽहंसुखांशतः ॥ कर्मजात्कर्मकुर्वेश्चेत्येवंमामानसंकुरु ॥ १ ॥यावत्स्यात्स्नानपानादिफलंक्षुद्रजलाशये ॥ तावत्फलंभवत्येवमहत्यपिजलाशये ॥ २ ॥ यथाद्रिनिर्झराःसर्वेसवंतस्तेकचिद्भुवि ॥ मिलंत्येकत्रतत्रापिप्रत्येकंयत्प्रयोजनम् ॥ ३ ॥ तत्सर्वंतत्रसुतरामेकत्रातिजलाशये ॥ एवमेवागमोक्तेषुसर्वेषुकाम्यकर्मसु ॥ ४ ॥ यावानर्थोऽस्तिहैरण्यगर्भानंदावसानकः ॥ तावान्ब्रह्माद्वयानंदंसाक्षात्कृतवतो विदः ॥ ५ ॥ ब्राह्मणस्यभवत्येवब्रह्मीभूतस्यसर्वथा ॥ ६ ॥ यथाकृतायोविजितोऽस्तियेनाधरेऽपिसंयांतितमेवचायाः ॥ तथात्मविज्ञंसुकृतैकरा

यावानर्थउदपानेसर्वतःसंप्लुतोदके ॥ तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ॥ ४६ ॥

शिंसंयांतिसर्वाणिसुखानिपुंसाम् ॥ ७ ॥ क्षुद्रानंदाःसमस्तास्तेब्रह्मानंदलवायतः ॥अविद्याकल्पितोपाधितारतम्यादनेकधा ॥ ८ ॥ ब्रह्मानंदस्तु सर्वत्रव्यापकःसत्यआंतरः ॥ जडदुःखानृताकारेप्रपंचेकुत्रवासुखम् ॥ ९ ॥ सच्चिदानंदमद्वैतसुखंब्रह्मैवसर्वगम् ॥ तथाचशुद्धचित्तस्यतवनिष्कामकर्मभिः ॥ १० ॥ आत्मज्ञानोदयेब्रह्मानंदप्राप्तिःस्वतोभवेत् ॥ सर्वानंदपरिप्राप्त्याक्षुद्रानंदलवेषुते ॥ ११ ॥ मास्तुकामोह्यतस्तत्त्वज्ञानलाभायसर्वथा ॥ ईश्वरार्पणयाबुद्ध्याकुरुकर्मानहंकृतिः ॥ १२ ॥ ४६ ॥

एतत्सिद्ध्यर्थमाहेशस्तमेतमितिवाक्यतः ॥ विहितानांफलैकत्वंकर्मणांशुद्धिकारिणाम् ॥ १ ॥ श्रेयोमार्गेऽथवावाक्येतमेतमितिवैदिके ॥ बुद्धिरेकैवसाध्यास्तितत्त्वनिश्चयरूपिणी ॥ २ ॥ चतुर्णामाश्रमाणांचसैवसाध्याविवक्षिता ॥ एकैवसांख्येयोगेचफलैक्यान्निश्चयात्मिका ॥ ३ ॥

व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन ॥ बहुशा
खाह्यनंताश्चबुद्धयोऽव्यवसायिनाम् ॥ ४१ ॥

विपरीतमतीनांसाबाधिकावेदवाक्यजा ॥ ईश्वराराधनेनैवतरिष्यामीहसंसृतिम् ॥ ४ ॥ इत्येकैवास्तिवाबुद्धिर्भक्तानांनिश्चयात्मिका ॥ इतरास्तुधियोबाध्यामिथ्याज्ञानवतांनृणाम् ॥ ५ ॥ कामभेदात्तथाशाखाभेदान्नानाभिदायुताः ॥ संसारानंत्यहेतुत्वादनंतामूढचेतसाम् ॥ ६ ॥ ४१ ॥

ननुनिष्कामकर्माणिकर्तव्यानिकुतोमम ॥ प्रयोजनमनुद्दिश्यनमंदोऽपिप्रवर्तते ॥ १ ॥ इतिन्यायाद्वरंकर्मानुष्ठानंफलवांछया ॥ किमर्थंनिष्फलंकर्मकर्तव्यमितिचेच्छृणु ॥ २ ॥ फलकामनयाकर्मकृतंजन्मादिहेतुकम् ॥ निकृष्टंतत्त्वविज्ञानहेतोर्निष्कामकर्मणः ॥ ३ ॥ यद्वात्मबुद्धियोगात्तत्कर्मदूरंयतोऽखिलम् ॥ निकृष्टंकिंपुनर्वाच्यंनैकृष्टंकाम्यकर्मणः ॥ ४ ॥ सर्वानर्थनिवर्तिन्यांबुद्धौतस्माद्धनंजय ॥ प्रतिबंधकपापस्यक्षयेणपरिरक्षकम् ॥ ५ ॥ निष्कामकर्मयोगंत्वंकर्तुमिच्छस्थिरोभव ॥ फलकामनयाकर्मयेकुर्वंत्यविचक्षणाः ॥ ६ ॥ कृपणास्तेसदाजन्ममृत्युग्रस्ताभवंतिते ॥ यथातिकृपणालोकेदुःखेनाप्यर्जितंधनम् ॥ ७ ॥ दानादिजनितंभोगंकर्तुंशक्ताभवंतिन ॥ तथात्यंतप्रयत्नेनकुर्वाणाःकर्मवैदि

दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय ॥ बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ॥४९॥ बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते ॥ तस्माद्योगाययुज्यस्वयोगःकर्मसुकौशलम् ॥ ५० ॥

कम् ॥ ८ ॥ क्षुद्रानंदाभिलाषेणवंचिताःकृपणाःसुखात् ॥ अहोदौर्भाग्यमेतेषांमौढ्यंचेत्याशयोहरेः ॥ ९ ॥ ४९ ॥ समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठति ॥ पुमांस्तस्यफलंयत्स्यात्तदत्रहरिणोच्यते ॥ १ ॥ समत्वप्रज्ञयायुक्तःसत्वशुद्ध्यात्मबोधतः ॥ जहातिपुण्यपापेद्वेसमूलेसफलेकृते ॥ २ ॥ जीवन्नेवपुमान्ब्रह्मीभूतोभवतिबोधवान् ॥ यस्मादेवंततःसम्यग्बुद्धियोगायसर्वथा ॥ ३ ॥ उद्युक्तोभवयोगोऽसौवर्तमानस्यकर्मसु ॥ मोक्षपर्यवसायित्वादतिदक्षोयतोमतः ॥ ४ ॥ ५० ॥

नन्वात्मबोधःसंपाद्योयदिनिष्कामकर्मभिः ॥ आनंदायतदातत्रयतितव्यंमुमुक्षुभिः ॥ १ ॥ आत्मबोधेकिमायासशतैःकर्मभिरेवचेत् ॥ मैवं ह्यशुद्धबुद्धेस्तेबुद्धिशोधककर्मणि ॥ २ ॥ मयेदंकार्यमित्येवास्तुबोधःकर्मकुर्वतः ॥ नचवेदांतवाक्यानांविचारेतेऽधिकारिता ॥ ३ ॥ कर्मापिकुर्वतःसम्यक्तत्फलेषुस्वरादिषु ॥ कर्मानुष्ठानकालेवाप्रागूर्ध्ववाकदाचन ॥ ४ ॥ मयेदमिहभोक्तव्यमितिबोधोऽपिमास्तुते ॥ ननुमयेदंभोक्तव्यमितिबुद्धिंविनापितत् ॥ ५ ॥ स्वसामर्थ्यात्फलंकर्मजनयिष्यतिचेच्छृणु ॥ फलकामनयाकर्मकुर्वन्नुत्पादकोभवेत् ॥ ६ ॥ माकर्मफलहेतु

कर्मण्येवाधिकारस्तेमाफलेषुकदाचन ॥ माकर्मफलहेतुर्भूर्मातेसंगोऽस्त्वकर्मणि ॥ ४७ ॥ योग स्थःकुरुकर्माणिसंगंत्यक्त्वाधनंजय ॥ सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते ॥ ४८ ॥

र्भूस्त्वंतुनिष्कामएवसन् ॥ निष्कामेनकृतंकर्मकृष्णार्पणधियास्वयम् ॥ ७ ॥ फलायकल्पतेनैवतथैवत्वंसदाकुरु ॥ फलंचेन्नेष्यतेतर्हिकिंस्याद्दुःखात्मकर्मणा ॥ ८ ॥ इतिबुद्ध्यातवप्रीतिर्माभूदकरणेकदा ॥ ९ ॥ ४७ ॥ कथंकर्तव्यमितिचेच्छृणुभूत्वासमाहितः ॥ योगस्थःसन्फलेकामं कर्तृत्वाभिमतिंतथा ॥ १ ॥ त्यक्त्वात्वंकुरुकर्माणिकृष्णार्पणधियासदा ॥ त्यक्त्वाहर्षंफलप्राप्तौफलासिद्धौविषादताम् ॥ २ ॥ कोऽसौयोगः सयत्रस्थःकर्मकुर्वन्नदुष्यति ॥ सिद्ध्यसिद्ध्योःसमत्वंयत्सयोगइहकथ्यते ॥ ३ ॥ ४८ ॥

धीशुद्धचैवंपरिप्राप्तवैराग्यस्यकदामम ॥ आत्मज्ञानोदयश्चैवमपेक्षायांवचःशृणु ॥ १ ॥ अविचारिततात्पर्यैरनेकश्रवणैस्तव ॥ धीःसंशयविप
र्यासैर्विक्षिप्तप्रागनेकधा ॥ २ ॥ यस्मिन्कालेविशुद्धयुत्थविवेकजनितेनच ॥ इहामुत्रफलेदोषदर्शनेनसमन्विता ॥ ३ ॥ त्यक्त्काविक्षेपमद्वै
ततत्त्वेऽत्यंतविनिश्चला ॥ जाग्रत्स्वप्नमनोराज्यवर्जिताब्रह्मणिस्थिता ॥ ४ ॥ अचलासुप्तिमूर्छादिलयशून्यासतीस्वयम् ॥ यद्वाऽसंभावनांत्यक्त्का

श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्चला ॥ समा
धावचलाबुद्धिस्तदायोगमवाप्स्यसि ॥ ५३ ॥

विपरीतमतिंतथा ॥ ५ ॥ निदिध्यासनसंपन्नातत्त्वेस्थास्यतिनिश्चला ॥ तस्मिन्कालेपरात्मैक्ययोगंवेदांतवाक्यजम् ॥ ६ ॥ अखंडसाक्षात्का
राख्यंसर्वयोगफलंपरम् ॥ अवाप्स्यसिस्थितप्रज्ञःकृतकृत्योभविष्यसि ॥ ७ ॥ ५३ ॥

उपलभ्यार्जुनःप्रश्नबीजंसर्वहितायच ॥ तत्त्वज्ञलक्षणंज्ञातुंप्रोवाचश्रीहरिंप्रति ॥ १ ॥ यान्येवजीवन्मुक्तानांलक्षणानिभवंतिहि ॥ तान्येवात्र
मुमुक्षूणांमोक्षोपायात्मकान्यपि ॥ २ ॥ ब्रह्मैवास्मीतिधीर्यस्यनिश्चलास्थितधीर्हिसः ॥ समाधिस्थस्यषष्ठीयंकर्मण्येवनकर्तरि ॥ ३ ॥ समाधि
स्थोव्युत्थितश्चस्थितप्रज्ञोद्विधोच्यते ॥ तत्राद्यःकेनचिन्हेनज्ञायतेऽन्यैर्जनैरपि ॥ ४ ॥ समाधिस्थस्यकाभाषालक्षणंभाष्यतेऽनया ॥ व्युत्थि
तोऽसौस्थितप्रज्ञःकिंप्रभाषेतवास्वयम् ॥ ५ ॥ स्तुतिनिंदादिविषयाञ्छब्दानज्ञविलक्षणान् ॥ किमासीतकथंचित्तनिरोधार्थंविनिग्रहम् ॥ ६ ॥

अर्जुनउवाच ॥ स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेश
व ॥ स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिम् ॥ ५४ ॥

इंद्रियाणांकरोत्येषव्यवहारेकथंव्रजेत् ॥ विषयान्कथमाप्नोतिस्वारब्धादागतान्सुधीः ॥ ७ ॥ लक्षणंभाषणंस्थानंव्रजनंचचतुर्थकम् ॥ चत्वा
रिकीदृशान्यस्यभिन्नान्यज्ञेभ्यइत्यलम् ॥ ८ ॥ एवंप्रश्नाहिचत्वारःसमाधिस्थस्यचाग्रिमः ॥ व्युत्थितस्यत्रयःप्रोक्ताःस्थितप्रज्ञस्यभागशः ॥ ९ ॥
त्वमेवैतादृशंगुह्यंरहस्यंवक्तुमर्हसि ॥ सर्वांतर्यामिभावेनसर्वसामर्थ्यवान्हरिः ॥ १० ॥ आव्हयन्केशवेत्येवंस्तूचयत्यर्जुनःसुधीः ॥ ११ ॥ ५४ ॥

एषांचतुर्णांप्रश्नानांक्रमेणाहोत्तरंहरिः ॥ कामान्संकल्पमुख्यान्वैमनोवृत्त्यात्मकान्यदा ॥ १ ॥ सर्वान्कारणबाधेनजहात्येतानशेषतः ॥ सर्वकाम विनिर्मुक्तोयदाभवतिनिश्चलः ॥ २ ॥ स्थितप्रज्ञःसमाधिस्थस्तदायंप्रोच्यतेमुनिः ॥ कामाअनात्मधर्मत्वात्त्यक्तुंयोग्याअशेषतः ॥ ३ ॥ यद्येतेह्यात्म धर्माःस्युस्त्यक्तुंशक्याःकथंतदा ॥ वन्ह्यौष्ण्यवत्स्वभावत्वात्स्वभावोदुरतिक्रमः ॥ ४ ॥ मनोधर्मायतस्त्वेतेत्यक्तुंशक्याःसुखेनवै ॥ तन्निरोधेनतेस

श्रीभगवानुवाच ॥ प्रजहातियदाकामान्सर्वान्पार्थमनोगतान् ॥ आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

र्वेनिरुद्धाःसंतिवैयथा ॥ ५ ॥ तत्त्यागेनतथात्यक्तास्तद्धर्माःस्युर्मृषात्मकाः ॥ ननुस्थितधियस्तर्हिसंतोषःकिंनिबंधनः ॥ ६ ॥ कामत्यागेभवे दित्याकांक्षायामाहकेशवः ॥ आत्मन्येवपरानंदेनत्वनात्मनितुच्छके ॥ ७ ॥ आत्मनास्वप्रकाशत्वाद्भासमानेनचित्त्वतः ॥ परितृप्तःसदानंद पुरुषार्थैकलाभतः ॥ ८ ॥ स्थितप्रज्ञःसमाधिस्थएवंलक्षणवाचिभिः ॥ शब्दैर्भाष्यतइत्याद्यप्रश्नोत्तरमुदाहृतम् ॥ ९ ॥ ५५ ॥

ननुसर्वस्यममचपापहानमपेक्षितम् ॥ पुण्यहानंनकस्यापिपुरुषार्थक्षयोऽन्यथा ॥ १ ॥ मैवंजन्मप्रदंपुण्यंहेयत्वेनविवक्षितम् ॥ नतुधीशोधकं पुण्यंमुमुक्षोरीश्वरार्पितम् ॥ २ ॥ तत्फलज्ञानसंसिद्धौकर्ममात्रंविनश्यति ॥ अतःसमत्वधीयुक्ताःसंत्यक्त्वाकर्मजंफलम् ॥ ३ ॥ ईश्वराराधना र्थंचकुर्वाणाःकर्मकेवलम् ॥ धीशुद्धिद्वारतोवेदवाक्यजन्यात्मधीयुताः ॥ ४ ॥ संतोजन्माख्यबंधेनविनिर्मुक्ताअशेषतः ॥ आत्मतत्त्वंपदंब्रह्मा नंदंमायादिवर्जितम् ॥ ५ ॥ पुरुषार्थंविमोक्षाख्यंप्राप्नुवंतीहतादृशाः ॥ त्वमप्येतादृशोभूत्वागच्छविष्णोःपरंपदम् ॥ ६ ॥ ५१ ॥ एवंमेकुर्व

कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः ॥ जन्मबंधविनिर्मुक्ताःपदंगच्छंत्यनामयम् ॥ ५१ ॥
यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति ॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ॥ ५२ ॥

तःकर्मचित्तशुद्धिःकदेतिचेत् ॥ नकालनियमस्तत्रशृणुत्वंभोःसमाहितः ॥ १ ॥ यस्मिन्कालेऽतिकालुष्यमविवेकात्मकंमलम् ॥ अहंममेद मित्येवमाद्यविद्याविजृंभणम् ॥ २ ॥ अत्यंतगहनंतीर्त्वातवांतःकरणंपराम् ॥ शुद्धिमापत्स्यतेत्युक्तंराजसंतामसंमलम् ॥ ३ ॥ तस्मिन्का लेसमस्तस्यश्रोतव्यस्यश्रुतस्यच ॥ फलस्यकर्मणांसम्यग्वैतृष्ण्यंयास्यसिस्वयम् ॥ ४ ॥ त्वंनिर्वेदफलेनैवधीशुद्धिंज्ञास्यसीतिच ॥ ५ ॥ ५२ ॥

यस्मिन्सत्यन्यदीयेहिहानिवृद्धीवृथात्मनि ॥ आरोप्येतेतमोवृत्त्यास्नेहःप्रेमापराभिधः ॥ १ ॥ देहेवित्तेकलत्रादौस्नेहशून्यःसतादृशः ॥ सुखहे
तुंशुभंतत्तद्विषयंप्राप्यकर्मणा ॥ २ ॥ नप्रशंसतिहर्षेणदुःखहेतुंतथाशुभम् ॥ विषयंप्राप्यनासूयापूर्वकंतंचनिंदति ॥ ३ ॥ अज्ञस्यसुखहेतुर्यः
स्वकलत्रादिकःशुभः ॥ तद्गुणख्यापनोद्युक्ताधीवृत्तिरभिनंदकः ॥ ४ ॥ तथान्यदीयविद्यादिप्रकर्षोऽज्ञजनंप्रति ॥ अशुभोविषयस्तस्यतन्निंदा

यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभम् ॥ नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता ॥ ५७ ॥

दिप्रवर्तिका ॥ ५ ॥ धीवृत्तिर्भ्रांतिरूपास्याद्द्वेषःसोऽत्यंततामसः ॥ तावुभौशुद्धसत्वेऽस्मिन्संभवेतांकथंमुनौ ॥ ६ ॥ तस्माद्विचालकाभावा
त्प्रज्ञातस्यात्मगोचरा ॥ प्रतिष्ठांनिश्चलांप्राप्तःफलपर्यवसायिनी ॥ ७ ॥ स्थितप्रज्ञःस्तुतिंनिंदांकस्याप्येवंनभाषते ॥ एवंमुमुक्षुरन्योऽपिनिः
स्नेहःसकलेभवेत् ॥ ८ ॥ नप्रशंसेच्छुभंप्राप्यननिंदेदशुभंगतः ॥ ९ ॥ ५७ ॥

अथव्युत्थितचित्तस्यस्थितप्रज्ञस्यभाषणम् ॥ आसनंगमनंचैतत्त्रयंमूढविलक्षणम् ॥ १ ॥ व्याख्येयंतत्रचाद्यस्यव्याख्यानंसम्यगुच्यते ॥ शोक मोहज्वरादीनिदुःखान्याध्यात्मिकानिवै ॥ २ ॥ आधिभौतिकदुःखानिव्याघ्रसर्पादिजानिच ॥ अतिवातातिवृष्ट्यादिदुःखंस्याच्चाधिदैविक म् ॥ ३ ॥ तेषुदुःखेषुरजसःपरिणामात्मकेषुच ॥ प्रारब्धकर्मणाप्तेषुव्याकुलंयस्यनोमनः ॥ ४ ॥ भ्रांतिकार्यतयातेषुनोद्वेगंभजतेबुधः ॥ दे हाभिमानिनोदुःखप्राप्तौसत्यामहोबत ॥ ५ ॥ पापिष्ठोऽहंचधिङ्मांस्यादीदृशंदुःखभागिनम् ॥ कोमेदुःखंनिराकुर्यादित्युद्वेगोऽभिजायते ॥ ६ ॥ पापानुष्ठानसमयेयद्येवंस्यात्तदाततः ॥ प्रतिबंधेनपापस्यसफलःस्याज्जडात्मनः ॥ ७ ॥ भोगकालेवृथोद्वेगोमूढस्यैवनतद्विदः ॥ तथासुखेषुस त्वस्यपरिणामात्मकेषुच ॥ ८ ॥ प्रारब्धकर्मणाप्तेषुत्रिविधेषुगतस्पृहः ॥ सुखानुभवकालेहिमूढानामविवेकिनाम् ॥ ९ ॥ वृथाकांक्षाविनाधर्म

दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः ॥ वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते ॥ ५६ ॥

तज्जातीयसुखस्यच ॥ स्थितप्रज्ञस्यचभ्रांतेरभावात्तामसोभ्रमः ॥ १० ॥ नैवास्त्यतःस्पृहाशून्यःस्वात्मतत्त्वेस्थितःसुधीः ॥ अनात्मन्यात्म धीरेवकारणंसकलभ्रमे ॥ ११ ॥ शोभनाध्यासजोरागोविषयेरंजनात्मकः ॥ अत्यंताभिनिवेशात्माचित्तवृत्तिविशेषकः ॥ १२ ॥ तद्वोचर स्यदुर्दैवान्नाशकेप्रत्युपस्थिते ॥ तन्निराकरणाशक्तेर्यद्दैन्यंतद्भयंस्मृतम् ॥ १३ ॥ तन्निवारणसामर्थ्यंमन्यमानस्यचात्मनः ॥ चित्तवृत्तिविशेषः स्यात्क्रोधोऽभिज्वलनात्मकः ॥ १४ ॥ तेविपर्ययरूपत्वाद्रागाद्याविगतायतः ॥ एतादृशोमुनिर्धीरःस्थितप्रज्ञउदाहृतः ॥ १५ ॥ एवंसशि ष्यशिक्षार्थमनुद्वेगादिकागिरः ॥ स्वानुभूतिप्रकाशेननिर्मलास्ताःप्रभाषते ॥ १६ ॥ एवंमुमुक्षुर्नोहृष्येत्सुखेदुःखेचनोद्विजेत् ॥ रागक्रोधा दिशून्यःस्यादित्येवात्राशयोहरेः ॥ १७ ॥ ५६ ॥

॥ राम ॥

प्रज्ञास्थैर्येपरोहेतुःसेंद्रियस्वांतनिग्रहः ॥ तदभावेपराहानिःप्रज्ञायाइतिकथ्यते ॥ १ ॥ भूयोभूयोऽपिभोगेषुदोषदृष्टिंप्रकुर्वतः ॥ सम्यग्विवेकि
नोऽप्येतन्मनःस्थितमपिक्षणम् ॥ २ ॥ विकारंप्रापयंत्येतानींद्रियाणिप्रसह्यतत् ॥ पश्यत्येवबलात्कारात्स्वामिन्यपिविपश्चिति ॥ ३ ॥ क्षोभ
कानिबलीयस्त्वाद्विवेकेसतिरक्षके ॥ प्रविष्टंतानिप्रच्याव्यविवेकजमतौमनः ॥ ४ ॥ विषयावेशसामर्थ्याद्धरंत्येवेंद्रियाण्यदः ॥ यथाप्रमाथिन
श्चौराःप्रसह्यधनिनोधनम् ॥ ५ ॥ हरंत्येवंमनःस्वेस्वेविषयेऽपींद्रियाणिवै ॥ ६ ॥ ६० ॥ एवंतर्हिप्रतीकारःकस्तत्रेत्यतआहतम् ॥ तानींद्रियाणिधी
कर्मसाधकान्यखिलान्यपि ॥ १ ॥ समाहितोवशीकृत्यनिगृहीतमनाश्चसन् ॥ निर्व्यापारतयातिष्ठेन्मांसमाश्रित्यमत्परः ॥ २ ॥ वासुदेवोऽहमे

यततोह्यपिकौंतेयपुरुषस्यविपश्चितः ॥ इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ॥ ६० ॥ तानि
सर्वाणिसंयम्ययुक्तआसीतमत्परः ॥ वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता ॥ ६१ ॥

वेशोयस्योपादेयआंतरः ॥ सचास्त्येकांतमद्भक्तोवशीकर्तुंक्षमोऽखिलम् ॥ ३ ॥ यथाराजानमाश्रित्यनिगृह्यंतेहिदस्यवः ॥ राजाश्रितोऽयमि
त्येवंज्ञात्वावश्याभवंतिते ॥ ४ ॥ भगवंतंतथाश्रित्यतत्प्रभावेनसर्वशः ॥ निगृह्यानींद्रियाण्येवक्षोभकान्यपियोगिनः ॥ ५ ॥ कृष्णाश्रितो
ऽयंमत्तेत्थंस्वयंवश्यानिसंतिवै ॥ माहात्म्यंभगवद्भक्तेःस्फुटंचाग्रेभविष्यति ॥ ६ ॥ इंद्रियाणांवशीकारेफलमाहरमापतिः ॥ वशेहीतिस्पष्टमिदं
किमासीतेतिपृच्छतः ॥ ७ ॥ उत्तरंप्रोक्तमित्येतदतःकृत्यंयतेःशृणु ॥ ८ ॥ ६१ ॥

नान्विंद्रियवशीकारेजातेस्वांतविनिग्रहः ॥ स्वतःसिद्धःकिमर्थंतदासीतेतिपृथक्श्रमः ॥ १ ॥ इंद्रियद्वारतोऽनर्थकरंनैवस्वतोमनः ॥ उत्खातदंष्ट्रो रगवदनिरोधेऽस्यकाक्षतिः ॥ २ ॥ मैवंमनोनिरोद्धव्यंसर्वानर्थकरंयतः ॥ निगृहीतेंद्रियस्यापिमनसाविषयान्प्रियान् ॥ ३ ॥ पुंसश्चिंतयतस्ते षुशोभनाध्यासहेतुकः ॥ प्रीतिभेदोयआसंगोममैतेसुखहेतवः ॥ ४ ॥ इत्येवंजायतेतस्मात्संगात्कामःप्रजायते ॥ भवंत्वेतममेत्येवंतृष्णाभेदस्त तोऽपिच ॥ ५ ॥ कुतश्चिद्धन्यमानात्तत्प्रतिघातकगोचरः ॥ क्रोधोऽभिज्वलनात्मास्यजायतेक्रोधतस्ततः ॥ ६ ॥ कार्याकार्यविवेकस्याभावः संमोहउद्धवेत् ॥ येनाप्तगुरुमित्रादीन्यथाक्रुश्यतिमूढधीः ॥ ७ ॥ संमोहाज्जायतेतस्मात्स्मृतेर्भ्रंशोह्यनर्थदः ॥ शास्त्राचार्योपदिष्टार्थानुसंधानस्य

ध्यायतोविषयान्पुंसःसंगस्तेषूपजायते ॥ संगात्संजायतेकामःकामात्क्रोधोऽभिजायते ॥ ६२ ॥
क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

विभ्रमः ॥ ८ ॥ ततोब्रह्मैक्यधीवृत्तेःप्रतिबंधोविपर्ययात् ॥ बुद्धेर्नाशस्ततस्तस्याविलोपादेवपूरुषः ॥ ९ ॥ पुमर्थायोग्यतापन्नोमृतएवेतिकथ्यते ॥ यस्मादेवंहिमनसोनिग्रहाभावतःपुमान् ॥ १० ॥ मृततुल्योभवेत्तस्माद्यतस्वास्यविनिग्रहे ॥ अतोयुक्तंमयोक्तंतदासीतेतिपुरातव ॥ ११ ॥ श्रीमत्कृष्णपदारविंदसुरभौवृत्तिंवहद्भ्रामरींश्रद्धाभक्तियुतंमनोऽनवरतंयावत्प्रविष्टंनहि ॥ तावत्क्षोभकशीलतांप्रतिपदंनाद्धाजहातिस्विकांचांच ल्यंप्रजहातितत्रनिरतंचेतःस्वयंत्वाधिदम् ॥ १२ ॥ ६२ ॥ ६३ ॥

निगृहीतेतुमनसिविनेंद्रियविनिग्रहम् ॥ दोषोनेतिवदन्नाहव्रजेतेत्यस्यचोत्तरम् ॥ १ ॥ वशीकृतमनायस्तुस्वाधीनैरिंद्रियैश्चरन् ॥ वियुक्तैराग द्वेषाभ्यांशब्दादिविषयांस्तथा ॥ २ ॥ चित्तस्यस्वच्छतांब्रह्मसाक्षात्कारैकयोग्यताम् ॥ सप्राप्नोतिततश्चित्तंनिरोद्धव्यंप्रयत्नतः ॥ ३ ॥ ६४ ॥ चित्तस्यस्वच्छतायांतुभ्रांतिज्ञानैकजन्मनाम् ॥ आध्यात्मिकादिदुःखानांसर्वेषांजायतेक्षयः ॥ १ ॥ यस्माच्छीघ्रंयतेरस्यप्रसन्नमनसोमतिः ॥ ब्रह्मात्मैक्यसुखाकारासमंतादवतिष्ठते ॥ २ ॥ अतःसर्वप्रयत्नेनमुमुक्षुर्मत्परायणः ॥ वशीकृत्यमनःस्वीयंतिष्ठेद्ब्रह्माद्वयेमयि ॥ ३ ॥ ६५ ॥

रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ॥ ६४ ॥
प्रसादेसर्वदुःखानांहानिरस्योपजायते ॥ प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते ॥ ६५ ॥ ना
स्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना ॥ नचाभावयतःशांतिरशांतस्यकुतःसुखम् ॥ ६६ ॥

व्यतिरेकमुखेनेमंदृढयत्यर्थमीश्वरः ॥ पुंसोह्यजितचित्तस्यबुद्धिर्वेदांतवाक्यजा ॥ १ ॥ नोत्पद्यतेऽस्यतद्बुद्धचभावेनास्त्येवभावना ॥ निदिध्यास नरूपायाशांतिहेतुःस्थिरात्मिका ॥ २ ॥ निदिध्यासनशून्यस्यनास्त्यविद्यापरिक्षयः ॥ साक्षात्कारःपरात्मैक्यतत्त्वस्यानंदकारणम् ॥ ३ ॥ तत्साक्षात्कारशून्यस्यमोक्षानंदःकुतोभवेत् ॥ अतश्चित्तंनियम्याशुयतस्वानंदसिद्धये ॥ ४ ॥ ६६ ॥

किमासीतेतिप्रश्नस्यवक्तुमुत्तरमीश्वरः ॥ षड्भिरारभतेश्लोकैःसर्वमंगलहेतवे ॥ १ ॥ विक्षिप्तानींद्रियाण्येषव्युत्थानेसतिकर्मणा ॥ समस्तानींद्रियार्थेभ्यःशब्दादिभ्योयदास्वयम् ॥ २ ॥ संकोचयतिधैर्येणकूर्मोऽगानीवसर्वशः ॥ समाधिकालेतस्यास्तिप्रज्ञासम्यक्प्रतिष्ठिता ॥ ३ ॥ पूर्वश्लोकद्वयेप्रोक्तोव्युत्थानसमयेमुनेः ॥ सर्वतामसवृत्तीनामभावस्तत्त्वदर्शनात् ॥ ४ ॥ पुनःसमाध्यवस्थायामधुनोक्तोमहात्मनः ॥ समस्त वृत्त्यभावोऽत्रविशेषोऽयंविचार्यताम् ॥ ५ ॥ ५८ ॥ ननुमूढजनस्यापिरोगादिवशतःस्वयम् ॥ विषयेभ्योह्युपरतिरिंद्रियाणांभवत्यतः ॥ १ ॥

यदासंहरतेचायंकूर्मोऽगानीवसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ५८ ॥
विषयाविनिवर्तंतेनिराहारस्यदेहिनः ॥ रसवर्जंरसोऽप्यस्यपरंदृष्ट्वानिवर्तते ॥ ५९ ॥

प्रज्ञाप्रतिष्ठितातस्यकथमुक्तमिहेतिचेत् ॥ आतुरस्येंद्रियैर्भोगाननाहरतआग्रहात् ॥ २ ॥ शब्दादयोनिवर्तंतेयद्वाकाष्ठतपस्विनः ॥ विषयेषु निवृत्तेषुतत्तृष्णाननिवर्तते ॥ ३ ॥ स्थितप्रज्ञस्यधीरस्यसाक्षात्कृत्यपरंपदम् ॥ तदेवाहमितिस्वात्मपदेनित्यंस्थितस्यच ॥ ४ ॥ क्षुद्रानंदेसरागो ऽपिविषयैःसहनश्यति ॥ एवंरागनिवृत्तिस्तुनास्त्यनात्मविदोयतः ॥ ५ ॥ समूलरागाद्युच्छेदस्तत्त्वसाक्षात्कृतेर्मुनेः ॥ तस्मात्त्वमपितत्त्वैक्य साक्षात्कारेयतस्वभोः ॥ ६ ॥ ५९ ॥

एवंमुमुक्षुणाप्रज्ञास्थैर्यार्थेंद्रियसंयमः ॥ कार्यःप्रयत्नतःशास्त्राचार्याभ्यामुपदेशतः ॥ १ ॥ उत्पन्नेतत्त्वविज्ञानेक्षीणेऽज्ञानेसकार्यके ॥ इंद्रियाणांसचित्तानांस्वतःसिद्धोऽस्तिसंयमः ॥ २ ॥ इत्याहभगवान्विष्णुर्ब्रह्मनिष्ठाप्रदर्शनात् ॥ वेदांतवाक्यजाप्रज्ञाहंब्रह्मास्मीतियादृढा ॥ ३ ॥ अज्ञान्प्रत्यप्रकाशत्वादज्ञानांरजनीवया ॥ ब्रह्मविद्यास्वरूपिण्यांतस्याजागर्तिसंयमी ॥ ४ ॥ जितेंद्रियोजितमनाःस्थितप्रज्ञउदारधीः ॥ प्रबुद्धोऽज्ञाननिद्रातःसावधानःसवर्तते ॥ ५ ॥ ग्राह्यग्राहकरूपायानिशाऽविद्यातमोमयी ॥ प्रसुप्तान्येवभूतानियस्यांव्यवहरंतिवै ॥ ६ ॥ स्वप्नवत्सानिशातस्यब्रह्मतत्त्वंप्रपश्यतः ॥ स्थितप्रज्ञस्यविदुषोभेददृङ्नावभासते ॥ ७ ॥ प्रबुद्धयतेनयावद्धितावत्स्वप्नस्यदर्शनम् ॥ प्रबुद्धस्यपुनःस्वप्नोबाधितोभ्रमकालिकः ॥ ८ ॥ बाधपर्यंततादृष्टासकार्यस्यभ्रमस्यच ॥ साक्षात्कृतेपरेतत्त्वेनभ्रमोनचतत्कृतिः ॥ ९ ॥ समूलभ्रांतिबाधाच्चत

यानिशासर्वभूतानांतस्यांजागर्तिसंयमी ॥ यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः॥ ६९ ॥

दुक्तंवार्तिकेस्फुटम् ॥ कारकव्यवहारेहिशुद्धंवस्तुनवीक्ष्यते ॥ १० ॥ शुद्धेवस्तुनिसिद्धेचकारकव्याप्तिस्तथा ॥ काकोलूकनिशेवायंसंसारोऽज्ञात्मवेदिनोः ॥ ११ ॥ यानिशासर्वभूतानामित्यवोचत्स्वयंहरिः ॥ विपरीतदृशोनास्तिसम्यग्वस्तुनिरीक्षणम् ॥ १२ ॥ वस्त्वदर्शनजायस्माद्विपरीतादृगेवसा ॥ सम्यग्वस्तुदृशोनास्तिविपर्ययनिरीक्षणम् ॥ १३ ॥ सम्यक्दृशाबाधितत्वात्समूलस्यभ्रमस्यहि ॥ उलूकस्यदिवांधस्ययथाकाकदिनंनिशा ॥ १४ ॥ रात्र्यंधस्यचकाकस्ययथोलूकदिनंनिशा ॥ तथाऽज्ञस्यनिशेवास्तिनिष्ठाब्रह्मविदोमुनेः ॥ १५ ॥ तथाब्रह्मविदोमूढनिष्ठारात्रिरिवोदिता ॥ अतस्तत्त्वदृशोनास्तिक्रियाकारकलक्षणः ॥ १६ ॥ व्यवहारोऽस्यसिद्धोऽतःसचित्तेंद्रियसंयमः ॥ वितृष्णस्यात्मनिष्ठत्वादेषणात्रयमुज्झतः ॥ १७ ॥ ज्ञस्याप्यनिच्छतोध्यानमर्थायातंप्रवर्तते ॥ इत्युक्तंश्रीवसिष्ठेनरघुनाथंप्रतिस्फुटम् ॥ १८ ॥ ६९ ॥

अयुक्तस्यकुतोनास्तिबुद्धिरित्यतउच्यते ॥ स्वैरंप्रवर्तमानानामिंद्रियाणांप्रमाथिनाम् ॥ १ ॥ विषयेषुचतन्मध्येयद्येकमपिहींद्रियम् ॥ मनोऽनुलक्षीकृत्यैवसाधकस्यप्रवर्तते ॥ २ ॥ मनसानुसृतंतच्चप्रज्ञामात्मैकगोचराम् ॥ साधकस्यापनयतिशास्त्रीयांविषयावृतम् ॥ ३ ॥ यद्येकमपितांप्रज्ञांविदुषोहरतींद्रियम् ॥ किमुवाच्यंतदासर्वाणींद्रियाणिहरंतिताम् ॥ ४ ॥ नौकाहरणसामर्थ्यमंभस्येवनतुक्षितौ ॥ वायोस्तथेंद्रियस्या

इंद्रियाणांहिचरतांयन्मनोऽनुविधीयते ॥ तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि ॥ ६७ ॥ तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ ६८ ॥

पिचांचल्येमनसःसति ॥ ५ ॥ प्रज्ञाहरणसामर्थ्यंमनस्थैर्येतुनास्यतत् ॥ इतिसूचयितुंप्रोक्तमंभसीतिपदंत्विह ॥ ६ ॥ ६७ ॥ यस्मादेवंततोयस्यसचित्तानींद्रियाणिच ॥ निगृहीतानिसर्वाणितस्यप्रज्ञाप्रतिष्ठिता ॥ १ ॥ निवातकवचादीन्योऽसुरांश्चजितवानसि ॥ महाबाहोसमर्थस्त्वमिंद्रियारिनिवारणे ॥ २ ॥ ६८ ॥

एवंचतुर्णांप्रश्नानामुत्तरव्याजतोऽत्रच ॥ तत्त्वविल्लक्षणान्येतान्यखिलानिमुमुक्षुणा ॥ १ ॥ प्रकर्तव्यतयोक्तानिजीवन्मुक्त्यैकसिद्धये ॥ स्तूय
तेज्ञाननिष्ठेयमधुनात्रोपसंहृतौ ॥ २ ॥ एषायथोक्ताब्राह्मीयाब्रह्माद्वैतैकगोचरा ॥ निष्ठाचकर्मसंन्यासपूर्विकाज्ञानलक्षणा ॥ ३ ॥ एतांब्राह्मीं
स्थितिंप्राप्ययःकोऽपिनविमुह्यति ॥ मोहहेतोरविद्यायाबाधितत्वान्नसंभवः ॥ ४ ॥ अस्यामंतेऽपिवयसिस्थितौस्थित्वातिनिश्चलाम् ॥ ब्रह्मा
त्मनिर्वृतिंनित्यांमोक्षाख्यामधिगच्छति ॥ ५ ॥ किमुवाच्यंब्रह्मचर्यादेवसन्यस्ययःपुमान् ॥ यावज्जीवंस्थितावस्यांब्राह्मयामेवावतिष्ठते ॥ ६ ॥

**एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति ॥ स्थित्वास्यामंतकालेऽपिब्रह्म
निर्वाणमृच्छति ॥ ७२ ॥ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्या
यांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोऽध्यायः ॥ २ ॥**

सयातिब्रह्मनिर्वाणमित्यपेराशयोहरेः ॥ ७ ॥ ७२ ॥ बंधोच्छेद्यात्मबोधंतदनुमतिमलोच्छेदनार्थंस्वधर्मैतज्जांशुद्धिंततोद्याखिलकरणफलंज्ञान
निष्ठांपरेष्टाम् ॥ योभक्तायप्रियायाववददमलयशाःश्रीपतिर्धर्मगोप्तासश्रीकृष्णोऽखिलस्यभ्रमतिमिरहरोभातुभास्वान्ममांतः ॥ १ ॥ ६७२ ॥
इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ गीतार्थसूत्रणंनामद्वितीयःपूर्णतांगतः ॥ ६७३ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ९४७ ॥

श्रीगणेशायनमः ॥ अथतृतीयाध्यायव्याख्याप्रारंभः ॥महीभारोद्धारंसुजनपरिवारंसुरगुरुंगुणाधारंसारंनिरवधिविहारंरसरसम् ॥ परप्रेमागारत्र
जभुविसुचारंकलपदंहरिंवारंवारंत्वदिगतमुदारंसुकलये ॥ १ ॥ पूर्वाध्यायेसमाश्रित्यसांख्यबुद्धिंविपश्चिताम् ॥ ज्ञाननिष्ठाविभज्योक्ताहरिणा
विजयंप्रति ॥ २ ॥ एषातेभिहितासांख्येबुद्धिरित्यादिनास्फुटम् ॥ योगबुद्धिंसमाश्रित्यकर्मनिष्ठाप्युदात्तता ॥ ३ ॥ योगेत्विमांशृण्वित्या
दौकर्मण्येवेतिचांततः ॥ नानयोर्निष्ठयोःस्पष्टमधिकारभिदोदिता ॥ ४ ॥ नैकाधिकारिकत्वंवोभयोःप्रोक्तंयतोऽनयोः ॥ परस्परविरुद्धत्वंतेज
स्तिमिरयोरिव ॥ ५ ॥ दूरेणह्यवरंकर्मबुद्धियोगादितिस्फुटम् ॥ कर्मणांबुद्धिनिष्ठायाःसकाशान्न्यूनतोदिता ॥ ६ ॥ यावानर्थउदपानइतिज्ञा
नफलेपरे ॥ सर्वकर्मफलानांचाप्यंतर्भावःप्रदर्शितः ॥ ७ ॥ स्थितधीलक्षणंप्रोच्याध्यायांतेधीप्रशंसया ॥ एषाब्राह्मीतिविज्ञानफलेनैवोपसंह्र
तिः ॥ ८ ॥ यानिशासर्वभूतानामित्यादौतत्त्ववेदिनः ॥ द्वैतंदृष्टेरभावाच्चानुष्ठानासंभवःक्षितौ ॥ ९ ॥ भिन्नाधिकारिकत्वेचाप्यनयोर्ज्ञानक

अर्जुनउवाच ॥ ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन ॥ तत्किंकर्मणिघोरेमांनियोजयसिकेशव ॥ १ ॥

र्मणोः ॥ एककर्तृकनिर्देशःस्यादयोग्यस्तदाकिल ॥ १० ॥ एकाधिकारिकत्वेतुविरोधान्नसमुच्चयः ॥ संभवेद्युगपत्तत्रतथासत्यपिचद्वयोः ॥ ११ ॥
नैवस्याज्ज्ञानप्राशस्त्यवचनंतदपेक्षया ॥ विकल्पस्वीकृतौश्रेष्ठंज्ञानंसुकरमासुखम् ॥ १२ ॥ यत्कानिकृष्टमायासबहुलंकर्मनश्वरम् ॥ अयोग्यंस्या
दनुष्ठातुमितिमत्वाऽऽकुलोऽर्जुनः ॥ १३ ॥ हेजनार्दननाम्नैवत्वंप्रार्थ्योऽसीत्युवाचह ॥ यतस्त्वंयाच्यसेसर्वैःस्वाभिवांछितसिद्धये ॥ १४ ॥
तथाभूतोमयापित्वंस्वश्रेयोनिश्चयेऽर्थ्यसे ॥ आत्मतत्त्वैकविषयान्निष्कामादपिकर्मणः ॥ १५ ॥ सुप्रशस्ततराबुद्धिर्यदितेऽभिमतातदा ॥ हिं
साद्यायासबहुलेभक्तंमांक्रूरकर्मणि ॥ १६ ॥ कर्मण्येवाधिकारस्तइत्यारभ्यविशेषतः ॥ किमर्थंप्रेरयस्येवंहेसर्वेश्वरकेशव ॥ १७ ॥ शिष्यत्वेन
प्रपन्नंमामनन्यशरणंप्रति ॥ सर्वेश्वरस्यकृष्णस्यनोचितातेप्रतारणा ॥ १८ ॥ १ ॥

नाहंप्रतारयाम्यन्यंकिंपुनस्त्वामतिप्रियम् ॥ किंवाप्रतारणाचिन्हंपश्यसित्वंमयीतिचेत् ॥ १ ॥ नह्येवंकिंतुमेभ्रांतिवशाद्धातिप्रतारणा ॥ व्यामिश्रेणैववतेवाक्यंसुविविक्ताभिधायिनः ॥ २ ॥ भिन्नाधिकारिकंवास्यात्किंस्यादेकाधिकारिकम् ॥ कर्मज्ञानंममेत्येवसंदेहात्तेवचस्त्विदम् ॥ ३ ॥ संकीर्णार्थमिवाभातितात्पर्यानवधारणात् ॥ ममेमंदमतेस्तेनवाक्येनैवांतरिंद्रियम् ॥ ४ ॥ भ्रांत्यायोजयसीवेतिकल्पयामिनवस्तुतः ॥ त्वंमोह

व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे ॥ तदेकंवदनिश्चित्ययेनश्रेयोऽहमाप्नुयाम् ॥ २ ॥

यसिमेकिंतुमोहःस्वाशयदोषतः ॥ ५ ॥ तस्माद्विरुद्धयोरेकंमांप्रतिज्ञानकर्मणोः ॥ निर्देशासंभवादेकंज्ञानंवाकर्मवाभम ॥ ६ ॥ अधिकारानुसारेणविनिश्चित्यवदस्फुटम् ॥ येनाधिकारमाश्रित्यानुष्ठितेनयथाविधि ॥ ७ ॥ ज्ञानेनकर्मणावाहंसम्यङ्मोक्षमवाप्नुयाम् ॥ ८ ॥ २ ॥

तदेवंसर्वविक्षेपनिवृत्तिस्तस्यधीमतः ॥ उक्ताधुनाकामशांतिःसदृष्टांतानिदर्श्यते ॥ १ ॥ आपूर्यमाणंसर्वाभिर्नदीभिरपिसागरम् ॥ वृष्ट्यादि
प्रभवाआपःप्रविशंतियथाखिलाः ॥ २ ॥ अनतिक्रांतमर्यादंतिष्ठंतंनिर्विकारतः ॥ धीरंतेनप्रकारेणस्थितप्रज्ञमवस्थितम् ॥ ३ ॥ निर्विकारत
यासंतंकाम्यमानाअपीतरैः ॥ शब्दाद्याविषयाःसर्वेयदिप्रारब्धकर्मणा ॥ ४ ॥ प्रविशंतिनतच्चित्तंविकर्तुंशक्नुवंतिते ॥ समहार्णवतुल्योयःस्थि
तप्रज्ञोविचक्षणः ॥ ५ ॥ सर्वलौकिकविक्षेपनिवृत्तेर्ज्ञानतेजसा ॥ अविद्याकार्यमाभासमपित्यक्त्काचनैष्ठिकीम् ॥ ६ ॥ शांतिमाप्नोतिमूढस्तु
कामकामीनशांतिभाक् ॥ काम्यान्कामयितुंशीलंयस्यसंसारिणःसच ॥ ७ ॥ सदाक्लेशार्णवेमग्नोभवतीत्याशयोहरेः ॥ ८ ॥ ७० ॥ यस्मादेव

**आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् ॥ तद्वत्कामायंप्रविशं
तिसर्वेसशांतिमाप्नोतिनकामकामी ॥ ७० ॥ विहायकामान्यःसर्वान्पु
मांश्चरतिनिःस्पृहः ॥ निर्ममोनिरहंकारःसशांतिमधिगच्छति ॥ ७१ ॥**

मतःप्राप्तानपिबाह्यान्गृहादिकान् ॥ वासनामात्ररूपांश्चमनोराज्यात्मकानपि ॥ १ ॥ पथिप्राप्तांस्तृणस्पर्शतुल्यांस्तांस्त्रिविधानपि ॥ उपेक्ष्यदेह
यात्रायामपियोनिःस्पृहोमुनिः ॥ २ ॥ देहाद्यहंकृतेःशून्यःस्वश्लाघादिविवर्जितः ॥ तादात्म्याध्यासशून्यत्वात्संसर्गाध्यासवर्जितः ॥ ३ ॥ शरीर
यात्रामात्रार्थंप्राप्तेप्रारब्धकर्मणा ॥ ममेदमितितत्रापिस्वत्वभ्रांतिविवर्जितः ॥ ४ ॥ भोगानारब्धवशतोभुंक्तेभोक्तृत्वमंतरा ॥ यादृच्छिकतयाय
त्रकापियातिसवापुमान् ॥ ५ ॥ यएवंभूतएषोऽत्रस्थितप्रज्ञउदारधीः ॥ शांतिंसमस्तसंसारदुःखाभावोपलक्षिताम् ॥ ६ ॥ निर्वाणाख्यामवा
प्नोतितत्त्वबोधबलेनवै ॥ ईदृशंत्रजनंतस्यस्थितप्रज्ञस्यकीर्तितम् ॥ ७ ॥ ७१ ॥

शुद्धचंतंकर्मकर्तव्यमस्त्यशुद्धधियस्त्विति ॥ नकर्मणामनारंभादित्यारभ्यप्रवक्ष्यते ॥ १ ॥ मोघंसजीवतीत्यंतैस्त्रयोदशभिरेवच ॥ विदुषःशुद्ध
बुद्धेस्तुकर्तव्यंनास्तिकिंचन ॥ २ ॥ यस्त्वात्मरतिरित्यादिद्वाभ्यामित्थंप्रवक्ष्यते ॥ तस्मादसक्तइत्यादौबंधहेतोश्चकर्मणः ॥ ३ ॥ धीशुद्धचा
मोक्षहेतुत्वंज्ञानोत्पत्तिमुखेनच ॥ अथकेनेतिचोत्थाप्यप्रश्नंकामस्यशत्रुता ॥ ४ ॥ वक्ष्यतेमोक्षमार्गेऽस्मिंस्तत्त्यागाज्ज्ञानयोगतः ॥ मोक्षो
ऽस्तीत्येवभगवानध्यायांतेचवक्ष्यति ॥ ५ ॥ तत्रादौकारणाभावेकार्याभावःप्रदर्श्यते ॥ तमेतमितिवाक्येनविहितानांहिकर्मणाम् ॥ ६ ॥ चि

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोऽश्नुते ॥ नचसन्यसनादेवसिद्धिंसमधिगच्छति ॥ ४ ॥

त्तशुद्धचात्मबोधार्थमननुष्ठानतःपुमान् ॥ सत्वशुद्धेरभावात्स्याज्ज्ञानायोग्योबहिर्मुखः ॥ ७ ॥ ज्ञानयोगेननिष्ठांनावाप्नोत्यात्मन्यवस्थितिम् ॥
नन्वेतमेवप्रव्राजिनोलोकमितिवेदतः ॥ ८ ॥ समस्तकर्मसंन्यासाज्ज्ञाननिष्ठोपपत्तितः ॥ कृतंकर्मभिरित्यत्रप्राहनारायणोहरिः ॥ ९ ॥ यतःस
न्यसनादेवचित्तशुद्धिंविनाकृतात् ॥ ज्ञाननिष्ठात्मिकांसिद्धिंनैवाप्नोतिफलावधिम् ॥ १० ॥ नधीशुद्धिमृतेन्यासःसंभवेदथचेत्कृतः ॥ फलेपर्य
वसायीनोभवेदित्याशयोहरेः ॥ ११ ॥ ४ ॥

एवमेकाधिकारित्वेनविकल्पसमुच्चयौ ॥ अधिकारभिदाज्ञानसिद्धयैप्रश्नोऽर्जुनस्यच ॥१॥ दृष्टेऽधिकारभेदेश्रीभगवानाहसूत्तरम् ॥ चित्तशु
द्धयविशुद्धिभ्यांजनेऽस्मिन्नधिकारिणि ॥ २ ॥ द्विविधेद्विप्रकारैवपूर्वाध्यायेस्फुटंमया ॥ ज्ञानकर्मपरत्वाख्यानिष्ठोक्तातेहितैषिणा ॥ ३ ॥
यद्वापुरेतिसर्गादौप्रजाःसृष्ट्वाचतुर्विधाः ॥ तासांस्वर्गापवर्गाप्तिसाधनंवेदपद्धतिः ॥ ४ ॥ मयाविःकुर्वताप्रोक्तासर्वज्ञेनेश्वरेणच ॥ तथाचत्वंभो
माग्लासीरधिकार्यैक्यशंकया ॥ ५ ॥ अनघेतिपदेनैषासूच्यतेयोग्यतार्जुने ॥ साध्यसाधनभेदेननिष्ठैकैवास्तिसाद्विधा ॥ ६ ॥ नतुनिष्ठेस्वतं
त्रेद्वेनिष्ठेत्यत्रैकताध्वनिः ॥ द्वैविध्येनचतामेवनिष्ठांसंदर्शयत्यजः ॥ ७ ॥ सम्यक्तत्त्वमतिःसंख्यातांसंप्राप्तवतांसताम् ॥ ब्रह्मचर्याश्रमादेववेदांत

श्रीभगवानुवाच ॥ ॥ लोकेऽस्मिन्द्विविधानिष्ठापुराप्रोक्तामया
नघ ॥ ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनाम् ॥ ३ ॥

श्रवणादिभिः ॥ ८ ॥ ज्ञानभूमौप्रविष्टानांसांख्यानांशुद्धचेतसाम् ॥ युज्यतेब्रह्मणानेनज्ञानंतद्योगइत्यतः ॥ ९ ॥ ज्ञानयोगेनतेनैवनिष्ठातेषा
मुदाहृता ॥ कर्माधिकारिणांपुंसामशुद्धमनसांतथा ॥ १० ॥ कर्मैवयुज्यतेचित्तशुद्धयाननेनेतियोगकः ॥ तेनैवकर्मयोगेननिष्ठातेषामुदाहृता
॥ ११ ॥ धीशुद्धिद्वारतोज्ञानभूमौसम्यक्प्रवेशनम् ॥ नान्यथेत्याशयोविष्णोःश्रीकृष्णस्यकृपानिधेः ॥ १२ ॥ अतोभिन्नाधिकारित्वात्सा
ध्यसाधनरूपयोः ॥ नविकल्पस्तयोर्ज्ञानकर्मणोर्वासमुच्चयः ॥ १३ ॥ तस्मादवस्थाभेदेनचैकमेवप्रतिद्वयोः ॥ उपयोगान्नवैय्यर्थ्यमुपदेशस्य
चेतिदिक् ॥ १४ ॥ ३ ॥

कर्मणाबद्ध्यतेजंतुरितिस्मृत्यामुमुक्षुणा ॥ बंधकत्वात्कथंकर्मकर्तव्यमितिचेच्छृणु ॥ १ ॥ यज्ञोवैविष्णुरित्युक्तस्तदाराधनहेतुकम् ॥ यत्कर्म क्रियतेतस्मात्प्रवृत्तोऽन्यत्रकर्मणि ॥ २ ॥ कर्माधिकार्ययंलोकःकर्मणाबद्ध्यतेतदा ॥ नेश्वराराधनार्थेनबद्ध्यतेऽतस्तदर्थकम् ॥ ३ ॥ कर्म ण्यधिकृतःसंस्त्वंफलसंगविवर्जितः ॥ सम्यक्श्रद्धादिनाकर्मकौंतेयकुरुशास्त्रतः ॥ ४ ॥ ९ ॥ प्रजापतिगिराप्येवंकर्मकर्तव्यमादरात् ॥ सृष्ट्वाकर्मकलापेनसहवर्णत्रयात्मिकाः ॥ १ ॥ प्रजाःस्रष्टासकल्पादावुवाचाधिकृतान्जनान् ॥ स्वाश्रमोचितधर्मेणाभिवृद्धिंत्युत्तरोत्तरम् ॥ २ ॥ लभध्वंयूयमेतस्मात्कुरुध्वंयज्ञमादरात् ॥ युष्माकमेषयज्ञोऽस्तुसर्वाभीष्टफलप्रदः ॥ ३ ॥ यद्यप्यावश्यकंकर्मयज्ञशब्देनलक्ष्यते ॥

यज्ञार्थात्कर्मणोऽन्यत्रलोकोऽयंकर्मबंधनः ॥ तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर ॥९॥ सहय ज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः ॥ अनेनप्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक् ॥ १० ॥ देवान्भावयतानेनतेदेवाभावयंतुवः ॥ परस्परंभावयंतःश्रेयःपरमवाप्स्यथ ॥ ११ ॥

निंदितत्वान्नचात्रास्तिप्रस्तावःकाम्यकर्मणाम् ॥ ४ ॥ तथापिफलसद्भावोनित्यानामपिकर्मणाम् ॥ आनुषंगिकएवोक्तएषवोऽस्त्विष्टकाम धुक् ॥ ५ ॥ १० ॥ कामदोग्धृत्वमप्याहयज्ञस्यभगवानिति ॥ यजमानतयायूयंदेवानिंद्रमुखान्सदा ॥ १ ॥ तर्पयध्वंहविर्भागैर्यज्ञेनाने नशास्त्रतः ॥ युष्माभिस्तर्पितादेवायुष्मान्वृष्ट्यादिभिर्हितैः ॥ २ ॥ संवर्धयंतुयूयंतेदेवाश्चैवंपरस्परम् ॥ संवर्धयंतःसततंप्राप्स्यथाभिमतंफलम् ॥ ३ ॥ प्राप्स्यंतिदेवतास्तृप्तिंयूयंस्वर्गफलंतथा ॥ ४ ॥ ११ ॥

नकेवलंपरत्रैवफलंकिंत्वैहिकानपि ॥ हिरण्यपशुधान्यादीन्देवाभोगांश्चवांछितान् ॥ १ ॥ वितरिष्यंतियुष्मभ्यंयज्ञैस्तेतोषितायतः ॥ भो
गास्तैर्ऋणवद्दत्ताभवद्भ्यश्चयतोऽमरैः ॥ २ ॥ तस्माद्दैवैःप्रदत्तांस्तान्भोगानेभ्योऽध्वरेषुच ॥ असंपाद्याहुतीर्देवोद्देशेनात्मंभरिस्तुयः ॥ ३ ॥
देहप्राणेंद्रियाण्येवतर्पयत्येषतस्करः ॥ देवर्णमनपाकृत्यदेवस्वापहरोऽधमः ॥ ४ ॥ १२ ॥ वैश्वदेवादियज्ञानामवशिष्टंसदामृतम् ॥ येऽश्नं
तिशिष्टावेदोक्तकारित्वेनैवतेऽनृणाः ॥ १ ॥ पंचसूनानिमित्तैश्चप्राकृतैःकिल्बिषैरपि ॥ नित्याकरणजैस्तेऽतोमुच्यंतेसर्वकिल्बिषैः ॥ २ ॥
संत्यसंसर्गिणस्तैस्तैर्भूतैरागामिभिर्मलैः ॥ येतुनैवंप्रकुर्वंतितान्प्रत्याहातिदूषणम् ॥ ३ ॥ भुंजतेपापमेवाघावैश्वदेवाद्यकारिणः ॥ पंचसूना

इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः ॥ तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः ॥ १२ ॥
यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः ॥ भुंजतेतेत्वघंपापायेपचंत्यात्मकारणात् ॥ १३ ॥

निमित्तंचप्रमादादिनिबंधनम् ॥ ४ ॥ पापंकृत्वापचंत्यात्मकारणादेवयेऽधमाः ॥ प्राचीनेसत्यघेचान्यंप्रयांत्यकरणात्क्रतोः ॥ ५ ॥ अतो
ऽघंभुंजतेपापास्तथोक्तंस्मृतिकर्तृभिः ॥ कंडिनीपेषणीचुल्लीउदकुंभीप्रमार्जनी ॥ ६ ॥ पंचसूनागृहस्थस्यताभिःस्वर्गंनविंदति ॥ पंचसूना
कृतंपापंपंचयज्ञैर्व्यपोहति ॥ ७ ॥ ब्रह्मदेवमनुष्याणांपितॄणांभूतसंज्ञिनाम् ॥ यज्ञाः संतिजपोहोमोदानंचतर्पणंबलिः ॥ ८ ॥ अनुष्ठेया
निकर्माणिकर्मण्यधिकृतैर्जनैः ॥ प्रजापतिगिरामर्थःसमाप्तोऽयंयथातथम् ॥ ९ ॥ १३ ॥

नकेवलंविधेर्वाक्यादेवकर्तव्यमस्तितत् ॥ कर्मकिंतुजगच्चक्रप्रवृत्तेःकारणादपि ॥ १ ॥ शुक्रशोणितरूपेणह्यन्नात्परिणतात्किल ॥ शरीराणि प्रजायंतेवृष्टेरन्नस्यजन्मच ॥ २ ॥ यज्ञाद्धर्मादपूर्वाख्याज्जायतेवृष्टिरर्कतः ॥ अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते ॥ ३ ॥ आदित्याज्जा यतेवृष्टिर्वृष्टेरन्नंततःप्रजाः ॥ सूक्ष्मोयज्ञःसधर्माख्यऋत्विगादेश्चकर्मणः ॥४॥ अपूर्वाख्यस्ययज्ञस्यविहितंकर्मकारणम् ॥५॥ १४ ॥ वेदप्रमा णकंकर्मापूर्वस्योत्पादकंभवेत् ॥ नतुपाषंडसंसिद्धंधर्मस्योत्पादकंभवेत् ॥ १ ॥ ननुपाषंडशास्त्रात्किंवैलक्षण्यंश्रुतेर्यतः ॥ श्रुतिप्रमाणकोध र्मोनान्योऽस्तीतिश्रृणूत्तरम् ॥ २ ॥ आविर्भावोऽपिवेदस्यह्यक्षरात्परमात्मनः ॥ तथाचापौरुषेयत्वान्निरस्ताखिलसंशयः ॥३॥ अर्थेह्यतींद्रिये

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः ॥ यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः ॥ १४ ॥
कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवम् ॥ तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितम् ॥ १५ ॥
एवंप्रवर्तितंचक्रंनानुवर्तयतीहयः ॥ अघायुरिंद्रियारामोमोघंपार्थसजीवति ॥ १६ ॥

वेदःप्रमाणंस्वतएवसः ॥ नतुप्रमादमायादिदोषवद्रचितंहितत् ॥४॥ पाषंडवाक्यंप्रामाण्यजनकंस्यादतींद्रिये ॥ तस्मात्साक्षात्परब्रह्महेतुत्वात्स र्वभासकम् ॥ ५ ॥ अविनाशिचवेदाख्यंब्रह्मयज्ञेप्रतिष्ठितम् ॥ अतोऽप्यतींद्रियोधर्मोऽनुष्ठेयोवेदबोधितः ॥ ६ ॥ त्यक्त्वोपधर्मंपाषंडबोधितं सर्वथाजनैः ॥ ७ ॥ १५ ॥ आदौसर्वेश्वराद्वेदःकर्मज्ञानंततोभवेत् ॥ ततोऽनुष्ठानतोधर्मस्ततोवृष्टिस्ततःपरम् ॥ १ ॥ अन्नमन्नाच्छरीराणिप्रु नस्तेषांतथैवच ॥ कर्मप्रवृत्तिरित्येवमीश्वरेणप्रवर्तितम् ॥ २ ॥ जगन्निर्वाहकंचक्रंयोमूढोनानुतिष्ठति ॥ सपापजीवितोव्यर्थमेवजीवतिकेव लम् ॥ ३ ॥ यतोऽसावेंद्रियैर्भोगेरमतेहिस्वभावतः ॥ सकर्माधिकृतोभूत्वाऽकुर्वन्कर्मप्रयात्यधम् ॥ ४ ॥ १६ ॥

यतःकश्चिदपिप्राणीक्षणंनापिकदाचन ॥ तिष्ठतीहविनाकर्मनातःशुद्धिमृतेऽक्रियः ॥ १ ॥ यतोऽशुद्धमनाःसर्वोरजःसत्वतमोगुणैः ॥ स्वभाव
प्रभवैर्वापिरागद्वेषादिभिर्गुणैः ॥ २ ॥ अस्वतंत्रोऽखिलंकर्मवैदिकंलौकिकंबलात् ॥ कार्यतेऽतोविनाशुद्धिंनसंन्यासोऽपिसंभवेत् ॥ ३ ॥ ५ ॥
रागाद्याक्रांतचित्तस्तुयोऽकुर्वन्बहिरिंद्रियैः ॥ कर्माणिमनसारागद्वेषादिप्रेरितेनच ॥ १ ॥ शब्दादीन्संस्मरन्नित्यंकर्मत्यक्त्वैवतिष्ठति ॥ सस
त्वशुद्ध्यभावेनपापाचारःप्रकथ्यते ॥ २ ॥ त्वंपदार्थविवेकायसंन्यासःसर्वकर्मणाम् ॥ श्रुत्याविधीयतेयस्मादन्यथापतितोभवेत् ॥३॥६॥
कर्मण्यधिकृतोयस्तुसचित्तानींद्रियाणिच ॥ भोगासक्तेर्निवर्त्याशुवाक्पाण्यादिभिरिंद्रियैः ॥ १ ॥ शुद्धिहेतुतयाप्रोक्तंकर्मयोगविवेकवान् ॥

नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् ॥ कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ॥ ५ ॥ कर्मे
द्रियाणिसंयम्ययआस्तेमनसास्मरन् ॥ इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यते ॥ ६ ॥
यस्त्विंद्रियाणिमनसानियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैःकर्मयोगमसक्तःसविशिष्यते ॥ ७ ॥
नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः ॥ शरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणः ॥ ८ ॥

फलाभिलाषशून्यःसन्करोतिसविशिष्यते ॥ २ ॥ श्रमेसाम्येऽपिपूर्वोक्तान्मिथ्यासंन्यासिनोनरात् ॥ चित्तशुद्ध्यैक्रियाःकुर्वन्श्रेष्ठःस्यात्फलभा
ग्यतः ॥ ३ ॥ ७ ॥ यस्मादेवंततोबुद्ध्याधींद्रियाणिनिगृह्यवै ॥ फलसंबंधशून्यंयद्विहितंविधिनैवतत् ॥ १ ॥ नियतंकर्मनित्यंत्वंश्रौतं
स्मार्तंसमाचर ॥ अशुद्धबुद्धेःकर्मैवाकरणादधिकंयतः ॥ २ ॥ नसिद्ध्येन्मनसःशुद्धिःकर्माभावेनकेवलम् ॥ किंतुस्वधर्मशून्यस्यदेहस्थि
तिरपीहते ॥ ३ ॥ नैवसिद्ध्येत्प्रकर्षेणततःकर्मसमाचर ॥ ४ ॥ ८ ॥

नन्वस्त्वत्मविदःकर्माभ्युदयादिनिबंधनम् ॥ प्रत्यवायक्षयार्थंवाकोदोषइतिचेच्छृणु ॥ १ ॥ कृतेनकर्मणातस्यनस्वर्गादिप्रयोजनम् ॥ प्राप्यंतस्यतुसर्वत्रस्वर्गादौतुच्छतामतिः ॥ २ ॥ कर्मासाध्यतयामुक्तेःस्वात्मत्वाच्चात्मवेदिनः ॥ तदर्थमपिनोकार्यंनित्यप्राप्ततयामुनेः ॥ ३ ॥ स्वात्मावस्थानमोक्षस्यनित्यप्राप्तस्यकेवलम् ॥ अज्ञानमात्रमप्राप्तिस्तद्बाध्यंस्वात्मबोधतः ॥ ४ ॥ अज्ञानेज्ञानतोनष्टेसकार्येतत्त्ववेदिनः ॥ नकिंचित्कर्मणासाध्यंज्ञानसाध्यंनकिंचन ॥ ५ ॥ नकर्माकरणेनास्यप्रत्यवायोऽपिकश्चन ॥ यस्मादात्मविदःसर्वभूतेषुद्रुहिणादिषु ॥ ६ ॥ नप्रयोजनसंबंधःकोऽप्यस्त्यात्मरतेर्मुनेः ॥ अतःकृताकृतेतस्यनिष्फलेइतिनिर्णयः ॥ ७ ॥ मुमुक्षोरपिनैवास्तिकर्मकर्तव्यमाग्रहात् ॥ भूमिकात्रयसंस्थस्यकिंपुनर्ज्ञानिनोमुनेः ॥ ८ ॥ भूमिसप्तकभेदेनब्रह्मवित्संनिरूपितः ॥ वासिष्ठेजानकीनाथंसंमुखीकृत्यतद्विदा ॥ ९ ॥ ज्ञान

नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन ॥ नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः ॥ १८ ॥

भूमिःशुभेच्छारव्याप्रथमापरिकीर्तिता ॥ विचारणाद्वितीयास्याच्तृतीयातनुमानसा ॥ १० ॥ भूमिकात्रितयंत्वेतद्रामजाग्रदितिस्थितम् ॥ यथावद्भेदबुद्ध्येदंजगज्जाग्रतिदृश्यते ॥ ११ ॥ अद्वैतेस्थैर्यमायातेद्वैतेचप्रशमंगते ॥ पश्यंतिस्वप्नवल्लोकंचतुर्थींभूमिकामिताः ॥ १२ ॥ पंचमींभूमिकामेत्यसुषुप्तिपदनामिकाम् ॥ षष्ठींगाढसुषुप्ताख्यांक्रमात्प्राप्ततिभूमिकाम् ॥ १३ ॥ षष्ठ्यांभूम्यामसौस्थित्वासप्तमींभूमिमाप्नुयात् ॥ किंचिदेवैषसंपन्नस्त्वथवैषनकिंचन ॥ १४ ॥ अगम्यावचसांशांतासासीमायोगभूमिषु ॥ एवंवसिष्ठमुनिनाशरदेंदुःप्रबोधितः ॥ १५ ॥ चतुर्थींभूमिमारभ्यब्रह्मविज्ज्ञानकर्मणोः ॥ नसाध्यमीक्षतेकिंचित्कृतकृत्यतयात्मनः ॥ १६ ॥ साध्याभावादतोब्रह्मविदःकार्यंनविद्यते ॥ १७ ॥ १८ ॥

यस्तुनास्तींद्रियारामस्तत्त्वदर्शीसकर्मतत् ॥ अकुर्वन्नपिनैवासौप्रत्यवैतिकथंचन ॥१॥ रतिंयातींद्रियारामःस्रग्गंधवनितादिषु ॥ तृप्तिंयात्य न्नपानादौतुष्टिंपुत्रादिलाभतः ॥ २ ॥ विषयाणांयथोक्तानामभावेदुःखमेतिच ॥ साक्षात्कृतनिजानंदोद्वैतदृष्टेरभावतः ॥ ३ ॥ अतितुच्छत याभोग्यसुखंनेच्छतितत्त्वदृक् ॥ तथोक्तंश्रीवसिष्ठननिर्वाणंस्योत्तरेदले ॥४॥ स्वभावोदृश्यवैरस्यमेवतत्त्वविदोनिजः ॥ दृश्यस्पंदनमेवाहुरतत्त्व ज्ञत्वमुत्तमाः ॥ ५ ॥ अतज्ज्ञायैवविषयाःस्वदंतेनतुतद्विदः ॥ नहिपीतामृतायांतःस्वदतेकटुकांजिकम् ॥ ६ ॥ मनोवृत्तिविशेषाहिस्यूरति

यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः ॥ आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते ॥ १७ ॥

तृप्तितुष्टयः ॥ साक्षिसिद्धाअतोऽनात्मधर्मास्तेषुकथंबुधः ॥ ७ ॥ सज्जेतात्मसुखेमग्नोगलितानात्मधीःस्वतः ॥ आत्मन्येवसुखांभोधौस्वभा वादेवतत्त्ववित् ॥ ८ ॥ रतिंतृप्तिंचतुष्टिंचयात्यसौसुखसागरः ॥ अतोऽनात्मनिरत्यादेरभावादात्मतत्त्ववित् ॥ ९ ॥ साक्षात्कुर्वन्परानं दमुपचारतयोच्यते ॥ आत्मरतिरात्मतृप्तआत्मसंतुष्टइत्यपि ॥ १० ॥ एवंभूतोमनुष्योयःकृतकृत्यःसएवहि ॥ वर्णाश्रमनियम्योनमानवश्चे तिशब्दतः ॥ ११ ॥ एवंभूतस्यकर्तव्यंवैदिकंलौकिकंमनाक् ॥ नविद्यतेभ्रांतिनाशात्स्थितस्याद्वयवस्तुनि ॥ १२ ॥ १७ ॥

कर्मणिक्रियमाणेऽपिमयाकथमयंजनः ॥ संगृह्णीयादितिभ्रांतिवारणायाहमाधवः ॥ १ ॥ प्रधानभूतोराजादिर्यद्यदेवशुभाशुभम् ॥ कर्मा चरतिसामान्यस्तत्तदाचरतीतरः ॥ २ ॥ ननुशास्त्रंसमालोच्यश्रेष्ठंशास्त्रीयमादरात् ॥ आचारंस्वयमेवान्यःकुतोनाचरतीतिचेत् ॥ ३ ॥ मैवंश्रेष्ठोजनोयद्यद्वैदिकंलौकिकंचवा ॥ प्रमाणत्वेनलोकेऽस्मिन्मन्यतेऽन्योजनोऽपिच ॥ ४ ॥ तदेवकुरुतेमानंनस्वातंत्र्येणकिंचन ॥ त्वया प्रधानभूतेनलोकसंरक्षणायच ॥ ५ ॥ शास्त्रीयंकर्मकर्तव्यंतस्मादित्याशयोहरेः ॥ ६ ॥ २१ ॥ अत्राहमेवदृष्टांतइत्याहत्रिभिरीश्वरः ॥

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः ॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ॥ २१ ॥ नमे पार्थास्तिकर्तव्यंत्रिषुलोकेषुकिंचन ॥ नानवाप्तमवाप्तव्यंवर्तएवचकर्मणि ॥ २२ ॥ य दिह्यहंनवर्तेयंजातुकर्मण्यतंद्रितः ॥ ममवर्त्मानुवर्तंतेमनुष्याःपार्थसर्वशः ॥ २३ ॥ उत्सी देयुरिमेलोकानकुर्यांकर्मचेदहम् ॥ संकरस्यचकर्तास्यामुपहन्यामिमाःप्रजाः ॥ २४ ॥

ममेश्वरस्यहेपार्थकर्तव्यंनास्तिकिंचन ॥ १ ॥ लोकत्रयेऽपियस्मान्मेऽनवाप्तंनास्तिकिंचन ॥ प्राप्तव्यंतदपीशोऽहंकरोम्येवजगद्धितम् ॥ २ ॥ २२ ॥ यद्यहंजगतामीशःकर्माण्यनलसोऽपिसन् ॥ कदाचिन्नानुतिष्ठेयंतदासर्वेशितुर्मम ॥ १ ॥ मार्गंसर्वप्रकारैस्तेनराःकर्माधिकारिणः ॥ सर्वदै वानुवर्तेरंस्तत्रदोषंशृणुष्वभोः ॥ २ ॥ २३ ॥ यद्यहंकर्मनोकुर्यांतदामदनुवर्तिनाम् ॥ कर्माकरणतोलोकस्थितिहेतोश्चकर्मणः ॥ १ ॥ लो पेनैतेविनश्येयुःसर्वेकर्माधिकारिणः ॥ तदाकर्ताहमेवस्यांवर्णानांसंकरस्यच ॥ २ ॥ इमाःसर्वाःप्रजास्तेनधर्मलोपेनसंकरात् ॥ अहमेवोप हन्यांयःप्रवृत्तोऽनुग्रहायसः ॥ ३ ॥ २४ ॥

नन्वीश्वरस्यतवतुकर्तृत्वादेरभावतः ॥ नक्षतिर्मेत्वनीशस्यक्षतिर्ज्ञानाभिभूतितः ॥ १ ॥ कर्मणिक्रियमाणेस्यादित्याशंक्याहमाधवः ॥ यथा
फलानुरागेणकर्तृत्वाभिनिवेशतः ॥ २ ॥ कर्मण्यभिनिविष्टाश्चकुर्वंत्यज्ञाःस्वकर्मतत् ॥ तथैवकर्तुमिच्छुःसन्नात्मविल्लोकसंग्रहम् ॥ ३ ॥
कुर्यात्त्यक्त्वाफलेरागंकर्तृत्वाभिमतिंतथा ॥ तथाचक्रियमाणेऽपिकर्मण्यात्मविदोनहि ॥ ४ ॥ क्षतिर्नापिमुमुक्षोर्वाधीशुद्ध्यर्थंप्रकुर्वतः ॥
किंतुकर्तृत्वधीःकर्मफलेरागश्चबंधने ॥ ५ ॥ हेतुस्तस्माद्व्यंत्यक्त्वाकुर्वन्नाप्नोतिबंधनम् ॥ भाज्ञानंतद्रतत्वेनयथोक्तंबोद्धुमर्हसि ॥ ६ ॥ यद्यो
त्कृष्टकुलोत्पन्नतयाभारतशब्दतः ॥. ७ ॥ २५ ॥ अनुष्ठानेनधर्मस्यकर्तव्योलोकसंग्रहः ॥ तत्त्वज्ञानोपदेशेनकर्मणोऽज्ञान्नचालयेत् ॥ १ ॥

सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभारत ॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥ २५ ॥
नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनाम् ॥ जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन् ॥ २६ ॥

अविवेकवतांयास्तिकर्तृत्वाभिनिवेशिनाम् ॥ फलाभिसंधिनांबुद्धिरिदंकर्मकरोम्यहम् ॥ २ ॥ भोक्ष्येऽहंतत्फलंचेतितस्याःकुर्यान्नचालनम् ॥
अकर्त्राभोपदेशेनकिंतुभूत्वासमाहितः ॥ ३ ॥आत्मवित्सर्वकर्माणिचिकीर्षुर्लोकसंग्रहम् ॥ कुर्वंस्तेषांसमुत्पाद्यश्रद्धांप्रीत्याहिसेवयेत् ॥ ४ ॥
अकर्त्राभोपदेशेनकृतेबुद्धेर्विचालने ॥ कर्मश्रद्धानिवृत्त्यास्याद्धर्मभ्रष्टोजनस्ततः ॥ ५ ॥ चित्तशुद्धेरभावात्स्याज्ज्ञानानुत्पत्तिदूषणम् ॥ उभ
यभ्रष्टतापुंसांस्यात्तथोक्तंमहर्षिणा ॥ ६ ॥ अज्ञस्यार्धप्रबुद्धस्यसर्वंब्रह्मेतियोवदेत् ॥ महानिरयजालेषुसतेनविनियोजितः ॥ ७ ॥ २६ ॥

कर्मानुष्ठानसाम्येऽपिविशेषश्राज्ञतज्ज्ञयोः ॥ अध्यासतदभावाभ्यांकर्तृत्वादेःप्रदर्श्यते ॥ १ ॥ मिथ्याज्ञानात्मिकामायाप्रकृतिःपारमेश्वरी ॥ कार्यकारणरूपेणतस्याःपरिणतैर्गुणैः ॥ २ ॥ क्रियमाणानिकर्माणिश्रौतानिलौकिकानिच ॥ सर्वप्रकारैस्तत्रायंकार्यकारणसंहतौ ॥ ३ ॥ आत्मन्याध्यासतःस्वात्मविवेकाक्षममानसः ॥ तानिकर्माणिकर्ताहंकरोमीत्यभिमन्यते ॥ ४ ॥ अक्रियेकर्तृताध्यासादात्माज्ञानावृतोजनः ॥ जन्ममृत्युमयींघोरांसंसृतिंयातिदुःसहाम् ॥ ५ ॥ २७ ॥ विद्वांस्तुमन्यतेनैवंतत्त्वंवेत्तियतःपरम् ॥ कस्यतत्त्वंतदित्याहगुणकर्मविभागयोः ॥ १ ॥ अहंकारास्पदाएवगुणादेर्हेंद्रियादयः ॥ तेषांव्यापारभूतानिकर्माणिविविधानिच ॥ २ ॥ ममकारास्पदान्येवबाह्यान्याभ्यंतराणिच

प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः ॥ अहंकारविमूढात्माकर्ताहमितिमन्यते ॥ २७ ॥
तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः ॥ गुणागुणेषुवर्तंतइतिमत्वानसज्जते ॥ २८ ॥

॥ अत्रद्वंद्वैकवद्भावेगुणकर्मेतिबोध्यंताम् ॥ ३ ॥ भासकत्वेनसर्वेषांजडानांहिविकारिणाम् ॥ विभज्यतेविभागोऽयंपृथग्भवतिचिद्धनः ॥ ४ ॥ स्वप्रकाशतयासंगआत्माजडविलक्षणः ॥ भास्यभासकयोरेवंजडचैतन्ययोर्द्वयोः ॥ ५ ॥ याथात्म्यंवेत्तियोविद्वाञ्छास्त्रानुभवयुक्तिभिः ॥ विकारित्वेनवर्ततेगुणाहिकरणात्मकाः ॥ ६ ॥ गुणेषुविषयेष्वेवंनत्वात्माविक्रियत्वतः ॥ आत्मनोनिर्विकारत्वंगुणानांचविकारिताम् ॥ ७ ॥ ज्ञात्वाकर्तृत्वबुद्धिंनकरोत्येषविमूढवत् ॥ सामुद्रिकोक्तसच्चिन्हयुक्तत्वात्त्वंविमूढवत् ॥ ८ ॥ कर्तृत्वाभिनिवेशंमाकार्षीरितिमहाभुज ॥ ९ ॥ २८ ॥

यस्मान्नैवंत्वमात्मज्ञःकिंतुकर्माधिकारवान् ॥तस्मान्नित्यंफलासंगशून्यःकर्मयथाविधि ॥ १ ॥ तमेतमितिवाक्येनविहितंसम्यगाचर॥ यस्मात्समाचरन्नीशाराधनंसंगवर्जितः ॥ २ ॥ धीशुद्ध्याज्ञानसंप्राप्तिद्वारेणपरमंपदम् ॥ पुरुषोमोक्षमाप्नोतिसएवपुरुषोमतः ॥ ३ ॥ १९ ॥ ननु मेब्रह्मजिज्ञासोर्ज्ञाननिष्ठाप्तयेसदा ॥ श्रवणाद्येवकर्तव्यंकर्मत्यागपुरःसरम् ॥ १ ॥ यथातत्त्वविदःकर्मसंन्यासोऽस्तितथामम ॥ बुभुत्सोरपि संन्यासःकिंनस्यादितिचेच्छृणु ॥ २॥ श्रुतिस्मृतिप्रसिद्धायेक्षत्रियाजनकादयः॥ मुमुक्षवोवाविद्वांसःस्वधर्मेणसहैवते॥ ३ ॥ धीशुद्धिंज्ञाननिष्ठांवाप्राप्तानत्यागतोयतः ॥ ततोऽपिखंबुभुत्सुर्वाविद्वान्वाक्षत्रियस्ततः ॥ ४ ॥ स्वधर्माचरणंसम्यक्कर्तुमेवसदार्हसि ॥ संन्यासविधिवाक्ये

तस्मादसक्तःसततंकार्यंकर्मसमाचर ॥ असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः ॥ १९ ॥
कर्मणैवहिसंसिद्धिमास्थिताजनकादयः॥ लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि॥ २० ॥

हिब्राह्मणत्वंविवक्षितम् ॥ ५ ॥ संन्यासाभावएवास्तियतःक्षत्रियवैश्ययोः ॥ चत्वारआश्रमाविप्रेराजन्यस्यत्रयःस्मृताः ॥ ६ ॥ द्वौवैश्यस्य स्मृतौसिद्धौपुराणेभारतेतथा ॥ मुखजानामयंधर्मोयद्विष्णोर्लिंगधारणम् ॥ ७ ॥ बाहुजातोरुजातानांनायंधर्मःप्रशस्यते ॥ जनकादिसमाचारंपश्यंस्वंकर्मसाधय ॥ ८ ॥ स्वेस्वेधर्मेचलोकानामुन्मार्गाद्विनिवर्त्ययत् ॥ स्थापनंप्रोच्यतेलोकसंग्रहस्तंत्वमाश्रय ॥ ९ ॥ सर्वेराजाश्रिताधर्माराजाधर्मस्यधारकः ॥ १० ॥ २० ॥

एवमुक्त्वान्वयेमोक्षंदोषमाहविपर्यये ॥ येतुनास्तिक्यतःश्रद्धाहीनाएतन्मतंमम ॥ १ ॥ दोषमुद्भावयंतोनानुवर्तंतेऽतिदुर्धियः ॥ तानतोदुष्टचित्तांश्चमंदभाग्यान्सुधिक्कृतान् ॥ २ ॥ सर्वत्रकर्मणीशेवासगुणेनिर्गुणेचयत् ॥ ज्ञानंतत्रात्ययोग्यांश्चमानतोमेयतःफलात् ॥ ३ ॥ पुरुषार्थपरिभ्रष्टाज्ञानीहिहतकर्मणः ॥ ४॥३२ ॥ ननुराज्ञइवेशस्यतवाज्ञातिक्रमेभयम्॥पश्यंतस्तेमतंनानुतिष्ठंतीतिकथंतव ॥ १ ॥ प्रतिकूलाःकथंवातेपुरुषार्थैकसाधने॥शृणुप्राग्जन्मसंस्कारोधर्माधर्मादिगोचरः॥ २ ॥ वर्तमानभवेव्यक्तःसर्वतोबलवांश्चयः॥प्रकृतिःसास्वकीयायास्तस्याःसदृशमेव

येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतम् ॥ सर्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ॥ ३२ ॥
सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि ॥ प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति ॥ ३३ ॥

हि ॥ ३ ॥ सर्वोऽपिगुणदोषज्ञश्रेष्टतेकिमुमूढधीः ॥ तस्मात्सर्वेऽनुवर्तंतेप्राणिनःप्रकृतिंस्विकाम् ॥ ४ ॥ पुरुषार्थक्षयेहेतुभूतामपिदुरत्ययाम् ॥ राज्ञोवाममवातत्रनिग्रहःकिंकरिष्यति ॥ ५॥ रागौत्कट्येनदुरितान्ननिवर्तयितुंक्षमाः॥महानरकहेतुत्वंज्ञात्वापिवासनाबलात्॥६॥ प्रवर्तमानाःपापेषुमदाज्ञातिक्रमादपि ॥ नबिभ्यतीतितात्पर्यंहरेर्नारायणस्यच ॥ ७ ॥ ३३ ॥

मायायाःकार्यरूपेणगुणैःपरिणतैर्जनाः ॥ देहेंद्रियादिभिःसम्यङ्मूढास्तत्राभिमानिनः ॥ १ ॥ तेषांदेहेंद्रियादीनांव्यापारेष्वभ्रमावृताः ॥
स्वीयांबुद्धिंप्रकुर्वंतितान्मूढान्कर्मसंगिनः ॥ २ ॥ मंदानशुद्धचित्तत्वाद्देहाद्यात्माभिमानिनः ॥ ज्ञानाधिकारमप्राप्तान्परिपूर्णात्मवित्स्वयम्
॥ ३ ॥ नैवप्रच्यावयेत्कर्मश्रद्धातोऽल्पविदोजनान् ॥ ४ ॥ २९ ॥ कथंमुमुक्षुणाज्ञेनकर्मण्यधिकृतेनच ॥ कर्तव्यंकर्मशास्त्रीयमित्यत्राहरमा
पतिः ॥ १ ॥ मयिसर्वात्मनीशाव्हेसर्वज्ञेपरमेश्वरे ॥ श्रौतानिसर्वकर्माणिलौकिकानिसमर्प्यच ॥ २ ॥ अहंकर्तेश्वराधीनस्तदर्थंभृत्यवत्सदा

प्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु ॥ तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत् ॥२९॥ मयि
सर्वाणिकर्माणिसन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममोभूत्वायुद्ध्यस्वविगतज्वरः ॥ ३० ॥
येमेमतमिदंनित्यमनुतिष्ठंतिमानवाः ॥ श्रद्धावंतोऽनसूयंतोमुच्यंतेतेऽपिकर्मभिः ॥ ३१ ॥

॥ करोमीत्यनयाबुद्ध्यानिष्कामोममतोज्झितः ॥ ३ ॥ दुर्यशोनरकप्राप्तिहेतुशोकविवर्जितः ॥ युद्ध्यस्वेतिविहितानिकुरुकर्माणिशास्त्रतः
॥ ४ ॥३० ॥ येमदीयंयथोक्तंचमतमावश्यकंसदा ॥ श्रद्धावंतोऽनुवर्ततेनराःकर्माधिकारिणः ॥ १ ॥ मयीश्वरेगुरौविष्णौसर्वभूतानुकंपि
नि ॥ अहोदुःखात्मकेक्रूरेकर्मणीशःप्रवर्तयन् ॥ २ ॥ मामकारुणिकोऽयंस्यादित्युदारगुणेष्वपि ॥ असूयांदोषबुद्धिंचाकुर्वंतोधर्मतत्पराः
॥३॥तेऽपिधीशुद्धितस्तत्त्वज्ञानप्राप्तिमुखेनच ॥ सम्यग्ज्ञानिवदेवाशुधर्माधर्माख्यकर्मभिः॥४॥बंधनापरपर्यायैर्मुच्यंतेमत्प्रसादतः ॥५॥३१॥

ननुस्वाभाविकींरागद्वेषहेतुप्रवृत्तिकीम् ॥ त्यक्त्वाशास्त्रीयमेवेहकर्मकर्तव्यमस्तिचेत् ॥ १ ॥ तदायदंजसाकर्तुंशक्यंभिक्षाशनादिकम् ॥ तदे
वक्रियतांकिंमेयुद्धेनश्रमदायिना ॥ २ ॥ मैवंस्वधर्मोयंवर्णमाश्रमंप्रतिचोदितः ॥ श्रुत्यासएवतस्यास्तिप्रशस्यतरआमृतेः ॥ ३ ॥ ससर्वा
गोपसंहारमंतरेणकृतोऽपिच ॥ स्वंप्रत्यविहिताद्धर्मात्सर्वांगैःसाधितादपि ॥ ४ ॥ अतःस्थितस्यस्वेधर्मेकिंचिदंगाननुष्ठिते ॥ अपिस्यान्मरणं
श्रेयःपरधर्मस्थजीवितात् ॥ ५ ॥ इहकीर्त्यावहोयस्मात्परलोकेसुखावहः ॥ स्वधर्मस्तत्रधीमद्भिःस्थेयंशास्त्रार्थवेदिभिः ॥ ६ ॥ परधर्मस्तुलो
कानामिहाकीर्तिकरोयतः ॥ परत्रानर्थदोघोरनरकादिप्रदानतः ॥ ७ ॥ तस्माद्रागादिवद्धन्यधर्मोहेयोमुमुक्षुभिः ॥ ८ ॥ ३५ ॥ यद्यप्यन

श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् ॥ स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ॥ ३५ ॥ अर्जुन उवाच ॥ अथकेनप्रयुक्तोऽयंपापंचरतिपूरुषः ॥ अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः ॥ ३६ ॥

र्थमूलंप्राग्ध्यायतोविषयानिति ॥ प्रोक्तंतथाधुनारागद्वेषौशत्रूप्रकीर्तितौ ॥ १ ॥ प्रकृतेर्गुणसंमूढाइत्यादौबहुविस्तरात् ॥ पुंसःपृथक्पृथक्तत्रसर्वे
षांविनिवारणे ॥ २ ॥ महाप्रयासएवस्यादतःसर्वस्यकारणम् ॥ किमेकंयन्निवृत्त्यास्यात्कृतकृत्यत्वमंजसा ॥ ३ ॥ ममेत्याशयवानाहहरिंप्रत्यर्जुनोव
चः ॥ केनायंहेतुभूतेनप्रेरितःपुरुषोऽवशः ॥ ४ ॥ अनिष्टहेतुकंकर्मनिषिद्धंचरतिस्फुटम् ॥ अनिच्छन्नप्ययंकर्तुभृत्योराज्ञेवयेंनसः ॥ ५ ॥ बला
न्नियोजितोजानन्नप्यनिष्टानुबंधितत् ॥ कर्मानुचरतीत्येनंप्रेरकंब्रूहिमांप्रति ॥ ६ ॥ वृष्णिवंशेऽवतीर्णत्वान्नोपेक्ष्योऽहंहरेत्वया ॥ ७ ॥ ३६ ॥

एवंपृष्टेऽर्जुनेनाहभगवानुत्तरंवचः ॥ अथोखल्वाहुरित्यादिश्रुतिसिद्धमसंशयम् ॥ १ ॥ शृणुतंवैरिणंयंत्वंपृच्छसत्यंतदुःसहम् ॥ बलादनर्थमार्गेऽस्मिन्कामएषप्रवर्तकः ॥ २ ॥ सर्वानर्थपरिप्राप्तिनिमित्तंशत्रुरात्मनः ॥ केनचिद्धेतुनाकामःप्रतिबद्धःसएवहि ॥ ३ ॥ क्रोधःपरिणतोभातितस्मिन्कामेनिवारिते ॥ सर्वश्रेयःपरिप्राप्तिस्ततोऽस्यशृणुकारणम् ॥ ४ ॥ चलप्रवृत्तिदुःखात्मायस्यहेतूरजोगुणः ॥ यद्वारजोगुणस्यायंकारणंलोभरूपधृक् ॥५॥ नायंसामादिभिःसाध्योहंतव्योदंडतोरिपुः ॥ महाशनत्वाद्धानेनसंधातुंनैषशक्यते॥६॥यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः ॥ नालमेकस्यतत्सर्वमितिमत्वाशमंव्रजेत् ॥ ७ ॥ संधातुंसामभेदाभ्यामत्युग्रत्वान्नशक्यते ॥ तेनायंप्रेरितोजंतुर्महापापेप्रवर्तते ॥ ८ ॥ अतोजानीहिसंसारेकाममेनंहिवैरिणम् ॥ तदेतद्विवृतंसर्ववार्तिकेश्रीसुरेश्वरैः ॥९॥ आत्मैवेदमितिश्रुत्याव्याख्यानेनिर्मलैःपदैः ॥ प्रवृत्तौचनिवृ

श्रीभगवानुवाच ॥ कामएषक्रोधएषरजोगुणसमुद्भवः ॥ महाशनोमहापाप्माविद्ध्येनमिहवैरिणम् ॥३७॥

त्तौचयथोक्तस्याधिकारिणः ॥ १० ॥ स्वातंत्र्येसतिसंसारस्तौकस्मात्प्रवर्तते ॥ नतुनिःशेषविध्वस्तसंसारानर्थवर्त्मनि ॥ ११ ॥ निवृत्तिलक्षणेवाच्यंकेनायंप्रेर्यतेऽवशः ॥ अनर्थपरिपाकत्वमपिजानन्प्रवर्तते ॥ १२ ॥ पारतंत्र्यमृतेदृष्टाप्रवृत्तिर्नेदृशीक्वचित् ॥ तस्माच्छ्रेयोऽर्थिनःपुंसःप्रेरकोऽनिष्टकर्मणि ॥ १३ ॥ वक्तव्यस्तन्निरासार्थमित्यर्थास्यात्परा श्रुतिः ॥ अनाप्तपुरुषार्थोऽयंनिःशेषानर्थसंकुलः ॥ १४ ॥ इत्यकामयतानाप्तान्पुमर्थान्साधनैर्जडः ॥ जिहासतितथानर्थानविद्वानात्मनिश्रितान् ॥ १५ ॥ अविद्योद्भूतिकामःसन्नथोखल्वितिचश्रुतिः ॥ अकामतःक्रियाःकाश्चिद्दृश्यंतेनेहकस्यचित् ॥ १६ ॥ यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितम् ॥ कामएषक्रोधएषइत्यादिवचनंस्मृतेः ॥ १७ ॥ प्रवर्तकोनापरोऽतःकामादन्यःप्रतीयते ॥ १८ ॥ ३७ ॥

महापाप्मतयातस्यस्पष्टयत्यतिवैरिताम् ॥ दृष्टांतैस्तत्रकामोऽयंचतुर्धाप्रोच्यतेक्रमात् ॥ १ ॥ मनसोलब्धवृत्तित्वाच्छरीरारंभतःपुरा ॥ सू
क्ष्मःकामःशरीरेचारब्धेस्थूलःसवृत्तिके ॥ २ ॥ विषयेचिंत्यमानेस्यात्कामःस्थूलतरस्ततः ॥ भोगस्यावसरेऽत्यंतोद्रिक्तस्थूलतमस्ततः ॥३॥
अप्रकाशेनधूमेनसहजेनानलोयथा ॥ प्रकाशात्मावृतोदाहमुखंकार्यंकरोतिच ॥ ४ ॥ मलेनागंतुकेनासावादर्शस्त्वावृतःस्वकम् ॥ प्रति

धूमेनाव्रियतेवन्हिर्यथादर्शोमलेनच ॥ यथोल्बेनावृतोगर्भस्तथातेनेदमावृतम् ॥ ३८ ॥

च्छायाग्रहंकार्यंनकरोतियथास्फुटम् ॥ ५ ॥ स्वच्छताधर्ममात्रस्यतिरोधानवशात्सच ॥ उपलभ्यतएवासौस्वरूपेणचदर्पणः ॥ ६ ॥ जरा
युणावृतोगर्भःस्वरूपेणनलभ्यते ॥ हस्तपादादिचेष्टांचनकरोतियथेष्टतः ॥ ७ ॥ तत्प्रकारत्रयेणेदंकामेनाच्छाद्यतेतथा ॥ ८ ॥ ३८ ॥

नन्वेवंप्राणिनःसर्वेप्रकृतेर्वशवर्तिनः ॥ विध्यादिशास्त्रानर्थक्यंप्राप्तंतर्हियतोजनः ॥ १ ॥ नकश्चित्प्रकृतेर्हीनोयंप्रतिस्यात्तदर्थवत् ॥ पौरुषस्यापिवैयर्थ्यंप्राप्तमित्यत्रचोच्यते ॥ २ ॥ इंद्रियाणांसमस्तानांशब्दादिविषयेऽखिले ॥ रागःशास्त्रनिषिद्धेऽपिद्वेषस्तद्विहितेऽपिच ॥ ३ ॥ प्रतींद्रियार्थमित्येवंरागद्वेषौव्यवस्थितौ ॥ प्रातिकूल्यानुकूल्याख्याव्यवस्थातत्रकारणम् ॥ ४ ॥ तत्रपूरुषकारस्यशास्त्रस्यविषयस्त्वयम् ॥ नतयोर्वशमागच्छेच्छास्त्रीयात्सद्विवेकतः ॥ ५ ॥ अत्यनिष्टानुबंधित्वज्ञानाभावपुरःसरम् ॥ इष्टसाधनताज्ञानंहेतूरागोद्भवेनृणाम् ॥ ६ ॥ पुरस्कृत्यैवतंरागंनिषिद्धेप्रकृतिर्हिंसा ॥ कलंजभक्षणादौचप्रवर्तयतिपूरुषम्॥ ७ ॥ अभीष्टहेतुताज्ञानाभावेनैवोपबृंहितम् ॥ अनिष्टहेतुताज्ञानंहेतुर्द्वेषोद्भवेनृणाम् ॥ ८ ॥ पुरस्कृत्यैवसाद्वेषंशास्त्रीयादपिपूरुषम् ॥ निवर्तयतिनित्यादेःप्रकृतिःकर्मणोवशम् ॥ ९ ॥ शास्त्रेणज्ञापितातत्र

इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यवस्थितौ ॥ तयोर्नवशमागच्छेत्तौह्यस्यपरिपंथिनौ ॥ ३४ ॥

निषिद्धेऽनर्थहेतुता ॥ विहितेऽभीष्टहेतुत्वंज्ञापितंतद्वयंबुधः ॥ १० ॥ विनिश्चित्यास्तिकस्तत्रयथाशास्त्रंप्रवर्तते ॥ तदासाप्रकृतिर्ह्येनंज्ञानवंतंनरंबलात् ॥ ११ ॥ नशक्नोतितमानेतुंरागद्वेषवशेकदा ॥ विषसंपृक्तमिष्टान्नभोजनादौयथानृणाम् ॥ १२ ॥ निवृत्तिर्दृश्यतेऽभीष्टहेतुताज्ञानबाधनात् ॥ तपोवित्तव्ययादौचाभीष्टसाधनताधिया ॥ १३ ॥ प्रवृत्तिर्दृश्यतेऽनिष्टहेतुताज्ञानबाधनात् ॥ शास्त्रीयंज्ञानमाश्रित्यरागद्वेषौविनाशयेत् ॥ १४ ॥ रागद्वेषौयतःशत्रूमोक्षमार्गवियोजकौ ॥ आध्यासिकौविघ्नकरौश्रेयोमार्गेऽतिदुःसहौ ॥ १५ ॥ शास्त्रीयज्ञानप्राबल्यात्पौरुषेणपुमानयम् ॥ समूलौतौसमुच्छेत्तुंशक्नोत्यात्मावबोधतः ॥ १६ ॥ ३४ ॥

यतोऽसाविंद्रियाधारःकामोमोहायदेहिनः ॥ तस्मात्त्वंमोहनात्पूर्वंप्राग्वाकामनिरोधतः ॥ १ ॥ श्रोत्रादीनींद्रियाण्येववशीकृत्यसुवंशज ॥ पापमूलंरिपुंकाममंमारयैनमशेषतः ॥ २ ॥ ज्ञानंपरोक्षमित्युक्तंशास्त्राचार्योपदेशजम् ॥ अपरोक्षंहिविज्ञानंश्रेयःसाधनयोस्तयोः ॥ ३ ॥ नाशनंदुष्टमत्यंततत्त्वज्ञानिरिपुंशठम् ॥ ननुज्ञानंसमुत्पन्नंसविज्ञानंयदातदा ॥ ४ ॥ बाधित्वाऽज्ञानतत्कार्येतिष्ठत्यात्मनिनिश्चलम् ॥ कामस्योत्पत्तिमात्रेणतस्यनाशःकथंभवेत् ॥ ५ ॥ वेदांतमानसंसिद्धंज्ञानंविज्ञानसंयुतम् ॥ कामादिमात्रनाश्यंचेद्वृथातत्रपरिश्रमः ॥ ६ ॥ ज्ञानंवस्तुप्रमायत्तंसाधितंब्रह्मविद्वरैः ॥ तत्कथंनश्यतिक्षिप्रंसतिमानेचवस्तुनि ॥ ७ ॥ किंचज्ञानस्यनाशेनप्रतिद्वंद्विसमुद्भवः ॥ यथादीपप्रभानाशेतिमिरस्यसमुद्भवः ॥ ८ ॥ तद्विरुद्धमनिर्वाच्यानाद्येकाज्ञानवादिनाम् ॥ अनादिभावरूपस्याज्ञानस्यास्यजनिःकथम् ॥ ९ ॥ अ

तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ ॥

न्यथाभवतामेवस्वसिद्धांतक्षतिर्भवेत् ॥ बाढंज्ञानंसविज्ञानंजातंजातुननश्यति ॥ १० ॥ तदुक्तेःकागतिस्तर्हिशृणुत्वंयुक्तितःस्फुटम् ॥ ज्ञानविज्ञानघातित्वंकामस्येत्यत्रनोहरेः ॥ ११ ॥ तात्पर्यंकिंतुकामस्यदुष्टस्यात्यंतनिंदया ॥ हेयत्वेऽस्त्यन्यथावाक्यभेदःस्यात्ततएवच ॥ १२ ॥ तत्त्वज्ञानेसमुत्पन्नेजीवन्मुक्तमुनेरयम् ॥ कामाभासःसमुत्पन्नोयदिप्रारब्धकर्मणा ॥१३॥ प्रत्युतज्ञाननाश्योऽसावक्षमोज्ञाननाशने ॥ तथाप्ययंनविश्वास्यःकामइत्येवकथ्यते ॥ १४ ॥ मुमुक्षोरुपदेशार्थंहरिणाभ्रांतिहारिणा ॥ अयमत्रास्तिनिष्कर्षोभगवद्वचसोमतः ॥ १५ ॥ बाध्योऽप्यज्ञानबाधाच्छ्रुतिशिखरवचोजन्यबोधेनकामोवामोऽयंमोक्षमार्गेप्रबलतरिपुर्नैवविश्वासयोग्यः ॥ तत्त्यागेसन्मुमुक्षोरनुदिनमधिकंयत्नमास्थायबोधःसाध्योविज्ञानयुक्तोहरिरितिवदतिब्रह्मविद्याप्रदाता ॥ १६ ॥ यद्वाकामस्यदौष्ट्यंतत्सर्वमिहवर्ण्यते ॥ तत्त्यागायतथाप्राहज्ञान

तथातेनेतिवाक्यंचविवृणोतिहरिःस्वयम् ॥ इदंशब्दोदितंज्ञानमंतःकरणमेववा ॥ १ ॥ कामेनाच्छादितंतत्त्वज्ञानिनोनित्यवैरिणा ॥ अ
ज्ञोहिभोगकालेतंपश्यन्मित्रमिवाधमम् ॥ २ ॥ प्राप्तेदुःखेचतत्कार्येवैरितांवेत्तिदुःखितः ॥ ज्ञानीतुभोगकालेऽपिवेत्त्यनेनाहमाग्रहात् ॥ ३ ॥
अनर्थेऽस्मिन्प्रयुक्तोऽस्मीत्यतोज्ञस्यसदारिपुः ॥ इच्छातृष्णादिरूपोऽसौहंतव्यःसर्वथाततः ॥ ४ ॥ नविद्यतेऽलंपर्याप्तिर्यस्यसोऽत्यंतदुर्भ
रः ॥ यथापूरयितुंनैवहविषाशक्यतेऽनलः ॥ ५ ॥ तथायमपिभोगेनहेयस्तस्माद्विवेकिना ॥ नजातुकामःकामानामुपभोगेनशाम्यति

**आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा ॥ कामरूपेणकौंतेयदुःपूरेणानलेनच ॥ ३९ ॥ इंद्रि
याणिमनोबुद्धिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनम् ॥ ४० ॥**

॥ ६ ॥ हविषाकृष्णवर्त्मेवभूयएवाभिवर्धते ॥ इतिस्मृत्यापिकामस्यत्यागएवविशिष्यते ॥ ७ ॥ दोषदृष्ट्याहिभोगेषुनभोगासक्तिरासुरी ॥ ८ ॥
॥ ३९ ॥ ज्ञातेशत्रोरधिष्ठानेसजेतुंशक्यतेऽजसा ॥ तदधिष्ठानमेवाहसमस्तानींद्रियाणिच ॥ १ ॥ शब्दादिग्राहकाण्यस्यवचनादिकराणिच
॥ संकल्पात्मामनोज्ञेयंबुद्धिर्निश्चयरूपिणी ॥ २ ॥ कामस्यह्याश्रयोयस्मादेतैःसोऽपींद्रियादिभिः ॥ स्वस्वव्यापारवद्भिस्तैराश्रयैर्मोहयत्यसौ
॥ ३ ॥ विवेकज्ञानमाच्छाद्यमूढंदेहाभिमानिनम् ॥ ४ ॥ ४० ॥

स्वकर्मानुसारेणवर्तंतांतेतथातथा ॥ अविशिष्टःसर्वबोधःसमामुक्तिरितिस्थितिः ॥ ३७ ॥ इत्यादिसंप्रदायज्ञैरयमर्थउदीरितः ॥ जातेऽपित
त्त्वविज्ञानेप्रारब्धाख्येनकर्मणा ॥ ३८ ॥ जीवतःपुरुषस्यास्तिचित्तधर्मोह्यनेकधा ॥ रागद्वेषादिकःक्लेशहेतुत्वादेषतद्विदः ॥ ३९ ॥ सबा
धितानुवृत्त्यापिबंधोभवतितत्क्षणे ॥ चित्तवृत्तिनिरोधेनतस्ययोगेनवारणम् ॥ ४० ॥ प्रोक्तंबहुविधंशास्त्रेजीवन्मुक्तिसुखाप्तये ॥ अतःका
मोद्भवाज्जीवन्मुक्तेःस्यात्प्रतिबंधनम् ॥ ४१ ॥ तदर्थंहरिणाप्रोक्तंज्ञानविज्ञाननाशनम् ॥ चित्तस्यसर्वदोषाणांराजाकामउदीरितः ॥ ४२ ॥
तन्निराकरणेनैवसर्वदोषनिराकृतिः ॥ जीवन्मुक्तिसुखंतज्ज्ञचेतस्याविर्भवत्यपि ॥ ४३ ॥ यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखम् ॥ तृष्णा
क्षयसुखस्यैतेनार्हतःषोडशींकलाम् ॥ ४४ ॥ कामोद्भवोमुमुक्षोर्हितत्त्वधीप्रतिबंधकः ॥ तज्ज्ञस्यात्मसुखास्वादप्रतिबंधकईर्यते ॥ ४५ ॥ त
दर्थंतस्यनाशाययत्नआस्थेयआदरात् ॥ मुमुक्षुणात्मबोधायतज्ज्ञेनात्मसुखायच ॥ ४६ ॥ इतिश्रीकरुणासिंधोर्हरेरद्भुतकर्मणः ॥ तात्पर्यग
म्यतेविष्णोःशास्त्रयोनेरमापतेः ॥ ४७ ॥ तत्त्वज्ञानेऽपिजातेभ्रमतिमिरहरेशांतिदेसज्जनानांजीवन्मुक्तयापिभाव्यंपरमसुखदयासर्वविक्षेपना
शात् ॥ तत्रप्रारब्धदोषाद्यदिभवतिमतौकामशत्रोःप्रचारोमोक्षोभाव्यंतकालेत्वपिसपदिपरंदृष्टदुःखंननश्येत् ॥ ४८ ॥ अथवातत्त्वजिज्ञा
सोरुपदेशार्थमेवहि ॥ कामनिंदाह्युपक्रांतातथाहिश्रीहरेर्मतम् ॥ ४९ ॥ कामस्तृष्णादिपर्यायोदुःपूरोयत्रतिष्ठति ॥ ज्ञानविज्ञानयोस्तत्रगंधो
ऽप्यत्यंतदुर्लभः ॥ ५० ॥ वक्ष्यत्येवहरिःसाक्षात्षोडशेकामदुष्टताम् ॥ त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः ॥ ५१ ॥ कामःक्रोधस्तथालो
भस्तस्मादेतत्त्रयंत्यजेत् ॥ एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः ॥ ५२ ॥ आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिम् ॥ कामलोभावुभावत्र
कामशब्देनकीर्तितौ ॥ ५३ ॥ क्रोधस्तस्यानुजोऽप्यत्रकाममूलउदीरितः ॥ कामएषक्रोधएषइत्यत्रहरिणास्वयम् ॥ ५४ ॥ तस्मात्काम
रिपावंतर्भूतत्वेनैवतौमतौ ॥ तस्मिन्सतिनगंधोऽपिश्रेयसःसाधनस्यवा ॥ ५५ ॥ अतएनंरिपुंकामंविनियम्येंद्रियाणिच ॥ नाशयत्वंसुखा
वाप्त्यैपौरुषेणबलीयसा ॥ ५६ ॥ नन्विंद्रियनिरोधेनकथंकामस्यनाशनम् ॥ सतिकामेनिरोधोऽपितेषांभातीहदुर्घटः ॥ ५७ ॥ काममूल

मिदंयस्माच्चांचल्यंहींद्रियाश्रयम् ॥ केनोपायेनतीव्रेणक्षमःस्यांकामनाशने ॥ ५८ ॥ इत्यत्राहहरिःसाक्षाज्ज्ञानविज्ञानसाधनम् ॥ नाशने
बाधनेज्ञानविज्ञानेअस्यवैयतः ॥ ५९ ॥ ज्ञानविज्ञानरूपाभ्यांसाधनाभ्यांसमूलतः ॥ नाशनंयस्यकामस्यतत्रत्वंयत्नवान्भव ॥ ६० ॥ देहें
द्रियादिसंघातेयावदस्त्यात्मधीर्दृढा ॥ कामोऽपितावदेवास्तिबलवानतिदुःखदः ॥ ६१ ॥ अविद्याहेतवःकामाःकाममूलाःप्रवृत्तयः ॥ धर्मा
धर्मौचतन्मूलौदेहोऽनर्थाश्रयस्ततः ॥ ६२ ॥ अतोऽविद्यानिरोधेस्यान्निरोधोविदुषःसदा ॥ निःशेषकर्महेतूनांविकाराणांतदैवतु ॥ ६३ ॥
इत्युक्तंवार्तिकेस्पष्टंतैत्तिरीयकभाष्यके ॥ अहंकारचिदात्माबावेकीकृत्याविवेकतः ॥ ६४ ॥ इदंमेस्यादिदंमेस्यादितीच्छाकामशब्दिता ॥ देहा
दिभ्योविविच्यातोज्ञातेब्रह्मात्मवस्तुनि ॥ ६५ ॥ समूलस्यैवकामस्यनाशनंभवतिस्वयम् ॥ अतोमुख्यउपायोऽयंतुभ्यंसमुपदिश्यते ॥ ६६ ॥
ज्ञानंशास्त्रीयमाश्रित्यतत्त्वमस्यादिवाक्यजम् ॥ देशिकोक्तनयैर्युक्तंविज्ञानंस्वानुभूतिजम् ॥ ६७ ॥ नाशयत्वमिमंशत्रुंकामंपौरुषमास्थि
तः ॥ इत्येवंवाकृपासिंधोस्तात्पर्यंश्रीहरेर्विभोः ॥ ६८ ॥ संदर्भस्योत्तरस्यापियतोऽस्मिन्पक्षएवहि ॥ स्वारस्यंतत्रचिद्धातोर्जडवर्गाद्विवेच
नम् ॥ ६९ ॥ स्वाज्ञानाध्यस्तदेहद्वयमहमितिसंश्रित्ययस्यास्तियावत्कामक्रोधादिदोषःप्रभवतिभयदस्तस्यतावन्मुमुक्षोः ॥ देहादिभ्योवि
विच्याभयपदममलंतत्त्वमाज्ञायसम्यक्ध्वस्तेऽज्ञानेसकार्येह्यपनयतिसुधीःकामशत्रुंसुखेन ॥ ७० ॥ क्वशास्त्रंगीताख्यंहरिमुखसरोजाद्विगलि
तंक्वचास्माकंबुद्धिर्विषयविषपंकेनिपतिता ॥ तथापिश्रीकांतप्रचुरगुणलक्ष्मीविरचितंकटाक्षंस्वच्छाच्छंह्यनुसृतवतांकिंनसुलभम् ॥७१॥४१॥

स्मिन्भोक्तृत्वविज्ञानात्स्वात्मानंदाविवेकतः ॥ भोग्यसौंदर्यसंभ्रात्याकामोऽयंजायतेनृणाम् ॥ १ ॥ प्रत्यगात्माविविच्यातोद्रष्टव्योंऽतर्धियानयैः ॥ कामशत्रुविनाशायनिजानंदाप्तयेतथा ॥ २ ॥ देहेंद्रियमनोधीभ्यःपृथक्कृत्यविवेकतः ॥ सर्वसाक्षीपरोदृश्याद्रूष्टाद्रष्टव्यआदरात् ॥ ३ ॥ असंगात्मानमाश्रित्यभोग्यमिथ्यात्वबोधतः ॥ हेयःकामःपरःशत्रुरित्याहभगवान्हरिः ॥ ४ ॥ स्थूलंजडंपरिच्छिन्नंबाह्यंदेहमपेक्ष्यहि ॥ प्रकाशकत्वात्सूक्ष्मत्वाद्व्यापकत्वात्पराणिच ॥ ५ ॥ इंद्रियाणींद्रियेभ्यस्तुप्रेरकत्वान्मनःपरम् ॥ मनसस्तुपराबुद्धिर्निश्चयैकस्वरूपिणी ॥ ६ ॥ यस्तुबुद्धेःपरस्तस्याभासकत्वेनचिद्वपुः ॥ यमविद्यावृतंकामःस्वाश्रयैर्मोहयत्यसौ ॥ ७ ॥ बुद्धेर्द्रष्टापरःसोऽयमात्मासाक्षीविविच्यताम् ॥ अत्रायम

इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः ॥ मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ॥ ४२ ॥

स्तिनिष्कर्षःसाक्षित्त्वविवेचने ॥ ८ ॥ देहःस्थूलोजडोऽयंजनिमरणयुतोनायमात्माकदाचित्सूक्ष्मोलिंगापराख्योभ्रमशतवलितोवैकृतोनायमात्मा ॥ सुप्त्यादौभावहीनस्तडिदिवगलितोऽज्ञानमात्रैकहेतुःसाक्षीतस्याप्यभावंसुखघनवपुषावेत्तितद्भिन्नबोधः ॥ ९ ॥ विश्वोवैश्वानरोऽयंव्यभिचरतियतोजागरेविप्रणष्टेसूत्रात्मातैजसोऽपिस्वयमिहगलतिप्रत्यहंसंप्रसादे ॥ प्राज्ञेशौसंप्रबोधेसुखघनविषयेसंलयंप्राप्नुतश्चप्रत्यग्ब्रह्माद्वयात्मास्वयमिहनिगमाच्छिष्यतेभ्रांतिशून्यः ॥ १० ॥ ४२ ॥

विज्ञाननाशनम् ॥ १७ ॥ ज्ञानविज्ञानशब्दाभ्यांतत्फलंमुक्तिरुच्यते ॥ साद्विधास्तिसदेहैकाविदेहान्येतितत्रच ॥ १८ ॥ उत्पन्नेतत्त्वविज्ञा
नेसाक्षात्कारापराभिधे ॥ अवश्यंसभवेन्मुक्तोदेहपातादनंतरम् ॥ १९ ॥ जीवन्मुक्तिफलंकामक्रोधादिभिरिहारिभिः ॥ प्रतिबद्ध्यतएवेति
दर्शनार्थमिहोच्यते ॥ २० ॥ अहोकामस्यदुष्टत्वंकिमुवाच्यमतःपरम् ॥ यदयंज्ञानविज्ञानफलेसत्यपितत्क्षणे ॥ २१ ॥ उद्भूतःप्रतिबध्नाति
जीवन्मुक्तिसुखंमुनेः ॥ यस्यांवृत्तौसआह्लादोजीवन्मुक्तिसुखाभिधः ॥ २२ ॥ आरूढःसुखयत्येनंनष्टाविद्यंविचक्षणम् ॥ यदितत्रागतःका
मोदुष्टप्रारब्धकर्मणा ॥ २३ ॥ तत्क्षणेतत्सुखंचासौप्रतिबध्नातिवेदिनः ॥ ननुज्ञानेस्थितेतत्रसविज्ञानेज्ञचेतसि ॥ २४ ॥ कथंकामोद्भवस्त
त्रसंभवेदितिचेच्छृणु ॥ प्रारब्धकर्मप्राबल्यात्कामोत्पत्तिर्ज्ञचेतसि ॥ २५ ॥ सतिमिथ्याबोधेऽपिविषयेष्वचसंभवेत् ॥ ननुतत्त्वविदांचि
त्तेकामःप्रारब्धकर्मणा ॥ २६ ॥ जायतेऽत्रप्रमाणंकिमितिचेच्छ्रीहरेर्वचः ॥ सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि ॥ २७ ॥ प्रकृतिंयांति

पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनम् ॥ ४१ ॥

भूतानिनिग्रहःकिंकरिष्यति ॥ तथैवोक्तंचवासिष्ठेनिर्वाणेकुंभवाक्यतः ॥ २८ ॥ ज्ञस्याज्ञस्यचदेहस्ययावद्देहमयंक्रमः ॥ लोकवद्व्यवहारोऽयं
शक्त्याशक्त्याथवासदा ॥ २९ ॥ येपरिज्ञातगतयोयेचाज्ञाःपशुधर्मिणः ॥ लोकस्यव्यवहारेषुतेस्थितालोकजालवत् ॥ ३० ॥ व्यवहारे
यथैवाज्ञस्तथैवाखिलपंडितः ॥ वासनामात्रभेदोऽत्रकारणंबंधमोक्षयोः ॥ ३१ ॥ यावच्छरीरंतावद्धिदुःखेदुःखंसुखेसुखम् ॥ असंसक्तधियो
धीरादर्शयंत्यप्रबुद्धवत् ॥ ३२ ॥ तथैवभाष्येभामत्यांचायमर्थोनिदर्शितः ॥ पश्वादिभिश्चाविशेषादित्यत्रातिस्फुटंतथा ॥ ३३ ॥ विदंतुश्रु
तियुक्तिभ्यांदेहादिभ्योविलक्षणम् ॥ विशुद्धंप्रत्यगात्मानंब्रह्मैक्यंचिद्घनंसुखम् ॥ ३४ ॥ प्राणभृन्मात्रधर्मंतुव्यवहारेविदांवराः ॥ नातिव
र्तंतइत्यादौभामत्यांनिर्णयःकृतः ॥ ३५ ॥ प्रारब्धकर्मनानात्वाद्बुधानामन्यथान्यथा ॥ वर्तनंतेनशास्त्रार्थेभ्रमितव्यंनपंडितैः ॥ ३६ ॥ स्व

एवंबुद्धेःपरंपूर्णसाक्षात्कृत्यस्वयाधिया ॥ स्थिरीकृत्यमनःकामंशत्रुंमारयसर्वथा ॥ १ ॥ समूलोच्छेदनंतस्यमारणंतत्त्वबोधतः ॥ तृष्णारूपं चदुर्ज्ञेयानेकभेदंभ्रमप्रदम् ॥ २ ॥ प्रयत्नाधिक्यमाश्रित्यनाश्योऽयंसर्वथारिपुः ॥ ३ ॥ ४३ ॥ यंयोगीश्रद्दधानःक्रतुभिरर्पयजंश्चित्तशुद्धयै तिमोक्षंसांख्योयन्निष्ठयाप्तापरमितपदधीर्मज्जतिस्वेसुखाब्धौ ॥ यत्स्मृत्याकामशत्रुंह्यपनयतिसुधीःसाक्षिणंसंविविच्यस्वांतेतंदीनबंधुंगुरुमति

एवंबुद्धेःपरंबुद्धवासंस्तभ्यात्मानमात्मना ॥ जहिशत्रुंमहाबाहोकामरूपंदुरासदम् ॥ ४३ ॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेकर्मयोगोनामतृतीयोऽध्यायः ॥ ३ ॥

सुहृदंसंस्थितंकृष्णमीडे ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ ज्ञाननिष्ठाप्रधानोऽयंतृतीयःपूर्णतांगतः ॥ ३५९ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ १३०६ ॥

॥ इतिश्रीमद्भगवद्गीतायांभावप्रकाशेतृतीयाध्यायःसमाप्तः ॥

एवमादित्यमारभ्यगुरुशिष्यपरंपरा ॥ तयाप्राप्तमिमंयोगंराजानऋषयश्चते ॥ १ ॥ प्रभुत्वेसतिसूक्ष्मार्थनिरीक्षणक्षमानृपाः ॥ विदुर्निम्याद यःपूर्वेस्वपित्राद्युक्तमादरात् ॥ २ ॥ अनादिवेदमूलत्वादनंतफलभावतः ॥ अनादिसंप्रदायत्वाद्योगोऽयंस्तूयतेमहान् ॥ ३ ॥ एवंमहाफ लोयोगोधर्मन्हासकरेणसः ॥ नष्टोदीर्घेणकालेनद्वापरांतेऽधुनाक्षितौ ॥ ४ ॥ दुर्बलान्प्राप्यभोगादौतत्परानजितेंद्रियान् ॥ कामाद्यैरभि भूतःसन्विच्छिन्नःसंप्रदायतः ॥ ५ ॥ क्रोधादिशत्रुसंघंयःशौर्येणस्वविवेकतः ॥ तापयत्यर्कवत्सत्वमधिकारीजितेंद्रियः ॥ ६ ॥ स्वर्लोके ऽप्युर्वशीत्यागितयासम्यक्परीक्षितः ॥ परेविपक्षभूतास्तान्शौर्यतेजोगभस्तिभिः ॥ ७ ॥ तापयत्यर्कवद्वायंप्रोक्तस्त्वंहिपरंतपः ॥ ८ ॥ २ ॥ सएवायंपराचीनस्तुभ्यंस्नेहवशान्मया ॥ प्रोक्तोयतस्त्वंमद्भक्तोमामेवशरणंगतः ॥ १ ॥ सखास्निग्धःसहायोऽसिततस्तुभ्यमनुत्तमम् ॥ गोप

एवंपरंपराप्राप्तमिमंराजर्षयोविदुः ॥ सकालेनेहमहतायोगोनष्टःपरंतप ॥ २ ॥ सएवायं मयातेऽद्ययोगःप्रोक्तःपुरातनः ॥ भक्तोऽसिमेसखाचेतिरहस्यंह्येतदुत्तमम् ॥ ३ ॥ अर्जुनउवा च ॥ अपरंभवतोजन्मपरंजन्मविवस्वतः ॥ कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति ॥ ४ ॥

नीयमिदंज्ञानंप्रोक्तमत्यद्भुतोपमम् ॥ २ ॥ मायातीतोऽप्यसंगोविमलमतिमतांभावगम्योऽप्यगम्योयःसंकल्पेनलोकान्विरचयतिविभुर्ब्रह्मरुद्रादिनेतृन् ॥ यस्तिष्ठन्स्वेमहिम्निस्वपदरतधियांभक्तिविद्यादिसिद्धचैस्वात्मानंनित्यशुद्धंवपुरिवसृजतिश्रीपतिंतंश्रयेऽहम् ॥ ३ ॥ ३ ॥ वा सुदेवेभगवतिमूढानामविचारिणाम् ॥ मनुष्यत्वेनजन्मादिशंकायातांसचार्जुनः ॥ १ ॥ अपनेतुमनूद्यैवमुवाचश्रीपतिंप्रति ॥ वसुदेवगृहे जन्मभवतश्चाधुनातनम् ॥ २ ॥ सर्गादौबहुकालीनंजन्मादित्यस्यचश्रुतम् ॥ कथमेतद्विजानीयामविरुद्धार्थभावतः ॥ ३ ॥ त्वमिदानींत नस्तस्मैसर्गादौप्रोक्तवानिति ॥ ४ ॥ ४ ॥

शंकांपरिहरन्नाहसर्वज्ञःसर्वशक्तिमान् ॥ अतिक्रातानिजन्मानिस्वेच्छोपात्तवपूंषिमे ॥ १ ॥ बहूनिपरमेशस्यवासुदेवस्यसद्विभोः ॥ तव चाज्ञानिनःकर्मनिर्मितानितथार्जुन ॥ २ ॥ अर्जुनेतितरोनार्म्नास्चयत्यावृतांमतिम् ॥ तानिजन्मानिसर्वाणिसर्वज्ञोऽहंमहेश्वरः ॥ ३ ॥

श्रीभगवानुवाच ॥ बहूनिमेव्यतीतानिजन्मानितव
चार्जुन ॥ तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ॥ ५ ॥

विजानामिखदीयानिमदीयानीत्यलुप्तदृक् ॥ नत्वंवेत्थतिरोभूतज्ञानशक्तितयाज्ञकः ॥ ४ ॥ भेददृष्ट्यापरंशत्रुंपरिकल्प्यत्वमुद्यतः ॥ हंतुंवि पर्ययज्ञानवत्त्वादित्याशयोहरेः ॥ ५ ॥ ५ ॥

सर्वज्ञस्यतवेशस्यधर्माधर्माद्यभावतः ॥ जन्मैवासंभविस्वामिन्कुतस्तेबहुधाजनिः ॥ १ ॥ इत्यत्राहचिदानंदकंदलःश्रीरमापतिः ॥ अपूर्वदे
हसंबंधोजन्मतद्वर्जितोऽप्यहम् ॥ २ ॥ पूर्वदेहस्यविच्छेदोव्ययस्तद्रहितोऽपिसन् ॥ ब्रह्मादीनांचभूतानांसर्वेषामीश्वरोऽपिसन् ॥ ३ ॥ विचि
त्रानेकशक्त्याढ्यांमायाख्यांप्रकृतिंस्विकाम् ॥ स्वोपाधिभूतामत्यंतासंभावितप्रदर्शिनीम् ॥ ४ ॥ चिच्छाययावशीकृत्यस्यामहंदेहवानिव ॥
अजातोजातइवचस्वेच्छयास्वात्ममायया ॥ ५ ॥ वैष्णवीममायेयंमनुष्यत्वादिनाटनम् ॥ लोकस्यानुग्रहायैववस्तुवृत्त्यानतन्मयि ॥ ६ ॥
मायात्वेषामयासृष्टायन्मांपश्यसिनारद ॥ सर्वभूतगुणैर्युक्तंनतुमांद्रष्टुमर्हसि ॥७॥ मोक्षधर्मोक्तरीत्यापिवस्तुतोऽहंनिराकृतिः ॥ यस्याविद्या
दिसंबंधोजन्मतस्यैवयुज्यते ॥ ८ ॥ निरविद्यस्यशुद्धस्यकथंभूतमयंवपुः ॥ तथैवोक्तंपुराणेऽपिब्रह्मांडाख्येमहर्षिणा ॥ ९ ॥ स्त्रीपुंमलानुंषगा
त्मादेहोनास्यविजायते ॥ किंतुनिर्दोषचैतन्यंसुखनित्यांस्विकांतनुम् ॥ १० ॥ प्रकाशयतिसैवेयंजनिर्विष्णोर्नचापरा ॥ नित्योयःकारणो

अजोऽपिसन्नव्ययात्माभूतानामीश्वरोऽपिसन् ॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया ॥ ६ ॥

पाधिर्मायाख्योनैकशक्तिमान् ॥ ११ ॥ सएवभगवद्देहइतिभाष्यकृतांमतम् ॥ अन्येत्वाहुर्नचैवास्तिदेहदेहिभिदाहरौ ॥ १२ ॥ किंत्वखड
चिदानंदघनोयोविभुरद्वयः ॥ निर्गुणोनित्यपूर्णात्माविग्रहोऽस्यसएवहि ॥ १३ ॥ भौतिकोमायिकोवान्योनास्तिदेहोहरेर्विभोः ॥ अत
आहस्वयंविष्णुरजइत्यादिकागिरः ॥ १४ ॥ आकाशवत्सर्वगतोनित्यइत्यादिवेदतः ॥ प्रकृतिंस्वांचिदानंदस्वभावंप्रकृतेःपरम् ॥ १५ ॥
सर्वदैकरसंनित्यंस्वेमहिम्निप्रतिष्ठितम् ॥ स्वस्वरूपमधिष्ठायस्वस्वरूपेत्यवस्थितः ॥ १६ ॥ देहिवद्विहरामीशोदेहदेहिभिदोज्झितः ॥ १७ ॥
स्वतःस्वच्छेबोधेविगलितमहामोहतिमिरेमयीशेजन्मादेर्नभवतिकदाकापिकलना ॥ स्वभक्तोद्धारार्थंस्वयमहमजोऽप्यात्मकलयाचिदानंदा
कारंपुवरिवसृजामीड्यममलम् ॥ १८ ॥ ६ ॥

श्रीगणेशायनमः ॥ अथचतुर्थाध्यायव्याख्याप्रारंभः ॥ यमाराध्यानंतरंविमनुमुखाब्रह्मपदवींविदित्वात्रैलोक्येसुजनमणितामापुरमिताम् ॥ श्रुतीनांसिद्धांतंप्रथितमहिमादेशिकवपुःस्वभक्तायाहेशस्तमहममलंनौमिशतशः ॥ १ ॥ साध्यसाधनरूपौद्वौयोगौपूर्वमुदाहृतौ ॥ साध्यसाधनयोरैक्यंफलैक्यादौपचारिकम् ॥ २ ॥ साधनंकर्मयोगाख्यंसाध्यंज्ञानमनेकधा ॥ गुणैःस्तौतिहरिर्वंशकीर्तनेनाधुनास्फुटम् ॥ ३ ॥ एतावान्सर्ववेदार्थोगीतार्थश्चविवक्षितः ॥ श्रीहरेरित्यतश्चोर्ध्ववेदार्थंसकलंहरिः ॥ ४ ॥ समाप्तंकिलमन्वानःस्तौतिवेत्यवतारिका ॥ इममध्याययुग्मेनप्रोक्तंयोगंविवस्वते ॥ ५ ॥ सर्वक्षितीशसद्वंशबीजभूतायभास्वते ॥ सर्गादौप्रोक्तवान्सर्वजगतांपालकोह्यहम् ॥ ६ ॥ जग

श्रीभगवानुवाच ॥ इमंविवस्वतेयोगंप्रोक्तवानहमव्ययम् ॥
विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

त्पालयितुंराज्ञांबलाधानायतेनते ॥ युक्तायोगबलेनस्युःसमर्थाविश्वपालने ॥ ७ ॥ अक्षयश्रुतिमूलत्वादविनाशिफलत्वतः ॥ अव्ययंस्वफलान्नैवव्येतिराज्ञांबलंह्यतः ॥ ८ ॥ आधातुंराजयोगोऽयंक्षमतेविश्वपालने ॥ ममशिष्यःसवैस्वर्यःश्राद्धदेवायस्वनवे ॥ ९ ॥ मनवेप्राहतंयोगंब्रह्मात्मौकारणंपरम् ॥ मनुर्वैवस्वतःप्राहस्वपुत्रायादिभूभुजे ॥ १० ॥ इक्ष्वाकवेसइत्थंहियोगःसंस्तूयतेऽधुना ॥ प्रतिमन्वंतरंयोगोपदेशोयद्यपीशितुः ॥ ११ ॥ साधारणस्तथाप्यर्कमारभ्यहरिणाधुना ॥ वैवस्वतमनौवर्तमानेवंशपरंपरा ॥ १२ ॥ संप्रदायविशुद्ध्यर्थंप्रोक्तालोकहितायच ॥ एतादृशायशिष्यायपुत्रायानुगतायच ॥ १३ ॥ देयोऽयंराजयोगश्चेत्याशयःश्रीरमापतेः ॥ १४ ॥ १ ॥

सर्वमुक्तजनैःप्राप्यंस्वात्मानंसंप्रदर्श्यच ॥ मोक्षाध्वनोऽप्यनादित्वंदर्शयत्यधुनाहरिः ॥ १ ॥ तत्तत्फलैषणारागोभयंभोगेषुदीनता ॥ विष
योच्छेदकत्वेनज्ञानमार्गःकथंहितः ॥ २ ॥ इतिद्वेषोऽत्रक्रोधोऽस्तितेत्रयोऽत्यंतदुःसहाः ॥ विवेकाद्विगतायेभ्यःशुद्धसत्त्वाविरागिणः ॥ ३ ॥
तत्त्वंपदार्थाभेदेनमामेवाद्वयमांतरम् ॥ साक्षात्कृत्यैवमद्रूपामामेवशरणंगताः ॥ ४ ॥ ज्ञानमेवतपःसर्वकर्मविध्वंसकारणम् ॥ तेनपूताःपरि
क्षीणाज्ञानतत्कार्यकल्मषाः ॥ ५ ॥ बहवःसच्चिदानंदघनंमद्भावमागताः ॥ ६ ॥ १० ॥ येज्ञानतपसापूतास्त्वद्भावंयांतितेजनाः ॥ नेतरेचे
तिवैषम्यंफलदातुस्तवेतिचेत् ॥ १ ॥ शृण्वार्तार्थित्तकामाश्रज्ञानिनश्रमुमुक्षवः ॥ सकामत्वेननिष्कामतयायेमांयथेश्वरम् ॥ २ ॥ समस्तफ

वीतरागभयक्रोधामन्मयामामुपाश्रिताः ॥ बहवोज्ञानतपसापूतामद्भावमागताः ॥ १० ॥
येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहम् ॥ ममवर्त्मानुवर्तंतेमनुष्याःपार्थसर्वशः ॥ ११ ॥

लदातारंभजंतेतांस्तथैवच ॥ तदभीष्टप्रदानेनत्वनुगृण्हाम्यहंहरिः ॥ ३ ॥ आर्तानार्तिविनाशेनवित्तदानेनचार्थिनः ॥ जिज्ञासून्ज्ञानदाने
नज्ञानिनोमोक्षदानतः ॥ ४ ॥ अनुगृण्हाम्यहंस्वामीनान्यकामायचान्यथा ॥ फलार्थित्वेमुमुक्षुत्वेहरिरेवनृणांगतिः ॥ ५ ॥ इत्याहाखिल
भूतानामात्मास्वामीगुरुःसखा ॥ सर्वात्मनःपरेशस्यममवर्त्मानुवर्तनम् ॥ ६ ॥ ज्ञानकर्मात्मकंसर्वेजीवाःकर्माधिकारिणः ॥ अनुवर्तंतएवा
स्मिन्पार्थसर्वप्रकारतः ॥ ७ ॥ अन्यदेवान्भजंतोऽपिभजंतेमाखिलात्मकम् ॥ ८ ॥ ११ ॥

चिदानंदघनस्यैवंकिमर्थंतववाकदा ॥ देहिवद्व्यवहारोऽस्तीत्यतआहजगद्गुरुः ॥ १ ॥ द्विविधस्यास्यधर्मस्यवेदप्रामाणिकस्यच ॥ स्वर्गमो
क्षनिमित्तस्यप्राणिनांहियदायदा ॥ २ ॥ क्षतिर्भवत्यधर्मांशैःस्वर्गमोक्षविरोधिभिः ॥ श्रुतिस्मृतिनिषिद्धस्याधर्मस्यानर्थकारिणः ॥ ३ ॥
उद्भवोधर्मशत्रोश्चभवतीहयदायदा ॥ तदातदाहमात्मानंनित्यसिद्धंस्वमायया ॥ ४ ॥ दर्शयामिसृष्टमिवचिद्घनंपरमार्थतः ॥ ५ ॥ ७ ॥
धर्माधर्मविपर्यासःकिंतवाभिमतोयतः ॥ तदैवाविर्भवस्येवमपेक्षायामितीर्यते ॥ १ ॥ साधूनांहीयमानानांधर्महान्यामहात्मनाम् ॥ वेदमा
र्गेस्थितानांचरक्षणायसमंततः ॥ २ ॥ पापिनांवर्धमानानामधर्मस्योद्भवेनच ॥ विध्वंसनायदुष्टानांवेदमार्गविरोधिनाम् ॥ ३ ॥ वेदमार्ग

यदायदाहिधर्मस्यग्लानिर्भवतिभारत ॥ अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहम् ॥ ७ ॥
परित्राणायसाधूनांविनाशायचदुष्कृताम् ॥ धर्मसंस्थापनार्थायसंभवामियुगेयुगे ॥ ८ ॥
जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्वतः ॥ त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोऽर्जुन ॥ ९ ॥

परित्राणधर्मसंस्थापनायच ॥ नित्यसिद्धःप्रतियुगंस्वयंप्राडुर्भवाम्यहम् ॥ ४ ॥ ८ ॥ जन्मैवंनित्यसिद्धस्यचिदानंदघनस्यमे ॥ लीलयामो
घयाशक्त्यातथानुकरणंक्षितौ ॥ १ ॥ धर्मसंस्थापनेनैवजगतःपरिपालनम् ॥ कर्ममेवासुदेवस्यनित्यसिद्धेश्वरस्यच ॥ २ ॥ अक्रियस्यातिशु
द्धस्यदिव्यमप्राकृतंपरम् ॥ अन्यैःकर्तुमशक्यंयदसाधारणमैश्वरम् ॥ ३ ॥ योवेत्तितत्त्वतोभ्रांतिंत्यक्त्वैवंमूढधीगताम् ॥ सच्चिदानंदरूपस्या
जस्यापिस्वात्ममायया ॥ ४ ॥ जन्मानुकरणंचैवमकर्तुरपिसर्वथा ॥ कर्मानुकरणंलोकानुग्रहायेतिवेत्तियः ॥ ५ ॥ सआत्मतत्त्वविज्ञाना
त्त्यक्त्वादेहमिमंबुधः ॥ प्राप्नोतिनपुनर्जन्ममामेवैतिचिदद्वयम् ॥ ६ ॥ जीवन्मुक्तोमुनिर्भूत्वासंसारान्मुच्यतेऽर्जुन ॥ ७ ॥ ९ ॥

कर्तृत्वचनिराकृत्यनिराचष्टेऽथभोक्तृताम् ॥ कर्माणिविश्वसृष्ट्यादीन्यनहंकारमीश्वरम् ॥ १ ॥ देहाद्यारंभकत्वेननमांबध्नंतिचिद्घनम् ॥ नवा ममाप्तकामस्यतृष्णाकर्मफलेयतः ॥ २ ॥ कर्तृत्वाभिनिवेशेनतथैषफलतृष्णया ॥ लिंपंत्यज्ञांस्तुकर्माणितदभावान्नमांहरिम् ॥ ३ ॥ एवंयो ऽन्योऽपिमामीशमात्मत्वेनश्रुतेर्नयात् ॥ अकर्तारमभोक्तारंवेत्तिस्वानुभवेनच ॥ ४ ॥ धर्माधर्मादिरूपाणिकर्माणिबंधकान्यपि ॥ तस्यापि

नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहा ॥ इतिमांयोऽभिजानातिकर्मभिर्नसबद्ध्यते ॥ १४ ॥
एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः ॥ कुरुकर्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतम् ॥ १५ ॥

नैवदेहाद्यारंभकानिभवंतिवै ॥ ५ ॥ सचाकर्त्रात्मबोधेनमुच्यतेकर्मबंधनैः ॥ ६ ॥ १४ ॥ एवमेवात्मनोऽकर्तुःकर्मालेपंविचार्यवै ॥ कृतंक र्मयुगेऽप्यस्मिन्नतिक्रांतैर्मुमुक्षुभिः ॥ १ ॥ तस्मात्त्वमपिकर्मैवकुरुत्यागस्तुनोचितः ॥ धीशुद्ध्यर्थंमुमुक्षुश्चेत्तज्ज्ञश्चेत्संग्रहायच ॥ २ ॥ युगांत रेकृतंपूर्वैःकृतंतज्जनकादिभिः ॥ अवश्यंकर्मकर्तव्यंकृतत्वात्सार्वकालिकैः ॥ ३ ॥ १५ ॥

नन्वत्रकर्मविषयेकिंकश्चित्संशयोऽस्तिवा ॥ पूर्वैःपूर्वतरंचेतियेनोक्तमितिचेच्छृणु ॥ १ ॥ निष्क्रियेष्वपितीरस्थवृक्षेष्वगमनभ्रमः ॥ नौस्थस्य दृश्यतेपुंसस्तस्मात्किंकर्मवस्तुतः ॥ २ ॥ चक्षुषासन्निकृष्टेष्वगच्छत्स्वप्यतिदूरतः ॥ नरेष्वगमनभ्रांतिदर्शनात्किमकर्मतत् ॥ ३ ॥ अतःकिं वस्तुतःकर्मकिमकर्मेतिवार्थतः ॥ मेधाविनोऽपिकर्मादिविषयेनिर्णयेऽर्थतः ॥ ४ ॥ असामर्थ्यंगताश्चातिदुर्निरूपतयाखिलाः ॥ तस्मात्तु भ्यमहंकर्मवक्ष्यामितदकर्मच ॥ ५ ॥ कर्माकर्मस्वरूपंयज्ज्ञात्वामुक्तोभविष्यसि ॥ अशुभागारसंसाराज्जन्ममृत्युप्रवाहतः ॥ ६ ॥ १६ ॥

किंकर्मकिमकर्मेतिकवयोऽप्यत्रमोहिताः ॥ तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥१६॥
कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः ॥ अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः ॥ १७ ॥

सर्वलोकप्रसिद्धत्वाज्जानाम्यप्यहमेवतत् ॥ देहेंद्रियादिव्यापारःकर्माकर्मविपर्ययः ॥ १ ॥ किंत्वयातत्रवक्तव्यमितिचेच्छृणुतत्त्वतः ॥ यस्माच्छास्त्रविधानस्यबोद्धव्यंतत्त्वमस्तिते ॥ २ ॥ निषिद्धस्यापिबोद्धव्यंतत्त्वमस्तिविकर्मणः ॥ तूष्णींभावस्यबोद्धव्यमस्तितत्त्वमकर्मणः ॥ ३ ॥ यतस्तत्त्वंचदुर्ज्ञेयंकर्माकर्मविकर्मणाम् ॥ ४ ॥ १७ ॥

कीदृशंतर्हिकर्मादेस्तत्त्वमित्यत्रकथ्यते ॥ देहेंद्रियादिव्यापारेनिषिद्धेविहितेतथा ॥ १ ॥ कर्मण्यहंकरोमीतिधर्माध्यासेप्रकल्पिते ॥ स्वात्म
न्यसंगचिद्रूपेनिरीहेनिष्क्रियेऽमले ॥ २ ॥ पश्यत्यकर्मयोवस्तुदृष्ट्वासम्यग्विवेकतः ॥ यथानौस्थेनतीरस्थवृक्षेष्वविचलेष्वपि ॥ ३ ॥ कल्पि
तंचलनंतद्वदक्रियेकर्मकल्पितम् ॥ अकर्त्रात्मविचारेणकर्माभावंचवस्तुतः ॥ ४ ॥ तीरस्थवृक्षेष्विवयःपश्यत्यात्मस्वरूपवित् ॥ तथामाया
विकारेषुसदादेहेंद्रियादिषु ॥ ५ ॥ सव्यापारेषुतच्छून्यस्तूष्णीमासेसुखंत्विति ॥ आरोपिताभिमानेनव्यापारोपरमाभिधे ॥ ६ ॥ गच्छ

कर्मण्यकर्मयःपश्येदकर्माणिचकर्मयः ॥

त्स्वगमनंयद्वत्कल्पितंनृषुदूरगैः ॥ सदादेहेंद्रियादीनांसव्यापारविचारणात् ॥ ७ ॥ यश्चकर्मनिवृत्त्याख्यंव्यापारंपरिपश्यति ॥ उदासीनद
शायामप्यहमासेसतादृशः ॥ ८ ॥ एवंरूपोऽभिमानोऽस्तिकर्मयश्चेतिपश्यति ॥ एवंभूतःसआत्मज्ञोबुद्धिमत्त्वादिभिर्गुणैः ॥ ९ ॥ स्तूयते
वासुदेवेनसम्यग्दर्शितयामुनिः ॥ अत्राद्यपादेसंप्रोक्तंतत्त्वंकर्मविकर्मणोः ॥ १० ॥ विहितेप्रतिषिद्धेचकर्मशब्दप्रयोगतः ॥ अकर्मणोद्वि

ननुत्वामेवसर्वेशंनभजंतेकुतोऽखिलाः ॥ सर्वाभीष्टप्रदातारमित्यत्राहरमापतिः ॥ १ ॥ कर्मणांफलनिष्पत्तिंप्रार्थयंतोजनाइह ॥ पूजयंतींद्रवन्ह्यादीनज्ञानहतबुद्धयः ॥ २ ॥ कर्मजन्यंफलंयस्मादिंद्रवन्ह्यादियाजिनाम् ॥ तत्फलंकांक्षिणांपुंसांशीघ्रंभवतिभारत ॥ ३ ॥ तत्त्वज्ञानफलंबुद्धिशुद्धिसाक्षेपभावतः ॥ नशीघ्रंभवतीत्यस्मादन्यान्देवान्भजंतिते ॥ ४ ॥ क्षिप्रंहिमानुषेलोकेइत्यस्मात्तुविशेषणात् ॥ अन्यलोकेऽप्युपासादिकर्मजासिद्धिरूहिता ॥ ५ ॥ सकामामोक्षविमुखास्तत्तत्क्षुद्रफलाप्तये ॥ अन्यदेवान्यजंतेऽतोमांभजंतिमुमुक्षवः ॥ ६ ॥ १२ ॥
गुणानामपिवैषम्याच्छरीरारंभकारिणाम् ॥ नसर्वेतुल्यशीलाःस्युरित्याहप्रकृतेःपतिः ॥१॥ चत्वारएववर्णास्तेष्यज्ञःस्वार्थेविधानतः ॥ गुणकर्म

कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः ॥ क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा ॥ १२ ॥
चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः ॥ तस्यकर्तारमपिमांविद्ध्यकर्तारमव्ययम् ॥ १३ ॥

विभागेनवर्णास्तेब्राह्मणादयः ॥ २ ॥ चत्वारोनिर्मिताःसर्गेमयाभगवतायतः ॥ सत्त्वप्रधानायेविप्रास्तेषांकर्मशमादिकम् ॥ ३ ॥ सत्वगौणरजोमुख्यानृपाःशौर्यादिकर्मिणः ॥ तमोगौणरजोमुख्यावैश्याःकृष्यादिकर्मिणः ॥ ४ ॥ तमःप्रधानाःशूद्रास्तत्कर्मशुश्रूषणादिकम् ॥ तदिदंमानुषेलोकेचातुर्वर्ण्यंव्यवस्थितम् ॥ ५ ॥ एवंवैषम्यसृष्टेस्तेकर्तृत्वात्तत्फलेनच ॥ संबंधोदुर्निवारःस्यादित्यतःप्राहमाधवः ॥ ६ ॥ व्यवहारदृशातस्यचातुर्वर्ण्यस्यसर्वशः ॥ कर्तारंसंतमपिमांपरमार्थदृशाऽव्ययम् ॥ ७ ॥ विद्ध्यकर्तारमक्षीणस्वभावमनहंकृतिम् ॥ निर्विकारतयासंतंमांज्ञात्वामुच्यतेभयात् ॥ ८ ॥ १३ ॥

यथार्थदर्शिनोऽध्यासाभावात्कर्माद्यसंगता ॥ प्रपंच्यतेऽत्रहरिणाश्लोकैःषड्भिरतिस्फुटम् ॥ १ ॥ यथोक्तदर्शिनोयस्यसर्वेश्रौताश्चलौकिकाः ॥ कर्माभिधाःसमारंभाःफलाहंकारवर्जिताः ॥ २ ॥ शरीरयात्रामात्रार्थंसंग्रहायाथवामुधा ॥ चेष्टामात्राभवंत्याप्तकामस्याद्वैतदर्शिनः ॥ ३ ॥ यत्कर्मादावकर्मादिदर्शनंज्ञानमेवतत् ॥ अग्निस्तेनप्रदग्धानियस्यकर्माणिसर्वशः ॥ ४ ॥ परमार्थेनतंप्राहुःपंडितंब्रह्मविद्वराः ॥ पंडितस्तत्त्वदर्शीस्यान्नतुभ्रांतोजडात्मदृक् ॥ ५ ॥ १९ ॥ सम्यग्ज्ञानेसमुत्पन्नेकार्यंज्ञस्यनकिंचन ॥ कृतैःकर्मभिरस्पृष्टभावत्वादेवमुच्यते ॥ १ ॥ कर्तृत्वाहंकृतिंत्यक्त्वाफलेतृष्णांचकर्मणि ॥ परानंदात्मलाभेननिराकांक्षोऽखिलेफले ॥ २ ॥ देहाद्यहंकृतेःशून्योदृष्टादृष्टाश्रयातिगः ॥ एवंभूतःप्रवृत्तोऽपिलोकदृष्ट्यायथाविधि ॥ ३ ॥ लौकिकेवैदिकेवासौकर्मण्यारब्धयोजितः ॥ स्वदृष्ट्यानिष्क्रियःस्वात्मदर्शनध्वस्तविक्रियः

यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताः ॥ ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितंबुधाः ॥ १९ ॥
त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः ॥ कर्मण्यभिप्रवृत्तोऽपिनैवकिंचित्करोतिसः ॥ २० ॥
निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः ॥ शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषम् ॥ २१ ॥

॥ ४ ॥ स्वेमहिम्निस्थितोधीरोनैवकिंचित्करोत्यसौ ॥ ५ ॥ २० ॥ यदाचात्यंतविक्षेपकारणैरपिकर्मभिः ॥ सम्यग्ज्ञानान्नलेपोऽस्तितदा भिक्षाटनादिभिः ॥ १ ॥ नास्तिबंधोब्रह्मविदःकिमुवाच्यमितीर्यते ॥ वीततृष्णोवशेनीतंचित्तंदेहेंद्रियैःसह ॥ २ ॥ येनसोऽत्यंतवैराग्यात्त्यक्तभोगोपकारकः ॥ एतादृशोऽपिप्रारब्धवशाद्भिक्षाटनादिकम् ॥ ३ ॥ शरीरस्थितिमात्रार्थंकायिकंवाचिकंतथा ॥ मानसंकर्मकर्तृत्वाध्यासशून्यःसमाचरन् ॥ ४ ॥ अकर्त्रात्मदृशानासौधर्माधर्मफलंयतिः ॥ संसारंकिंचनाप्नोतिबाधितत्वाच्छुभाशुभम् ॥ ५ ॥ यतेरनिष्टहेतुत्वात्पुण्यमप्यस्यकिल्बिषम् ॥ ६ ॥ २१ ॥

तीयेनतत्त्वमत्रप्रदर्शितम् ॥ ११ ॥ सत्यांकर्तृत्वबुद्धौहिवूष्णीमासेऽहमित्यपि ॥ बंधहेतुरविद्येयंवस्तुतत्त्वाविचारणात् ॥ १२ ॥ तस्मा
त्त्वमीदृशंतत्त्वंकर्माकर्मविकर्मणाम् ॥ ज्ञात्वाकर्मैवविहितंकुरुत्यक्त्वोभयंत्रिषु ॥ १३ ॥ यद्वाकर्मणिदृश्येऽस्मिन्जडेहिज्ञानकर्मणि ॥ सत्ता
स्फूर्त्यात्मनातत्त्वमनुस्यूतंसदद्वयम् ॥ १४ ॥ भ्रमाधिष्ठानचैतन्यमकर्मावेद्यमांतरम् ॥ परमार्थदृशैवंयःपश्यत्यद्धाविविक्तदृक् ॥ १५ ॥
तथाकर्मणिदृग्वस्तुस्वप्रकाशेप्रकल्पितम् ॥ कर्मदृश्यंमृषारूपंमायाकार्यक्षरंजडम् ॥ १६ ॥ दृग्दृश्ययोर्नसंबंधोविनाध्यासंभ्रमात्मकम् ॥ अ

सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् ॥ १८ ॥

न्योन्याध्यासमाबाध्ययःशुद्धंवस्तुपश्यति ॥ १७ ॥ सबुद्धिमान्मनुष्येषुतत्त्वदर्शितयोत्तमः ॥ सयुक्तोयोगफलभाग्धीशुद्ध्यासर्वकर्मकृत्
॥ १८ ॥ तस्मात्त्वमपियाथात्म्यंज्ञात्वास्तुत्योभवात्मनः ॥ इदमेवहिबोद्धव्यंतत्त्वंकर्मादिगोचरम् ॥ १९ ॥ एवंज्ञानाद्विमुक्तःस्यात्संसारा
न्नान्यबोधतः ॥ अत्रपद्येकुधीभिर्यत्कल्पितंस्वकपोलतः ॥ २० ॥ खंडितंभाष्यकारैस्तद्व्याख्यानंचात्यसंगतम् ॥ २१ ॥ १८ ॥

ननुज्ञानेसमुत्पन्नेपूर्वकर्मविनश्यतु ॥ क्रियमाणंकथंकर्माऽजनयित्वाफलंविदः ॥ १ ॥ नश्यतीत्यत्रब्रह्मैक्यबोधेनेत्याहमाधवः ॥ बहुकारक साध्यास्तिक्रियायागादिकाऽखिला ॥ २ ॥ देवतोद्देशतोद्रव्यत्यागोयागउदाहृतः ॥ सएवत्यज्यमानस्यद्रव्यस्याग्नौयथाविधि ॥ ३ ॥ प्रक्षेपाद्वोमइत्युक्तस्तत्रोद्देश्यास्तिदेवता ॥ संप्रदानंहविःशब्दवाच्यंद्रव्यंयदस्तितत् ॥ ४ ॥साक्षाद्वात्वर्थकर्मास्तितत्फलंतुस्वरादिकम् ॥ भावना कर्मयस्मात्तत्तद्द्रव्यंविहितंभवेत् ॥ ५ ॥ एवंजुव्हादिकरणंप्रक्षेपेऽत्यंतसाधकम् ॥ भासकत्वेनमंत्रादिकरणंद्विविधंतथा ॥ ६ ॥ त्यागप्रक्षे पभेदेनक्रियापिद्विविधेरिता ॥ त्यागेयजमानःकर्ताप्रक्षेपोऽध्वर्युकर्तृकः ॥ ७ ॥ प्रक्षेपाधिकरणंस्यादग्निःस्वर्गादिकंफलम् ॥ तदेवमखिलं यज्ञक्रियाकारकवस्तुयत् ॥ ८ ॥ ब्रह्माज्ञानेनतत्रैवाध्यस्तंरज्जौसर्गादिवत् ॥ ब्रह्मज्ञानेनबाधेतुभासमानमपिस्फुटम् ॥ ९ ॥ कल्पतेनैवबं

ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतम् ॥ ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना ॥ २४ ॥

धाययथास्वाग्नंप्रजागरे ॥ ब्रह्मदृष्टिरियंसर्वयज्ञरूपतयाधुना ॥ १० ॥ स्तूयतेहरिणासम्यक्दृष्टिदार्ढ्यायतद्विदाम् ॥ अर्पणंचार्प्यतेऽनेनजुव्हादिकरणंहियत् ॥ ११ ॥ अर्प्यतेऽस्माइतिप्रोक्तंसंप्रदानंचदेवता ॥ अर्प्यतेऽस्मिंस्तुदेशाद्याधारोऽधिकरणंतथा ॥ १२ ॥ ब्रह्मण्यारो पितत्वात्तत्सर्वंब्रह्मैवनेतरत् ॥ कल्पितस्यपृथक्सत्ताधिष्ठानान्नास्तिसर्वथा ॥ १३ ॥ त्यागादिकक्रियाकर्महविर्ब्रह्मैववस्तुसत् ॥ यत्रप्रक्षिप्य तेऽग्नौतत्सोऽपिब्रह्मैवकेवलम् ॥ १४ ॥ त्यज्यतेक्षिप्यतेयेनसकर्ताब्रह्मचिन्मयम् ॥ त्यागप्रक्षेपरूपायाक्रियाब्रह्मैवतद्धुतम् ॥ १५ ॥ हुतेनतेन गंतव्यंफलंब्रह्मस्वरादितत् ॥ कर्मण्यनेनरूपेणसमाधिर्यस्यधीमतः ॥ १६ ॥ तेनब्रह्मविदाब्रह्मगंतव्यंचित्सुखाद्वयम् ॥ १७ ॥ २४ ॥

एवंसंपाद्ययज्ञत्वंसम्यग्दृष्टेरथाधुना ॥ तत्स्तुत्यर्थंमखानन्यानुपन्यस्यतिकेशवः ॥ १ ॥ देवाइंद्रमुखायेनेज्यंतेयज्ञःसदैवकः ॥ तंकुर्वंतिसदाय
ज्ञंयोगिनःकर्मिणोऽपरे ॥ २ ॥ सत्यंज्ञानमनंतंयन्निर्विशेषंनिरंजनम् ॥ तत्पदार्थःपरंब्रह्मतदेवाग्निर्हुताश्रयः ॥ ३ ॥ तस्मिन्नग्नौचिदात्मानं
त्वंपदार्थमुमुक्षवः ॥ वस्तुतोब्रह्मसंततंयज्ञंबुद्ध्यादिसंयुतम् ॥ ४ ॥ आहुतीरूपमध्यस्तंब्रह्मत्वेनैवजुव्हति ॥ सर्वोपाधिपरित्यागाद्ब्रह्मात्मैक्य
मखंडितम् ॥ ५ ॥ पश्यंतिब्रह्मनिष्ठास्तेभेदंसम्यनङ्निरस्यच ॥ यज्ञत्वेनैवसंपाद्यब्रह्मात्माभेददर्शनम् ॥ ६ ॥ तत्स्तोतुंपठ्यतेमध्येतत्साधनम
खेषुवै ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञइतीहसा ॥७॥संस्तुतिर्ज्ञानयज्ञस्यसम्यग्भगवतोच्यते॥८ ॥ २५ ॥ श्रेयसःसाधनंयावत्किंचिदस्ती
हवैदिकम् ॥ यज्ञत्वेनैवतत्सर्वमत्रसंप्राद्यतेऽधुना ॥ १ ॥ प्रत्याहारपराःकेचिच्छ्रोत्रादीनींद्रियाणिते ॥ विषयेभ्यःसमाकृष्यसंयमाग्निषुजु

दैवमेवापरेयज्ञंयोगिनःपर्युपासते ॥ ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुव्हति ॥ २५ ॥ श्रोत्रादी
नींद्रियाण्यन्येसंयमाग्निषुजुव्हति ॥ शब्दादीन्विषयानन्यइंद्रियाग्निषुजुव्हति ॥ २६ ॥
सर्वाणींद्रियकर्माणिप्राणकर्माणिचापरे ॥ आत्मसंयमयोगाग्नौजुव्हतिज्ञानदीपिते ॥ २७ ॥

व्हति ॥ २ ॥ धारणाध्यानसिद्ध्यर्थंसमस्तानींद्रियाण्यपि ॥ धीराःसमस्तभोगेभ्यःप्रत्याहृत्यात्मनिस्थिताः॥ ३ ॥ अपरेव्युत्थितावस्थाःश्रोत्रा
दिभिरपींद्रियैः ॥ अविरुद्धार्थस्वीकारंहोमंमन्यंतएवतम् ॥ ४ ॥ २६ ॥ पातंजलमतेनैवमुक्त्कायज्ञद्वयंहरिः ॥ ब्रह्मवादिमतेनाहयज्ञांतरम
कामिनाम् ॥ १ ॥ सर्वाणिस्थूलरूपाणिसूक्ष्मरूपाणिसर्वशः ॥ शब्दाद्यादानरूपाणींद्रियकर्माणियोगिनः ॥ २ ॥ तथैवप्राणकर्माण्याकुं
चनप्रभृतीनिच ॥ अर्थाद्व्यष्टिसमष्ट्यात्मलिंगंसप्तदशांगकम् ॥ ३ ॥ आत्मसंयमयोगाग्नौसमाधौनिर्विकल्पके ॥ प्रक्षिपंत्यात्मविज्ञानदी
पितेऽत्यंततेजसि ॥ ४ ॥ बाधित्वाज्ञानमखिलंसम्यग्ज्ञानेनयोगिनः ॥ विलापयंतितेलिंगंसमाधौसर्वतोधुवम् ॥ ५ ॥ २७ ॥

पंचयज्ञांस्त्रिभिःश्लोकैरुक्तैकेनषडाहच ॥ द्रव्यत्यागोयथाशास्त्रंयज्ञोयेषांतएवते ॥ १ ॥ तपएवातिकृच्छ्रादियज्ञोयेषांतपस्विनाम् ॥ चित्तवृत्तिनिरोधाख्योयज्ञोयेषांसुयोगिनाम् ॥ २ ॥ वेदाभ्यासोयथाशास्त्रंयेषांस्वाध्यायिनांमखः ॥ शास्त्रार्थनिश्चयोयेषांन्यायेनज्ञानयाजिनाम् ॥ ३ ॥ व्रतान्यतिदृढान्येवयेषांतेव्रतिनांवराः ॥ ४ ॥ २८ ॥ इदानीमाहसार्धेनप्राणायामंचतुर्विधम् ॥ जुव्हत्यपानवृत्तौचप्राणवृत्तिंतथापरे ॥ १ ॥ पूरकाख्यंप्रकुर्वंतिप्राणायामंसदैवते ॥ रेचकाख्यंप्रकुर्वंतिप्राणेऽपानमितीतरे ॥ २ ॥ मुखनासिकाभ्यांवायोर्निर्गमःप्राणिकीगतिः ॥ विपरीतमतोऽपानगमनंतेगतीउभे ॥ ३ ॥ निरुद्धचकुंभकंप्राणायामंकुर्वंतियोगिनः ॥ ४ ॥ २९ ॥ अन्येपरिमिताहारानिगृही

द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्चयतयःसंशितव्रताः ॥ २८ ॥
अपानेजुव्हतिप्राणंप्राणेऽपानंतथापरे ॥ प्राणापानगतीरुद्ध्वाप्राणायामपरायणाः ॥ २९ ॥
अपरेनियताहाराःप्राणान्प्राणेषुजुव्हति ॥ सर्वेऽप्येतेयज्ञविदोयज्ञक्षपितकल्मषाः ॥ ३० ॥ य
ज्ञशिष्टामृतभुजोयांतिब्रह्मसनातनम् ॥ नायंलोकोऽस्त्ययज्ञस्यकुतोऽन्यःकुरुसत्तम ॥ ३१ ॥

तेषुवायुषु ॥ विलापयंतितेप्राणान्ज्ञानकर्मेंद्रियाणिच ॥ १ ॥ तदेवंसम्यगुक्तानांफलमाहाध्वराध्वनाम् ॥ सर्वेऽप्येतेहियज्ञानांज्ञातारःसाधकास्तथा ॥ २ ॥ नाशितंकल्मषंयेषांयज्ञैःपूर्वोदितैःकृतैः ॥ ३ ॥ ३० ॥ यज्ञान्कृत्वावशिष्टंयेकालेऽन्नंभुञ्जतेऽमृतम् ॥ चित्तशुद्ध्यात्मसद्बोधप्राप्तिद्वारेणतेऽखिलाः ॥ १ ॥ ब्रह्मीभूताविमुच्यंतेसंसारादुःखसागरात् ॥ यस्यनैकोऽपियज्ञानामुक्तानांमध्यऐश्वरः ॥ २ ॥ नायमल्पसुखस्यनृलोकोऽप्यधमस्यनुः ॥ सर्वनिंद्यतयादुःखभागिनोऽतिदरिद्रिणः ॥ ३ ॥ कुतोऽन्यःस्वर्गमोक्षादिःसाध्योयःसाधनैर्वरैः ॥ ४ ॥ ३१ ॥

यतेरकिंचनस्यापिशरीरस्थितिकारणम् ॥ याञ्चादिनानसंपाद्यमन्नादीत्याहविश्वपाः ॥ १ ॥ लाभोह्यप्रार्थितोऽयत्नात्तेनालंप्रत्ययंगतः ॥ शास्त्रानुमतभिक्षादिलाभात्संतुष्टएववा ॥ २ ॥ स्वप्रयत्नंविनाऽलाभेशीतोष्णादिभिरर्दितः ॥ द्वंद्वैरक्षुब्धचित्तोयोनिर्वैरःसर्वजंतुषु ॥ ३ ॥ शरीरस्थितिहेतोश्चलाभेऽलाभेऽविकारधीः ॥ स्वानुभूत्यासचाकर्तैवान्यैरारोपितक्रियः ॥४॥ भिक्षाटनादिकंकृत्वाबंधनाप्नोतिकिंचन

यदृच्छालाभसंतुष्टोद्वंद्वातीतोविमत्सरः ॥ समःसिद्धावसिद्धौचकृत्वापिनानिबद्ध्यते ॥ २२ ॥
गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः ॥ यज्ञायाचरतःकर्मसमग्रंप्रविलीयते ॥ २३ ॥

॥ ५ ॥ २२ ॥ तत्त्वज्ञस्यगृहस्थस्यकर्मयागादिकंकृतम् ॥ नैवबंधकमित्याहपूर्वोक्तमपिकेशवः ॥ १ ॥ फलासंगविहीनस्यनिर्गताध्यास कस्यच ॥ निर्विकल्पात्मतत्त्वैक्यबोधेयस्यस्थितंमनः ॥ २ ॥ ईदृशस्यापिप्रारब्धवशाल्लोकप्रवृत्तये ॥ कुर्वतःकर्मयज्ञादिविष्णुप्रीत्यर्थमेववा ॥ ३ ॥ सहाग्रेणफलेनैतत्कर्मज्ञस्यविनश्यति ॥ फलंचाजनयित्वैवमूलोच्छेदादृशोक्तया ॥ ४ ॥ २३ ॥

एवमत्याग्रहेणात्मज्ञानस्योत्पादनेसति ॥ फलमाहकृपासिंधुर्वासुदेवोजगद्गुरुः ॥ १ ॥ उपदिष्टंपरात्मैक्यज्ञानंब्रह्मात्मदर्शिभिः ॥ प्राप्यत्वंबंधुविच्छेदनिमित्तंमोहमाधिदम् ॥ २ ॥ पांडुपुत्रकदाचिन्नभूयोयास्यसिपूर्ववत् ॥ येनज्ञानेनभूतानिब्रह्मादीन्यप्यशेषतः ॥ ३ ॥ स्वाविद्याकार्यभूतानित्वंपदार्थेत्वमात्मनि ॥ मयीशेतत्पदार्थेऽपिवस्तुतोभेदवर्जिते ॥ ४ ॥ अधिष्ठानेह्यभेदेनद्रक्ष्यस्यात्ममयानिच ॥ अधिष्ठानातिरेकेणकल्पितस्याप्यभावतः ॥ ५ ॥ साक्षात्कृत्यात्मरूपेणवासुदेवंहिमांहरिम् ॥ ध्वस्तेज्ञाऽनेचतत्कार्येनस्थास्यतिजगद्भ्रमः ॥ ६ ॥ ३५ ॥ शृणुज्ञानस्यमाहात्म्यंपावनानांसुपावनम् ॥ सर्वेभ्यःपापकारिभ्यस्त्वमाधिक्येनयद्यपि ॥ १ ॥ पापकारीतथाप्येवंदुस्तरस्त्वेनसंकटम् ॥ पा

यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपांडव ॥ येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि ॥ ३५ ॥
अपिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः ॥ सर्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसि ॥ ३६ ॥
यथैधांसिसमिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ॥ ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा ॥ ३७ ॥

पार्णवमिदंसर्वंज्ञानंपोतंविधायच ॥ २ ॥ पुनरावृत्तिशून्यत्वात्सुखेनातिक्रमिष्यसि ॥ धर्माधर्मात्मकंकर्मसर्ववृजिनशब्दतः ॥ ३ ॥ अभिप्रेतंमुमुक्षोर्हिबंधुहेतुतयायतः ॥ हेयंपुण्यमपीत्येवंभगवन्मतमुत्तमम् ॥ ४ ॥ ३६ ॥ निःशेषत्वेनसर्वेषांकर्मणांज्ञानवन्हिना ॥ दाहःप्रदर्श्यतेतेषांमूलोच्छेदेनसंप्रति ॥ १ ॥ यथाप्रज्वलितोवन्हिःकाष्ठंनयतिभस्मताम् ॥ ज्ञानाग्निःसर्वकर्माणिपुण्यपापात्मकानिच ॥ २ ॥ प्रारब्धफलभिन्नानिसंचितादीन्यशेषतः ॥ तद्धेत्वज्ञाननाशेननाशयत्येवमेवहि ॥ ३ ॥ ३७ ॥

एवंबहुप्रकारास्तेवेदद्वारेणविस्तृताः ॥ यज्ञाअवगतास्तांस्त्वंयज्ञाञ्जानीहिसर्वकान् ॥ १ ॥ कायवाङ्मनसामेवकर्मभ्योहिसमुद्भवान् ॥ न त्वात्मजान्यतश्चात्मानिर्व्यापारश्चिदद्वयः ॥ २ ॥ मद्व्यापारानचैवैतेनिर्व्यापारोऽहमक्षरः ॥ देहेंद्रियादयःसर्वेक्रियाधाराजडाश्चलाः ॥ ३ ॥ मय्यक्रियेचिदानंदेकल्पिताःखेयथामलाः ॥ नह्यध्यस्तस्यदोषेणगुणेनास्तिमनागपि ॥ ४ ॥ लेपोऽधिष्ठानचिद्धातोर्ममाद्वैतस्यसर्वथा ॥ एवं ज्ञात्वैवसंसारबंधनात्त्वंविमोक्ष्यसे ॥ ५ ॥ ३२ ॥ उक्तैर्बहुविधैर्यज्ञैर्ज्ञानाख्यःस्तूयतेऽध्वरः ॥ द्रव्यसाधनसाध्याच्चसर्वस्माज्ज्ञानवर्जितात् ॥ १ ॥ संसारफलकाद्यज्ञाज्ज्ञानयज्ञोऽधिकोत्तमः ॥ समस्तंवैदिकंकर्माखिलंस्मार्तमुपासनम् ॥ २ ॥ ब्रह्मात्मैक्यावबोधेतत्पर्यवस्यतिसर्वथा ॥ प्रतिबंधक्षयद्वाराज्ज्ञानयज्ञस्ततोवरः ॥ ३ ॥ ३३ ॥ तादृशज्ञानसंप्राप्तावुपायःप्रोच्यतेऽधुना ॥ अभिगम्यत्वमाचार्यात्तज्ज्ञानंमोक्षसा

एवंबहुविधायज्ञावितताब्रह्मणोमुखे ॥ कर्मजान्विद्धितान्सर्वानेवंज्ञात्वाविमोक्ष्यसे ॥ ३२ ॥
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतप ॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यते ॥ ३३ ॥
तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया ॥ उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

धनम् ॥ १ ॥ लभस्वयेनविधिनाप्राप्यतेतंत्वमाश्रय ॥ नमस्कारेणदीर्घेणदैशिकानांमहात्मनाम् ॥ २ ॥ कोऽहंकथमहंबद्धोमुच्येयंकथमंजसा ॥ काविद्याकास्त्यविद्यावेत्यादिप्रश्नैरनेकधा ॥ ३ ॥ सेवयासर्वभावेनगुरूणांहितरूपया ॥ एवंतेऽभिमुखाःसंतोभक्तिश्रद्धादिभिर्गुणैः ॥ ४ ॥ तुभ्यंसंपादयिष्यंतिज्ञानंब्रह्मैक्यगोचरम् ॥ उपदेशेनसाक्षाद्यन्मोक्षसाधनमुत्तमम् ॥ ५ ॥ पदवाक्यप्रमाणज्ञाब्रह्मयाथात्म्यदर्शिनः ॥ सम्यग्दर्शिभिरेवेदमुपदिष्टंयथाविधि ॥ ६ ॥ फलपर्यवसायिस्याज्ज्ञानंनत्वज्ञपंडितैः ॥ एकस्मिन्नपिचाचार्येगौरवातिशयायतत् ॥ ७ ॥ बहुत्वंज्ञानिनश्चेतिनबहुत्वविवक्षया ॥ ८ ॥ ३४ ॥

संशयोनात्रकर्तव्यःकिमर्थमितिचेच्छृणु ॥ अज्ञोऽनधीतशास्त्रत्वादात्मज्ञानविवर्जितः॥१॥ गुरुवेदांतवाक्यार्थेविश्वासाभावरूपिणी॥नास्ति क्यबुद्धिरश्रद्धातद्वानश्रद्दधानकः ॥ २ ॥ इदमेवंनवेत्त्येवंसंशयाक्रांतधीःपुमान् ॥ भवतिस्वार्थतोभ्रष्टस्त्रिष्वेष्वन्यतमोऽपियः ॥ ३ ॥ अज्ञश्चा श्रद्दधानश्चविनश्यतितथापियः ॥ संशयात्मातिपापीयान्सर्वथासविनश्यति ॥ ४ ॥ वित्तार्जनाद्यभावान्नलोकःसाधारणोऽप्ययम् ॥ धर्म ज्ञानाद्यभावान्नस्वर्गमोक्षादिकःपरः ॥५॥ संशयाक्रांतचित्तस्यनाशनादिकृतंसुखम् ॥ अज्ञस्याश्रद्दधानस्यपरलोकोनयद्यपि॥६॥ वर्ततेतुनृ लोकोऽयंभोजनादिसुखंतथा ॥ संशयात्मात्रिभिर्हीनःपापीयान्सर्वतोऽधमः ॥ ७ ॥ ४० ॥ संशयस्याखिलानर्थमूलस्यास्यापनुत्तये ॥ आत्म

अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति॥ नायंलोकोऽस्तिनपरोनसुखंसंशयात्मनः॥ ४० ॥
योगसंन्यस्तकर्माणंज्ञानसंछिन्नसंशयम्॥ आत्मवंतंनकर्माणिनिबध्नंतिधनंजय ॥ ४१ ॥

ज्ञानमुपायंचवदन्नारायणोहरिः ॥ १ ॥ पुराध्यायद्वयेनोक्तांकर्मज्ञानमयींद्विधाम् ॥ उपसंहरतीदानींब्रह्मनिष्ठांविमोक्षदाम् ॥ २॥ समत्वबु द्धिरूपेणयोगेनपरमेश्वरे ॥ समर्पितानिकर्माणियेनतंशुद्धमानसम् ॥ ३ ॥ यद्वात्यक्तानिकर्माणियेनब्रह्मैक्यदर्शिना ॥ योगसंन्यस्तकर्म त्वंकथंस्यात्संशयेसति ॥ ४ ॥ शृणुत्वमात्मबोधेनयेनच्छिन्नोऽस्तिसंशयः ॥ सर्वदासावधानंतंक्रियमाणान्यनेकधा ॥ ५ ॥ कर्माणिननिब ध्नंत्यनिष्टेष्टादिकलेवरैः ॥ ६ ॥ ४१ ॥

यस्मादेवंततोऽज्ञानादुत्पन्नंचस्थितंमतौ ॥ कारणस्याश्रयस्यापिज्ञानेसतिसुखेनवै ॥ १ ॥ निहंतुंशक्यतेशत्रुरुपन्यासोद्वयोरिति ॥ ब्रह्मै
क्यबोधखड्गेनछित्वाभरतवंशज ॥ २॥ निष्कामकर्मयोगंत्वमाश्रयज्ञानसाधनम् ॥ अतउत्तिष्ठयुद्धायसन्नद्धोभवधीरधीः ॥ ३ ॥ ४२ ॥
स्मिन्नीशत्वबोधाद्भगवतिसुतनौभक्तिरापादिताद्धाधीहेतुःकर्मनिष्ठाकृतुभिरपितथाज्ञाननिष्ठोत्तमोक्ता ॥ सत्यंब्रह्मैक्यतत्त्वंप्रतिपदमुदि

तस्मादज्ञानसंभूतंत्दृत्स्थंज्ञानासिनात्मनः ॥ छित्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत॥ ४२ ॥ इतिश्री
मद्भगवद्गीतासू०श्रीकृष्णार्जुनसंवादेकर्मसंन्यासयोगोनामचतुर्थोऽध्यायः॥ ४॥ श्रीकृष्णार्पणमस्तु ॥

तंदृश्यमिथ्यात्वमेवंयेनश्रीशांतिधाम्नातमिहमुररिपुंकृष्णमेवावलंबे ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ ब्रह्मनिष्ठाप्रधानोऽयंचतु
र्थःपूर्णतांगतः ॥ २६४ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ १५७० ॥

॥ इतिश्रीमद्भगवद्गीतायांभावप्रकाशेचतुर्थोऽध्यायःसमाप्तः ॥

ज्ञानेनतुल्यंलोकेऽस्मिन्वेदेवान्यन्नपावनम् ॥ विद्यतेशुद्धिजनकमज्ञानमलनाशकम् ॥ १ ॥ ज्ञानाद्विन्नस्यसामर्थ्यनास्त्यज्ञानमलक्षये ॥
तदात्मज्ञानंसर्वेषांकुतोनोत्पद्यतेऽचिरात् ॥ २ ॥ इत्याशंक्याहकालेनमहतानतुतत्क्षणे ॥ पूर्वोक्तकर्मयोगेनसंस्कृतोयोग्यतांगतः ॥ ३ ॥
मुमुक्षुर्लभतेबुद्धौस्वयंतज्ज्ञानमुत्तमम् ॥ नयोग्यतामनापन्नोज्ञानमात्मैक्यगोचरम् ॥४॥ लभतेयोग्यतांसिद्ध्यैयत्नंकुर्यादतःपुमान् ॥५॥३८॥
ज्ञानप्राप्तिःसतांयेनोपायेनैकांतभाविनी ॥ सआसन्नतरःसाक्षादुपायउपदिश्यते ॥ १ ॥ गुरुवेदांतवाक्येषुश्रद्धास्तिक्यमतिःस्मृता ॥ तद्यु
तोलभतेज्ञानंयदितत्रैवतत्परः ॥ २ ॥ गुरुसेवामुखेज्ञानोपायेऽत्यंताभियुक्तिमान् ॥ श्रद्धावांस्तत्परोयस्तुनस्यात्सम्यग्जितेंद्रियः ॥ ३ ॥ त

नहिज्ञानेनसदृशंपवित्रमिहविद्यते ॥ तत्स्वयंयोगसंसिद्धःकालेनात्मनिविंदति ॥ ३८ ॥
श्रद्धावाँल्लभतेज्ञानंतत्परःसंयतेंद्रियः ॥ ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिगच्छति ॥ ३९ ॥

स्यापिदुर्लभंज्ञानमतःस्यात्संयतेंद्रियः ॥ निवर्तितानींद्रियाणिविषयेभ्यश्चयेनसः ॥ ४ ॥ अवश्यंलभतेज्ञानंविशेषणत्रयान्वितः ॥ प्रणिपा
ताद्युपायोहिदंभिनामपिदृश्यते ॥ ५ ॥ श्रद्धावत्त्वाद्युपायस्तुसतामैकांतिकोवरः ॥ उपायेनेदृशेनैवज्ञानंप्राप्यसपद्यसौ ॥ ६ ॥ अविद्या
दिनिवृत्त्याख्यांशांतिंमुक्तिमुपैतिसः ॥ व्यवधानंविनैवाद्याब्रह्मीभूतोभवेन्नरः ॥ ७ ॥ यथास्वोत्पत्तिमात्रेणदीपोहंतितमोऽखिलम् ॥ स
नैवापेक्षतेतत्रकंचित्तुसहकारिणम् ॥ ८ ॥ तथास्वोत्पत्तिमात्रेणज्ञानंब्रह्मैक्यगोचरम् ॥ निहंत्यविद्यांतत्कार्यंनसहायमपेक्षते ॥ ९ ॥ ३९ ॥

यांदृढायांतुसंन्यासःसर्वकर्मणाम् ॥ १७ ॥ श्रवणाद्यात्मवेदांतविचारायविधीयते ॥ इत्येवंनिश्चितंभातिश्रीमद्भगवतोमतम् ॥ १८ ॥ कुतोविनिश्चितंह्येवंशृणुवेदविदांगिरः ॥ प्रत्यग्विविदिषासिद्ध्यैवेदानुवचनादयः ॥ १९ ॥ ब्रह्मावाप्त्यैतुतत्त्यागईप्संतीतिश्रुतेर्बलात् ॥ इत्युक्तंसंप्रदायज्ञैर्वार्तिकेश्रीसुरेश्वरैः ॥ २० ॥ कषायान्याचयित्वाचश्रेणीस्थानेषुचत्रिषु ॥ प्रव्रजेच्चपरंस्थानंपरिव्राज्यमनुत्तमम् ॥ २१ ॥ भावितैःकरणैश्चायंबहुसंसारयोनिषु ॥ आसादयतिशुद्धात्मामोक्षंवाप्रथमाश्रमे ॥ २२ ॥ तमासाद्यतुमुक्तस्यदृष्टार्थस्यविपश्चितः ॥ त्रिष्वाश्रमेषुकोऽन्वर्थोभवेत्परमभीप्सितम् ॥ २३ ॥ इत्येवंमोक्षधर्मेश्रीव्यासेनोक्तंमहर्षिणा ॥ तस्माद्वैराग्यपर्यंतंकर्मानुष्ठानमुच्यते ॥ २४ ॥ विरक्तादशायांतुसंन्यासोज्ञानसाधनम् ॥ ततोज्ञमधिकृत्यैवकर्मतत्त्यागयोर्विधिः ॥ २५ ॥ सम्यक्त्वविदोनास्तिचोदनाकापिवैदिकी ॥ लौकिकीवायतस्तस्यकृतकृत्यतयाहरिः ॥ २६ ॥ कृत्याभावंस्वयंपूर्वमवदन्निगमावधिः ॥ विद्वत्संन्यासआत्मज्ञेसिद्धएवार्थतोयतः ॥ २७ ॥

यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितम् ॥ १ ॥

संदेहाभावतस्तस्मात्सचनात्रविचार्यते ॥ तत्रैकमेवजिज्ञासुमज्ञंप्रत्यात्मलब्धये ॥ २८ ॥ कर्मतत्त्यागयोःशास्त्रेविधानात्तत्रचार्जुनः ॥ विरुद्धयोरनुष्ठानंयुगपन्नैवसंभवेत् ॥ २९ ॥ मयाजिज्ञासुनेदानींकिमनुष्ठेयमादरात् ॥ इतिसंशयवानेवमुवाचश्रीहरिंप्रति ॥ ३० ॥ यावज्जीवादिवेदोक्तकर्मणांत्यागमित्यपि ॥ जिज्ञासुंकथयस्यज्ञंप्रतिवेदगिरास्वयम् ॥ ३१ ॥ तद्विरुद्धंपुनःकर्मानुष्ठानंचप्रशंससि ॥ एतमेवेतिवेदेननिराशीरितिचस्वयम् ॥ ३२ ॥ तमेतमितिवेदेनकुरुकर्मेतिचस्वयम् ॥ तयोरेकेनयुगपत्करणंदुर्घटंद्वयोः ॥ ३३ ॥ कर्मतत्त्यागयोर्मध्येयदेकंमन्यसेवरम् ॥ तन्मह्यंनिश्चितंब्रूहिस्वनुष्ठानायतेमतम् ॥ २४ ॥ सदानंदस्वरूपोऽसिकृष्णभक्तार्तिकर्षण ॥ संछ्त्यसंशयार्तिंमेनिजानंदेनयस्वमाम् ॥ ३५ ॥ १ ॥

एवंप्रश्नेऽर्जुनस्याहभगवानुत्तरंवचः ॥ निःश्रेयसकरौकर्मसंन्यासौश्रुतिसंमतौ ॥ १ ॥ मोक्षोपयोगिनौज्ञानोत्पत्तिहेतुतयाह्युभौ ॥ तयोस्तु कर्मसंन्यासादशुद्धस्वांतकर्तृकात् ॥ २ ॥ शुद्धिसंपादकत्वेनकर्मयोगोविशिष्यते ॥ ३ ॥ २ ॥ कर्मयोगंतमेवेशःस्तौतिलोकप्रवृत्तये ॥ स्वकर्मणिप्रवृत्तोऽपिकर्मयोग्यनहंकृतिः ॥ १ ॥ ज्ञातव्योनित्यसंन्यासीयोनद्वेष्टिपरिश्रमम् ॥ ईश्वराराधनंकुर्वन्कर्मनैष्फल्यशंकया ॥ २ ॥ नस्वर्गादिफलंकिंचित्कांक्षतिद्वंद्ववर्जितः ॥ यतोऽनायासतश्चित्ताशुद्ध्याख्यप्रतिबंधतः ॥३॥ विवेकादिप्रकर्षेणमुक्तोभवतिशुद्धधीः ॥४॥३॥ ननुयःकर्मणांकर्तासंन्यासीकथंभवेत् ॥ कर्मतत्त्यागयोर्यस्माद्विरोधोऽस्तिस्वरूपतः ॥ १ ॥ फलतोऽपिविरुद्धत्वंस्वरूपेणविरुद्धयोः ॥ निःश्रे

श्रीभगवानुवाच ॥ संन्यासःकर्मयोगश्चनिःश्रेयसकरावुभौ ॥ तयोस्तुकर्मसंन्यासात्कर्मयोगोविशिष्यते ॥ २ ॥ ज्ञेयःसनित्यसंन्यासीयोनद्वेष्टिनकांक्षति ॥ निर्द्वंद्वोहिमहाबाहोसुखंबंधात्प्रमुच्यते ॥ ३ ॥ साख्ययोगौपृथग्बालाःप्रवदंतिनपंडिताः ॥ एकमप्यास्थितःसम्यगुभयोर्विंदतेफलम् ॥ ४ ॥

यसकरत्वंवानुपपन्नमिवेतिचेत् ॥ २ ॥ सम्यगात्ममतिःसंख्यातांवहत्यात्मबोधने ॥ ज्ञानांतरंगहेतुत्वात्सांख्यःसंन्यासउच्यते ॥ ३ ॥ कर्मयोगश्चपूर्वोक्तश्चित्तशुद्ध्येककारणम् ॥ संन्यासयोगौशास्त्रार्थविवेकज्ञानवर्जिताः ॥ ४ ॥ तौविरुद्धफलौबालाःप्रवदंतिनपंडिताः ॥ पंडितानांमतंतर्हिकिंस्यादित्युच्यतेशृणु ॥ ५ ॥ संन्यासकर्मणोर्मध्येस्वाधिकारानुरूपतः ॥ कृतवान्सन्यथाशास्त्रमेकमप्यादरात्सुधीः ॥ ६ ॥ ज्ञानोत्पत्तिमुखेनैवमेकंनिःश्रेयसंफलम् ॥ उभयोर्विंदतेतस्मान्नविरोधःफलेतयोः ॥ ७ ॥

कथमेकस्यकरणाद्उभयोर्विंदतेफलम्॥श्रृणुसंन्यासिभिःपुण्यैःपूर्वजन्मस्वनुष्ठितैः ॥ १ ॥ शुद्धांतःकरणैःसम्यग्वेदांतश्रवणादिभिः ॥ अवाप्ता त्मावबोधैर्यन्मोक्षाख्यंप्राप्यतेफलम् ॥ २ ॥ ईशार्पणधियायोगाःशास्त्रीयाणिकृतानिच ॥ कर्माणिसंतियेषांतेयोगास्तैरपियोगिभिः॥ ३ ॥ सत्वशुद्ध्याचसंन्यासपूर्वयाज्ञाननिष्ठया ॥ तत्स्थानंगम्यतेवर्तमानेभाविनिवाभवे ॥ ४ ॥ अतएकफलत्वाद्यःपश्यत्येकंविशुद्धधीः ॥ सांख्यं योगंसएवेहसम्यक्पश्यतिनापरः ॥ ५ ॥ दृश्यतेज्ञाननिष्ठेयंयेषांसंन्यासपूर्विका ॥ तेषांतल्लिंगतःपूर्वजन्मस्वीशसमर्पितम् ॥ ६ ॥ कर्मानु ष्ठानमप्यस्तीत्येवमत्रानुमीयते ॥ नविनाकारणंकार्योत्पत्तिर्दृश्यतएवहि ॥ ७ ॥ यान्यतोऽन्यानिजन्मानितेष्वूनंकृतंभवेत्॥ यत्कृत्यंपुरुषे णेहनान्यथाब्रह्मणिस्थितिः ॥८॥ एवमीशार्पितंकर्मानुष्ठानंदृश्यतेनृणाम्॥ येषांतेषांससंन्यासंज्ञानंभाव्यनुमीयते ॥ ९ ॥ तस्माज्जिज्ञासुनाज्ञे

यत्सांख्यैःप्राप्यतेस्थानंतद्योगैरपिगम्यते ॥ एकंसांख्यंचयोगंचयःपश्यतिसपश्यति ॥ ५ ॥
संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः ॥ योगयुक्तोमुनिर्ब्रह्मनाचिरेणाधिगच्छति ॥ ६ ॥

नप्रथमंचित्तशुद्धये॥ कर्मयोगोऽस्त्यनुष्ठेयोनसंन्यासःकथंचन ॥१०॥ वैराग्यतीव्रतायांसस्वयमेवभविष्यति ॥ ११ ॥५॥ किमर्थंकर्मसंन्यासो नादौकार्यःश्रृणुस्फुटम्॥ धीशोधकमृतेकर्मसंन्यासोयोहठात्कृतः ॥१॥ सदुःखमाप्तुमेवास्तिबुद्धिशुद्धेरभावतः ॥ ज्ञानस्यासंभवात्कर्मत्यागा द्भ्रष्टोऽभितोभवेत्॥२॥ कर्मानुष्ठानयुक्तस्तुशुद्धबुद्धितयामुनिः॥ सत्यंज्ञानमनंताख्यमात्मानंब्रह्मवद्धृतम् ॥ ३॥ शीघ्रमप्रतिबंधेनसम्यक्सा क्षात्करोत्यसौ॥ अतएकफलत्वेऽपिसंन्यासाज्ज्ञानवर्जितात्॥ ४ ॥ श्रेयान्सकर्मयोगोऽस्तिधीशुद्ध्याज्ञानकारणम्॥नकर्मणामनारंभादित्य त्रहरिणास्फुटम् ॥५॥ धीशुद्धिहेतुकंकर्मनत्याज्यमित्युदाहृतम्॥ चित्तशुद्धिमृतेत्यागंयःकरोतिस्वकर्मणाम् ॥६॥ सईशाज्ञापरित्यागीपतत्ये वनसंशयः॥श्रुतिस्मृतीममैवाज्ञेयस्तेउल्लंघ्यवर्तते॥७॥आज्ञाभंगीममद्वेषीमद्भक्तोऽपिनवैष्णवः॥इतिस्मृतौहरेराज्ञावश्यंकार्यतयेरिता ॥ ८॥ ६॥

श्रीगणेशायनमः ॥ अथपंचमाध्यायव्याख्याप्रारंभः ॥ श्रियोवासंवृंदावनकृतनिवासंश्रुतिपदंकलावासावासंसुरनरसुखावासजलधिम् ॥ महोल्लासोल्लासंसुजनहृदिवासंगुणनिधिंप्रतिश्वासंवंदेनिरवधिविलासंमधुरिपुम् ॥ १ ॥ अध्यायाभ्यांकृतोद्वाभ्यांनिर्णयःकर्मबोधयोः ॥ कर्मतत्त्यागयोर्द्वाभ्यांनिर्णयःक्रियतेऽधुना ॥ २ ॥ तृतीयईरितोऽध्यायेविभागःकर्मबोधयोः ॥ अज्ञाधिकारिकंकर्मनसमुच्चीयतेधिया ॥ ३ ॥ परस्परविरुद्धत्वात्तेजस्तिमिरयोरिव ॥ ऐकार्थ्याभावतोनापिकर्मयोगोविकल्प्यते ॥ ४ ॥ धीकार्याज्ञानबाधोहिकर्तुंशक्योनकर्मणा ॥ नापेक्षतेसमुत्पन्नंज्ञानंकर्मफलंमनाक् ॥ ५ ॥ तथाचज्ञानिनःकर्मानधिकारेविनिश्चिते ॥ प्रारब्धवशतस्तस्यकर्मानुष्ठानमस्तुवा ॥ ६ ॥ कर्मत्यागोऽस्तुवेत्येवंचतुर्थेनिर्णयःकृतः ॥ चित्तशुद्ध्यात्मविज्ञानप्राप्तयेज्ञानिनःसदा ॥ ७ ॥ अनुष्ठेयानिकर्माणिनतत्त्यागःप्रशस्यते ॥ सर्वकर्मपरित्यागोज्ञानार्थःश्रूयतेतथा ॥ ८ ॥ एतमेवेतिवाक्यादौसंन्यासोऽपिप्रशस्यते ॥ त्यजतैवहितज्ज्ञेयंत्यक्तुःप्रत्यक्परंपदम् ॥ ९ ॥ प्रयाजादिवदेवेदंकर्मारादुपकारकम् ॥ अवज्ञातवतत्त्यागःसन्निपत्योपकारकः ॥ १० ॥ तयोःसमुच्चयोनास्तिविरुद्धत्त्वेनसर्वथा ॥ नवातयोर्विकल्पोऽस्तिज्ञानमात्रफलत्वतः ॥ ११ ॥ द्वारभेदेनचैकार्थ्याभावात्सचनिदर्श्यते ॥ कर्मणोऽघक्षयादृष्टमेवद्वारंविनिश्चितम् ॥ १२ ॥ संन्यासस्यतुविक्षेपाभावहेतुतयामतौ ॥ दृष्टद्वारत्वमेवास्तिविकल्पोनास्त्यतस्तयोः ॥ १३ ॥ तस्माद्व्यंकमेणैतत्पुंसानुष्ठेयमादरात् ॥ संन्यासानंतरंकर्मानुष्ठानंनैवसंभवि ॥ १४ ॥ त्यक्तस्यपुनरादानेऽारूढपतितोभवेत् ॥ आरूढोनैष्ठिकंधर्मंयस्तुप्रच्यवतेपुनः ॥ १५ ॥ प्रायश्चित्तंनपश्यामोयेनशुद्धयेत्सआत्महा ॥ तस्मादादावनुष्ठानात्कर्मणामीश्वरार्पणात् ॥ १६ ॥ चित्तशुद्धयाप्तसत्तीव्रवैराग्येणविवेकिनः ॥ जिज्ञासा

अर्जुनउवाच ॥ संन्यासंकर्मणांकृष्णपुनर्योगंचशंससि ॥

तर्ह्यज्ञोलिप्यतेतत्तत्कर्तृत्वाभिनिवेशतः ॥ ज्ञाननिष्ठासंन्यासाकथंतस्येतिचेच्छृणु ॥ १ ॥ फलासंगंपरित्यज्यसमर्प्यपरमेश्वरे ॥ कर्माणि वैदिकान्यज्ञोलौकिकानिकरोतियः ॥ २ ॥ पापपुण्यात्मकेनासौकर्मणानैवलिप्यते ॥ यथोपरिप्रक्षिप्तेनपद्मपत्रंनचांभसा ॥ ३ ॥ लिप्य तेतद्वदीशेऽपिकर्मार्पितमलेपकम् ॥ प्रत्युतेशप्रसादेनधीशुद्धिश्चास्यजायते ॥ ४ ॥ १० ॥ त्यक्त्काफलाभिलाषंतुकर्मकुर्वंतिकर्मिणः ॥ चित्तशुद्ध्यैधियाचैवकायेनमनसेंद्रियैः ॥ १ ॥ केवलैरितिसर्वेषांकायादीनांविशेषणम् ॥ ईश्वरार्थंकरोमीदंनैतन्ममफलायच ॥ २ ॥ स्वा म्यर्थंभृत्यइवचममतामलवर्जितैः ॥ ३ ॥ ११ ॥ कर्तृत्वाध्याससाम्येऽपिकश्चित्तेनैवकर्मणा ॥ मुच्यतेबद्ध्यतेकश्चिद्वैषम्येहेतुरस्तिकः ॥ १ ॥ शृण्वीशायैवकर्माणिनैतानिचफलायमे ॥ इत्यभिप्रायवान्युक्तस्त्यक्त्वाकर्मफलंसुधीः ॥ २ ॥ कुर्वन्कर्माणिमोक्षाख्यांशांतिमाप्नोतिनैष्ठिकी

ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः ॥ लिप्यतेनसपापेनपद्मपत्रमिवांभसा ॥ १० ॥ का येनमनसाबुद्ध्याकेवलैरिंद्रियैरपि ॥ योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धये ॥ ११ ॥ युक्तःकर्म फलंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीम् ॥ अयुक्तःकामकारेणफलेसक्तोनिबद्ध्यते ॥ १२ ॥

म् ॥ शुद्धिर्विवेकसंन्यासज्ञाननिष्ठाक्रमेणया ॥ ३ ॥ जातासानैष्ठिकीशांतिर्मोक्षरूपासतामियात् ॥ यस्त्वयुक्तोऽस्त्यपूर्वस्माद्विपरीतःस कामतः ॥ ४ ॥ प्रवृत्त्यामेफलायेदंकरोमीतिफलेप्सुकः ॥ कर्मभिर्नितरांबंधंसंसाराख्यंप्रयात्यसौ ॥ ५ ॥ देहाभिमानसाम्येऽपिकृतंभगव दर्पणम् ॥ कर्मश्रौतंतथास्मार्तंलौकिकंचमुमुक्षुभिः ॥ ६ ॥ चित्तशुद्ध्याप्तवैराग्यज्ञानद्वाराविमुक्तिदम् ॥ तदेवकामकारेणकृतंसत्फलकाम्यभिः ॥ ७ ॥ दृढबंधायमूढानांभवतीत्याशयोहरेः ॥ यस्मादेवंततस्त्वंभोविहायासक्तिमांध्यजाम् ॥ ८ ॥ सर्वकर्मफलेष्वीशप्रतोषार्थंकुरु क्रियाम् ॥ वैदिकींलौकिकींवापिबंधान्मुक्तोभविष्यसि ॥ ९ ॥ १२ ॥

संन्यासात्केवलात्कर्मयोगोऽशुद्धधियोवरः ॥ इत्युक्काहाधुनाशुद्धबुद्धेःसंन्यसनंवरम् ॥ १ ॥ नित्यंनैमित्तिकंकाम्यंनिषिद्धंचेतिसर्वशः ॥ कर्मण्यकर्मयःपश्येदित्यत्रोक्तविवेकतः ॥ २ ॥ अकर्त्रात्मस्वरूपस्यविचारान्वितचेतसा ॥ त्यक्त्वाप्रारब्धवशतोऽनायासेनैवतिष्ठति ॥३॥ आयासहेतुकायवाङ्मनोव्यापारवर्जितः ॥ कार्यकारणसंघातोयेनादौस्ववशीकृतः ॥ ४ ॥ कास्तइत्याहभगवान्देहभिन्नात्मतत्त्वदृक् ॥ नवद्वारविशिष्टेऽस्मिन्देहेतिष्ठत्यसौपुरे ॥ ५ ॥ परगेहेप्रवासीवनिर्ममोनिरहंकृतिः ॥ देहमात्रात्मदर्शीतुदेहाधिकरणंनरः ॥ ६ ॥ स्वस्याधिकरणंमत्वागृहेभूमौतथासने ॥ अहमासेऽभिमानीतिनत्वासेदेहइत्यपि ॥ ७ ॥ संघातव्यतिरिक्तात्मदर्शिनस्तूपपद्यते ॥ देहआसइतिज्ञानं विद्ययाभ्रांतिबाधनात् ॥ ८ ॥ नन्वदेहादिव्यापाराआत्मन्यारोपिताभ्रमात् ॥ विद्ययाभ्रांतिबाधेहितेषांबाधोभवत्विति ॥ ९ ॥ किंत्वा

सर्वकर्माणिमनसासंन्यस्यास्तेसुखंवशी ॥ नवद्वारेपुरेदेहीनैवकुर्वन्नकारयन् ॥ १३ ॥

त्मनःस्वकीयेनव्यापारेणास्तुकर्तृता ॥ तथाकारयितृत्वंस्याद्देहादिव्यापृताविति ॥ १०॥ मैवमात्माऽक्रियोह्यास्तेनैवकुर्वन्नकारयन् ॥ यथा काशस्यनीलिम्नासंबंधोनास्तिसर्वथा ॥ ११ ॥ तथात्मनोनसंबंधःकर्तृत्वादिभिरण्वपि ॥ अक्रियस्याद्वयस्यास्यतत्कर्तृत्वाद्यैरसंगिनः ॥ १२ ॥ कर्तृत्वाद्याःकुतोधर्माभवंत्याविद्यकाजडाः ॥ आकाशेवर्णवन्नास्तिकर्तृत्वादिस्वतोऽमले ॥ १३ ॥ आविद्यकंतुविध्वस्तंतत्त्वधीजन्मनात्र तः ॥ तस्मात्त्यक्त्वासकर्माणिनैवकुर्वन्नकारयन् ॥ १४ ॥ वसन्देहागारेपरमपदनिष्ठोविजयतेनकर्तानोभोक्ताकचिदपिकदाचिद्विहरणे ॥ निजानंदारामोविषयविरतिर्नान्यशरणःपरब्रह्माद्वैतेऽपरिमितवपुःसन्विहरति ॥ १५ ॥१३॥

यथापुंसःस्वनिष्ठैवगतिःसत्यांस्थितौनसा ॥ तथात्मनोऽपिकर्तृत्वंसंन्यासेसतिनास्तिकिम् ॥ १ ॥ यद्वानभसिवर्णादिवन्नास्त्यात्मनिवस्तुतः॥ इतिसंदेहविच्छित्त्यैभगवानाहचांतिमम् ॥ २ ॥ सृजत्यात्मानकर्तृत्वंदेहादेस्वंचकुर्विति ॥ नापिलोकस्यकर्माणिप्रासादादीनियानिच ॥ ३ ॥ अत्यंतेप्सितरूपाणिस्वयंसृजतिकर्हिचित् ॥ नचाकृतवतःकर्मलोकस्यतत्फलेनच ॥ ४ ॥ ससंबंधंसृजत्यात्माभोक्ताभोजयितान

नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभुः ॥ नकर्मफलसंयोगंस्वभावस्तुप्रवर्तते ॥ १४ ॥

सः ॥ यद्यात्मानस्वतःकिंचित्कुरुतेकारयत्यजः ॥ ५ ॥ कस्तर्हिकारयन्कुर्वन्प्रवर्ततइहेतिचेत् ॥ शृणुस्वभावशब्देनमायाऽविद्यादिशब्दिता ॥ ६ ॥ प्रकृतिर्यास्तिसैवेयंव्यवहारेप्रवर्तते ॥ ७ ॥ १४ ॥

कर्मणोबंधकत्वात्स्यात्कथंमोक्षैकहेतुता ॥ शृणुकृष्णार्पणंकर्मफलासंगविवर्जितम् ॥ १ ॥ योगइत्युच्यतेतेनयुक्तःसन्प्रथमंततः ॥ रजस्तमोमलास्पृष्टंसत्वंयस्यसशुद्धधीः ॥ २ ॥ स्ववशीकृतदेहःसन्सन्साधीनकृतेंद्रियः ॥ एतेनमनुनोक्तोऽत्रत्रिदंडीहरिणोदितः ॥ ३ ॥ वाग्दंडोऽथमनोदंडःकायदंडस्तथैवच ॥ यस्यैतेनियतादंडास्त्रिदंडीतिकथ्यते ॥ ४ ॥ सर्वेंद्रियपरस्तत्रवाक्शब्दोऽस्तिमनुस्मृतौ ॥ ईदृशस्यभवेदेवत त्त्वज्ञानमितीर्यते ॥ ५ ॥ यस्यात्मासर्वभूतानामात्मभूतःसईदृशः ॥ अखंडाद्वैतनिष्ठःसन्त्यक्तभेदमतिःपुमान् ॥ ६ ॥ सर्वभूतआत्मभूतश्चा त्मायस्येतिविग्रहे ॥ जडाजडात्मकंविश्वंपश्यन्नात्ममयंमुनिः ॥ ७ ॥ उभयत्राप्यखंडार्थबोधसिद्धिरितीरिता ॥ ईदृशस्तत्त्वदृक्कुर्वन्नपिलोक

योगयुक्तोविशुद्धात्माविजितात्माजितेंद्रियः ॥ सर्वभूतात्मभूतात्माकुर्वन्नपिनलिप्यते ॥७॥ नैव किंचित्करोमीतियुक्तोमन्येततत्त्ववित् ॥ पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ॥ ८ ॥ प्रलपन्विसृजन्गृण्हन्नुन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषुवर्तंतइतिधारयन् ॥ ९ ॥

दृशाक्रियाः ॥ ८ ॥ ताभिर्नलिप्यतेयस्मात्स्वदृष्ट्यातदभावतः ॥ ९ ॥ ७ ॥ द्वाभ्यांतदेतद्देवेशोविवृणोतिस्फुटंहरिः ॥ धीशुद्ध्यायुक्तएवा दौभूत्वातत्त्वविदेवसः ॥ १ ॥ क्रियमाणासुचेष्टासुनकरोमीतिमन्यते ॥ ज्ञानकर्मेंद्रियैःकर्मदशभिस्तद्यथायथम् ॥ २ ॥ कुर्वन्नकर्तृताबुद्ध्या पश्यत्यात्मानमक्रियम् ॥ श्वसन्प्राणैःस्वपन्नंतःकरणेनमुनिस्तथा ॥३॥ उन्मिषन्निमिषन्नेवंनागकूर्मादिपंचकैः ॥ एतानिस्वस्वविषयेवर्तंतन त्वहंत्विति ॥ ४ ॥ धारयन्सर्वव्यापारेष्वात्मानमक्रियंविदन् ॥ कुर्वन्नलिप्यतेचातोयुक्तमेवेरितंवचः ॥ ५ ॥ ८ ॥ ९ ॥

तर्ह्येवंसर्वजीवानामध्यस्तानाद्यविद्यया ॥ आवृतत्वात्कथंबंधान्मुक्तिःस्यादितिचेच्छृणु ॥ १ ॥ तदावरणविक्षेपशक्तिमद्बंधकारणम् ॥ अ
विद्याख्यमनिर्वाच्यंज्ञानेनाज्ञानमात्मनः ॥ २ ॥ गुरूपदिष्टवेदांतवाक्यजन्येनभास्वता ॥ अखंडसच्चिदानंदवस्त्वैक्यविषयेणच ॥ ३ ॥
बाधितंसदधिष्ठानचिन्मात्रत्वेनबोधितम् ॥ रज्ज्वामहिस्रगादीवरज्जुज्ञानेनबाधितम् ॥ ४ ॥ येषांयथोक्तवेदांतश्रवणादिमतांसताम् ॥ केश
वानुगृहीतानांमुमुक्षूणांविपश्चिताम् ॥ ५ ॥ तज्ज्ञानंसूर्यवत्तेषांपरमद्वैतचिद्घनम् ॥ प्रकाशयतिचात्मानंप्रतिबिंबग्रहेणवै ॥ ६ ॥ कर्मतामं
तरेणाभिव्यनक्तीत्याशयोहरेः ॥ ज्ञाननाश्यतयाऽज्ञानंतथैवावरकत्वतः ॥ ७ ॥ भावरूपमनिर्वाच्यमस्तीतिभगवन्मतम् ॥ नह्यभावःक्वचित्किं
चिदावृणोतीतिसंभवेत् ॥ ८ ॥ नित्यमेवनिवृत्तत्वाज्ज्ञानेनापिननाश्यते ॥ येज्ञानाभावमज्ञानंतार्किकाःप्राहुराग्रहात् ॥ ९ ॥ भगवन्मत

ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानंप्रकाशयतितत्परम् ॥ १६ ॥
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छंत्यपुनरावृत्तिंज्ञाननिर्धूतकल्मषाः ॥ १७ ॥

बाह्यत्वाद्युपेक्ष्यास्तेनिराग्रहैः ॥ अतोऽज्ञोऽहंनमामन्यंजानामीतिप्रतीतितः ॥ १० ॥ साक्षिप्रत्यक्षसिद्धंतद्भावरूपंहरेर्मतम् ॥ ११ ॥ त्रिगु
णमनृतमांध्यंकल्पितंचिद्घनेऽच्छेश्रुतिशिखरविचारोद्भूतबोधेननष्टम् ॥ निरवधिवपुरात्मास्वात्मभासाचकास्तिभ्रमजलधरनाशेब्रह्मसूर्योऽद्वि
तीयः ॥ १२ ॥ १६ ॥ ज्ञानप्रकाशितेतस्मिंस्तत्त्वेसच्चित्सुखात्मनि ॥ बाह्यवस्तुपरित्यागाद्बुद्धिर्येषांसुनिष्ठिता ॥ १ ॥ तदेवात्मापरंतत्त्वंये
षामद्वैतचेतसाम् ॥ तस्मिन्नेवचिदानंदेस्थितिर्येषांस्थितासदा ॥ २ ॥ प्राप्तव्यंतत्पदंयेषांविरक्तानांपरंसुखम् ॥ साक्षात्कारोनिजध्यानंश्र
वणादिनिरंतरम् ॥ ३ ॥ वैराग्यादिप्रकर्षश्चपूर्वपूर्वस्यकार्यता ॥ उत्तरोत्तरहेतूनांविशेषणचतुष्टये ॥४॥ एतैर्विशेषणैर्युक्तामोक्षंगच्छंत्यनामयम्॥
ज्ञानेनोन्मूलितंयेषांकल्मषंबंधकारणम् ॥ ५ ॥ सकार्याज्ञानबाधेनब्रह्मात्मैक्यधियांसताम् ॥ कथंतन्मूलकोबंधोभवेद्देहपरिग्रहः ॥ ६ ॥ १७ ॥

उक्त्वाज्ञानफलंमोक्षंदेहपातादनंतरम् ॥ जीवन्मुक्तिफलंप्राहदेहेसत्यपितद्विदाम् ॥ १ ॥ सात्विकेब्राह्मणेश्रेष्ठेविनीतेतत्त्वदर्शिनि ॥ गविसंस्का
रहीनायांराजस्यांमध्यमाकृतौ ॥ २ ॥ अत्यंततामसेसर्वाधमेहस्त्यादिकत्रये ॥ सत्वादिकगुणैस्तज्जैःसंस्कारैरत्यसंगिकम् ॥ ३ ॥ द्रष्टुंशीलं
समंब्रह्मयेषांतेज्ञानिनोबुधाः ॥ सूर्योगांगेजलेकौपेसुरायांप्रतिबिंबितः ॥ ४ ॥ तद्गुणैर्दोषसंबंधैरसंस्पृष्टोयथाभवेत् ॥ तथाब्रह्मचिदाभासद्वा
रेणप्रतिबिंबितम् ॥ ५ ॥ नोपाधिगुणदोषाभ्यांसंबंधंयातिचिद्घनम् ॥ इत्येवंमन्यमानास्तेसर्वत्रसमदर्शिनः ॥ ६ ॥ नीरागाःस्वसुखस्फूर्त्या
जीवन्मुक्तिंभजंतिवै ॥ ७ ॥ १८ ॥ ननुसात्विकमुख्येषुस्वभावविषमेषुच ॥ समत्वदर्शनंशास्त्रेनिषिद्धंधर्मतत्परे ॥ १ ॥ स्मरतीत्थमभोज्या
न्नाइत्युपक्रम्यगौतमः ॥ समासमाभ्यांविषमसमेपूजातइत्यसौ ॥ २ ॥ उत्कृष्टानांयथापूजाप्रोक्तावेदविदांश्रुतौ ॥ तत्समायैवचान्यस्मैन्यू

विद्याविनयसंपन्नेब्राह्मणेगविहस्तिनि ॥ शुनिचैवश्वपाकेचपंडिताःसमदर्शिनः ॥ १८ ॥
इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः ॥ निर्दोषंहिसमंब्रह्मतस्माद्ब्रह्माणतेस्थिताः ॥ १९ ॥

नेपूजाविधौकृते ॥३॥ हीनाचारवतामल्पविदांपूजायथोदिता ॥ तत्समानायचान्यस्मैमुख्येपूजाविधौकृते ॥ ४ ॥ हीनत्वेनवरिष्ठस्यहीनस्यो
त्तमभावतः ॥ पूजातःकारणात्तस्यपूजाकर्तुरतद्विदः ॥ ५ ॥ भवत्यन्नमभोज्यंहिस्मृतेरित्यर्थईरितः ॥ एवंदोषप्रसिद्धेतेकथंस्युःसमदर्शिनः ॥ ६ ॥
पंडिताइतिशंकायामुत्तरंप्राहकेशवः ॥ तैर्जीवद्भिरतिक्रांतःपंडितैःसमदर्शिभिः ॥ ७ ॥ सर्गोद्वैतप्रपंचोऽयंभूतेषुविषमेष्वपि ॥ ब्रह्मणोवर्त
मानस्यसाम्येयेषांस्थिरंमनः ॥ ८ ॥ यस्मात्तद्ब्रह्मकूटस्थंनित्यमेकरसंसमम् ॥ तस्मात्तेऽवस्थितानित्यंब्रह्मण्येवविपश्चितः ॥ ९ ॥ पामरैर्दोष
वत्स्वेषुश्वपाकादिषुयद्यपि ॥ तद्दोषैर्दोषवन्मूढैःपरब्रह्मविभाव्यते ॥ १० ॥ तथापिदोषासंस्पृष्टमेवब्रह्मस्वभावतः ॥ तद्रूपाःपंडिताजीवन्मु
क्तादोषैर्विवर्जिताः ॥ ११ ॥ स्मृतिस्त्वज्ञगृहस्थस्यदोषमाहान्यथाकृते ॥ नतुब्रह्मविदोदोषंवक्तुमर्हतिकंचन ॥ १२ ॥ १९ ॥

स्वाभाविकंहिचरितंजीवन्मुक्तशरीरिणाम् ॥ मुमुक्षुभिरनुष्ठेयमितिवक्तिहरिर्लिङ्ग ॥ १ ॥ अद्वैतदर्शिनोभिन्नप्रियादिप्राप्ययोगतः ॥ नास्यहर्षविषादौतद्धेतुकौभवतःक्वचित् ॥ २ ॥ स्थिरावेदांतवाक्योत्थाबुद्धिर्ब्रह्मणियस्यसः ॥ अन्योन्याध्याससंमोहशून्योब्रह्मावबोधवान् ॥ ३ ॥ ब्रह्मण्येवस्थितोनित्यंसमाधिपरिपाकतः ॥ ४ ॥ २० ॥ अनाद्यध्यासजांभोगप्रीतिंबलवतींकथम् ॥ त्यक्त्वाब्रह्मण्यवस्थानंसंभवेदितिचेच्छृणु ॥ १ ॥ बाह्याःशब्दादयोभोगाजडधर्माविनश्वराः ॥ तेष्वनासक्तचित्तःसन्विरक्तःशुद्धमानसे ॥ २ ॥ शांतिरूपंसुखंबाह्यभोगाकांक्षांविहाययत् ॥ लभतेसत्ववृत्त्यासौतदनंतंमहत्सुखम् ॥ ३ ॥ यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखम् ॥ तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलाम्

नप्रहृष्येत्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियम् ॥ स्थिरबुद्धिरसंमूढोब्रह्मविद्ब्रह्मणिस्थितः ॥२०॥
बाह्यस्पर्शेष्वसक्तात्माविंदत्यात्मनियत्सुखम् ॥ सब्रह्मयोगयुक्तात्मासुखमक्षय्यमश्नुते ॥ २१ ॥

॥ ४ ॥ यद्वायत्त्वंपदार्थेचसुप्तौभातमपीहितम् ॥ प्रतिबंधादलभ्यंतत्तदभावाच्चलभ्यते ॥ ५ ॥ ब्रह्मण्येकाग्रसंपन्नंचित्तंयस्यचतद्व्रतम् ॥ तत्पदार्थेऽथवायोगःसमाधिस्तेनचैकताम् ॥ ६ ॥ गतस्वमोऽपिलक्ष्योऽर्थोयस्यसोऽनंतमद्वयम् ॥ स्वस्वरूपसुखंसम्यग्व्याप्नोत्यात्मस्वरूपतः ॥ ७ ॥ नित्येऽपिवस्तुनिभ्रांतिनाशाभिप्रायतस्तथा ॥ औपचारिकधात्वर्थयोगोऽस्तीहनवस्तुतः ॥ ८ ॥ बाह्यभोगरुचिंत्यक्त्कासर्वानर्थाकरींबुधैः ॥ नित्यानंदैकतांप्राप्तुंयत्नआस्थेयआदरात् ॥ ९ ॥ यत्पादपद्ममकरंदरसानुभूतिप्राप्ताखिलामृतसुखानुभवेनतृप्ताः ॥ पौरंदरींश्रियमथोऽवगणय्यधीरास्तिष्ठंतियत्रसहरिःशरणंममास्तु ॥ १० ॥ २१ ॥

ननुश्रुतौस्मृतौकर्तात्रसिद्धोजीवएवहि ॥ ईशःकारयितासिद्धस्तद्विरुद्धमिहोच्यते ॥ १ ॥ मायाविद्याभिधाशक्तिःस्वभावाख्याप्रवर्तते ॥
यमिच्छतिसउन्नेतुंपुण्यंतंकारयत्यजः ॥ २ ॥ यमिच्छतित्वधोनेतुंपापंतंकारयत्यसौ ॥ अज्ञोजंतुरनीशोऽयमात्मनःसुखदुःखयोः ॥ ३ ॥ ई
श्वरप्रेरितोगच्छेत्स्वर्गंवाऽश्रुभमेववा ॥ इतिश्रुतिस्मृतिभ्यांचनिर्णीतेनाध्वनायतः ॥ ४ ॥ कर्तृत्वप्रेरकत्वाभ्यामात्मनोरीशजीवयोः ॥ भोक्तृ
त्वभोजयितृत्वधर्माभ्यांलेपसंभवात् ॥ ५ ॥ मैवंवस्तुतआत्मायंविभुत्वात्परमेश्वरः ॥ जीवस्यकस्यचित्पापंनादत्तेसुकृतंतथा ॥ ६ ॥ वस्तु
तोनास्तिकर्तृत्वंजीवस्यासंगिनोविभोः ॥ कारयितृत्वमप्येवंनेश्वरस्यास्तिवस्तुतः ॥ ७ ॥ अज्ञानेनानृतेनैवावृत्तिविक्षेपशालिना ॥ माया

नादत्तेकस्यचित्पापंनचैवसुकृतंविभुः ॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः ॥ १५ ॥

रूपेनांध्यतमसाच्छादितंचिद्घनात्मकम् ॥८ ॥ जीवेश्वरजगद्भेदभ्रमाधिष्ठानमद्वयम् ॥ स्वप्रकाशंपरानंदंज्ञानंतेनेहजंतवः ॥ ९॥ स्वरूपाव
रणेनैवविक्षेपंयांतिसर्वशः ॥ मातृमानप्रमेयादिमोहंदुःखैकसंकटम् ॥ १० ॥ प्राप्नुवंतिमुधाजीवाभ्रांतिज्ञानवशीकृताः ॥ अकर्त्रभोक्तृपरमा
नंदात्मावृत्तिहेतुकः ॥ ११ ॥ जीवेश्वरजगद्भेदभ्रमोमूढधियांभवेत् ॥ तस्यांदशायांमूढानामवभासानुवादिनी ॥ १२ ॥ वास्तवाद्वैतबोधा
यश्रुतिस्तदनुगास्मृतिः ॥ अतआविद्यकैर्धर्मैःकर्तृत्वादिभिरीश्वरः ॥ १३ ॥ जीवोवालिप्यतेनैवश्रीहरेरेषआशयः ॥ ईश्वराशयमाश्रित्यब्र
ह्मात्मैक्यंविचार्यच ॥ १४ ॥ अकर्त्रात्मस्वरूपंस्वंनिश्चिन्वंतिविवेकिनः ॥ १५ ॥ १५ ॥

सर्वानर्थकरःश्रेयोमार्गेशत्रुश्चदोषभूः ॥ मुमुक्षुणातियत्नेनवारणीयोऽयमित्यजः ॥ १ ॥ यत्नाधिक्यविधानायपुनराहवचोऽमृतम् ॥ स्वानु
कूलेषुभोगेषुदृश्यमानेष्वनेकधा ॥ २ ॥ स्मर्यमाणेष्ववाश्रूयमाणेष्वामुष्मिकेष्वयः ॥ शोभनत्वगुणाध्यासोगर्धोरत्यात्मकःसच ॥ ३ ॥ काम
स्तृष्णादिपर्यायःसर्वानर्थाकरोनृणाम् ॥ आत्मनःप्रतिकूलेषुदुःखहेतुष्ववस्तुषु ॥ ४ ॥ दृश्यमानेष्ववाश्रूयमाणेष्वस्वांतगेषुच ॥ तावद्दोषानुसं
धानाभ्यासात्प्रज्वलनात्मकः ॥ ५ ॥ द्वेषोमन्युःसचक्रोधस्तज्ज्ञोवेगस्तयोर्द्वयोः ॥ याचास्त्यत्युत्कटावस्थालोकवेदविरोधिनि ॥ ६ ॥ मार्गे
प्रवृत्तिहेतुत्वाद्वेगोनद्यारयोयथा ॥ नद्यावेगोऽपिवर्षासुप्राबल्याल्लोकवेदयोः ॥ ७ ॥ विरोधिन्यप्यनिच्छंतंकुगर्तेपातयत्यधः ॥ तथाकामा

शक्नोतीहैवयःसोढुंप्राक्शरीरविमोक्षणात् ॥ कामक्रोधोद्भवंवेगंसयुक्तःससुखीनरः ॥ २३ ॥

दिजोवेगोलोकवेदविरोधिनि ॥ ८ ॥ भोगगर्तेऽप्यनिच्छंतंनिरयेपातयत्यधः ॥ चित्तप्रक्षोभरूपंतंस्तंभस्वेदादिलिंगकम् ॥ ९ ॥ आमृत्यो
र्जातमात्रंयदिहैवपतनात्पुरा ॥ तद्दोषदर्शनाभ्यासजातवैराग्यतेजसा ॥ १० ॥ मोघीकर्तुंसमर्थोऽस्तिसयोगीससुखीनरः ॥ पुरुषार्थैकनिष्ठ
त्वात्सएवपुरुषःसुखी ॥ ११ ॥ अन्यस्त्वाहारनिद्रादिपशुधर्मैकतत्परः ॥ नराकारःपशुर्ज्ञेयःपुरुषार्थपराङ्मुखः ॥ १२ ॥ मंदस्मितंरुचिरकां
तिविलासशोभिस्वाभाविकामृतरसाकरमप्रमेयम् ॥ ध्यानेस्वयंश्रितवतांरमयांचितंश्रीकृष्णाननंव्रजतिनाशमयंकुदोषः ॥ १३ ॥ २३ ॥

ननुबाह्यरुचित्यागेस्वसुखानुभवोभवेत् ॥ तस्मिन्सतिभवेद्बाह्यरुचित्यागस्ततस्तयोः ॥ १ ॥ अन्योन्याश्रयतादोषान्नैकंसिद्ध्येदपीतिचेत् ॥ शृणुबाह्यरुचित्यागेदोषदृष्टिर्हिकारणम् ॥ २ ॥ विषयेंद्रियसंबंधजन्यायेक्षुद्ररूपिणः ॥ सुखांशानुभवाभोगाइहलोकेपरत्रच ॥ ३ ॥ राग द्वेषादिविद्धत्वाद्दुःखहेतवएवते ॥ विषयेंद्रियसंयोगआदिरंतस्तुतत्क्षयः ॥ ४ ॥ तद्वंतःस्वप्नवन्मध्येप्रादुर्भूतामृषात्मकाः ॥ आदावंतेचयन्नास्ति

येहिसंस्पर्शजाभोगादुःखयोनयएवते ॥ आद्यंतवंतःकौंतेयनतेषुरमतेबुधः ॥ २२ ॥

वर्तमानेऽपितत्तथा ॥ ५ ॥ इतिन्यायेनतेमिथ्याक्षणिकानंदकारिणः ॥ यस्मादेवंततस्तेषुरतिमेतिनपंडितः ॥ ६ ॥ रज्जुसर्पवदध्यस्ताभोगा मिथ्याभ्रमाकराः ॥ स्वप्नवद्दृष्टिसृष्टित्वादविद्यामूलकाजडाः ॥ ७ ॥ अधिष्ठानावबोधेननष्टाविद्याभ्रमोबुधः ॥ नतेषुरमतेयद्वत्तज्ज्ञऊषरवारि षु ॥ ८ ॥ नसंसारेसुखस्यास्तिगंधोऽप्यद्धाततःसुधीः ॥ बाह्यभोगरुचिंत्यक्त्वास्वसुखानुभवोभवेत् ॥ ९ ॥ २२ ॥

ईश्वरार्पितचित्तस्यधीशुद्धिःकर्मयोगतः ॥ ततःस्यात्कर्मसंन्यासःश्रवणादिपरस्यच ॥ १ ॥ मोक्षहेत्वात्मविज्ञानंभवतीतिपुरोदितम् ॥ इदा
नींब्रह्मनिर्वाणंसयोगीत्यत्रसूचितम् ॥ २ ॥ विज्ञानसाधनंध्यानयोगंमुख्यंसुविस्तरात् ॥ वक्तुंत्रीन्सूत्रस्थानीयाञ्छ्लोकानाहजगद्गुरुः ॥३ ॥
वृत्तिस्थानीयएतेषांषष्ठाध्यायोभविष्यति ॥ द्वाभ्यांसंक्षेपतोयोगस्तृतीयेतत्फलंस्मृतम् ॥ ४ ॥ बाह्याःशब्दादयोबुद्धाविंद्रियैःसंप्रवेशिताः ॥
वैराग्येणैवतान्बाह्यान्बहिःकृत्वाप्रयत्नतः ॥ ५ ॥ यद्येतेआंतराःस्युर्वैतदोपायसहस्रकैः ॥ बर्हिर्नस्युःप्रभावस्यभंगःकर्तुनशक्यते ॥ ६ ॥
बाह्यांस्त्वंतःप्रविष्टांस्त्रात्रागावेशाद्बहिस्तदा ॥ कर्तुंशक्यान्विरागेणबाह्यानितिविशेषणात् ॥ ७ ॥ वैराग्यंतदनेनोक्त्वाप्राहाभ्यासमधो

स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवांतरेभ्रुवोः ॥ प्राणापानौसमौकृत्वानासाभ्यंतरचारिणौ ॥२७॥
यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधोयःसदामुक्तएवसः ॥२८॥

क्षजः ॥ अत्यंतमीलनेनिद्राप्रसारेविभ्रमादयः ॥ ८ ॥ अतोऽर्धमीलनेनैवभ्रूमध्येचक्षुषोःस्थितिः ॥ ऊर्ध्वाधोगतिविच्छेदान्नासाभ्यंतरचा
रिणौ ॥ ९ ॥ कुंभकेनसमौकृत्वाप्राणापानौविचक्षणः ॥ १० ॥ २७ ॥ संयताइत्युपायेनयस्येंद्रियमनोधियः ॥ विषयान्विषवत्त्यक्त्वा
समुनिर्मोक्षतत्परः ॥ १ ॥ इच्छादिरहितोयोगीजीवन्नेवविमुच्यते ॥ २ ॥ २८ ॥

एवंयोगान्वितःकिंवाज्ञात्वामुच्यतआहतत् ॥ कर्तृरूपेणसर्वेषांयज्ञानांतपसांतथा ॥ १ ॥ भोक्तारंदेवरूपेणपालकंवाजगत्पतिम् ॥ ब्रह्मादीनांसमस्तानांनियंतारमसंगिनम् ॥ २ ॥ अनपेक्ष्योपकर्तारंप्रत्युपकारमीश्वरम् ॥ सर्वेषांप्राणिनांसर्वबुद्धिवृत्त्येकसाक्षिणम् ॥ ३ ॥ सर्वावभासकंपूर्णंसच्चिदानंदविग्रहम् ॥ नारायणंहिमांसम्यक्साक्षात्कृत्यात्मरूपतः ॥ ४ ॥ संसारोपरतिंशांतिंमोक्षाख्यांलभतेऽजसा ॥ पश्यन्नहंकर्थत्वांनोमुक्तइत्यपनुत्तये ॥ ५ ॥ विशेषणानितत्रैवंज्ञानंमेमुक्तिकारणम् ॥ ६ ॥ निरवधिसुखवार्धिंशांतिकांताश्रितंश्रीप्रमुखगुणनिवासंस

भोक्तारंयज्ञतपसांसर्वलोकमहेश्वरम् ॥ सुहृदंसर्वभूतानांज्ञात्वामाशांतिमृच्छति ॥ २९ ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ० संन्यासयोगोनामपंचमोऽध्यायः ॥ ५ ॥

र्वयज्ञेज्यमूर्तिम् ॥ सकलसुहृदमीशंसर्ववेदांतभूमिंयदुपतिमभिवंदेभ्रांतिविच्छेदहेतुम् ॥ ७ ॥ २९ ॥ निष्कामःकर्मयोगःसपदिरतिकरायेस्यपादारविंदेज्ञानंवैराग्ययुक्तंभवतिचसुलभंयस्यभक्त्यानराणाम् ॥ कामक्रोधौनिरस्यस्थिरमतिरमितेलभ्यतेयत्प्रसादात्तंस्वाराज्यैकहेतुंनवजलदरुचंकृष्णमेवानतोऽस्मि ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ जीवन्मुक्तिफलाख्यानःपंचमःपूर्णतांगतः ॥ २३५ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ १८०५ ॥

॥ इतिश्रीमद्भगवद्गीतायांभावप्रकाशेपंचमोऽध्यायःसमाप्तः ॥

एवंसर्वापदामूलंनाश्यत्वेनाभिधायच ॥ पुनर्ब्रह्मामृतानंदप्राप्तिसाधनमुच्यते ॥ १ ॥ आत्मन्येंतःसुखंयस्यक्रीडायस्यातरात्मनि ॥ यस्यात्मन्येवविज्ञानंनबाह्यैरिंद्रियैर्जडे ॥ २ ॥ वैषयिकंसुखंतस्यसाधनंतन्मतिस्तथा ॥ एतत्त्रयंपरित्यक्तंयस्यस्वाभाविकंमलम् ॥ ३ ॥ भूमिकात्रितयं तेनदर्शितंहरिणास्फुटम् ॥ पंचम्यादितुरीयांतंवासिष्ठेकृतनिर्णयम् ॥ ४ ॥ ससमाहितधीर्ब्रह्मसच्चिदानंदमद्वयम् ॥ अध्यस्तद्वैतशून्यत्वा न्निर्वाणमगतागतम् ॥ ५ ॥ अविद्यावृत्तिबाधेनप्राप्तंप्राप्नोतितद्वपुः ॥ ६ ॥ यज्ज्ञानिनांविषयसारविचारणोत्थवैराग्यदार्ढ्यजसमाधिसु खानुभूतिः ॥ विस्मारयत्यखिलबाह्यसुखांशहेतूंस्तंश्रीमुकुंदमनिशंहृदिभावयेऽहम् ॥ ७ ॥ २४ ॥ मुक्तिहेत्वात्मबोधस्यसाधनांतरमुच्यते ॥

योंऽतःसुखोंऽतरारामस्तथांऽतर्ज्योतिरेवयः ॥ सयोगीब्रह्मनिर्वाणंब्रह्मभूतोऽधिगच्छति ॥ २४ ॥
लभंतेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः ॥ छिन्नद्वैधायतात्मानःसर्वभूतहितेरताः ॥ २५ ॥
कामक्रोधवियुक्तानांयतीनांयतचेतसाम् ॥ अभितोब्रह्मनिर्वाणंवर्ततेविदितात्मनाम् ॥ २६ ॥

आदौक्षीणमलायज्ञैश्चित्तशुद्ध्यात्मदर्शने ॥ १ ॥ समर्थास्ततआत्मैक्यविचाराच्छिन्नसंशयाः ॥ निदिध्यासनदार्ढ्येनब्रह्मण्येकाग्रचेतसः ॥ २ ॥
अद्वैतात्मधियाधीराःसर्वभूतहितेरताः ॥ हिंसाशून्याब्रह्मविदोलभंतेब्रह्मनिर्वृतिम् ॥ ३ ॥ २५ ॥ पूर्वमुत्पन्नयोर्वेगःसोढव्यःकामकोपयोः ॥
उक्तोऽधुनातयोर्जन्मप्रतिबंधार्थमुच्यते ॥ १ ॥ कामक्रोधवियोगस्तदनुत्पत्तिर्विवक्षिता ॥ तद्वतांयत्नशीलानांसमाहितधियांसताम् ॥ २ ॥
साक्षात्कृतात्मतत्त्वानांमृतानांजीवतामपि ॥ तेषांहिवर्ततेमोक्षोनित्यत्वात्स्वस्वरूपकः ॥ ३ ॥ २६ ॥

तत्किंकर्मप्रशस्तत्वात्सदानुष्ठेयमामृतेः ॥ मैवंधीशुद्धिवैराग्यमारुरुक्षोर्हिकर्मतत् ॥ १ ॥ शुद्धिंप्राप्तस्यतस्यैवतत्त्यागोज्ञानसाधनम् ॥ अधिकारविभागेनकर्मतत्त्यागयोरपि ॥ २ ॥ कार्याकार्यव्यवस्थात्रप्रोक्ताभगवतामया ॥ ३ ॥ ३ ॥ यस्मिंश्चित्तसमाधानकालेकर्मसुतत्फले ॥ तन्मिथ्यात्वधियास्वात्माकर्त्रभोक्तृधियातथा ॥ १ ॥ अहंकर्तास्मभोग्यंतत्फलंमेचेतिरंजनाम् ॥ नकरोतिपरित्यक्तसर्वकामतयामुनिः ॥ २ ॥ इहामुत्रार्थकामानांहेतूनाध्यासिकान्यतः ॥ संत्यक्तुंशीलमस्यासौप्राप्तयोगस्तदोच्यते ॥ ३ ॥ ४ ॥ योगारूढोयदाजातस्तदैवात्मनामुना ॥ अनर्थव्रातसंसाराद्बंधनाख्यात्समुद्धृतः ॥ १ ॥ संसारपंकनिर्मग्नमात्मानमतियत्नतः ॥ उद्धरेत्ततऊर्ध्वंतंवैराग्यादियुतःपु

आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते ॥ योगारूढस्यतस्यैवशमःकारणमुच्यते ॥ ३ ॥
यदाहिनेंद्रियार्थेषुनकर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासीयोगारूढस्तदोच्यते ॥ ४ ॥
उद्धरेदात्मनात्मानंनात्मानमवसादयेत् ॥ आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मनः ॥ ५ ॥

मान् ॥ २ ॥ त्यागेनविषयासक्तेःसमाध्यारूढतांनयेत् ॥ अनाद्यविद्ययाध्यस्तदेहाद्यात्ममतिंत्यजेत् ॥ ३ ॥ ब्रह्मात्मैक्यावबोधेनधीमान् शांतिंसमाश्रयेत् ॥ संसारेऽत्यंतघोरेऽस्मिन्रागद्वेषादिसंकुले ॥ ४ ॥ स्वात्मानंपातयेन्नैवविषयासक्तचेतसा ॥ बंधान्मोक्षकरोह्यात्माहितकारीसआत्मनः ॥ ५ ॥ नान्यःकश्चिद्भवेद्बंधुःसंसारोद्धारणेक्षमः ॥ प्रत्युतस्नेहपाशेनबंधुरन्योऽत्यनर्थदः ॥ ६ ॥ आत्मैवाहितकारित्वादात्मनःशत्रुरुच्यते ॥ विषयासक्तिबंधैश्चकारागारेप्रवेशनात् ॥ ७ ॥ पुनर्जन्मपुनर्मृत्युःपुनर्भोगेषुदीनता ॥ स्वात्माज्ञानाद्यतोनॄणांततऊर्ध्वंनयेत्स्वयम् ॥ ८ ॥ आत्मानंतत्त्वबोधेनवैराग्यादियुतेनच ॥ ९ ॥ ५ ॥

बंधुरात्मात्मनःकीदृक्कीदृक्शत्रुरितीर्यते ॥ कार्यकारणसंघातोयेनादौस्ववशीकृतः ॥ १ ॥ विवेकबुद्ध्यातस्यात्माविषयासक्तिवारणात् ॥ बंधुरस्त्यात्मनःशास्त्रप्रवृत्त्यामोक्षसंमुखः ॥ २ ॥ आत्मैवशत्रुवत्तस्यमूढस्याप्यजितात्मनः ॥ वर्ततेशत्रुभावेनविषयासक्तिबंधनात् ॥ ३ ॥ उच्छृंखलप्रवृत्त्याचस्वस्यस्वेनैवबंधनम् ॥ तन्निवृत्त्यास्वमोक्षोऽपिस्वयंसिद्धउपस्थितः ॥ ४ ॥ ६ ॥ जितात्मनःस्वबंधुत्वंविवृणोतिरमापतिः ॥ सत्सुविक्षेपकेष्वेषुशीतोष्णादिषुयस्यनुः ॥ १ ॥ नजहातिसमत्वंधीरात्मतत्त्वसमीक्षणात् ॥ जितेंद्रियस्यशांतस्यरागद्वेषपरिक्षयात् ॥ २ ॥ समाधिविषयस्तस्यस्वप्रकाशोहरिर्भवेत् ॥ नान्यस्येत्याशयोविष्णोस्तस्माच्छांतोभवेन्मुनिः ॥ ३ ॥ संसारदुःखदृढकारणमाधिबीजंभ्रांतेर्गृहं

बंधुरात्मात्मनस्तस्ययेनात्मैवात्मनाजितः ॥ अनात्मनस्तुशत्रुत्वेवर्तेतात्मैवशत्रुवत् ॥ ६ ॥
जितात्मनःप्रशांतस्यपरमात्मासमाहितः ॥ शीतोष्णसुखदुःखेषुतथामानापमानयोः ॥ ७ ॥
ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः ॥ युक्तइत्युच्यतेयोगीसमलोष्टाश्मकांचनः ॥ ८ ॥

विविधकामभयादिमूलम् ॥ चित्तंनियंतुमचिरात्प्रभवंतिधीरायत्पादपद्मनिरताःसहरिर्ममेष्टः ॥ ४ ॥ ७ ॥ शास्त्रोक्तानांपदार्थानांज्ञानंस्वादौपदेशिकम् ॥ असंदिग्धाविपर्यासंविज्ञानंस्वानुभूतितः ॥ १ ॥ जातालंप्रत्ययस्ताभ्यामात्माचित्तंहियस्यसः ॥ सन्निधानेऽपिभोगानांनिर्विकारोऽतिधीरधीः ॥ २ ॥ व्यावर्तितानिभोगेभ्योयेनसर्वेंद्रियाणिसः ॥ हेयोपादेयधीशून्यतयायस्यसमानिच ॥ ३ ॥ मृत्पाषाणसुवर्णानिवीततृष्णोनिजात्मवित् ॥ ईदृशोयुक्तचित्तत्वाद्योगारूढइतीर्यते ॥ ४ ॥ ८ ॥

विनाप्रत्युपकारेप्सामुपकर्तासुहृत्स्मृतः ॥ स्नेहवान्मित्रमित्युक्तमरिःस्यादपकारकः ॥ १ ॥ उदासीनोद्वयोःपुंसोर्द्वेषाद्विवदमानयोः ॥ पक्ष पातविहीनत्वादुभयोरप्युपेक्षकः ॥ २ ॥ मध्यस्थोयोहितान्वेषीद्वयोर्विवदमानयोः ॥ स्वस्याप्रियोभवेद्वेष्यःसंबंधीबंधुरुच्यते ॥ ३ ॥ एते षुशास्त्रविहितकर्मकारिषुसाधुषु ॥ पापेषुशास्त्रमर्यादांसमुल्लंघ्यप्रवर्तिषु ॥ ४ ॥ चादन्येष्वपिसर्वेषुसमबुद्धिर्विमुच्यते ॥ कःकिंकर्मेतिधीशून्य उत्कृष्टःसंमतोमम ॥ ५ ॥ ९ ॥ अतउत्कृष्टतासिद्ध्यैयतितव्यमितीर्यते ॥ श्रुत्वावेदांतवाक्येभ्योमत्वासदुपपत्तिभिः ॥ १ ॥ आत्मतत्त्वंतत स्वमिन्निदिध्यासनतत्परः ॥ चित्तंसमाहितंकुर्यान्नित्यमेकांतदेशगः ॥२॥ त्यक्त्काविक्षेपकारित्वात्समस्तंममतास्पदम् ॥ संयतौचित्तदेहौचये

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु ॥ साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते ॥ ९ ॥
योगीयुंजीतसततमात्मानंरहसिस्थितः ॥ एकाकीयतचित्तात्मानिराशीरपरिग्रहः ॥ १० ॥
शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः ॥ नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरम् ॥ ११ ॥
तत्रैकाग्रंमनःकृत्वायतचित्तेंद्रियक्रियः ॥ उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये ॥ १२ ॥

नसोऽत्यंतनिश्चलः ॥ ३ ॥ परवैराग्यदाढ्येननिराशीर्वीततृष्णकः ॥ चित्तविक्षेपकत्यागीयोगीत्यक्तपरिग्रहः ॥ ४ ॥ १० ॥ आसनाहारनि यमानाहेदानींजगद्गुरुः ॥ स्वभावतःसंस्काराद्वाशुद्धेदेशेस्थिरंबुधः ॥ १ ॥ प्रतिष्ठाप्यासनंस्वस्यनात्युच्चंनातिनीचकम् ॥ कौशींबृसींसमा स्तीर्यमृदुचर्मकुशोपरि ॥ २ ॥ चर्मोपरिमृदुस्वच्छंवस्त्रमास्तीर्ययोगिराट् ॥ ३ ॥ ११ ॥ उपविश्यासनेतस्मिन्मनःसंयम्यसर्वतः ॥ कृत्वैकाग्रंस चित्तानामिंद्रियाणांचवृत्तयः ॥ १ ॥ सम्यगुपरतायस्याससमाधिंसमभ्यसेत् ॥ निर्विक्षेपतयाब्रह्मसाक्षात्कारैकसिद्धये ॥ २ ॥ नशयानोनवा तिष्ठन्नुपविश्येतिशब्दतः ॥ ३ ॥ १२ ॥

श्रीगणेशायनमः ॥ अथषष्ठाध्यायव्याख्याप्रारंभः ॥ पदंध्यायन्ध्यायन्मुजनमुनिवंद्यंमधुरिपोर्गुणान्स्मारंस्मारंभवजलधिपारंगमयतः ॥ रसं पायंपायंयदुपतिगिरांवेदशिरसांमतिर्भूयोभूयोममहरिपदाब्जेप्रविशतु ॥ १ ॥ ज्ञानयोगःपुराप्रोक्तःससंन्यासोविमुक्तिदः ॥ कर्मापिचित्तशु द्ध्यर्थप्रोक्तंकृष्णार्चनंपरम् ॥ २ ॥ चित्तशुद्धावपीदानींविक्षेपेसतियोगिनाम् ॥ निर्वाणशांतिरूपंयत्सुखंनस्यात्तदंजसा ॥ ३ ॥ येनोपाये नतत्सिद्धिःस्याद्धुपायःसउच्यते ॥ सूत्ररूपतयायोगःपंचमांतेयईरितः ॥ ४ ॥ सएवविस्तरेणात्रषष्ठाध्यायेप्रपंच्यते ॥ तत्रादौकर्मणांचित्तशु द्धिहेतुतयास्तुतिः ॥ ५ ॥ क्रियतेकामनात्यागाद्योगसंन्याससाम्यतः ॥ फलाभिसंधिशून्यःसन्नित्यंकर्मकरोतियः ॥ ६ ॥ श्रौतंस्मार्तंस ससंन्यासयोगयोःफलमश्नुते ॥ निरग्निरक्रियोयस्तुसंन्यासस्तुर्यआश्रमः ॥ ७ ॥ नतन्निषेधोहरिणाक्रियतेकर्मणांस्तुतौ ॥ किंतुकामपरि

श्रीभगवानुवाच ॥ अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः ॥ ससंन्यासीचयोगीचननिरग्निर्नचाक्रि यः ॥ १ ॥ यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव ॥ नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन ॥ २ ॥

त्यागमात्रेणैवास्यकर्मिणः ॥ ८ ॥ क्रियतेस्तुतिरित्येवमाशयोगम्यतेहरेः ॥ फलाभिलाषसंत्यागीविष्ण्वाराधनतत्परः ॥ ९ ॥ ससंन्यासी फलत्यागाद्योगीचित्तसमाधितः ॥ निरग्निरित्यनेनोक्तःसंन्यासीकर्मवर्जितः ॥ १० ॥ अक्रियश्चित्तसंरोधाद्योगीत्यत्रविवेचनम् ॥ यद्य पीदृङ्कर्म्यस्तिथापिस्तूयतेतथा ॥ ११ ॥ कामनात्यागसाम्येनसंन्यासीत्यादिशब्दतः ॥ १२ ॥ १ ॥ असंन्यासेऽपिसंन्यासशब्दयोगे ऽथकारणम् ॥ गुणयोगंहरिःप्राहमुमुक्षूणांहितायच ॥ १ ॥ यंकर्मतत्फलत्यागंप्राहुःसंन्यासमागमाः ॥ फलाभिलाषकर्तृत्वाभिमानत्यागयो गतः ॥२॥ योगंतंविद्धितत्त्वाप्तौसाधनत्वस्यसाम्यतः ॥ अकर्णकर्णमित्याहतेनमन्यामहेवयम् ॥३॥ कर्णतुल्योऽयमित्येवंन्यायाद्यौण्याप्रयुज्य ते ॥ परशब्दःपरत्रैवंसादृश्यंज्ञायतेजनैः ॥४॥ सादृश्यंप्रकृतेऽप्यस्तिकामत्यागोहिकर्मिणः ॥ नात्यक्तफलसंकल्पोयोगीभवतिकश्चन ॥५॥२॥

योगाभ्यासैकनिष्ठस्यप्राहाहारादिसंयमम् ॥ भुक्तंसज्जीर्यतिस्वस्ययदन्नंदेहधारणम् ॥ १ ॥ तदात्मसंमितंज्ञेयंतदतिक्रम्यलोभतः ॥ अधिकंचाश्नतोनास्तियोगोऽजीर्णादिदोषतः ॥ २ ॥ अत्यल्पाहारतोनास्तिनास्त्यनाहारतःसच ॥ अथवायोगशास्त्रोक्तमाहारंनैवलंघयेत् ॥ ३ ॥ पूरयेदशनेनार्धंतृतीयमुदकेनतु ॥ वायोःसंचरणार्थंतुचतुर्थमवशेषयेत् ॥ ४ ॥ निद्रयाक्रांतचित्तस्ययोगाभ्यासोनसंभवेत् ॥ ततो नास्त्यतिनिद्रालोर्योगोनास्त्यतिजाग्रतः ॥ ५ ॥ १६ ॥ अन्नंविहरणंयस्यनियतंपरिमाणतः ॥ तथापरिमिताचेष्टानिद्राजागरणेमिते ॥ १ ॥ सर्वदुःखक्षयेहेतुस्तस्ययोगोऽस्तिसन्मतेः ॥ अभियुक्तैस्तथैवोक्तंयोगिनांयोगसिद्धये ॥ २ ॥ अत्राहारार्थंकर्मकुर्यादनिंद्यंकुर्यादाहारंप्राणसं

नात्यश्नतस्तुयोगोऽस्तिनचैकांतमनश्नतः ॥ नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन ॥ १६ ॥
युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु ॥ युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा ॥ १७ ॥ य
दाविनियतंचित्तमात्मन्येवावतिष्ठते ॥ निःस्पृहःसर्वकामेभ्योयुक्तइत्युच्यतेतदा ॥ १८ ॥

धारणार्थम् ॥ प्राणाःसंधार्यास्तत्त्वंजिज्ञासनार्थंतत्त्वंजिज्ञास्यंयेनभूयोनदुःखम् ॥ ३ ॥ रजन्यामध्यमौयामौकुर्यान्निद्रांनचान्यदा ॥ विनाप्रयोजनंचेष्टांनकुर्याद्धस्तपादयोः ॥ ४ ॥ वृथाचेष्टावृथाकर्मभवेन्मंदधियांनृणाम् ॥ हितंमेध्यंमितंयस्यभोजनंप्राणधारकम् ॥ ५ ॥ गुरुसेवामुखे यस्यकर्मण्येवांघ्रिसंक्रमः ॥ मितानिद्रामितावाणीयस्यभागवतस्यच ॥ ६ ॥ योगस्तस्यसकार्यस्याज्ञानस्यस्याद्विनाशकृत् ॥ ७ ॥ १७ ॥ यस्मिन्कालेविशेषेणस्वच्छत्वान्निश्चलंमनः ॥ प्रतीच्येवनिरुद्धत्वान्नियमेनावतिष्ठते ॥ १ ॥ दृष्टादृष्टास्पदेभ्यश्चकामेभ्योदोषदर्शनात् ॥ तृष्णाविनिर्गतायस्यपरवैराग्ययोगतः ॥ २ ॥ तदासमाहितोयोगीसिद्धइत्युच्यतेबुधैः ॥ ३ ॥ १८ ॥

समाहितधियःप्रत्यगानंदेनिश्चलस्यच ॥ योगिनोभगवान्होपमानंबोधनायवै ॥ १ ॥ वातेनरहितेदेशेस्थितोदीपोयथाऽचलः॥समाहित धियःसोऽयंदृष्टांताश्चिंतितोबुधैः ॥ २ ॥ निरोधभूमौसततंसमाधिमनुतिष्ठतः ॥ सत्त्वोद्रेकेणयच्चित्तंप्रकाशकतयाऽचलम् ॥ ३ ॥ निश्चलो दीपएतस्यदृष्टांतोहरिणेरितः ॥ ४ ॥ १९ ॥ एवंसामान्यतोयोगंप्रोच्येदानींविशेषतः ॥ समाधिंविस्तरेणाहभगवान्योगिनांगतिः ॥ १ ॥ परिणामविशेषेहियस्मिन्नभ्यासपाटवात् ॥ जातेचित्तंनिरुद्धंसच्छांतंनिस्नेहदीपवत् ॥ २ ॥ यस्मिंश्चपरिणामेसत्यात्मानंदंचिदद्वयम् ॥ वेदां तमानसंजातवृत्त्यापश्यंश्चिदात्मनि ॥ ३ ॥ तुष्यत्यात्मसुखादन्यत्तोषहेतोरभावतः ॥ आनंदःपरएवात्माभेदसंसर्गवर्जितः ॥ ४ ॥ सएव

यथादीपोनिवातस्थोनेंगतेसोपमास्मृता ॥ योगिनोयतचित्तस्ययुंजतोयोगमात्मनः ॥ १९ ॥
यत्रोपरमतेचित्तंनिरुद्धंयोगसेवया ॥ यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति ॥ २० ॥
सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियम् ॥ वेत्तियत्रनचैवायंस्थितश्चलतितत्त्वतः ॥ २१ ॥
यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः ॥ यस्मिंस्थितोनदुःखेनगुरुणापिविचाल्यते ॥ २२ ॥

स्वस्वरूपेणव्यज्यतेपुण्यकर्मभिः ॥ यावद्यावत्तमोऽपैतिबुद्धौधर्मसमाहितम् ॥ ५ ॥ तावत्तावद्भियःस्वास्थ्यंतावत्तावत्सुखोन्नतिः॥ ६॥ २० ॥ यत्रावस्थाविशेषेचिद्घनानंताद्वयंसुखम् ॥विषयेंद्रियसंयोगानभिव्यंग्यंधियाच्छया॥ १ ॥सत्त्वमात्रप्रवाहिन्याग्राह्यंचानुभवत्ययम् ॥ यत्रायं चस्थितोविद्वानात्मतत्त्वस्वरूपतः ॥ २ ॥ नैवप्रच्यवतेतंचविद्यादित्यन्वयोऽमुना ॥ ३ ॥ २१ ॥ यमभ्यासातिवैशद्याल्लब्ध्वालाभंचिदद्वय म् ॥ ततोनैवापरंलाभमधिकंमन्यतेबुधः ॥ १ ॥ कृतकृत्यतयाप्राप्तप्रापणीयतयातथा ॥ परमात्मसुखेयस्मिन्स्थितोदुःखेननोमुनिः ॥ २ ॥ महताशस्त्रपातादिहेतुकेनापिचाल्यते ॥ ३ ॥ २२ ॥

यत्रोपरमतेचित्तमित्यारभ्यविशेषणैः ॥ चित्तावस्थाविशेषोयउक्तस्तंचित्तसंयमम् ॥ १ ॥ सर्वदुःखविरोधित्वाद्दुःखसंयोगघातकम् ॥ जानीया
द्दुःखसंयोगवियोगंसंतमप्यमुम् ॥२॥ विपरीतनयेनैवयोगशब्दाभिधेयकम् ॥ शास्त्राचार्यगिरांभावविषयोऽर्थःसनिश्चयात् ॥३॥ सत्यएवेतियो
क्तव्योयोगोनिर्वेदशून्यया ॥ धियेतिपुनराहेशोयोगःकार्यतयोदितः ॥ ४ ॥ सेत्स्यत्येवेतिनिश्चित्यभवेऽस्मिन्वाभवांतरे ॥ त्यक्त्वानिर्वेदम
त्यंतधैर्ययुक्तेनचेतसा ॥ ५ ॥ योगोऽस्त्यभ्यसनीयोऽयंयथोक्तंसांप्रदायिकैः ॥ उत्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना ॥ ६ ॥ मनसोनिग्रह
स्तद्वद्भवेदपरिखेदतः ॥ ७ ॥ २३ ॥ दृष्ट्वासंसारमागारमापदांभ्रांतिजन्मनाम् ॥ विरज्यालपसुखेभ्यश्चभोगेभ्योमतिमान्नरः ॥ १ ॥ कृष्णपाद

तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितम् ॥ सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा ॥ २३ ॥
संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः ॥ मनसैवेंद्रियग्रामंविनियम्यसमंततः ॥ २४ ॥

रतोभूत्वासद्गुरुंप्राप्यशांतिदम् ॥ लब्ध्वाततःपरब्रह्मोपदेशंयोगमभ्यसेत् ॥२॥ यावद्ब्रह्माद्वयानंदेमतिष्ठांनिश्चलांपराम् ॥ धियोनविंदतेतावद्यो
गोयोक्तव्यआदरात् ॥ ३ ॥ प्रतिष्ठायांचसिद्धायांकृतकृत्योभवेन्मुनिः ॥ एतद्दृदिनिधायाहभगवान्भूतभावनः ॥ ४ ॥ इदंमेस्यादिदंमेस्या
दितिसंकल्पजानिमान् ॥ शोभनाध्यासजान्कामान्दुष्टेषुविषयेष्वपि ॥५॥ त्यक्त्वाभोगाभिलाषाख्यान्दोषदृष्ट्याप्यशेषतः ॥ सर्वान्दुहिणलो
कांतान्वासनासहितान्मुनिः ॥ ६ ॥ प्रत्याहृत्येंद्रियग्रामंविषयेभ्यःसमंततः ॥ कामापायेविवेकेनयुक्ताधीर्यातयातथा ॥ ७ ॥ २४ ॥

उत्कासनंयोगसिद्ध्यैदेहधारणमुच्यते ॥ समंकृत्वाशिरोग्रीवांकायमध्यंसुनिश्चलम् ॥ १ ॥ मूलाधारात्समारभ्यमूर्धांतंधारयन्स्थिरम् ॥ सुदृढप्रयत्नोभूत्वानिष्कंपोयोगतत्परः ॥ २ ॥ लयविक्षेपशांत्यर्थंनासिकाग्रमवेक्ष्यच ॥ कृत्वेवदर्शनंसम्यगिवशब्दस्यलोपनात् ॥ ३ ॥ नासा संप्रेक्षणंनात्रविवक्षितमितीशितुः ॥ दिग्वीक्षणमकुर्वंश्चयोगस्यप्रतिबंधकम् ॥ ४ ॥ एवंभूतःसआसीतेत्युत्तरेणान्वयोमतः ॥ ५ ॥ १३ ॥ रागादिदोषशून्यत्वाच्छांतात्माध्यासवर्जितः ॥ युक्तायुक्तत्वसंदेहःकर्मत्यागेभयंस्मृतम् ॥ १ ॥ तच्छून्योनिर्भयोभूत्वायद्वासर्वभयोज्झितः ॥ ब्रह्मचर्यंविनाचित्तंदूषितंस्त्रीक्षणादिभिः ॥ २ ॥ निश्चलंनप्रतीचिस्याद्ब्रह्मचर्यमतश्चरेत् ॥ नारायणेपरांभक्तिंविनाब्रह्माद्वयेमनः ॥३॥ नक्षमंनिश्चलंस्थातुंभक्तिःकार्याततोहरौ ॥ एतद्बृदिनिधायाहब्रह्मचारीतिमाधवः ॥ ४ ॥ गुरुशुश्रूषणंभिक्षाब्रह्मचर्यमथापरम् ॥ यद्यद्व्रतंभवेद्ब्र

समंकायशिरोग्रीवंधारयन्नचलंस्थिरः ॥ संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन् ॥ १३ ॥
प्रशांतात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः ॥ मनःसंयम्यमच्चित्तोयुक्तआसीतमत्परः ॥ १४ ॥
युंजन्नेवंसदात्मानंयोगीनियतमानसः ॥ शांतिंनिर्वाणपरमांमत्संस्थामधिगच्छति ॥ १५ ॥

ह्मचारिणस्तत्रचस्थितः ॥ ५ ॥ मनोनिर्विषयंकृत्वावासुदेवेमयीश्वरे ॥ प्रत्यक्चैतन्यसद्रूपेचित्तंयस्यसमन्मनाः ॥ ६ ॥ अहमेवपरानंदरूपत्वेनपरःप्रियः ॥ सर्वस्माज्जीवपर्यंतात्पुरुषार्थःसमत्वरः ॥ ७ ॥ एवंचित्तनिरोधेनब्रह्माकाराकृतायदा ॥ चित्तवृत्तिःसआसीतनव्युत्तिष्ठेत्स्वयं ततः ॥ ८ ॥ १४ ॥ एवंपूर्वोक्तरीत्याहियोगाभ्यासपरोमुनिः ॥ वैराग्याभ्यासयोगेनमनःकुर्वन्समाहितम् ॥ १ ॥ अभ्यासातिशयेनैव निरुद्धंयेनमानसम् ॥ वृत्तिरूपाविकारावानिरुद्धायेनमानसाः ॥ २ ॥ सवृत्त्युपरतिंशांतिंनिर्वाणपरमांतथा ॥ तत्त्वबोधसमुत्पत्तिद्वारेणा ज्ञानमांतरम् ॥ ३ ॥ सकार्यमपबाध्याशुमुक्तिपर्यवसायिनीम् ॥ मत्स्वरूपपरानंदरूपांनिष्ठांसमश्नुते ॥ ४ ॥ १५ ॥

स्फुटीकरोतिभगवान्योगिनःसुखमीरितम् ॥ मनसैवेंद्रियग्राममित्याद्युक्तक्रमेणयः ॥ १ ॥ योगेननित्यसंबंधीमनोनित्यंसमादधत् ॥ संसार हेतुधर्मादिमलशून्योऽतिनिर्मलः ॥ २ ॥ अनायासेनमद्भक्त्यायोगप्रत्यूहवार्जितः ॥ सुखंब्रह्मस्वरूपंयदपरिच्छिन्नमांतरम् ॥ ३ ॥ लयविक्षेप शून्यत्वात्तद्व्याप्नोतिनिरंतरम् ॥ स्वयंब्रह्मसुखंयोगीभूत्वातिष्ठतिनिश्चलः ॥ ४ ॥ २८ ॥ इदानींयोगसंसिद्धंफलंब्रह्मैक्यदर्शनम् ॥ सर्वसंसारवि च्छेदकारणंतत्प्रदर्श्यते ॥ १ ॥ आब्रह्मस्थावरांतेषुसर्वभूतेषुचिद्घनम् ॥ स्वात्मानमेकमद्वैतमनुस्यूतंप्रपश्यति ॥ २ ॥ तथासर्वाणिभूतानिब्रह्मा

युंजन्नेवंसदात्मानंयोगीविगतकल्मषः ॥ सुखेनब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ॥ २८ ॥
सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ॥ इक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः ॥ २९ ॥

दीन्यात्मवस्तुनि ॥ ऐक्यंगतानियुक्तात्मापश्यत्यात्मैक्यदृच्मुनिः ॥ ३ ॥ साक्ष्येभ्योऽनृतदुःखेभ्योविवेकेनविविच्ययः ॥ साक्षिणंप्रत्यगात्मान मसंगंपरिपश्यति ॥ ४ ॥ साक्षिण्यखिलभूतानिकल्पितान्यात्ममायया ॥ आध्यासिकोहिसंबंधोमाययासाक्षिसाक्ष्ययोः ॥ ५ ॥ तन्निरस्यविवे केनमिथ्याभूतानिपश्यति ॥ योगेनैकाग्र्यरूपेणचित्तंयस्यसमाहितम् ॥ ६ ॥ सर्वत्रास्तिसमंयस्यदर्शनंब्रह्मगोचरम् ॥ सयोगीब्रह्मविद्ब्रह्मपश्यत्य न्यन्नपश्यति ॥ ७ ॥ २९ ॥

त्वंपदार्थनिरूप्यैवंशुद्धंतत्त्वैक्यसिद्धये ॥ विशुद्धस्तत्पदार्थोऽपिहरिणात्रनिरूप्यते ॥ १ ॥ योयोगीतत्पदार्थमांजगज्जन्मादिकारणम् ॥ मायो
पाधिविवेकेनसमस्तजगतीश्वरम् ॥ २ ॥ सत्तास्फुरणरूपेणानुस्यूतंनिरुपाधिकम् ॥ अद्वयानंदमात्मानमपरोक्षीकरोतिवै ॥ ३ ॥ तथासर्व
जगन्मय्यारोपितंमाययेक्षते ॥ तस्यैवंदर्शिनोनाहंतत्पदार्थोमहेश्वरः ॥ ४ ॥ परोक्षज्ञानविषयोभवामिस्वात्मतांगतः ॥ ईश्वरःकश्चिदन्यो

योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति ॥ तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ॥ ३० ॥

ऽस्तिमत्तश्चेतिपरोक्षधीः ॥ ५ ॥ यापुरासीन्मदात्मत्वधियासाविप्रणश्यति ॥ विद्वान्मद्रूपएवास्तिनपरोक्षोममापिसः ॥ ६ ॥ अविद्वांस्तुनतत्त्वे
नपश्यतीश्वरमांतरम् ॥ अतोनतंपरेशोऽपिपश्यन्नपिप्रपश्यति ॥ ७ ॥ ज्ञानीनित्यापरोक्षत्वादीशानुग्रहभाजनम् ॥ ८ ॥ ३० ॥

तत्त्वंपदार्थमुक्त्वैवमखंडार्थोनिरूप्यते ॥ ब्रह्मादिस्थावरांतेषुभूतेषूच्चावचेष्वयः ॥ १ ॥ निर्विशेषंचिदानंदेमामद्वैतंनिरंजनम् ॥ गुणरूपक्रिया वस्तुविक्रियाद्येकहेतुकम् ॥ २ ॥ भेदंत्यक्त्वाध्यजंशुद्धंसच्चिन्मात्रतयास्थितम् ॥ तत्पदार्थैकलक्ष्यस्त्वमोलक्ष्येणसाक्षिणा ॥ ३ ॥ इहैकत्वं श्रुतौसिद्धमत्यंताभेदमास्थितः ॥ अहंब्रह्मेतिवेदांतवाक्यजज्ञानचक्षुषा ॥ ४ ॥ अपरोक्षीकरोत्याशुत्यक्त्काविद्यांचतत्कृतम् ॥ कृतकृत्यतया सोऽयंजीवन्मुक्तउदारधीः ॥ ५ ॥ यावत्तस्यशरीरादिदर्शनंचानुवर्तते ॥ आभासमात्रंबुद्धस्ययथास्वाप्नदर्शनम् ॥ ६ ॥ प्रारब्धकर्मप्राब ल्यात्तावत्कर्माणिवात्यजन् ॥ कुर्वन्वाविहितंकर्मनिषिद्धंवासमाचरन् ॥ ७ ॥ येनकेनापिरूपेणयोगीव्यवहरन्नपि ॥ ब्रह्मास्मीतिधियावि द्वान्मय्येवपरमात्मनि ॥ ८ ॥ ऐक्येनवर्ततेनित्यमद्वैतेवैष्णवेपदे ॥ नित्यमुक्तस्वभावत्वात्कर्मभिर्नैवलिप्यते ॥ ९ ॥ धर्माधर्माद्यतीतेहिपदेनि

सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः ॥ सर्वथावर्तमानोऽपिसयोगीमयिवर्तते ॥ ३१ ॥
आत्मौपम्येनसर्वत्रसमंपश्यतियोऽर्जुन ॥ सुखंवायदिवादुःखंसयोगीपरमोमतः ॥ ३२ ॥

त्यंविराजते ॥ १० ॥ यस्योदारकृपाकटाक्षविलसद्वैराग्यमुख्योदयात्सम्यक्त्त्वमसीतिनैगमगिरोद्भूतात्मबोधाग्निना ॥ दग्ध्वाज्ञानमशेषभे दजनकंधीराःपरेचिद्घनेतिष्ठंत्यात्मपदप्रदंतमनिशंकृष्णंभजेऽहंसदा ॥ ११ ॥ ३१ ॥ स्वदृष्टांतेनसर्वत्रप्राणिजातेचतुर्विधे ॥ सुखंवायदिवा दुःखंतुल्यंयःपरिपश्यति ॥ १ ॥ यथाममसुखंनित्यमिष्टमेवंहिदेहिनाम् ॥ सर्वेषामनुकूलंसादितिपश्यतिसन्मतिः ॥ २ ॥ प्रतिकूलंयथादुःखं ममैवंसर्वदेहिनाम् ॥ प्रतिकूलंतथाचायंसर्वभूतहितेरतः ॥ ३ ॥ कस्यचिन्मनसावाचापीडांनाचरतीहयः ॥ कर्मणावासयोगीतुसर्वोत्कृष्ट तयामतः ॥ ४ ॥ ३२ ॥

गुरूपदिष्टमार्गेणोपरमेच्चशनैःशनैः ॥ अखिन्नतात्मधैर्येणयुक्तायाधीस्तयामनः ॥ १ ॥ आत्मन्येवसमाप्तिर्हियस्यतद्ब्रह्मगोचरम् ॥ कृत्वाविचिं
तयेन्नान्यद्गतिमन्यांनवाश्रयेत् ॥ २ ॥ आत्मैवास्त्यखिलंनान्यदितिनिश्चित्यवामुनिः ॥ नान्यद्विचिंतयेत्किंचिद्योगस्यायंपरोऽवधिः ॥३॥
॥ २५ ॥ एवंकुर्वन्समाधिंतंयोगीचित्तनिरोधनम् ॥ चित्तविक्षेपहेतूनांशब्दादीनांचमध्यतः ॥१॥ यस्माद्यस्मान्निमित्तात्तच्छब्दादेश्चंचलंमनः॥
अनाद्यविद्ययाध्यासाद्विक्षिप्तंसद्बहिर्व्रजेत् ॥ २ ॥ ततस्ततोऽतिविक्षेपनिमित्तात्तन्मनोमुनिः ॥ कृत्वानिर्वृत्तिकंप्रत्यगात्मन्येवाद्वयेसुखी ॥ ३ ॥
स्वप्रकाशपरानंदघनेतत्त्वेवशंनयेत् ॥ समस्तदुःखसीमेयंयन्मनोदृश्यगोचरम् ॥ ४ ॥ समस्तसुखसीमेयंयन्मनोब्रह्मगोचरम् ॥ विचार्यैवंधिया
विद्वान्वेदांताचार्यवाक्यतः ॥ ५ ॥ भोगानुत्सृज्यतद्धेतून्कामांस्त्यक्त्काश्रयेद्धरिम् ॥ यत्रयत्रमनोगच्छेच्छब्दादौभोगगोचरे ॥ ६ ॥ तंतंविचार्य

शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया ॥ आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेत् ॥ २५ ॥
यतोयतोनिश्चरतिमनश्चंचलमस्थिरम् ॥ ततस्ततोनियम्यैतदात्मन्येववशंनयेत् ॥ २६ ॥
प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमम् ॥ उपैतिशांतरजसंब्रह्मभूतमकल्मषम् ॥ २७ ॥

विषयंसवैराग्याद्विवेकतः ॥ आभासीकृत्यदोषाणामाकरत्वादसत्त्वतः ॥ ७ ॥ ततआकृष्यपरमानंदरूपेचिदात्मनि ॥ स्थापयेदितितात्पर्यंश्री
मद्भगवतोहरेः ॥ ८ ॥ २६ ॥ योगाभ्यासबलादेवंयोगिनश्चित्तमात्मनि ॥ प्रशाम्यतिततोऽत्यंतंशांतंनिर्वृत्तिकंस्थिरम् ॥ १ ॥ मनोयस्यतथाशां
तरजोविक्षेपकंमलम् ॥ कल्मषंलयहेतुर्यत्तमोयस्यनविद्यते ॥ २ ॥ धर्माधर्मादिरूपंवाकल्मषंनोभवप्रदम् ॥ यस्यतंब्रह्मवल्लेवसर्वमस्तीतिवेदि
नम् ॥ ३ ॥ सम्यग्ज्ञातेपरेतत्त्वेक्षीणेमोहमयेमले ॥ ब्रह्मभूतंमुनिंशांतमुपैतिसुखमुत्तमम् ॥ ४ ॥ दृश्यंनास्तिपरंब्रह्मैवास्तिसर्वंनिरंतरम् ॥ इति
निश्चयवंतंतंसुखंसमुपगच्छति ॥ ५ ॥ अभावेचित्ततद्वृत्त्योःसुषुप्तौचित्सुखंपरम् ॥ स्वयमाविर्भवत्येवंहिशब्दोद्योतयत्ययम् ॥ ६ ॥ २७ ॥

ताभ्यामसंयतंयस्यमनोविक्षेपशालिनः ॥ चित्तवृत्तिनिरोधाख्योयोगस्तस्यातिदुर्लभः ॥ १ ॥ प्रारब्धकर्मप्राबल्याच्चांचल्यादिमतोऽस्ययत् ॥ दुर्निग्रहत्वंचित्तस्यतत्रमेसंमतिर्हरेः ॥ २ ॥ वैराग्यपरिपाकेनवासनानांक्षयेसति ॥ वश्यःस्वाधीनआत्मांतःकरणंयस्यतेनतु ॥ ३ ॥ ईदृशेनापिपूर्वोक्तमभ्यासंकुर्वतादरात् ॥ चित्तचांचल्यकारीणिकर्माण्येवाभिभूयच ॥ ४ ॥ प्राप्तुंशक्यःसयोगोहिचित्तवृत्तिनिरोधकः ॥ स शक्योऽभिभवःकर्तुंकथंप्रारब्धकर्मणाम् ॥ ५ ॥ मैवंभोःसोऽप्युपायेनकर्तुंशक्योविवेकिना ॥ शास्त्रीयस्यप्रयत्नस्यप्राबल्यादपिकर्मणाम् ॥ ६ ॥ कर्तुंचाभिभवःशक्योवासिष्ठेऽपितथेरितम् ॥ सर्वमेवेहहिसदासंसारेरघुनंदन ॥ ७ ॥ सम्यक्प्रयुक्तात्सर्वेणपौरुषात्समवाप्यते ॥ उच्छास्त्रंशास्त्रितंचेतिपौरुषंद्विविधंस्मृतम् ॥ ८ ॥ तत्रोच्छास्त्रमनर्थायपरमार्थायशास्त्रितम् ॥ शुभाशुभाभ्यांमार्गाभ्यांवहंतीवासनासरित्

असंयतात्मनोयोगोदुःप्रापइतिमेमतिः ॥ वश्यात्मनातुयतताशक्योऽवाप्तुमुपायतः ॥ ३६ ॥

॥ ९ ॥ पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि ॥ अशुभेषुसमाविष्टंशुभेष्वेवावतारय ॥ १० ॥ स्वमनःपुरुषार्थेनबलेनबलिनांवर ॥ द्रागभ्यासवशाद्यातियदातेवासनोदयम् ॥ ११ ॥ तदाभ्यासस्यसाफल्यंविद्धित्वमरिमर्दन ॥ अव्युच्छिन्नमनायावद्भवानज्ञाततत्पदः ॥ १२ ॥ गुरुशास्त्रप्रमाणैस्त्वंनिर्णीतंतावदाचर ॥ ततःकपक्वषायेणन्नूनंविज्ञातवस्तुना ॥ १३ ॥ शुभोऽप्यसौत्वयात्याज्योवासनौघोनिरोधिना ॥ तस्मात्पौरुषमाश्रित्यशक्यःप्रारब्धकर्मणाम् ॥ १४ ॥ कर्तुंचाभिभवोऽपीतिसिद्धमित्याशयोहरेः ॥ १५ ॥ योगाभ्यासपरैर्मनोऽनवरतंसंस्थाप्यतेयत्रखेब्रह्मादींद्रइतीश्वरोऽद्वयइतिश्रुत्यात्रयोगीयते ॥ वैराग्यादिगुणाःसतांचसुलभायद्भक्तिलेशान्नृणांसोऽस्माकंहृदिसर्वदार्जुनसखो भूयान्मुकुंदोहरिः ॥ १६ ॥ ३६ ॥

दुःसंपाद्यत्वमालक्ष्ययोगस्योक्तस्यचार्जुनः ॥ तत्प्राप्त्युपायंशुश्रूषुःपृच्छतिस्महरिंप्रति ॥ १ ॥ योऽयंसर्वत्रसाम्येनयोगःप्रोक्तःपरात्मना ॥ सर्वज्ञेनमहेशेनत्वयानिगमयोनिना ॥ २ ॥ एतस्याहंत्वदुक्तस्ययोगस्यनिश्चलात्मनः ॥ नपश्यामिस्थितिंसत्तांदीर्घकालानुवर्तिनीम् ॥ ३ ॥ मनसोऽत्यंतचांचल्यान्नैवंसंभावयाम्यहम् ॥ ४ ॥ ३३ ॥ अत्यर्थचलशीलंहिप्रसिद्धंमनएवतत् ॥ हेकृष्णभक्तदोषाणांसर्वथाविनिवारक ॥ १ ॥ इंद्रियाणांशरीरस्यक्षोभकत्वात्प्रमाथितत् ॥ नैवकेनाप्युपायेननियंतुंशक्यतेबलात् ॥ २ ॥ दृढंभेत्तुमशक्यंचाप्यच्छेद्यंतंतुनागवत् ॥ अनादिवासनाजालैःस्यूतत्वेननिरंकुशम् ॥ ३ ॥ महामत्तगजस्येववनस्थस्यास्यनिग्रहम् ॥ निर्वृत्तिकतयासम्यगवस्थानंसुदुष्करम् ॥ ४ ॥ यथादोधूयमानस्यवायोराकाशगामिनः ॥ निरोधोघटवेश्मादौकर्तुंकैश्चिन्नशक्यते ॥ ५ ॥ अप्यब्धिपानान्महतोमेरोरुन्मूलनादपि ॥ अ

अर्जुनउवाच ॥ योऽयंयोगस्त्वयाप्रोक्तःसाम्येनमधुसूदन ॥ एतस्याहंनपश्यामिचंचलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥ चंचलंहिमनःकृष्णप्रमाथिबलवद्दृढम् ॥ तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करम् ॥ ३४ ॥
श्रीभगवानुवाच ॥ असंशयंमहाबाहोमनोदुर्निग्रहंचलम् ॥ अभ्यासेनतुकौंतेयवैराग्येणचगृह्यते ॥ ३५ ॥

पिवन्ह्यशनात्साधोविषमश्चित्तनिग्रहः ॥ ६ ॥ इत्येवंमनसोदार्ढ्यंवासिष्ठेसम्यगीरितम् ॥ ७ ॥ ३४ ॥ इत्येवमर्जुनप्रश्नंश्रुत्वोवाचजगद्गुरुः ॥ सत्यमेवंयथाब्रूषेचंचलंमनआधिदम् ॥ १ ॥ महाबाहुतयात्वंतुनिगृह्णीतुंचशक्ष्यसि ॥ प्रारब्धकर्मप्राबल्यान्नरेणासंयतात्मना ॥ २ ॥ दुःखेनापिमनोऽशक्यंनिगृहीतुंचलंदृढम् ॥ एवंसत्यपिधीरेणसमाधौतत्परेणतत् ॥ ३ ॥ अभ्यासेनविशुद्धेनवैराग्येणनिगृह्यते ॥ अभ्यासोनामकस्यांचिच्चित्तभूमौनिरंतरम् ॥ ४ ॥ समानप्रत्ययावृत्तिश्चित्तस्याधिवियोगिनः ॥ दृष्टादृष्टेषुभोगेषुदोषग्रस्तत्वदर्शनात् ॥ ५ ॥ विषयेषुयद्वैतृष्ण्यंवैराग्यंतदुदीरितम् ॥ ताभ्यांनिगृह्यतेतस्यात्यंतविक्षेपशीलता ॥ ६ ॥ ३५ ॥

योगमार्गेप्रवृत्तःसन्योंऽतरालेमृतोविधेः ॥ सगत्वासाधकोलोकानश्वमेधादियाजिनाम् ॥ १ ॥ कोटिःसंवत्सराणांसवासंकृत्वाततःक्षये ॥
यथोक्तकारिणांगेहेधनिनांजायतेसताम् ॥ २ ॥ वासनाशेषसद्भावादल्पवैराग्यवान्यदि ॥ जनकादिवदेवासौराज्ञांगेहेऽभिजायते ॥ ३ ॥
॥ ४१ ॥ वैराग्यादिगुणाधिक्येवासनाविरहान्मुनिः ॥ योगभ्रष्टःसुकृतिनांलोकानप्राप्ययोगिनाम् ॥ १ ॥ ब्राह्मणानांदरिद्राणांब्रह्मविद्या

प्राप्यपुण्यकृताँल्लोकानुषित्वाशाश्वतीःसमाः ॥ शुचीनाश्रीमतांगेहेयोगभ्रष्टोऽभिजायते ॥ ४१ ॥
अथवायोगिनामेवकुलेभवतिधीमताम् ॥ एतद्धिदुर्लभतरंलोकेजन्मयदीदृशम् ॥ ४२ ॥

वतांकुले ॥ जायतेतत्कुलेजन्मदुर्लभादपिदुर्लभम् ॥ २ ॥ पुण्यसाध्यतयाजन्मराज्ञांगेहेऽपिदुर्लभम् ॥ तस्मादपीदृशंजन्मयोगिगेहेऽतिदुर्लभ
म् ॥ ३ ॥ सप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ ॥ चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे ॥ ४ ॥ तेऽपिजाताःकुरुक्षेत्रेब्राह्मणावेदपार
गाः ॥ प्रस्थितादीर्घमध्वानंयूयंतेभ्योऽवसीदथ ॥ ५ ॥ तदुक्तंहरिवंशेऽत्रवंशेप्रस्रावनस्थले ॥ ६ ॥ ४२ ॥

यतस्तेषांकुलेबुद्ध्यासंयोगंलभतेऽन्यया ॥ पूर्वदेहसमुद्भूतप्रबलांकुरयानया ॥ १ ॥ पूर्वस्मादेवसंस्काराद्यत्नंबहुतरंततः ॥ करोतितत्त्वविज्ञा
नसंसिद्धौयोगतत्परः ॥ २ ॥ तवापिश्रीमतांगेहेजन्मास्तिकुरुनंदन ॥ अनायासात्तवज्ञानंभविष्यत्येवमाशयः ॥ ३ ॥ अयमर्थोऽपिवासिष्ठेव्य
क्तःश्रीरामचोदनात् ॥ ॥ एकामथद्वितीयांवातृतीयांभूमिकामुत ॥ ४ ॥ आरूढस्यमृतस्याथकीदृशीभगवन्गतिः ॥ योगभूमिकयो
त्क्रांतजीवितस्यशरीरिणः ॥ ५ ॥ भूमिकांशानुसारेणक्षीयतेपूर्वदुष्कृतम् ॥ ततःसुरविमानेषुलोकपालपुरेषुच ॥ ६ ॥ मेरूपवनकुंजेषुरम
तेरमणीसखः ॥ ततःसुकृतसंभारेदुष्कृतेचपुराकृते ॥ ७ ॥ भोगक्षयात्परिक्षीणेजायंतेयोगिनोभुवि ॥ शुचीनांश्रीमतांगेहेकुलेयुणवतांसताम्
॥ ८ ॥ जनित्वायोगमेवैतेसेवंतेयोगवासिताः ॥ तत्रप्राग्भावनाभ्यस्तंयोगंभूमिक्रमंबुधाः ॥ ९ ॥ दृष्ट्वापरिपतंत्युच्चैरुत्तरंभूमिकाक्रमम्

तत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकम् ॥ यततेचततोभूयःसंसिद्धौकुरुनंदन ॥ ४३ ॥
पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोऽपिसः ॥ जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्तते ॥ ४४ ॥

॥ १० ॥ ४३ ॥ पूर्वजन्मकृताभ्याससंस्कारेणावशोऽपिसन् ॥ मोक्षमार्गेप्रवृत्तोऽपिस्ववशीक्रियतेबलात् ॥ १ ॥ अकस्मादेवव्युत्थाप्य
भोगवासनतोजनः ॥ ज्ञानसंस्कारप्राबल्यात्क्रियतेसाधनोन्मुखः ॥ २ ॥ अल्पकालमपिज्ञानाभ्यासवासनयातया ॥ सम्यगभ्यस्तया
तस्यावासनायाविशेषतः ॥ ३ ॥ सद्वस्तुविषयत्वेनप्राबल्यादन्यगोचरात् ॥ यथात्वमेवयुद्धेऽस्मिन्पूर्वाभ्यासवशेनच ॥ ४ ॥ ज्ञानाभ्यासो
न्मुखोऽकस्मादेवाभूरितिचाशयः ॥ अतःसंस्कारप्राबल्याज्ज्ञातुमिच्छुरपीहयः ॥ ५ ॥ मोक्षसाधनबोधस्यविषयंब्रह्मचिद्घनम् ॥ भुक्त्वा
भोगान्बहून्स्वर्गेजन्मप्राप्योत्तमेकुले ॥ ६ ॥ योगभ्रष्टोऽपिवेदोक्तकर्मानुष्ठानजंफलम् ॥ अतीत्यवर्ततेतर्हिकिंवाच्यंब्रह्मवेदिनः ॥ ७ ॥ ४४ ॥

योगभ्रष्टोवरंजन्मलब्ध्वाब्रह्मविदाकुले ॥ तत्त्वज्ञानेऽधिकारीसज्ज्ञानसाधनतत्परः ॥ १ ॥ ज्ञानलाभेनसंसारबंधनान्मुच्यतेत्विति ॥ यतमानोऽधिकंयोगीयत्नात्पूर्वकृतादपि ॥ २ ॥ योगप्रयत्नपुण्येनधौतपापमलोऽभितः ॥ संस्कारोपचयात्पुण्योपचयाद्बहुजन्मभिः ॥ ३ ॥ संस्कारातिशयात्सिद्धःपुण्यातिशययोगतः ॥ लब्धपाश्चात्यजन्मासौसाधनातिशयात्ततः ॥ ४ ॥ साक्षात्कृत्यपरंतत्त्वंमुक्तिंप्राप्नोतिसद्य

प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्ततोयातिपरांगतिम् ॥ ४५ ॥ तपस्विभ्योऽधिकोयोगीज्ञानिभ्योऽपिमतोऽधिकः ॥ कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन ॥ ४६ ॥

तिम् ॥ ५ ॥ ४५ ॥ श्रद्धाधिक्योदयायाथयोगीसंस्तूयतेऽधुना ॥ तपःकृच्छ्रोपवासादितत्परेभ्योऽपियोग्यसौ ॥ १ ॥ उत्कृष्टोब्रह्मविज्ज्ञानी निर्वृत्तिकमनायतः ॥ ज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्चाधिकोमतः ॥ २ ॥ मोक्षानर्हतयाज्ञत्वात्कर्मिणांचतपस्विनाम् ॥ परोक्षज्ञानवद्भ्योऽप्यपरोक्षज्ञानिनोवराः ॥ ३ ॥ तेभ्योऽप्येवंमनोनाशवासनाक्षयसंयुतः ॥ जीवन्मुक्तोमुनिर्योगीश्रेष्ठःसर्वोत्तमोमतः ॥ ४ ॥ ४६ ॥

योगाभ्यासप्रवृत्तेनसंन्यस्तंसर्वकर्मतत् ॥ इहामुत्रफलप्राप्तिहेतुभूतंमुमुक्षुणा ॥ १ ॥ योगसिद्धिफलंमोक्षसाधनंतत्त्वदर्शनम् ॥ नप्राप्तंयोग मार्गाच्चप्रयाणेचलितामतिः ॥ २ ॥ यस्यतस्याभितोनाशमालक्ष्योवाचपांडवः ॥ गुरुवेदांतवाक्येषुविश्वासेनयुतोऽपियः ॥ ३ ॥ विरक्तः साधनोपेतःप्रवृत्तोयोगपद्धतौ ॥ शिथिलप्रयत्नोऽभ्यासेदैवान्मध्येमृतोयदि ॥ ४ ॥ योगसिद्धिमसंप्राप्यकांगतिंयातिसोऽच्युत ॥ ५ ॥ ३७ ॥ कर्ममार्गात्तथायोगाद्विभ्रष्टःसन्नकिंद्रयात् ॥ छिन्नाभ्रमिवनश्येद्वासोंऽतरालेनिराश्रयः ॥ १ ॥ विमूढोब्रह्मविन्मार्गेत्यक्तकर्माश्रयोयतः ॥ भक्तानांदोषसंदोहवारणेयस्यबाहवः ॥ २ ॥ समर्थाःसुखदानेचमहाबाहोत्वमित्यहो ॥ ३ ॥ ३८ ॥ तदेतत्संशयंसर्वंछेत्तुंयोग्यस्त्वमेवहि ॥

अर्जुनउवाच ॥ अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः ॥ अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छ ति ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति ॥ अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणःपथि ॥ ३८ ॥ एतन्मेसंशयंकृष्णछेत्तुमर्हस्यशेषतः ॥ त्वदन्यःसंशयस्यास्यछेत्तानह्युपपद्यते ॥ ३९ ॥ श्रीभगवा नुवाच ॥ पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते ॥ नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति ॥ ४० ॥

त्वत्तोमहेश्वरादन्यःकश्चिद्देवोमुनिर्नवा ॥१॥ सम्यगुत्तरदानेनसंशयस्यास्यसर्वतः ॥ छेत्तासंभवतीत्यस्मात्सर्वज्ञस्त्वंजगद्गुरुः ॥२॥ प्रत्यक्षदर्शी सर्वस्यसंशयंछेत्तुमर्हसि ॥३॥३९॥ अर्जुनस्यैवमाशंकांनिराकुर्वन्नुवाचह ॥ श्रीमन्नारायणःकृष्णःशरणागतवत्सलः ॥ १ ॥ मुमुक्षोस्तस्यवेदांत श्रवणादिप्रकुर्वतः ॥ चित्तवृत्तिनिरोधेहिप्रवृत्तस्यविरागिणः ॥२॥ अंतरालेमृतस्यापिविनाशोनोभयत्रवै ॥ नेहशिष्टविनिंदास्ययथाशास्त्रंप्र कुर्वतः ॥३॥ नानिष्टांगतिमाप्नोतिपरत्रान्याज्ञजंतुवत् ॥ यस्माच्छास्त्रानुगःकश्चिच्छुभकृद्दुर्गतिंगतिम् ॥४॥ इहाकीर्तिंपरत्रापिकुत्सितांनैवग च्छति ॥ अयंतुसर्वतःश्रेष्ठःकथंगच्छेद्विदुर्गतिम् ॥५॥ शिष्यस्यपुत्ररूपेणकृपापात्रत्वसूचनम् ॥ तातेतिपदतःसाक्षाद्धरिणाकृतमर्जुने॥६॥४०॥

सर्वयोगिवरंश्रीशभक्तंश्रीशोवदन्हरिः ॥ उपसंहरतीदानीमध्यायंयोगतत्परम् ॥ १ ॥ योगिनांवसुरुद्रादिभक्तानांभेदचेतसाम् ॥ सर्वेषाम
पिमध्येयोवासुदेवेमयीश्वरे ॥ २ ॥ पुण्यपुंजोदयात्प्रेम्णानिविष्टेनांतरात्मना ॥ प्राग्भवार्जितसंस्कारपाटवात्साधुसंगमात् ॥ ३ ॥ श्रद्दधा
नःसदाभूत्वाचिंतयत्यादराच्चमाम् ॥ सगुणंनिर्गुणंवापिनारायणमधीश्वरम् ॥ ४ ॥ अनन्यभक्त्यापरयासमद्भक्तोह्यनन्यधीः ॥ सर्वेभ्योयुक्त
चित्तेभ्यःश्रेष्ठोनित्यसमाहितः ॥ ५ ॥ सर्वज्ञस्यममात्यंतनिश्चितोनात्रसंशयः ॥ योगाभ्यासश्रमेतुल्येसमानेभजनश्रमे ॥ ६ ॥ मद्भक्तस्यैव

योगिनामपिसर्वेषांमद्गतेनांतरात्मना ॥ श्रद्धावान्भजतेयोमांसमेयुक्त
तमोमतः ॥ ४७ ॥ इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायायोग
शास्त्रेश्रीकृष्णार्जुनसंवादेआत्मसंयमयोगोनामषष्ठोऽध्यायः ॥ ६ ॥

मुख्यत्वंमत्पराङ्मुखयोगिनः ॥ त्वंमद्भक्ततयात्यंतयुक्तोभवितुमर्ज्जुन ॥ ७ ॥ अनायासेनशीघ्रंचशक्ष्यसीत्याशयोहरेः ॥ ८ ॥ योगीयोगबलेन
संसृतिमिमांत्यक्त्वात्मसौख्येस्थितःकर्मीकर्मजलोकभोगरसिकस्तस्मिन्नुपायेरतः ॥ अस्माकंतुनवीनवारिदरुचिर्मदस्मितेनांचितोगोगोपीज
नवत्सलःसुखनिधिःकृष्णःशरण्योगतिः ॥ ९ ॥ ४७ ॥

निरूपितमिहाध्यायेकर्मसंन्यासपूर्वकम् ॥ तत्त्वज्ञानैककरणंचित्तवृत्तिनिरोधनम् ॥ १ ॥ एवमध्यायषट्केनत्वंपदार्थनिरूपणम् ॥ त्रिधाऽशुद्धि निरासेनत्रिधाशुद्धियुतंकृतम् ॥ २ ॥ पापाख्याऽशुद्धिरतुलानिष्कामैःकर्मभिर्हता ॥ ततोरजोगुणोद्भूतविक्षेपाशुद्धिरांतरी ॥ ३ ॥ चित्तवृ त्तिनिरोधेनप्रत्यग्ध्यानेननाशिता ॥ त्वंपदार्थापरिज्ञानाभिधाशुद्धिस्तृतीयका ॥ ४ ॥ देहादिभ्यःपृथक्कृत्यसाक्षिणंतद्विवेचनात् ॥ साप्य शुद्धिर्हतासम्यगुपदेशवचोऽमृतैः ॥ ५ ॥ एवंभगवतासम्यक्त्वंपदार्थनिरूपणम् ॥ कृतंयेननमस्तस्मैश्रीकृष्णाख्यायवेधसे ॥ ६ ॥ योगोज्ञा नंचकर्मश्रुतिर्विशदफलंयस्यभक्त्याजनानांब्रह्मादीनांनियंताविजयरथगतोयंतृरूपेणयोऽभूत् ॥ योगिध्येयःस्वरूपोनिरवधिसुखदोब्रह्मविद्या गुरुर्यःकृष्णोऽसौभक्तिवश्योवसतुममहृदिस्वात्मभूतोममाद्धा ॥ ७ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ चित्तवृत्तिनिरोधाख्यःषष्ठःसंपूर्ण तांगतः ॥ २६१ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ २०६६ ॥

तच्छ्रोतुराभिमुख्यायस्तौतिज्ञानंस्वगोचरम् ॥ इदंमद्विषयंज्ञानमपरोक्षंस्वतोयतः ॥ १ ॥ परोक्षंप्रतिबंधेनज्ञानमित्युपचर्यते ॥ तन्निरासेप्रमाणेनसविचारेणयत्पुनः ॥ २ ॥ विज्ञानेनयुतंसत्तन्मत्स्वरूपावसानकम् ॥ शास्त्रजंतेपरोक्षंचपरमासोऽहमीश्वरः ॥ ३ ॥ कथयिष्याम्यशेषेण सफलंचससाधनम् ॥ नित्यचैतन्यरूपंयदागमांतजयाधिया ॥ ४ ॥ विषयीकृत्यलोकेऽस्मिन्पुनरन्यन्मनागपि ॥ जिज्ञासोस्तववान्यस्यज्ञातव्यंनावशिष्यते ॥ ५ ॥ सर्वाधिष्ठानसन्मात्रज्ञानेऽध्यारोपितंजगत् ॥ तज्ज्ञानाद्बाधितंसर्वंज्ञेयंकिमवशिष्यताम् ॥ ६ ॥ तन्मात्रज्ञानतस्त्वंतुकृतकृत्योभविष्यसि ॥ ७ ॥ परब्रह्मज्ञानेजगदिदमशेषंसुविदितंयतःप्रोक्तंश्रुत्याबहुविधसुदृष्टांतकथनैः ॥ यदाविश्वंसर्वंभगवतिहरौभ्रांति

ज्ञानंतेऽहंसविज्ञानमिदंवक्ष्याम्यशेषतः ॥ यज्ज्ञात्वानेहभूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥
मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये ॥ यततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः ॥ ३ ॥

कलितंतदाब्रह्मज्ञानाद्विदितमलमस्त्येवनिगमात् ॥ ८ ॥ २ ॥ मत्कृपामंतरेणेदंदुर्लभंतन्महाफलम् ॥ कर्मज्ञानादियोग्यानांसहस्रेषुनृजन्मनाम् ॥ १ ॥ मध्येकश्चिद्विवेकीसन्यततेचित्तशुद्धये ॥ ज्ञानाययतमानानांसिद्धानांचविपश्चिताम् ॥ २ ॥ मध्येकश्चिन्महानेकःसम्यग्ज्ञानेनमांहरिम् ॥ साक्षात्करोतितत्त्वेनप्रत्ययूपेणचिद्घनम् ॥ ३ ॥ मत्तत्त्वज्ञोऽस्तिसर्वज्ञोदुर्लभोजगतीतले ॥ किंवाच्यंज्ञानमाहात्म्यंश्रीहरेरयमाशयः ॥ ४ ॥ ३ ॥

एवंप्ररोचनेनाभिमुखीकृत्यार्जुनंहरिः ॥ आत्मनःसर्वरूपत्वात्पूर्णत्वमवतारयन् ॥ १ ॥ क्षेत्राख्यांप्रकृतिंस्वीयामुपन्यसतिसंग्रहात् ॥ भूम्या
दिपंचभूतानिसूक्ष्मावस्थात्मकानिहि ॥ २ ॥ तन्मात्राण्येवलक्ष्यंतेमनोऽहंकारइष्यते ॥ बुद्धिशब्दान्महत्तत्वमहंकारस्यकारणम् ॥ ३ ॥ अवि
द्यात्मकमव्यक्तंवासनानंत्यवासितम् ॥ अहंकारपदेनोक्तंसर्वकारणकारणम् ॥ ४ ॥ इत्येवमुक्तरीत्येयंसाक्षिभास्यतयाक्षगा ॥ शक्तिःप्रकृ
तिधर्माख्याऽनिर्वाच्यात्रिगुणात्मिका ॥ ५ ॥ प्रकारैरष्टभिर्भेदमागतापारमेश्वरी ॥ अंतर्भूतोऽत्रसर्वोऽपिजडवर्गःप्रपंचगः ॥ ६ ॥ ४ ॥
प्रकृतेःक्षेत्ररूपायाअस्यास्तत्त्वंवदन्हरिः ॥ क्षेत्रज्ञलक्षणांप्राहप्रकृतिंचिद्धनांपराम् ॥ १ ॥ अष्टधोक्तानिकृष्टेयंप्रकृतिर्मलिनावृता ॥ संसार

भूमिरापोऽनलोवायुःखंमनोबुद्धिरेवच ॥ अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपराम् ॥ जीवभूतांमहाबाहोययेदंधार्यतेजगत् ॥ ५ ॥
एतद्योनीनिभूतानिसर्वाणीत्युपधारय ॥ अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा ॥ ६ ॥

बंधरूपत्वात्परार्थत्वाज्जडत्वतः ॥ २ ॥ इतोऽन्यांप्रकृतिंशुद्धांप्रकृष्टांचेतनात्मिकाम् ॥ ममात्मभूतांजानीहिपरांक्षेत्रज्ञलक्षणाम् ॥ ३ ॥ यया
क्षेत्रज्ञरूपिण्यासर्वस्यांतःप्रविष्टया ॥ जगज्जडमिदंसर्वंधार्यतेविशरारवम् ॥ ४ ॥ ५ ॥ एतेपरापरेप्रोक्तेक्षेत्रक्षेत्रज्ञलक्षणे ॥ प्रकृतीयोनिरस्त्ये
षामेतद्योनीनितानिवै ॥ १ ॥ चराचराणिसर्वाणिभूतानीत्युपधारय ॥ एवंचोपाधिभूतेमेक्षेत्रक्षेत्रज्ञलक्षणे ॥ २ ॥ जगतःप्रकृतीयस्मात्तद्वा
राहंततोहरिः ॥ सर्वज्ञोऽनंतशक्तिश्चमायोपाधिरधीश्वरः ॥ ३ ॥ सर्वस्यकार्यवर्गस्यजगतोजन्मकारणम् ॥ विनाशकारणंतद्वत्स्थिरजंगमरू
पिणः ॥ ४ ॥ स्वाभिकस्येवविश्वस्यमायिकस्यास्यसर्वतः ॥ उपादानंतथाद्रष्टामायावित्वादहंहरिः ॥ ५ ॥ ६ ॥

यतोऽहंसर्वजगतोजन्मस्थित्यादिकारणम् ॥ ततोमत्तोमहामायाधिष्ठानाज्जगदीशितुः ॥ १ ॥ सत्तास्फुरणरूपेणानुस्यूतात्स्वप्रकाशतः ॥ वस्तुसत्यंपरंकिंचिन्नान्यदस्तिधनंजय ॥ २ ॥ नमय्यारोपितंमत्तोभिद्यतेपरमार्थतः ॥ व्यवहारदृशासर्वंसच्चिद्रूपेमयीश्वरे ॥ ३ ॥ जडजात मिदंसर्वंप्रोतंमत्सत्तयाततम् ॥ प्रोतत्वमात्रेदृष्टांतःसूत्रेमणिगणाइति ॥ ४ ॥ स्वाप्निकामणयोयद्वत्स्वप्नद्रष्टरिकल्पिताः ॥ सूत्रेतैजसरूपेऽस्तु सर्वांशेवानिदर्शनम् ॥ ५ ॥ ७ ॥ रसादिष्वजलादीनांग्रथितत्वप्रतीतितः ॥ त्वयिसर्वंकथंप्रोतंनेतिशंक्यंकुतःशृणु ॥ १ ॥ रसोऽस्म्यहमपां सारआपःप्रोतारसेमयि ॥ इंद्वर्कयोःप्रभासारःप्रभारूपेचतौमयि ॥ २ ॥ प्रोतौतथैववेदेष्वोंकारोऽनुस्यूतईश्वरः ॥ प्रोतंशब्दात्मनिव्योमम

मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय ॥ मयिसर्वमिदंप्रोतंसूत्रेमणिगणाइव ॥ ७ ॥
रसोऽहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः ॥ प्रणवःसर्ववेदेषुशब्दःखेपौरुषंनृषु ॥ ८ ॥
पुण्योगंधःपृथिव्यांचतेजश्चास्मिविभावसौ ॥ जीवनंसर्वभूतेषुतपश्चास्मितपस्विषु ॥ ९ ॥

यीशेसर्वकारणे ॥ ३ ॥ यतःपुंबुद्धिरेतेषांनराणांपौरुषंहितत् ॥ तदात्मनिमयिप्रोताःपुरुषाःपरमेश्वरे ॥ ४ ॥ ८ ॥ गंधोऽहंपावनोभूमौगं धभूतेमहीमयि ॥ प्रोतागंधस्यपुण्यत्वंस्वभावादेवसंमतम् ॥ १ ॥ चात्पुण्यत्वंरसादीनांस्वभावादेवगम्यताम् ॥ गंधादीनामपुण्यत्वंप्राणि नामघदोषतः ॥ २ ॥ तेजःप्रकाशरूपंयत्सितभास्वरमग्निगम् ॥ तदहंमयितद्रूपेग्रथितोऽसौविभावसुः ॥ ३ ॥ चकारात्पावनस्पर्शोयोवा यौसोऽप्यहंहरिः ॥ प्राणधारणमायुर्यत्सर्वप्राणिष्वजीवनम् ॥ ४ ॥ तदहंमयितद्रूपेसंप्रोताःप्राणिनोऽखिलाः ॥ तपोद्वंद्वसहिष्णुत्वमहमस्मित पस्विषु ॥ ५ ॥ तपोरूपेमयिप्रोतायुक्तचित्तास्तपस्विनः ॥ ६ ॥ ९ ॥

श्रीगणेशायनमः ॥ अथसप्तमाध्यायव्याख्याप्रारंभः ॥ घनश्यामंवामंसततमभिरामंक्रतुपतिंश्रियोधामाकामंविमलसुखरामंमुनिगतिम् ॥ सुदामाद्यारामंविधिहरललामंश्रुतिमतिंश्रयेरामारामंभवगतिविरामंव्रजरतिम् ॥ १ ॥ ज्ञेयंव्याख्यायषट्केनत्वंपदार्थमथाधुना ॥ ध्येयंज्ञेयंसमादेयंतत्पदार्थंवदत्यजः ॥ २ ॥ षट्कस्यांत्येनपद्येनभक्तियोगोहिसूत्रितः ॥ विवरीतुंतमध्यायषट्केनारभतेहरिः ॥ ३ ॥ ब्रह्मविद्याप्रधानांगो योगोभगवतेरितः ॥ इदानींसर्वयोगानामुत्तमोयोगउच्यते ॥ ४ ॥ इत्थमुत्थानकाभेदेसत्यप्यर्थैक्यमस्त्यतः ॥ व्याख्यायंतेचिदानंदपदां भोजरजःश्रियः ॥ ५ ॥ भक्तियोगोहियोगानामुत्तमोभगवत्प्रियः ॥ भगवत्कृपयासाक्षाज्ज्ञायतेतद्दिदेहिनाम् ॥ ६ ॥ कर्मभ्रष्टाजनालो केजायंतेऽष्टसंसृतौ ॥ योगभ्रष्टास्तुजायंतेशुचीनांश्रीमतांकुले ॥ ७ ॥ नारायणपदांभोजरजःश्रीप्रेमसंवृते ॥ भक्तियोगेसकृत्पुंसांप्रवे

श्रीभगवानुवाच ॥ मय्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः ॥ असंशयंसमग्रंमायथाज्ञास्यसितच्छृणु ॥१॥

शेपुण्यपुंजतः ॥ ८ ॥ भ्रष्टशब्दःपरिभ्रष्टोनान्विष्टोऽपीहलभ्यते ॥ अतःसच्छ्रद्धयोपेतोनारायणपदांबुजम् ॥ ९ ॥ भजेदनन्ययाभक्त्यानै रंतर्येणसज्जनः ॥ तत्रश्रीहरिरेवादौभजनीयंस्वरूपतः ॥ १० ॥ कीदृशंभजनंतस्यतद्भतेनांतरात्मना ॥ कथमित्येवमाकांक्षामालक्ष्यैवा र्जुनस्यच ॥ ११ ॥ स्वयंवाक्यमुवाचेदंवक्ष्यमाणंकृपानिधिः ॥ मयीश्वरेहरौसाक्षाज्जगज्जन्मादिकारणे ॥१२॥ समासक्तंमनोयस्यत्यक्त्वान्य विषयंसदा ॥ कुर्वंश्चित्तसमाधानंमांसमाश्रित्यसर्वदा ॥१३॥ ईदृशस्त्वंहिमामीशंभगवंतमधोक्षजम् ॥ समग्रैश्वर्यसंपन्नंयथाज्ञास्यसितन्मया ॥ १४ ॥ उच्यमानंशृणुस्पष्टंनिःसंदेहतयार्जुन ॥ १५ ॥ १ ॥

एवंभूतंनजानंतिभगवंतंहिमांजनाः ॥ निर्गुणंगुणदाहार्थमित्याक्रोशतिमाधवः ॥ १ ॥ रागद्वेषप्रमादादिप्रकारैर्गुणजन्मभिः ॥ पदार्थैर्मो
हितंसर्वप्राणिमात्रमिदंकिल ॥ २ ॥ एभ्योगुणमयेभ्योमांसर्वाधिष्ठानमीश्वरम् ॥ समस्तविक्रियाशून्यंपरंचातिविलक्षणम् ॥ ३ ॥ आनंद

त्रिभिर्गुणमयैर्भावैरेभिःसर्वमिदंजगत् ॥ मोहितंनाभिजानातिमामेभ्यःपरमव्ययम् ॥ १३ ॥

घनमात्मानंस्वप्रकाशंनिरंजनम् ॥ नजानातिततःस्वात्माज्ञानादेवकुसंसृतौ ॥ ४ ॥ भ्रमत्यहोसुदौर्भाग्यमविवेकिजनस्यच ॥ इत्याक्रोशंकृ
पासिंधुर्दर्शयत्यांध्यमुक्तये ॥ ५ ॥ १३ ॥

स्वस्वबीजेषुभूतानिप्रोतानिनत्वयीतिचेत् ॥ आब्रह्मस्थावरांतानाभूतानायच्चिरंतनम् ॥ १ ॥ बीजमव्याकृताख्यंमांविद्धिप्रोतान्यतोमयि ॥ बुद्धिर्विवेकसामर्थ्यंतद्रूपेग्रथितामयि ॥ २ ॥ बुद्धिमंतोविनाबुद्धिंतादृशींनविवेकिनः ॥ पराभिभवसामर्थ्यंतेजःप्रागल्भ्यमुच्यते ॥ ३ ॥ पैश्वानभिभाव्यत्वंयत्तत्तेजस्विनामहम् ॥ तेजस्विनःपरिप्रोतास्तेजोरूपेमयीश्वरे ॥ ४ ॥ १० ॥ प्राप्तिसामर्थ्यभावेऽपिप्राप्यतामितिवांछनम् ॥ अप्राप्तविषयेकामोरागःप्राप्तेऽस्तिरंजना ॥ १ ॥ नक्षीयतामितीच्छास्यात्सत्यपिक्षयकारणे ॥ ताभ्यांविवर्जितस्वीयधर्मानुष्ठानसिद्धये ॥ २ ॥ बलंदेहेंद्रियादीनांसामर्थ्यंयच्चधारणे ॥ तद्रूपेमयिसंप्रोताबलवंतःशरीरिणः ॥ ३ ॥ धर्मशास्त्राविरुद्धोयःकामःप्राणिषुधर्मकृत् ॥ शरी

बीजंमांसर्वभूतानांविद्धिपार्थसनातनम् ॥ बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहम् ॥ १० ॥
बलंबलवतांचाहंकामरागविवर्जितम् ॥ धर्माविरुद्धोभूतेषुकामोऽस्मिभरतर्षभ ॥ ११ ॥
येचैवसात्विकाभावाराजसास्तामसाश्चये ॥ मत्तएवेतितान्विद्धिनत्वहंतेषुतेमयि ॥ १२ ॥

रयात्रासिद्ध्यर्थंकामोवाभोजनादिषु ॥ ४ ॥ सोऽहंतस्मिन्मयिप्रोताःकामिनोधर्मतत्पराः ॥ ५ ॥ ११ ॥ भावाश्चित्तपरीणामाःसात्विकायेशमादयः ॥ राजसाहर्षदर्पाद्यामोहाद्यास्तामसाश्चये ॥ १ ॥ विद्याकर्मादिवशतोजायंतेदेहिनांहितान् ॥ मत्तःसर्वेश्वरात्सर्वाज्जायमानानवेहिभोः ॥ २ ॥ नत्वहंतेषुभावेषुमज्जातत्वेऽपिसर्वतः ॥ नाहमस्मितदायत्तोमदायत्ताभवंतिते ॥ ३ ॥ मत्तःपृथङ्नतेसंतितेभ्योऽभिन्नोऽस्म्यहंसदा ॥ रज्जौसर्पादयोयद्वत्कल्पिताअपितद्भ्रमैः ॥ ४ ॥ रज्जोर्नास्तिमनाग्लेपस्तथाममनतद्भ्रमैः ॥ ५ ॥ १२ ॥

मायासागरमुत्तर्तुंश्रीहरेश्चरणांबुजम् ॥ पोतभूतंशरण्यंयेश्रितास्तेमोक्षभागिनः ॥ १ ॥ साधनंकर्मयोगादिहरिभक्तिमपेक्ष्यतत् ॥ मुक्तेःकृष्णांघ्रिभक्तिस्तुनिरपेक्षैकसाधनम् ॥ २ ॥ हरिभक्तिंविनायद्यत्साधनंदुष्करंनृभिः ॥ क्रियतेतद्वृथातस्माद्धरिंसर्वात्मनाश्रयेत् ॥ ३ ॥ महा पुण्यफलंकृष्णभक्तौविश्वासआदरात् ॥ तद्विहीनास्तुनिंद्यंतेपापिनोहरिणास्वयम् ॥ ४ ॥ मत्स्वरूपापरिज्ञानान्मूढाःस्युर्भोगलंपटाः ॥ ततः पापसमाचारेप्रवृत्तास्युर्नराधमाः ॥ ५ ॥ ततोमायाहृतज्ञानाःशास्त्रेऽप्यनधिकारिणः ॥ ततस्तेह्यासुरंभावंप्राप्ताःपश्वादिभिःसमाः ॥ ६ ॥ मा मीश्वरंसखायंस्वंपापोपहितबुद्धयः ॥ शरण्यंनप्रपद्यंतेदेहाद्यध्यासमाश्रिताः ॥ ७ ॥ नरोऽधिकारिणःकृष्णचरणांबुजसेवने ॥ तद्विहीनानरा काराःपशुभ्योऽप्यधमाःशठाः ॥ ८ ॥ मायया च्छादितंज्ञानंयेषांविषयरागिणाम् ॥ हिंसादिभावनाक्रांतागोविंदंनाश्रयंतिते ॥ ९ ॥ १५ ॥

नमांदुष्कृतिनोमूढाःप्रपद्यंतेनराधमाः ॥ मायया पहृतज्ञानाआसुरंभावमाश्रिताः ॥ १५ ॥
चतुर्विधाभजंतेमांजनाःसुकृतिनोऽर्जुन ॥ आर्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ ॥ १६ ॥

येजनाःपुण्यकर्माणोमांपरात्मानमीश्वरम् ॥ भजंतेतेमहात्मानःसंतिलोकेचतुर्विधाः ॥ १ ॥ आर्तोव्याध्यादिनाग्रस्तस्तन्निवृत्तीच्छयासुधीः ॥ ग्राहग्रस्तोयथाहस्तीयथाचद्रुपदात्मजा ॥ २ ॥ जिज्ञासुरात्मज्ञानार्थीजनकश्चोद्धवोयथा ॥ परत्रवेहभोगार्थमर्थार्थीसाधनेप्सुकः ॥ ३ ॥ बिभीषणश्चसुग्रीवोयथामुत्रध्रुवोयथा ॥ सकामाश्चत्रयोऽप्येतेभगवद्भजनेनच ॥ ४ ॥ तरंतिमायांतत्रापिजिज्ञासुर्ज्ञानलाभतः ॥ द्वौतुजि ज्ञासुतांप्राप्यज्ञाननेनमांतरंत्यमी ॥ ५ ॥ आर्तस्यार्थार्थिनश्चापिजिज्ञासुत्वस्यसंभवात् ॥ जिज्ञासोरपिबोधोपकरणार्थार्थिताभवेत् ॥ ६ ॥ अतस्त्रयोर्द्वयोर्मध्येजिज्ञासुर्हरिणेरितः ॥ निष्कामोभजतेज्ञानीविष्णुतत्त्वावबोधवान् ॥ ७ ॥ तीर्णमायोयथाव्याससनकादिरुदारधीः ॥ योनाकेवलनिष्कामोयथाऽक्रूरोयुधिष्ठिरः ॥ ८ ॥ १६ ॥

तेषांचतुर्विधानांचमध्येतत्त्वविदुत्तमः ॥ निवृत्तसर्वकामत्वात्सुकृताधिक्यहेतुना ॥ १ ॥ प्रेमाधिक्यात्सचोत्कृष्टःसर्वतःसंमतोमम ॥ यतो भगवतिप्रत्यगभिन्नेश्रांतिहानतः ॥ २ ॥ समाहितमनानित्यंविक्षेपाभावतोबुधः ॥ एकस्मिंश्चिद्घनेशुद्धेभगवत्येवयस्यहि ॥ ३ ॥ सदानुरक्तिरत्यंतापरप्रेमास्पदत्वतः ॥ विषयांतरबाधाच्चनास्यान्यविषयेरतिः ॥ ४ ॥ निरुपाधिपरप्रेमास्पदत्वेनप्रियोऽस्यच ॥ ज्ञानिनःपरमात्माहंप्रत्यगभिन्नआंतरः ॥ ५ ॥ ततोऽत्यर्थंसचज्ञानीप्रियोभगवतोमम ॥ प्रियोह्यात्मास्तिसर्वस्यलोकवेदप्रसिद्धितः ॥ ६ ॥ १७ ॥ एतेआर्तादयःसर्वेसकामाअपिमेप्रियाः ॥ पूर्वजन्मार्जितानेकपुण्यराशितयोत्तमाः ॥ १ ॥ अन्यथानभजेयुर्मांसर्वपुण्यफलावधिम् ॥ क्षुद्रदेवान्भजंतोऽपिदृश्यंतेबहवोजनाः ॥ २ ॥ आर्तादयस्त्रयोऽप्येतेममभक्तामममप्रियाः ॥ नह्यज्ञोज्ञोऽपिमद्भक्तःकश्चिदप्यप्रियोमम ॥ ३ ॥ किंतुयस्य

तेषाज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते ॥ प्रियोहिज्ञानिनोऽत्यर्थमहंसचममप्रियः ॥ १७ ॥
उदाराःसर्वएवैतेज्ञानीत्वात्मैवमेमतम् ॥ आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिम् ॥१८॥

मयिप्रीतिर्यादृशीमेऽपितादृशी ॥ प्रीतिरस्तीतिस्वाभाव्यात्तत्रैतेयेत्रयोमम ॥ ४ ॥ भक्तास्तेषांत्रयाणांचकाम्यमानमपिप्रियम् ॥ प्रियोऽहमपितस्माद्योज्ञानीतस्यतुसर्वतः ॥ ५ ॥ अहमेवप्रियोऽत्यंतप्रेमास्पदतयांतरः ॥ अतःसोऽपिममात्यंतप्रेमास्पदतयाप्रियः ॥ ६ ॥ अन्यथामेकृतज्ञत्वंनस्यात्स्याच्चकृतघ्नता ॥ अतोमामात्मभावेनज्ञानवान्स्वानुभूतितः ॥ ७ ॥ साक्षात्कृत्यस्थितोनित्यचिदानंदेयआत्मनि ॥ सआत्मैवनमद्भिन्नःकिंत्वहंसर्वथैवसः ॥ ८ ॥ यतःसमाहितमनामयिज्ञानीनिरंतरम् ॥ भगवंतमनंतंमामानंदघनमद्वयम् ॥ ९ ॥ आत्मानंपरमोत्कृष्टांगतिंगंतव्यमादरात् ॥ फलंस्वीकृतवान्नैवमद्भिन्नंमन्यतेफलम् ॥ १० ॥ १८ ॥

पुण्योपचयहेतूनांबहूनांजन्मनांयतः ॥ पुण्यपुंजविपाकेऽतेचरमेजन्मनिस्वयम् ॥ १ ॥ वासुदेवःसर्वमितिज्ञानवान्सन्सुदारधीः ॥ परप्रेमास्पदंमांचसर्वदानन्यमानसः ॥ २ ॥ सर्वप्रेमास्पदत्वेनभजतेमद्वपुश्चसन् ॥ अतःसएवमज्ज्ञानपूर्वकप्रेमवानपि ॥ ३ ॥ महात्मात्यंतशुद्धांतर्मनाब्रह्मात्मतत्त्वदृक् ॥ सर्वोत्कृष्टोनतत्तुल्योऽधिकोवान्योनकश्चन ॥ ४ ॥ मनुष्यणांसहस्रेषुदुःखेनापिससाधकैः ॥ अशक्योलब्धुमेतस्मान्ममातीवप्रियोऽस्तिसः ॥ ५ ॥ १९ ॥ एवमार्तादिभक्तानांमध्येज्ञानीविशिष्यते ॥ इत्युक्तमधुनातेऽपिदुर्लभाअन्यभक्तितः ॥ १ ॥ सकामत्वे तथाभेददर्शित्वेचसमेऽपिहि ॥ देवतांतरभक्तेभ्यःस्वभक्तानामुदारता ॥ २ ॥ प्रतिज्ञातापुरासैवसम्यग्व्याख्यायतेंऽततः ॥ यतःसमानेऽप्या

बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते ॥ वासुदेवःसर्वमितिसमहात्मासुदुर्लभः ॥ १९ ॥
कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेऽन्यदेवताः ॥ तंतंनियममास्थायप्रकृत्यानियताःस्वया ॥ २० ॥

यासेकृष्णभक्ताःक्रमेणच ॥ ३ ॥ सर्वोत्कृष्टंचमोक्षाख्यंलभंतेफलमक्षयम् ॥ येक्षुद्रदेवताभक्ताःक्षुद्रमेवपुनःपुनः ॥ ४ ॥ फलंसंसरणात्मैवलभंतेमंदभाग्यतः ॥ पुरुषार्थफलंश्रीशभजनंसमुपेक्ष्ययत् ॥ ५ ॥ भजनंक्षुद्रदेवानांतत्रकारणमुच्यते ॥ पुत्रपश्वादिविषयैःकामैःक्षुद्रैरनर्थदैः ॥ ६ ॥ तैस्तैर्भगवतोमत्तोविमुखीकृत्यमानसम् ॥ क्षुद्रदेवाभिमुख्यंचनीतंयेषांसुरागिणाम् ॥ ७ ॥ तत्तत्फलप्रदात्वत्वाभिमतायास्यदेवता ॥ तस्याआराधनेयोयःप्रसिद्धोनियमोभवेत् ॥ ८ ॥ तंतंजपोपवासादिनियमंसमुपाश्रिताः ॥ तत्तत्क्षुद्रफलप्राप्तिवांछयैवातिवंचिताः ॥ ९ ॥ असाधारणयापूर्वाभ्यस्तवासनयास्वया ॥ वशीकृताःपरित्यज्यमांभजंतेऽन्यदेवताः ॥ १० ॥ २० ॥

अनादिसिद्धात्रिगुणामायायातद्गुणैर्जगत् ॥ बद्धंतस्यततोमुक्तिःकथंस्यादितिचेच्छृणु ॥ १ ॥ ययाऽयंमोहितोलोकोमाययानैववेत्तिमाम् ॥ सैषादैवीस्वयंज्योतिर्देवाश्रयतयानृता ॥ २ ॥ कल्पितासाक्षिप्रत्यक्षगम्यातद्विषयातथा ॥ गुणत्रयात्मिकाबंधहेतुस्त्रिगुणरज्जुवत् ॥ ३ ॥ ममायाविनःसर्वशक्तेःसर्वविदोविभोः ॥ स्वाधीनत्वेनसृष्ट्यादिनिर्वाहिकतयामता ॥ ४ ॥ मायावरणविक्षेपशक्तिद्वयवतीजडा ॥ सर्वप्र पंचप्रकृतिरविद्याज्ञानशब्दिता ॥ ५ ॥ अशक्यातरितुंजीवैर्मत्साक्षात्कारमंतरा ॥ केनोपायेनतवचसाक्षात्कारोभवेन्नृणाम् ॥ ६ ॥ सव क्तव्यइतीदानीमुच्यतेकृपयात्मना ॥ येमांमायानियंतारंभगवंतंजगद्गुरुम् ॥ ७ ॥ समस्तफलदातारंसर्वज्ञंसर्वशक्तिकम् ॥ नित्यानंदघना त्मानंभक्तानुग्रहतत्परम् ॥ ८ ॥ सर्वोपाधिविनिर्मुक्तंत्यक्तान्यत्रोपरक्तताम् ॥ प्रपद्यंतेंऽतरात्मानमनन्यशरणाजनाः ॥ ९ ॥ सदानुचिंतयंतोमां

दैवीह्येषागुणमयीममायादुरत्यया ॥ मामेवयेप्रपद्यंतेमायामेतांतरंतिते ॥ १४ ॥

दिवसान्क्षपयंतिये ॥ तेमत्प्रेममहानंदवार्धिमग्नमनस्तया ॥ १० ॥ त्यक्तकामायागुणान्बंधहेतून्मायांनिहत्यच ॥ मत्प्रसादजबोधेनबाधेनाति तरंतिताम् ॥ ११ ॥ मामेवेत्येवकारेणभगवच्छरणंविना ॥ नमायातरणोपायःकोऽप्यस्तीत्यत्रसूचितम् ॥ १२ ॥ मायांदुरत्ययांतर्तुमना यासाद्यइच्छति ॥ समांशरण्यंसौंदर्यसारसर्वस्वमीश्वरम् ॥ १३ ॥ सदानुचिंतयेत्प्रेम्णानान्यत्किंचिद्विचिंतयेत् ॥ इतिश्रीवासुदेवस्यतात्पर्य मिहगम्यते ॥ १४ ॥ चिदानंदाकारंनवजलदशोभास्पदपदंमहामायाधारंशुभगुणकलाग्रामनिलयम् ॥ शरण्यंभीतानांजनिमृतिभयाच्चा णचरणंप्रपद्येऽहंकृष्णंस्मितमधुरवक्त्रंविदधतम् ॥ १५ ॥ १४ ॥

सर्वोत्तमफलंश्रीमद्भगवद्भजनंयदि ॥ कथंप्रायेणलोकास्तेभगवद्विमुखाइति ॥ १ ॥अपेक्षायांहरिःप्राहस्वयंहेतुंजगद्गुरुः ॥ अव्यक्तमप्रकाशं
मांप्राग्देहग्रहणात्स्थितम् ॥ २ ॥ वसुदेवगृहेव्यक्तिमस्मदादिवदागतम् ॥ इतिमन्यंतईशानंविवेकरहिताजनाः ॥ ३ ॥ सर्वकारणमीशा
नंमांव्यक्तिंकार्यरूपताम् ॥ मत्स्यकूर्मादिरूपेणप्राप्तंवेत्यर्थइष्यताम् ॥ ४ ॥ अविवेकितयामूढाविचारंनाश्रयंतिते ॥ सर्वकारणरूपंयन्नित्यं

अव्यक्तंव्यक्तिमापन्नंमन्यंतेमामबुद्धयः ॥ परंभावमजानंतोममाव्ययमनुत्तमम् ॥ २४ ॥

सोपाधिकंमम ॥ ५ ॥ तत्स्वरूपमजानंतस्तथैवनिरुपाधिकम् ॥ सर्वोत्कृष्टंपरानंदघनमद्वैतमक्षयम् ॥ ६ ॥ निर्विकल्पंस्वरूपंमेचिद्घनस्यमहेशि
तुः ॥ अजानंतोनृलोकानुकारिणंमांनरंविदुः ॥ ७ ॥ ततोमामीदृशंमत्वादेवतांतरमाश्रिताः ॥ अंतवत्तुफलंप्राप्यसंसाराब्धौभ्रमंतिते ॥ ८ ॥
मत्स्वरूपपरिज्ञानंमहापुण्यफलंयतः ॥ तस्मात्त्वंमांविजानीहिसगुणंनिर्गुणंचवा ॥ ९ ॥ तावन्मात्रेणमुक्तिस्तेभवितेत्याशयोहरेः ॥ १० ॥ २४ ॥

ननुश्रीमज्जन्मावसरइहसौंदर्यजलधिस्वरूपंयद्ध्येयंसुरमुनिगणैरैश्वरपदम् ॥ स्वयंप्राडभूर्तंनिरवधियुणैश्वर्यसहितंकथंतत्रावज्ञाभवतिमितबुद्धे
रपिहरौ ॥ १ ॥ तथाधुनाकौस्तुभकुंडलान्वितेकिरीटशोभावनमालशालिनि ॥ चतुर्भुजेकंबुगदाब्जशोभिनिसुदर्शनालंकृतपाणिपंकजे
॥ २ ॥ श्रीकांतिभूत्यादिविलाससंयुतेश्रीवत्ससौंदर्यगुणालयेविभौ ॥ समस्तदेवासुरसिद्धनायकेवैकुंठनाथेहिखगेशवाहने ॥ ३ ॥ देवेंद्रसं
पादितराजराजेश्वराभिषेकादिमहाविभूतौ ॥ समस्तदेवासुरजेतरीशब्रह्मादिभिर्वंदितपादपीठे ॥ ४ ॥ अनेकलीलासुविलासशीलेसमस्तलो

नाहंप्रकाशःसर्वस्ययोगमायासमावृतः ॥

कोत्तरसर्वधर्मे ॥ समस्तलोकोद्धरणोन्मुखेऽजेस्वेच्छावतीर्णेभुवमद्भुताभे ॥ ५ ॥ विधिप्रपंचोत्तरधामसंयुतेमहातिसौंदर्यरसाकरेहरौ ॥ उ
दारलीलाप्रविमोहिताखिलेश्रुतिप्रगीतामलकीर्तिधामनि ॥ ६ ॥ सप्ताश्वभानूज्ज्वलदिव्यकांतिमत्पीतांबरेनूतनमेघसुंदरे ॥ प्रभौसुदामा
दिदरिद्रशातनेस्वभक्तरक्षार्थमिहाश्वयंतरि ॥ ७ ॥ सुरद्रुमार्थंजितपाकशासनेबाणासुराजौजितचंद्रशेखरे ॥ सुरारिवंशोद्भवदुष्टघातिनि
स्वभावसिद्धाखिलदिव्यकर्मणि ॥ ८ ॥ पराशरव्यासवसिष्ठनारदादिभिर्महद्भिर्मुनिभिःसदास्तुते ॥ त्वयीदृशेस्यात्कथमल्पचेतसामपीड्यमा

नुष्यधियाह्युपेक्षणम् ॥ ९ ॥ इत्यर्जुनस्यांतरमादिदेवोऽभिलक्ष्यवाक्यंसमुदाजहार ॥ एतादृशोऽहंभवतायथोक्तःसर्वस्यलोकस्यनचाक्षिगोऽस्मि ॥ १० ॥ स्वेनरूपेणसर्वस्यप्रकटोनभवाम्यहम् ॥ किंतुकेषांचिदेवैवंमद्भक्तानांभवाम्यहम् ॥ ११ ॥ कथंसर्वस्यलोकस्यनप्रकाशइतीर्यते ॥ योगोममैवसंकल्पोमायातद्वशवर्तिनी ॥ १२ ॥ अभक्तोऽयंजनोमांनजानात्वित्थंमहेश्वरम् ॥ स्वरूपेणेतिसंकल्पानुसारिण्यैवमायया ॥ १३ ॥ ज्ञानगोचरतायोग्यःसत्यपिज्ञानकारणे ॥ कृतोऽतःप्राज्ञयाप्रोक्तंपरंभावमितीहवै ॥ १४ ॥ गुणानांघटनंयोगःसैवमायातयाह्यहम् ॥ संछ

मूढोऽयंनाभिजानातिलोकोमामजमव्ययम् ॥ २५ ॥

न्नोलोकदृष्ट्याद्येत्यर्थोभाष्यकृतांमतः ॥ १५ ॥ अभक्तानांममाज्ञानेसंकल्पोमेऽस्तिकारणम् ॥ अतोमेमायया च्छन्नज्ञानःसन्नयराङ्मुखः ॥ १६ ॥ लोकोऽयंमामजंनित्यमनंतंपरमेश्वरम् ॥ नाभिजानातिसर्वज्ञंसत्यपिज्ञानकारणे ॥ १७ ॥ किंतुमूढजनोऽयंमांविपरीतदृशान्यथा ॥ कंचिन्मनुष्यमेवात्रमन्यतेमाययावृतः ॥ १८ ॥ विद्यमानंयथावस्तुस्वरूपंह्यावृणोत्यसौ ॥ अविद्यमानंयत्किंचिन्मायादर्शयतीत्यपि ॥ १९ ॥ प्रसिद्धमस्तिभोःपार्थलोकेऽपीत्याशयोहरेः ॥ २० ॥ २५ ॥

योयःकामीतनुंयांयांदेवतामूर्तिमिच्छति ॥ पूर्वाभ्यासोत्थयाभक्त्यासंयुतोऽर्चयितुंसदा ॥ १ ॥ कामिनस्तस्यतस्याहमंतर्यामीमहेश्वरः ॥
तामेवदेवतामूर्तिंप्रतिश्रद्धांपुरार्जिताम् ॥ २ ॥ करोमिनतुमद्भक्तिंतस्यतस्यकरोम्यहम् ॥ नानाकामग्रहग्रस्तामद्भक्तौनाधिकारिणः ॥ ३ ॥
॥ २१ ॥ सकामीश्रद्धयायुक्तोमद्विनिर्मितयातया ॥ तस्याश्रदेवतातन्वाःपूजनंकुरुतेसदा ॥१॥ तस्याआराधितायाःसदेवतायाःसकाशतः॥
ईप्सिताँल्लभतेकामांस्तान्मयैवविनिर्मितान् ॥ २ ॥ हिप्रसिद्धंश्रुतौलोकेस्वकर्मफलदायिना ॥ भासमानान्हितत्वेनाहितत्वेऽपीतिवार्थतः
॥ ३ ॥ २२ ॥ यद्यपिदेवताःसर्वामवैवतनवोहरेः ॥ तत्पूजनंममैवास्तिपूजनंपरमार्थतः ॥ १ ॥ समस्तांतर्यामितयाफलदाताहमेवच ॥ तथा

योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति ॥ तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहम् ॥ २१ ॥
सतयाश्रद्धयायुक्तस्तस्याराधनमीहते ॥ लभतेचततःकामान्मयैवविहितान्हितान् ॥ २२ ॥
अंतवत्तुफलंतेषांतद्भवत्यल्पमेधसाम् ॥ देवान्देवयजोयांतिमद्भक्तायांतिमामपि ॥ २३ ॥

पिसाक्षान्मद्भक्तायेयेचान्यपरायणाः ॥ २ ॥ विवेकतदभावाभ्यांफलंतेषांपृथक्पृथक् ॥ अल्पबुद्धितयावस्तुविवेकाक्षमचेतसाम् ॥ ३ ॥
देवतांतरभक्तानांतदाराधनजंफलम् ॥ विनाश्येवनतुस्थायिमद्भक्तानांतुनोतथा ॥ ४ ॥ कुतएवंयतोदेवानिंद्रादीनेवनाशिनः ॥ मदन्यदेव
तापूजातत्पराःप्राप्नुवंतितान् ॥ ५ ॥ मद्भक्तास्तुसकामायेतेतावन्मत्प्रसादजान् ॥ अभीष्टान्प्राप्नुवंत्येवततोमामद्वयंपरम् ॥ ६ ॥ उपास्ति
परिपाकांतेप्राप्नुवंत्यैश्वरंपदम् ॥ समानेऽपिसकामत्वेमद्भक्तानांमहात्मनाम् ॥ ७ ॥ देवतांतरभक्तानांमहदस्त्यंतरंयतः ॥ उदाराःसर्वएवैते
तस्मात्साधूक्तमित्यपि ॥ ८ ॥ २३ ॥

यदिसर्वाणिभूतानिसंमोहंयांतितत्कथम् ॥ चतुर्विधाभजंतेमामित्युक्तमितिचेच्छृणु ॥ १ ॥ येषांप्राक्तनभिन्नानांजनानामधिकारिणाम् ॥ बहुज
न्मसुशास्त्रीयधर्मानुष्ठानतोऽसकृत् ॥ २ ॥ पुण्याचरणशीलानांतैस्तैःपुण्यैःस्वकर्मभिः ॥ धीप्रतिबंधकंपापमवसानंगतंहिते ॥ ३ ॥ पापाभा
वेचतद्धेतुरागद्वेषादिरूपिणा ॥ द्वंद्वमोहेननिर्मुक्ताःसम्यक्शुद्धधियाऽन्विताः ॥ ४ ॥ अत्यंताश्चाल्पसंकल्पाविश्वस्तामद्रतौसदा ॥ सर्वथाभ
गवानेवभजनीयःसआदरात् ॥ ५ ॥ सचैवंरूपएवेतिविनिश्चितधियोबुधाः ॥ अनन्यशरणाःसंतःसेवंतेमांचिदद्वयम् ॥ ६ ॥ चतुर्विधाभ
जंतेमामित्यत्रोक्तास्तईदृशाः ॥ तस्माद्धीशोधकेपुण्येयतितव्यंमनीषिभिः ॥ ७ ॥ श्रोतव्योनित्यभगवान्ध्येयोज्ञेयोऽर्च्यइत्यलम् ॥ ८ ॥

येषांत्वंतगतंपापंजनानांपुण्यकर्मणाम् ॥ तेद्वंद्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः ॥ २८ ॥
जरामरणमोक्षायमामाश्रित्ययतंतिये ॥ तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्मचाखिलम् ॥ २९ ॥

॥ २८ ॥ संसारदुःखान्निर्विण्णाजरामरणमुक्तये ॥ नानादुःसहसंसारदुःखोच्छेदायेजनाः ॥ १ ॥ दुःखोच्छेदैकहेतुंमांवासुदेवंचतुर्भुजम् ॥
घनश्यामंरमानाथंकिरीटोज्ज्वलमस्तकम् ॥ २ ॥ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ ध्येयत्वेनसमाश्रित्यसगुणंब्रह्मचिद्घनम् ॥ ३ ॥
विहायेतरकर्तव्यंगत्वाशरणमादरात् ॥ मदर्पितानिकर्माणिविहितान्याचरंतिते ॥ ४ ॥ क्रमाच्छुद्धधियःसंतस्तज्जगत्कारणंपरम् ॥ माया
धिष्ठानमद्वैतंशुद्धंब्रह्मचनिर्गुणम् ॥ ५ ॥ विदुस्तत्पदलक्ष्यंमांसाकल्येनयथातथम् ॥ शरीरमधिकृत्यैवंभासमानंचिदात्मकम् ॥ ६ ॥ देहाद्यु
पाध्यसंस्पृष्टंत्वमोलक्ष्यंविदुःपरम् ॥ कर्मार्पितद्वयज्ञानसाधनंशास्त्रसंमतम् ॥ ७ ॥ श्रवणाद्यखिलंचैतज्ज्ञानंत्यव्यभिचारियत् ॥ ८ ॥ २९ ॥

एवंभूतास्तुमद्भक्तामृत्युकालेऽपिमांहरिम् ॥ नविस्मरंतिकिंवाच्यंजीवनेसतिसाधवः ॥ १ ॥ येऽधिभूताधिदैवाभ्यांसहितंचिंतयंतिमाम् ॥ अधियज्ञेनसहितंसर्वदातत्परामयि ॥ २ ॥ प्राणोत्क्रमणकालेऽपितत्संस्कारैकपाटवात् ॥ अत्यंतव्यग्रतायांचसधींद्रियगणस्यते ॥ ३ ॥ अनायासेनमद्भक्तामांविदुर्मदनुग्रहात् ॥ मृत्युकालेऽपितेषांस्यान्मदाकारैकधीगतिः ॥ ४ ॥ पूर्वोपार्जितसंस्कारपाटवादेवसर्वथा ॥ तथाच तेकृतार्थाःस्युर्मद्भक्त्येत्याशयोहरेः ॥ ५ ॥ एवंसप्तत्रामश्लोकाभ्यांप्रश्नबीजंनिधायच ॥ विस्तरेणोत्तरंतस्यव्याख्यास्यतिहरिःस्वयम् ॥ ६ ॥ तदत्रशुद्धबुद्धीनांज्ञेयंब्रह्मनिरूपितम् ॥ मध्याधिकारिणांध्येयंबोधायहरिणेरितम् ॥ ७ ॥ ३० ॥ योमायावीमहेशःप्रकटितमहिमावेदसि

साधिभूताधिदैवंमांसाधियज्ञंचयेविदुः ॥ प्रयाणकालेऽपिचमांतेविदुर्युक्तचेतसः ॥३०॥ इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानविज्ञानयोगोनामसप्तमोऽध्यायः ॥७॥

द्धांतगीतोयोभक्तार्थंस्वरूपंसुरनरवनजंस्वेच्छयाधत्तईशः ॥ यस्यांघ्रिद्वंद्वमीड्यंजनिमृतिजलधिंसंतरंत्याश्रितायेतंश्रीकृष्णंहृदिस्थंसततमिह मुदासंश्रयेऽहंसुभक्त्या ॥ १ ॥ मायायस्यातिगूढाप्रचुरगुणयुतासर्वसंसारहेतुर्नोतर्तुंतैःसुशक्याहरिपदशरणंयेप्रपन्नानभक्त्या ॥ यत्पादांभोरुहांतर्भ्रमरइवजनःसंप्रविश्यातिरत्यामग्नस्तत्रैवनित्यंतमिहमुररिपुंकृष्णमीशंप्रपद्ये ॥ २ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ कृष्णभक्तिप्रधानोऽयंसप्तमःपूर्णतांगतः ॥ २२१ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ २२८७ ॥

॥ इतिश्रीमद्भगवद्गीतायांभावप्रकाशेसप्तमोऽध्यायःसमाप्तः ॥

ममस्वाधीनयाशक्त्यामाययामोहितोजनः ॥ नाभिजानातिमामीशंसगुणंनिर्गुणंतथा ॥ १ ॥ ममेश्वरस्यविज्ञानंप्रतिबध्नातिनैवसा ॥ मदायत्तानमद्भिन्नावक्तुंशक्यान्यशक्तिवत् ॥ २ ॥ मायाविनोयथान्यस्यमायानप्रतिबंधिका ॥ तथामद्देशितुर्मायाममायत्तास्तिसर्वतः ॥ ३ ॥ इत्याहभगवान्स्वीयभक्तानांबोधवृद्धये ॥ अहंसर्वेश्वरोलोकान्माययामोहयन्नपि ॥ ४ ॥ अतिक्रांतानिभूतानिवर्तमानानिसर्वशः ॥ भविष्याणिचजानामिकालत्रयगतान्यपि ॥ ५ ॥ अतःपरमसर्वज्ञोमायावीपरमेश्वरः ॥ अहमस्म्यत्रसंदेहोनकार्योभवतार्जुन ॥ ६ ॥ मदनुग्रहपात्रंवैमद्भक्तंसद्गुणंविना ॥ कोऽपिवेदनमांलोकोमन्मायामोहितत्वतः ॥ ७ ॥ मत्तत्त्ववेदनाभावाद्भजतेमांनमूढधीः ॥ ८ ॥ योंऽजःपुनातिसकलंह्रदिवाचिवर्तीयंवेत्तिनैवविधिरुद्रनुतंहिकोऽपि ॥ येनाततंनिखिलमेवनमंतियस्मैदेवायतोजगदिदंतमजंभजेऽहम् ॥९॥ २६ ॥ मत्तत्त्ववेद

वेदाहंसमतीतानिवर्तमानानिचार्जुन ॥ भविष्याणिचभूतानिमांतुवेदनकश्चन ॥ २६ ॥
इच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत ॥ सर्वभूतानिसंमोहंसर्गेयांतिपरंतप ॥ २७ ॥

नाभावान्मांभजंतिनयेजनाः ॥ रागद्वेषग्रहग्रस्ताभ्रमंत्येतेकुसंसृतौ ॥१॥ भोगाद्यभिनिविशेनसदेत्याहजगत्पतिः ॥ इच्छाद्वेषसमुद्भूतसुखादिद्वंद्वहेतुना ॥ २ ॥ मोहेनाहंसुखीदुःखीत्यादिभ्रांतिमयेनच ॥ समस्तान्यपिभूतानिविवेकायोग्यतांपराम् ॥ ३ ॥ स्थूलदेहोद्भवेयांतिहे भारतपरंतप ॥ त्वंतुवंशमहिम्नैवद्वंद्वमोहारिघातकः ॥ ४ ॥ सुखदुःखादिसंप्राप्यारागद्वेषोद्भवोयदा ॥ तदामोहंप्रयांत्येवसर्वभूतानिसर्वशः ॥ ५ ॥ नहीच्छाद्वेषदोषेणविवशीकृतचेतसाम् ॥ बहिर्गोचरमप्यस्तिसम्यग्ज्ञानंभ्रमापहम् ॥ ६ ॥ किमुवाच्यंतदाताभ्यांसमाविष्टधियांनृणाम् ॥ प्रत्यगात्मनिनज्ञानंसमुत्पद्यतइत्यपि ॥ ७ ॥ २७ ॥

प्रश्नक्रमानुसारेणभगवानुत्तरंत्रिभिः ॥ अनायासेनबोधार्थमुवाचहरिरीश्वरः ॥ १ ॥ निरुपाधिकमेवात्रब्रह्ममेऽस्तिविवक्षितम् ॥ अविनाश्यक्षरंब्रह्मसर्वव्यापकमुच्यते ॥ २ ॥ सर्वस्याव्याकृतांतस्यजगतोधारकंपरम् ॥ शरीरेंद्रियसंघातेविज्ञातृनिरुपाधिकम् ॥ ३ ॥ चैतन्यंस्वप्रकाशंयत्तद्ब्रह्मेतिमयेरितम् ॥ प्रतिदेहंचतस्यैवप्रत्यगात्मतयास्थितिः ॥ ४ ॥ स्वोभावःस्वस्वरूपंयत्प्रत्यक्चैतन्यमेवहि ॥ उच्यतेऽध्यात्मशब्देननेंद्रियग्रामइत्ययम् ॥ ५ ॥ यागहोमादिकर्मैवप्रोक्तंतत्कर्मशब्दतः ॥ विसर्गोदेवतोद्देशात्पुरोडाशादिवस्तुनः ॥ ६ ॥ सर्वभूतसमुत्पत्तिकरोयागादिकर्मतत् ॥ यज्ञादेःकर्मणोबीजभूताद्दृष्ट्यादिकक्रमात् ॥ ७ ॥ चराचराणिभूतानिजायंतेऽतस्तदुच्यते ॥ ८ ॥ ३ ॥ प्राणिजातंहियत्किंचिज्जनिमद्वस्तुमायिकम् ॥ अधिभूतपदेनोक्तंविनाशीभावएवच ॥ १ ॥ पूर्णंसर्वमनेनेतिशयनात्पूर्षुवेतिवा ॥ सूर्यमंडल

श्रीभगवानुवाच ॥ अक्षरंब्रह्मपरमंस्वभावोऽध्यात्ममुच्यते ॥ भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितः ॥ ३ ॥ अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतम् ॥ अधियज्ञोऽहमेवात्रदेहेदेहभृतांवर ॥ ४ ॥

मध्यस्थःपुरुषश्चाधिदैवतम् ॥ २ ॥ सर्वप्राणींद्रियाणांयःस्यादनुग्राहकःपुमान् ॥ हिरण्यगर्भएवासावादित्यांतर्गतःस्मृतः ॥ ३ ॥ सवैशरीरीप्रथमःसवैपुरुषउच्यते ॥ आदिकर्तासभूतानांब्रह्माग्रेसमवर्तत ॥ ४ ॥ विष्ण्वाख्यदेवताश्रौतीसर्वयज्ञाभिमानिनी ॥ सविष्णुश्चाधियज्ञोऽहं वासुदेवोनमत्परः ॥ ५ ॥ अतोब्रह्माद्ययानंदादत्यंताभेदतोहरेः ॥ प्रतिपत्तव्यएवास्मिन्नृदेहेयज्ञरूपतः ॥ ६ ॥ बुद्ध्यादिव्यतिरिक्तोऽस्ति विष्णुरूपतयास्थितः ॥ मनुष्यदेहेयज्ञस्यावस्थानंहरिणेरितम् ॥ ७ ॥ यतोमनुष्यदेहेननिर्वर्त्यत्वंहिकर्मणः ॥ त्वंसर्वदेहिनांश्रेष्ठोमत्सान्निध्यात्प्रतिक्षणम् ॥ ८ ॥ मयासंभाषणादेतद्बोधयोग्योऽसिसर्वथा ॥ सर्वदेहिवरत्वंतुप्रसिद्धंनृसुरादिषु ॥ ९ ॥ अर्जुनस्यैवभगवत्प्रसादातिशयेनवै ॥ १० ॥ ४ ॥

सप्तमस्योत्तरंप्राहप्रश्नस्यभगवान्हरिः ॥ मामेववासुदेवंयःसगुणंवाथनिर्गुणम् ॥ १ ॥ चिंतयन्सततंबुद्ध्यातत्तत्संस्कारपाटवात् ॥ समस्तक
रणग्रामवैयग्र्यसमयेमृतौ ॥ २ ॥ स्मरन्कलेवरंमुक्त्वाहंममेतिधियंतथा ॥ त्यक्त्वाप्राणवियोगेयःसगुणध्यानवान्यदि ॥ ३ ॥ तदासदेवयानेन
प्रयातिमद्गुपासकः ॥ मद्भावंनिर्गुणंब्रह्मब्रह्मलोकेविरिंचिना ॥ ४ ॥ सहभोगावसानेऽसौप्राप्नोतिज्ञानलाभतः ॥ निर्गुणध्यानपक्षेतुप्रयाती
त्यन्यदृष्टितः ॥ ५ ॥ नतस्यप्राणाइत्यत्रश्रुतौब्रह्मविदोमुनेः ॥ प्राणस्योत्क्रमणाभावेगत्यभावउदीरितः ॥ ६ ॥ ससाक्षादेवमद्भावंयातिब्र
ह्मैवसन्स्वयम् ॥ नास्त्यत्रसंशयःकश्चिद्ब्रह्मैवब्रह्मविद्यतः ॥ ७ ॥ अत्रायमाशयोविष्णोःप्रयाणसमयेनृणाम् ॥ कफवातादिदोषेणात्यंतव्य
ग्रधियामपि ॥ ८ ॥ स्वंस्वरूपंहरिःसाक्षात्स्मारयत्यात्मनिस्थितः ॥ हरितत्त्वविदोभक्तांस्तथान्यत्रहरेर्वचः ॥ ९ ॥ स्वस्थचेष्टाश्चयेमर्त्याःस्म

अंतकालेचमामेवस्मरन्मुक्त्वाकलेवरम् ॥ यःप्रयातिसमद्भावंयातिनास्त्यत्रसंशयः ॥ ५ ॥
यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरम् ॥ तंतमेवैतिकौंतेयसदातद्भावभावितः ॥ ६ ॥

रंतिममनारद ॥ काष्ठपाषाणतुल्यांस्तानंतकालेस्मराम्यहम् ॥ १० ॥ स्थिरचेतसिसुस्वस्थेशरीरेसतियोनरः ॥ धातुसाम्येस्थितेस्मर्तांविश्वरूपंच
मामकम् ॥ ११ ॥ ततस्तंम्रियमाणंतुकाष्ठपाषाणसन्निभम् ॥ अहंस्मरामिमद्भक्तंनयामिपरमांगतिम् ॥ १२ ॥ ५ ॥ नमद्भोचरएवायंनियमः
किंतुसर्वतः ॥ यंयंदेवविशेषंवायात्किंचिद्वस्तुमात्रकम् ॥ १ ॥ चिंतयन्नंतकालेऽसौत्यजतीहकलेवरम् ॥ तंतंसंस्मर्यमाणंसभावमेवैतिनापरम्
॥ २ ॥ पितृष्वस्रात्मजत्वेनानुग्राह्योऽसीतिसूच्यते ॥ कौंतेयेतिपदेनात्रस्नेहातिशयसूचनात् ॥ ३ ॥ पूर्वाभ्यासार्जिताप्युंसांवासनास्मृ
तिकारणम् ॥ सर्वदायेनयोऽभ्यस्तोभावोदेवादिगोचरः ॥ ४ ॥ स्मर्यमाणतयासोंऽतेतंतमेवैतिनापरम् ॥ ५ ॥ ६ ॥

यतोंऽत्याभावनाहेतुःप्राप्तौदेहांतरस्यच ॥ तस्मान्मद्विषयैकांतभावनोत्पत्तिसिद्धये ॥ १ ॥ पूर्वमेवादरेणत्वंसर्वकालेषुमांहरिम् ॥ सगुणंसर्वसौंदर्यसारसर्वस्वमीश्वरम् ॥ २ ॥ स्मितांकितमुखंमेघश्यामंपीतांबरंविभुम् ॥ श्रीवत्सांकितवक्षःस्थकौस्तुभादिश्रियोज्ज्वलम् ॥ ३ ॥ गरुडध्वजमाधारंसर्वस्यजगतःपतिम् ॥ आनंदसांद्रंश्रीकांतंकरुणार्द्रंनिरंतरम् ॥ ४ ॥ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ चिंतयाविरतंप्रेम्णाद्रवीभूतेनचेतसा ॥ ५ ॥ यद्यंतःकरणाशुद्धिवशात्त्वंनैवसंततम् ॥ शक्नोषिमामनुस्मर्तुंततःस्वांतविशुद्धये ॥ ६ ॥ युद्धादिकंस्वधर्मंत्वंकुरुनिष्कामचेतसा ॥ तेनाशुद्धिक्षयादेववासुदेवेमयीश्वरे ॥ ७ ॥ येनार्पितेमनोबुद्धीसंकल्पाध्यवसायकौ ॥ सत्वमेतादृशोनित्यंमच्चिंतनपरायणः ॥ ८ ॥ मामेववासुदेवंश्रीपरमानंदविग्रहम् ॥ प्राप्स्यस्यत्रनसंदेहोविद्यतेभोमनागपि ॥ ९ ॥ सगुणज्ञानिनामुक्तमंत्यभावाद्यपेक्षणम् ॥

तस्मात्सर्वेषुकालेषुमामनुस्मरयुद्ध्यच ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥
अभ्यासयोगयुक्तेनचेतसानान्यगामिना ॥ परमंपुरुषंदिव्ंयातिपार्थानुचिंतयन् ॥ ८ ॥

ज्ञानिनांभ्रांतिदाहेनमुक्तिःस्यात्तत्क्षणेयतः ॥ १० ॥ सदद्वैतेऽनृतद्वैतेयदन्योन्यैक्यवीक्षणम् ॥ तस्यांतकालस्तद्भेदबुद्धिरेवनचेतरः ॥ ११ ॥ नीरोगउपविष्टोवारुग्णोवाविलुठन्भुवि ॥ मूर्छितोवात्यजत्वेषप्राणान्भ्रांतिर्नसर्वथा ॥ १२ ॥ इत्युक्तेरपिद्रष्टव्यंध्यानिज्ञानिर्विवेचनम् ॥ १३ ॥ यस्मिन्निदंविविधविश्वमजेविभूम्निस्वाभाविकामृतसुखेवरिवार्तीनित्यम् ॥ सार्वज्ञ्यमुख्यगुणसंघमहोदधौश्रीसेव्यांघ्रिपद्मयुगलंतमहंप्रपद्ये ॥ १४ ॥ ७ ॥ सप्तानामुत्तरंप्रोच्यप्रश्नानामधुनाहरिः ॥ भगवच्चिंतनस्यैवभगवत्प्राप्तिलक्षणम् ॥ १ ॥ विवरीतुंफलंचात्रसम्यगारभतेस्फुटम् ॥ वासुदेवेविभौतुल्यप्रत्ययावृत्तिलक्षणः ॥ २ ॥ अभ्यासस्तेनयुक्तंयच्चेतस्तत्रैवतत्परम् ॥ गंतुंशीलंनचान्यत्रचेतसोऽस्येतितेनच ॥ ३ ॥ युक्तोयातिपरंदिव्यंसूर्यमंडलमध्यगम् ॥ शास्त्राचार्योपदेशेनध्यायन्नुत्तमपूरुषम् ॥ ४ ॥ ८ ॥

श्रीगणेशायनमः ॥ अथाष्टमाध्यायव्याख्याप्रारंभः ॥ यशोभूतिर्धर्मोविषयविरतिःश्रीःश्रुतिमतिर्गुणाःसाकल्येनप्रभवतिसदायत्रविमलाः ॥ प्रतिष्ठांसंप्राप्ताभगवतिपदेतंनिरुपमंश्रयेकृष्णंलक्ष्म्याश्रितममरपूज्यैश्रमुनिभिः ॥ १ ॥ सप्तमांतेपदार्थायेहरिणासप्तसूत्रिताः ॥ वृत्तिस्थानीयएतेषामधुनारभ्यतेऽष्टमः ॥ २ ॥ उपलभ्यार्जुनःप्रश्नबीजंकृष्णोपदेशतः ॥ पृच्छतिस्महरिंसप्तपदार्थज्ञानसिद्धये ॥ ३ ॥ ज्ञेयत्वेनेरितंब्रह्माकिंतत्सोपाधिकंत्वया ॥ किंनिरुपाधिकंवोक्तंतथाध्यात्मंकिमुच्यते ॥ ४ ॥ श्रोत्रादिकरणग्रामःप्रत्यक्चैतन्यमेववा ॥ तथाकर्मकिमत्रोक्तंयज्ञरूपमथापरम् ॥ ५ ॥ विज्ञानंतनुतेयज्ञंकर्माणितनुतेऽपिच ॥ इत्यत्रश्रुतिवाक्येऽपिद्वैविध्यंकर्मणःश्रुतम् ॥ ६ ॥ किंतेसर्वोत्तमस्यात्राज्ञातं

अर्जुनउवाच ॥ किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम ॥ अधिभूतंचकिंप्रोक्तमधिदैवंकिमुच्यते ॥ १ ॥ अधियज्ञःकथंकोऽत्रदेहेऽस्मिन्मधुसूदन ॥ प्रयाणकालेचकथंज्ञेयोऽसिनियतात्मभिः ॥ २ ॥

वापुरुषोत्तम ॥ अधिभूतपदेनोक्तंकिंकार्यंपांचभौतिकम् ॥ ७ ॥ किंवासमस्तमेवोक्तंकार्यजातंहिमायिकम् ॥ अधिदैवमनुध्यानंदेवताविषयंचकिम् ॥ ८ ॥ किंवानुस्यूतचैतन्यंसूर्यादेर्मंडलादिषु ॥ ९ ॥ १ ॥ देवताद्याधियज्ञोवापरब्रह्माथवेरितम् ॥ सचकेनप्रकारेणचिंतनीयोऽधियज्ञकः ॥ १ ॥ किंतादात्म्येनकिंवासोऽत्यंताभेदेनचिंत्यते ॥ सर्वथापिसदेहेऽस्मिन्वर्ततेवाततोबहिः ॥ २ ॥ देहेचेत्किंसबुद्ध्यादिस्तद्भिन्नोवासउच्यते ॥ करणग्रामवैयग्र्यान्मृत्युकालेऽतिदुःसहे ॥ ३ ॥ कथंज्ञेयोऽसिचित्तस्यसमाधेरप्यसंभवात् ॥ एतत्कथयसार्वज्ञात्कृपालुत्वाच्चमांप्रति ॥ ४ ॥ कुरुमेसंशयस्यास्यछेदनंत्वंमधोरिव ॥ ५ ॥ २ ॥

प्रणवेनाभिधानेनवेदोक्तेनप्रधानतः ॥ भगवत्स्मरणंकार्यमित्याहभगवान्स्वयम् ॥ १ ॥ अविनाशियदोंकाराभिधंब्रह्मवदंतिच ॥ वेदार्थ
ज्ञाभिदाभ्रांतित्यक्त्वामानविदोबुधाः ॥ २ ॥ यत्स्वाम्यैक्यधियाधीरानिःस्पृहायत्नतत्पराः ॥ विशंतिमुक्तपुरुषैःप्राप्यत्वेनमतंपदम् ॥ ३ ॥
यदिच्छंतःपरिज्ञातुंनैष्ठिकाब्रह्मचारिणः ॥ ब्रह्मचर्यंगुरोरंतेनिवासादिचरंत्यलम् ॥ ४ ॥ संक्षेपेणप्रवक्ष्यामितत्तुभ्यंपदमैश्वरम् ॥ कथंतदक्षरंज्ञे
यंमाभूरित्याकुलस्त्वतः ॥ ५ ॥ ११ ॥ प्रत्याहृत्येंद्रियद्वाराण्यखिलानिविवेकतः ॥ सम्यक्समस्तभोगेभ्योदोषदृष्ट्याविशेषतः ॥ १ ॥ वै
राग्याभ्यासयोगेननिर्वृत्तिकमनोयथा ॥ भवेत्तथास्वहृद्देशेसंयम्यातिप्रयत्नतः ॥ २ ॥ क्रियाद्वारंतथाप्राणंसर्वतोविनिगृह्यच ॥ गुरूपदिष्ट

यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागाः ॥ यदिच्छंतोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये ॥ ११ ॥ सर्वद्वाराणिसंयम्यमनोहृदिनिरुद्ध्यच ॥ मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणाम् ॥ १२॥ ॐमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन् ॥ यःप्रयातित्यजन्देहंसयातिपरमांगतिम् ॥ १३ ॥

मार्गेणतथाभ्रूमिजयक्रमात् ॥ ३ ॥ स्थापयित्वाभ्रुवोर्मध्येधारणामात्मगोचराम् ॥ समाधिलक्षणांकर्तुंप्रवृत्तस्तांसमास्थितः ॥ ४ ॥ १२ ॥
ब्रह्मणोवाचकत्वात्तत्प्रतीकत्वात्समुच्चरन् ॥ ॐमित्येकाक्षरंब्रह्मसर्वव्यापकमद्वयम् ॥ १ ॥ ॐमित्यस्यार्थमीशानंमांचसम्यगनुस्मरन् ॥ ना
ड्यामूर्धन्ययादेहंत्यजन्धीरःप्रयातियः ॥ २ ॥ सदेवयानमार्गेणब्रह्मलोकमुपासकः ॥ गत्वाभोगावसानेचमद्रूपांगतिमुत्तमाम् ॥ ३ ॥ प्रा
प्नोतिब्रह्मणासार्धंसंप्राप्तेप्रतिसंचरे ॥ ४ ॥ १३ ॥

पुनश्चितयितव्यंतंगंतव्यंचैवपूरुषम् ॥ नानाविशेषणैःशुद्धैर्विशिनष्टिहरिःस्वयम् ॥ १ ॥ अतीतानागतादेश्चसर्वस्यैवचवस्तुनः ॥ स्पष्टदर्शितयाक्रांतदर्शीसर्वज्ञउच्यते ॥ २ ॥ तमनादितयासर्वकारणत्वाच्चिरंतनम् ॥ समस्तस्यनियंतारमाकाशादेश्चसूक्ष्मतः ॥ ३ ॥ तत्कारणतयासूक्ष्मतरंसर्वस्यकारणम् ॥ सर्वस्यफलजातस्यविचित्रत्वेनकर्मणाम् ॥ ४ ॥ प्राणिभ्यःसंविभक्तारमचिंत्यमहिमत्वतः ॥ नास्यचिंतयितुंशक्यंरूपंकेनापितंतथा ॥ ५ ॥ आदित्यस्येवसर्वस्यप्रपंचस्यावभासकः ॥ प्रकाशोयस्यतंतस्मान्मोहांधतमसःपरम् ॥ ६ ॥ तमित्थंचिंतयेद्यस्तुसतं

कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्यधातारमचिंत्यरूपमादित्यवर्णंतमसःपरस्तात् ॥ ९ ॥ प्रयाणकालेमनसाऽचलेनभक्त्यायुक्तोयोगबलेनचैव ॥ भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंपरंपुरुषमुपैतिदिव्यम् ॥ १० ॥

यात्येवपूरुषम् ॥ ७ ॥ ९ ॥ अंतकालेचलेनांतःकरणेनानुसंस्मरेत् ॥ भगवद्विषयेणातिप्रेम्णायुक्तःसमाधिना ॥ १ ॥ समाधिजन्यसंस्कारसमूहेनयुतःपुमान् ॥ आदौहृदिवशीकृत्यततोभूमिजयक्रमात् ॥ २ ॥ सुषुम्नयोर्ध्वगामिन्यानाड्याचार्योक्तमार्गतः ॥ स्थापयित्वात्मनःप्राणमाज्ञाचक्रेसमाहितः ॥ ३ ॥ ब्रह्मरंध्रात्सउत्क्रम्योपासकस्तंस्वचिंतितम् ॥ कविंपुराणमित्यादिलक्षणंपुरुषंपरम् ॥ ४ ॥ द्योतनात्मकमीशानमद्भुतंप्रतिपद्यते ॥ ५ ॥ १० ॥

लोकाःकालपरिच्छिन्नतयासर्वेविनश्वराः ॥ मत्प्राप्तिव्यतिरेकेणसुखंनेत्याहमाधवः ॥ १ ॥ सहस्राणियुगान्येवयस्यपर्यवसानकम् ॥ तद्दिनं ब्रह्मणःस्रष्टुस्तावतीरात्रिरिष्यते ॥ २ ॥ प्रजापतेर्दिनंरात्रिंविदुर्येयोगिनोजनाः ॥ अहोरात्रविदस्तेस्युर्नेतरेस्वल्पदर्शिनः ॥ ३ ॥ १७ ॥ एवमुक्तैरहोरात्रैःपक्षमासादिसंख्यया ॥ पूर्णंवर्षशतंस्रष्टुःपरमायुरितीरितम् ॥ १ ॥ तस्यकालपरिच्छिन्नतयानित्यत्वमीरितम् ॥ येऽर्वाग्जन्म

सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः ॥ रात्रिंयुगसहस्रांतांतेऽहोरात्रविदोजनाः ॥ १७ ॥
अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंत्यहरागमे॥रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञके॥१८॥

लयाःसंतिकुतस्तेषांस्थिरागतिः ॥ २ ॥ तल्लोकप्राप्तिपर्यंतेत्याहसर्वजगद्गुरुः ॥ स्वापावस्थाविधेरस्यप्रोक्तेहाव्यक्तशब्दतः ॥ ३ ॥ विधेःप्रबोधसमयेस्वापावस्थात्मनस्ततः ॥ शरीरविषयाद्यात्मव्यक्तयोभोगभूमयः ॥ ४ ॥ व्यवहारक्षमत्वेनप्रभवंत्यहरागमे ॥ स्वापकालेविधेरात्र्यागमे तत्रैवकारणे ॥ ५ ॥ अव्यक्तसंज्ञकेसर्वालीयंतेव्यक्तयस्तथा ॥ ६ ॥ १८ ॥

एवमाशुविनाशित्वेऽप्यस्यनास्तिपरिक्षयः ॥ संसारदीर्घरोगस्यपंचक्लेशैःपुनःपुनः ॥ १ ॥ जायमानस्ततत्रैषांसंसारेभ्रमतानृणाम् ॥ अस्वातं त्र्याज्जरामृत्युजन्मादिदुःखचक्रतः ॥ २ ॥ कदापिनास्तिविश्रांतिरितिवैराग्यसिद्धये ॥ अकृताभ्यागमोदोषःकृतनाशस्तथापरः ॥ ३ ॥ स्याद्यदादिमतीसृष्टिर्जायमानाविनश्वरा ॥ बंधमोक्षव्यवस्थायाःसाधकंशास्त्रमप्यथ ॥ ४ ॥ निष्फलंस्याद्यदासृष्टिरादिमत्येवसंमता ॥ एत द्दोषापनुत्त्यर्थंप्राहैवंश्रीरमापतिः ॥ ५ ॥ भूतग्रामोयएवासीत्पूर्वकल्पेसएवहि ॥ चराचरात्मकोनान्योभूत्वाभूत्वाप्रलीयते ॥ ६ ॥ निशागमे दिनादौचसएवायंप्रजायते ॥ स्वाविद्यादिपराधीनोभूतग्रामोह्यनेकधा ॥ ७ ॥ अविद्यादिक्लेशमूलकर्माशयवशादयम् ॥ भूतग्रामःपराय त्तोजायतेलीयतेपुनः ॥ ८ ॥ सएवेतिविरागादिसिद्धयेहरिणोच्यते ॥ ९ ॥ १९ ॥ एवंक्लेशवतांजन्ममृत्युचक्रेप्रवर्तनम् ॥ भगवद्भक्तिही

भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते ॥ रात्र्यागमेऽवशःपार्थप्रभवत्यहरागमे ॥ १९ ॥ पर
स्तस्मात्तुभावोऽन्योऽव्यक्तोव्यक्तात्सनातनः ॥ यःससर्वेषुभूतेषुनश्यत्सुनविनश्यति ॥ २० ॥

नानांव्याख्यातमधुनातुये ॥ १ ॥ भगवद्भक्तिनिष्ठास्तेयंप्राप्यास्मिन्भवांबुधौ ॥ नपतंतिविमुक्तास्तंस्वरूपंदर्शयत्यजः ॥ २ ॥ तस्माच्चराचरस्थू लजगद्धेतोर्विधेःपरः ॥ व्यतिरिक्तोऽथवाश्रेष्ठोहेतुभूतोविधेरपि ॥ ३ ॥ नतस्यप्रतिमास्तीतिश्रुत्यात्यंतविलक्षणः ॥ अव्यक्तइंद्रियातीतोरू पस्पर्शादिवर्जितः ॥ ४ ॥ अध्यस्तेषुचसर्वेषुकार्येष्वनुगतोऽक्षरः ॥ नित्योयईदृशोभावोनश्यत्स्वप्यखिलेषुच ॥ ५ ॥ भूतेषुजायमानेषुनन श्यतिनजायते ॥ स्रष्टुर्हिरण्यगर्भस्यकार्यस्यात्राभिमानिनः ॥ ६ ॥ तदुत्पत्तिविनाशाभ्यांयुक्तेस्तोनाशजन्मनी ॥ अधिष्ठानस्यसत्यस्याव्य क्तस्याकृत्रिमस्यच ॥ ७ ॥ परमेश्वरस्यविष्णोर्नास्तिजन्मादिविक्रिया ॥ ८ ॥ २० ॥

योभावइहचाव्यक्तइत्यक्षरइतीरितः ॥ तमुत्पत्तिविनाशाभ्यांशून्यमानंदमव्ययम् ॥ १ ॥ पुरुषार्थस्यविश्रांतिंसंप्राहुःपरमांगतिम् ॥ श्रुतयः स्मृतयश्चैवपुरुषान्नपरंत्विति ॥ २ ॥ यंभावंप्राप्यभूयोनोनिवर्ततेऽत्रजन्मने ॥ तत्स्वरूपंपरंविष्णोर्ममसर्वोत्तमोत्तमम् ॥ ३ ॥ अतोऽहमेव वेदांतगम्योऽस्मिपरमागतिः ॥ ४ ॥ २१ ॥ तत्प्राप्तौसाधनंमुख्यंममभक्तिरितीर्यते ॥ सर्वोत्कृष्टःसपुरुषःपरमात्माहमेवच ॥ १ ॥ प्रेमलक्षणयाभक्त्याज्ञानलक्षणयैववा ॥ लभ्योऽस्मिनान्यथाकर्मकोटिभिःसंचितैरपि ॥ २ ॥ वक्तव्यःसचकोऽस्तीत्याकांक्षायामाहमापतिः ॥ य

अव्यक्तोऽक्षरइत्युक्तस्तमाहुःपरमांगतिम् ॥ यंप्राप्यननिवर्ततेतद्धामपरमंमम ॥ २१ ॥ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया ॥ यस्यांतःस्थानिभूतानियेनसर्वमिदंततम् ॥ २२ ॥ यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः ॥ प्रयातायांतितंकालंवक्ष्यामिभरतर्षभ ॥ २३ ॥

स्याधिष्ठानभूतस्यांतर्वर्तीन्यखिलान्यपि ॥ ३ ॥ भूतानिकल्पितान्येवयेनविश्वमिदंततम् ॥ आकाशेनेवकुंभादिसोऽहमेवमहेश्वरः ॥ ४ ॥ २२ ॥ प्रणवेब्रह्मबुद्धीनांप्रकृतानांचयोगिनाम् ॥ तेषांकालांतरेमुक्तिभाजांब्रह्मास्तयेऽधुना ॥ १ ॥ वक्तव्यउत्तरोमार्गोयत्रेत्यादिगिरास्फुटम् ॥ उत्तरस्तुतयेचात्रपितृयानप्रदर्शनम् ॥ २ ॥ यस्मिन्मार्गेमृतायांतियोगिनोह्यपुनर्भवम् ॥ यस्मिन्यांतिपुनर्जन्मकर्मिणस्तमहंब्रुवे ॥ ३ ॥ २३ ॥

यएवंस्वेच्छयादेहंत्यक्तुंशक्नोतिनोजनः ॥ किंतुकर्मक्षयेणैवदेहंपरवशश्चसन् ॥ १ ॥ रोगादिभिस्त्यजत्यस्याकिंस्यादित्युच्यतेशृणु ॥ म
दन्यविषयेचेतोनास्तियस्यसएकधीः ॥ २ ॥ योमांनिरंतरंयावज्जीवंस्मरतितस्यच ॥ स्वेच्छयात्यजतोदेहंपराधीनतयाथवा ॥ ३ ॥ समा
हितधियोनित्यंयोगिनोमत्परस्यसः ॥ अनायासेनलभ्योऽस्मियोऽन्येषामतिदुर्लभः ॥ ४ ॥ हेपार्थातिसुखेनैवलभ्यस्तेऽहंभयंत्यज ॥ ५ ॥
॥ १४ ॥ यस्मादेवंततोनित्यंसमाहितमनामयि ॥ अनन्यधीःस्यादामृत्योर्मुमुक्षुर्मत्परायणः ॥ १ ॥ मद्भावंवैष्णवंतत्त्वंप्राप्यधीरामुमुक्षवः ॥
नाप्नुवंतिपुनर्देहसंबंधंदुःखमंदिरम् ॥ २ ॥ गर्भवासभगद्वारनिर्गमादिश्रमाकरम् ॥ दृष्टनष्टभ्रमागारंजन्मदुःखालयंततः ॥ ३ ॥ शुद्धसत्वा

अनन्यचेताःसततंयोमास्मरतिनित्यशः ॥ तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगिनः ॥ १४ ॥
मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतम् ॥ नाप्नुवंतिमहात्मानःसंसिद्धिंपरमांगताः ॥ १५ ॥
आब्रह्मभुवनाल्लोकाःपुनरावर्तिनोऽर्जुन ॥ मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते ॥ १६ ॥

महात्मानोजातसम्यग्धियोबुधाः ॥ सर्वोत्कृष्टांविमोक्षाख्यांसंसिद्धिंतेसमागताः ॥ ४ ॥ १५ ॥ भगवंतंगतानांचसम्यग्ज्ञानवतांनृणाम् ॥
मुक्तिस्तद्विमुखानांतुपुनरावृत्तिरुच्यते ॥ १ ॥ ब्रह्मलोकेनसहितालोकायेभोगभूमयः ॥ असम्यग्दर्शिनांसंतिपुनरावर्तिनोऽखिलाः ॥ २ ॥
कर्मभिर्निर्मितानांहिस्थायित्वंनास्तिकर्हिचित् ॥ कर्मभिर्निर्मिताःस्युर्ब्रह्मलोकादयोऽखिलाः ॥३॥ मामनंतपदंप्राप्यपुनरावृत्तिवर्जितम् ॥
नविद्यतेपुनर्जन्मपुनरावृत्तिलक्षणम् ॥ ४ ॥ १६ ॥

पुनःश्रद्धाविवृद्ध्यर्थंयोगंस्तौतिरमापतिः ॥ वेदोक्तव्रतसंदोहैरधीतेष्वागमेषुच ॥ १ ॥ सांगोपांगेषुयज्ञेषुश्रद्धयानुष्ठितेषुच ॥ शास्त्रोक्तेषुसुतप्तेषु तपस्स्वैकाग्र्ययाधिया ॥ २ ॥ देशेकालेचपात्रेचतुलापुरुषकादिषु ॥ सम्यग्दत्तेषुयत्पुण्यंफलंस्वर्गादिकंस्मृतम् ॥ ३ ॥ श्रुतौस्मृतौपुराणे वातत्सर्वमतिगच्छति ॥ योगीसम्यगिदंसप्तप्रश्नद्वारेणकीर्तितम् ॥ ४ ॥ ज्ञात्वासम्यगनुष्ठानपर्यंतमवधार्यच ॥ ध्याननिष्ठोह्यनुष्ठायप्रकृष्टंवै

वेदेषुयज्ञेषुतपःसुचैवदानेषुयत्पुण्यफलंप्रदिष्टम् ॥ अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्थान मुपैतिचाद्यम् ॥ २८ ॥ इतिश्रीमद्भगवद्गीता॰योगशास्त्रे॰महापुरुषयोगोनामाष्टमोऽध्यायः ॥ ८ ॥

ष्णवंपदम् ॥ ५ ॥ सर्वाधिष्ठानमानंदंसुखेनप्रतिपद्यते ॥ ध्येयत्वेनात्रव्याख्यातस्तत्पदार्थोयथातथम् ॥ ६ ॥ २८ ॥ योवेदांतेऽक्षरात्मावहुसुकृ तवतांध्येयआनंदकंदःप्रेम्णालभ्योयआराच्चरमचरमिदंकल्पितंयत्रधाम्नि ॥ यंप्राप्यावृत्तिशून्योनिवसतिपरमेस्वेमहिम्न्यात्मनिष्ठस्तंश्रीकृष्णंमु कुंदंस्मितमधुरमुखंसर्वदासंश्रयेऽहम् ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ ब्रह्मध्यानप्रधानोऽयमष्टमःपूर्णतांगतः ॥ १४९ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ २४३६ ॥

अग्निर्ज्योतिरितीहार्चिरुक्ताकालाभिमानिनी ॥ देवतायदिवातेद्वेदेवतेश्रुतिसंमते ॥ १ ॥ तथाहर्देवतातद्वच्छुक्लपक्षाभिमानिनी ॥ उत्तरा
यणषण्मासाभिमानिन्येवदेवता ॥ २ ॥ अग्न्याद्यादेवताःसर्वायोगिनःकालतोमृतान् ॥ प्रापयंतिपरंब्रह्ममार्गभूताःक्रमेणताः ॥ ३ ॥ त
स्मिन्मार्गेमृतायांतिब्रह्मोपासनतत्पराः ॥ क्रमेणनिर्गुणंब्रह्मयत्रगत्वानशोच्यते ॥ ४ ॥ सम्यग्दर्शननिष्ठानांनैवस्यातामुभेगती ॥ सद्यःप्राण
परित्यागान्मोक्षभाजांमहात्मनाम् ॥ ५ ॥ २४ ॥ तथाधूमादिशब्दैश्चलक्ष्यंतेदेवतायतः ॥ मार्गभूतामृतांस्तांस्तान्प्रापयंतिचकर्मिणः ॥ १ ॥
तस्मिन्मार्गेमृतायांतिफलंचांद्रमसंजनाः ॥ कर्मिणःकर्मसंसिद्धिंप्राप्यभुक्त्वापतंत्यधः ॥ २ ॥ पितृदेवैकभोग्यत्वंयस्माच्चंद्रमसस्ततः ॥ लोकं

अग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणम् ॥ तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः ॥ २४ ॥
धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनम् ॥ तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्तते ॥ २५ ॥
शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते ॥ एकयायात्यनावृत्तिमन्ययावर्ततेपुनः ॥ २६ ॥ नैते
सृतीपार्थजानन्योगीमुह्यतिकश्चन ॥ तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन ॥ २७ ॥

चांद्रमसंगत्वाकर्मिणोऽधःपतंत्यमी ॥ ३ ॥ २५ ॥ अर्चिरादिगतिःशुक्लाधीप्रकाशमयत्वतः ॥ धूमादिकगतिःकृष्णाज्ञानहीनतयातमः ॥ १ ॥
शास्त्रज्ञस्यापिसर्वस्यविद्याकर्माधिकारिणः ॥ एतेगतीप्रसिद्धेद्वेअनादिजगतोमते ॥ २ ॥ संसारस्याप्यनादित्वादनादित्वंतयोर्मतम् ॥
शुक्लयायात्यनावृत्तिंकृष्णयावर्ततेपुनः ॥ ३ ॥ २६ ॥ तत्रैकाक्रममोक्षायसंसारायापरास्मृता ॥ इत्येवंध्याननिष्ठोहिनिश्चिन्वन्नैवमुह्यति
॥ १ ॥ योगस्याप्युनरावृत्तिफलत्वादेवसर्वदा ॥ निरंतरंसमाधानंचित्तंकुरुविमुक्तये ॥ २ ॥ २७ ॥

पुनस्तदाभिमुख्यायतज्ज्ञानंस्तौतिमाधवः ॥ राजाहिसर्वविद्यानांसर्वाविद्याविनाशकम् ॥ १ ॥ दीप्यतेऽतिशयेनेयंब्रह्मविद्यायतस्ततः ॥ र
हस्यानांसमस्तानांराजागुह्यशिरोमणिः ॥ २ ॥ अनंतजन्मसद्धर्मैःसाध्यत्वेनातिदुर्लभम् ॥ कोटिजन्मार्जितानेककोटीनांपापकर्मणाम् ॥ ३ ॥
तद्धेतोरप्यविद्यायाःसद्यश्छेदकभावतः ॥ पावनंपावनानांचसर्वेषामिदमुत्तमम् ॥ ४ ॥ नातींद्रियेधर्मइवकस्याप्यत्रास्तिसंशयः ॥ स्वरूपात्फ
लतश्चास्यप्रत्यक्षत्वादितीर्यते ॥ ५ ॥ मानंप्रत्यक्षमेवास्मिन्साक्षिप्रत्यक्षतायतः ॥ प्रत्यक्षोऽवगमोऽस्येतिसाक्षिप्रत्यक्षताफलात् ॥ ६ ॥ मानंक
रणव्युत्पत्त्याकर्मव्युत्पत्तितःफलम् ॥ अर्थोऽवगमशब्दस्याभिप्रेतःश्रीरमापतेः ॥ ७ ॥ मयेदंविदितंतस्मान्नष्टमत्रममाधुना ॥ अज्ञानमितिसर्व

राजविद्याराजगुह्यंपवित्रमिदमुत्तमम् ॥ प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययम् ॥ २ ॥
अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप ॥ अप्राप्यमांनिवर्तंतेमृत्युसंसारवर्त्मनि ॥ ३ ॥

त्रसाक्षिप्रत्यक्षइष्यते ॥ ८ ॥ कोटिजन्मार्जितैःपुण्यैःप्राप्यत्वाद्धर्म्यमुच्यते ॥ गुरूपदिष्टमार्गेणकर्तुशक्यंसुखेनतत् ॥ ९ ॥ अनायासेनसाध्यंस
दक्षय्यंफलतोमहत् ॥ सर्वोत्कृष्टतयाज्ञानंश्रद्धेयंसर्वथाततः ॥ १० ॥ २ ॥ आत्मज्ञानाख्यधर्मस्यस्वरूपेसाधनेफले ॥ नास्तिकाअप्रमाखादिशं
कयापापकारिणः ॥ १ ॥ आसुरींसंपदंरूढावेदमानविरोधिनः ॥ मत्प्राप्तिसाधनंभेदभक्तिमप्यनवाप्यच ॥ २ ॥ तेमांभूमानमप्राप्यसंसारे
मृत्युसंयुते ॥ नारकीयातनादौचभ्रमंत्याकल्पमासुराः ॥ ३ ॥ अतस्तेमनुजाकारावानरागर्दभाश्चवा ॥ उपेक्ष्याःसर्वथासद्भिरितिहा
र्दंरमापतेः ॥ ४ ॥ ३ ॥

स्तुत्यादिनामहीकृत्यज्ञानंव्याख्यातुमीश्वरः ॥ सम्यगारभतेवेदसिद्धांतंचाद्भुतोपमम् ॥ १ ॥ भूतभौतिकतद्धेतुरूपंदृश्यमिदंजगत् ॥ मया धिष्ठानरूपेणव्याप्तंसच्चिन्मयात्मना ॥ २ ॥ कथंव्याप्तंमयासर्वंपरिच्छिन्नेनहीतिचेत् ॥ मैवंसर्वेंद्रियातीतस्वप्रकाशैकमूर्तिना ॥ ३ ॥ मया व्याप्तमिदंसर्वमपरिच्छिन्नदेहिना ॥ संतीवांतःस्फुरंतीवमद्रूपेणस्थितानिभोः ॥ ४ ॥ मत्स्थानिसर्वभूतानिजंगमानिस्थिराणिच ॥ तेष्वध्य स्तेषुभूतेषुनैवाहंसमवस्थितः ॥ ५ ॥ ब्रह्मादिसर्वभूतानिस्वात्मवंत्यात्मनामया ॥ स्थितानिमय्यधिष्ठानेसत्तास्फूर्तिप्रदेहरौ ॥ ६ ॥ आका शादपिसूक्ष्मत्वादसंसर्गितयाऽकलः ॥ आधेयत्वेनभूतेषुनचाहंतेष्ववस्थितः ॥ ७ ॥ नाध्यस्तगुणदोषाभ्यांलेपोऽधिष्ठानगोऽप्यणुः ॥ रज्जुखं डेतदज्ञानाध्यस्तैःसर्पादिभिर्यथा ॥ ८ ॥ इहभगवतिशुद्धेमायिकंविश्वमेतत्प्रभवतिनहिजातुस्पृष्टमीषद्विभूम्नि ॥ क्वचिदपिगगनेनोनीलि

मयाततमिदंसर्वंजगदव्यक्तमूर्तिना ॥ मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः ॥ ४ ॥
नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरम् ॥ भूतभृन्नचभूतस्थोममात्माभूतभावनः ॥ ५ ॥

मास्पर्शगंधोगुणइवभुजगाद्यारोपितंचापितत्र ॥ ९ ॥ ४ ॥ मय्यध्यस्तानिभूतानिनसंतिमयिवस्तुतः ॥ दिविष्ठेऽर्केयथाध्यस्तंजलकंपा दिकंनहि ॥ १ ॥ हित्वात्वंप्राकृतींबुद्धिंप्रभावंमेविलोकय ॥ आधेयोऽहंनकस्यापिनाधारःकस्यचित्तथा ॥ २ ॥ तथाप्यहंसमस्तेषुसमस्ता निमयीतिच ॥ भूतानीहास्मिमायेयंमहतीत्यैश्वरंमम ॥ ३ ॥ यतोभूतानिसर्वाणिसर्वोपादानभावतः ॥ बिभर्तिधारयत्येषपोषयतीतिभूत भृत् ॥ ४ ॥ उत्पादयतिभूतानिकर्तृत्वाद्भूतभावनः ॥ ममात्माभिन्नहेतूपादानभूतोऽपिवस्तुतः ॥ ५ ॥ चिदानंदघनोऽसंगस्वरूपत्वान्नभूत गः ॥ वस्तुतोभूतसंबंधीनास्त्येवात्माममेतिच ॥ ६ ॥ राहोःशिरइतीवात्रषष्ठीकल्पनयेरिता ॥ भगवाँल्लोकदृष्ट्यावारोप्यात्राहंकृतिंतनौ ॥ ७ ॥ ममात्मेत्याहभगवद्भाष्यकारैरितीरितम् ॥ ८ ॥ ५ ॥

आधाराधेयभावंश्रीभगवानाहसर्वगः ॥ दृष्टांतेनप्रबोधार्थमत्यसंश्लिष्टयोरपि ॥ १ ॥ यथासंगस्वभावेऽपिव्योम्निवायुःस्थितःसदा ॥ सदा चलस्वभावोऽपिमहांश्चपरिमाणतः ॥ २ ॥ ईदृशोऽपिनवैव्योम्नासहसंसृज्यतेकदा ॥ तथैवासंगचिद्रूपस्वभावेमयिसर्वगे ॥ ३ ॥ संश्लेषमं तरेणैवसर्वगानिमहांत्यपि ॥ आकाशादीनिभूतानिस्थितानीत्यवधारय ॥ ४ ॥ गगनकुसुमसाम्यंविश्वमध्यस्तमीशेव्रजतिविविधयुक्त्याव्र

यथाकाशस्थितोनित्यंवायुःसर्वत्रगोमहान् ॥ तथासर्वाणिभूतानिमत्स्थानीत्युपधारय ॥ ६ ॥
सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकाम् ॥ कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहम् ॥ ७ ॥

ह्यभिन्नंसमस्तम् ॥ किरणजलमसत्यंरज्जुसर्पोयथास्याद्भगवतिपरमात्मन्यद्वितीयेतथेदम् ॥ ५ ॥ ६ ॥ एवंसृष्टौस्थितौसंगाभावमुक्त्वाऽखिलै र्जडैः ॥ असंगत्वमथेदानींप्रलयेप्राहचात्मनः ॥ १ ॥ लयेसर्वाणिभूतानिमच्छक्तित्वेनकल्पिताम् ॥ प्रकृतिंयांतिमायाख्यांलीयंतेतत्रवैयतः ॥ २ ॥ सर्गकालेविभागेनपुनस्तानिव्यनज्म्यहम् ॥ सर्वज्ञःसर्वशक्तिश्चाविभागत्वंगतान्यपि ॥ ३ ॥ ७ ॥

श्रीगणेशायनमः ॥ अथनवमाध्यायव्याख्याप्रारंभः ॥ परब्रह्मानंदेसकलसुरवंद्येस्वरसतःक्षतद्वंद्वेमंदाकृतिदनुजकंदांकुरहरे ॥ श्रियःकंदेनंदात्मजउदितचंद्रस्मितमुखेमुकुंदेस्पंदोमेभवतुमनसोद्वंद्वविरतेः ॥ १ ॥ पूर्वाध्यायेहिमूर्धन्यनाडीद्वारेणयोगिनः ॥ अक्षरात्मनिगोविंदेध्याननिष्ठांगतस्यवै ॥ २ ॥ योगेनस्वेच्छयोत्क्रांतप्राणस्यार्चिर्मुखाध्वना ॥ ब्रह्मलोकंप्रयातस्यतत्रबोधोदयेनच ॥ ३ ॥ कल्पांतेब्रह्मसंप्राप्तिर्व्याख्याताक्रममुक्तता ॥ तत्रानेनप्रकारेणमुक्तिःस्यान्नान्यथात्विति ॥ ४ ॥ शंकायांहरिणाप्रोक्तासाक्षान्मुक्तिःस्ववेदिनः ॥ अनन्यचेताःसततंयोमांस्मरतिनित्यशः ॥ ५ ॥ तस्याहंसुलभस्स्यांभगवत्तत्त्वबोधतः ॥ अनन्याभक्तिरेवास्तिमुख्याहेतुःपरागतेः ॥ ६ ॥ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया ॥ इत्यसाधारणोहेतुरुक्तानन्यरतिर्हरौ ॥ ७ ॥ अतःसाभक्तिरधुनाभगवत्तत्त्वधीयुता ॥ वर्ण्यतेनवमेऽध्यायेतस्यामा

श्रीभगवानुवाच ॥ इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसूयवे ॥ ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥१॥

हात्म्यमेवच ॥ ८ ॥ अष्टमेध्येयरूपस्यब्रह्मणःसन्निरूपणात् ॥ गतिस्तद्ध्याननिष्ठस्यक्रममुक्तिरुदाहृता ॥ ९ ॥ नवमेज्ञाननिष्ठस्यज्ञेयब्रह्मनिरूपणात् ॥ उच्यतेगतिरित्येवंतत्स्तुत्यर्थमिहादरात् ॥ १० ॥ श्लोकत्रयमुवाचेशोभगवान्हरिरव्ययः ॥ इदंप्राग्बहुधाप्रोक्तंवक्ष्यमाणमिहाधुना ॥ ११ ॥ शब्दप्रमाणकंज्ञानंब्रह्मतत्त्वैकगोचरम् ॥ तुनोक्तध्यानतोज्ञानेवैलक्षण्यमिहोच्यते ॥ १२ ॥ सम्यग्ज्ञानमिदंसाक्षान्मोक्षसंप्राप्तिसाधनम् ॥ गोपनीयतमंचातिरहस्यत्वेनसंमतम् ॥ १३ ॥ ब्रह्मानुभवपर्यंतंतुभ्यंगुह्यमपीदृशम् ॥ अहंशिष्यगुणाधिक्यात्प्रवक्ष्याम्यनसूयवे ॥ १४ ॥ स्वैश्वर्यख्यापनेनायंसदात्मानंप्रशंसति ॥ मदग्रेइत्यसूयातच्छून्यायार्जवशालिने ॥ १५ ॥ यत्प्राप्यमोक्ष्यसेसद्योऽशुभात्संसारबंधनात् ॥ १६ ॥ १ ॥

भूतग्रामंसृजामीतितथोदासीनवत्स्थितिः ॥ इत्यन्योन्यविरुद्धंस्यादित्याशंक्याहमाधवः ॥ १ ॥ मयादृङ्मात्ररूपेणाध्यक्षेणाविक्रियात्मना ॥ नियंत्राप्रकृतिर्मायाभासकेनावभासिता ॥ २ ॥ सत्वादिभिरनिर्वाच्योयादयत्यखिलंजगत् ॥ मायाविनाश्रितामायायथाध्यस्तं गजादिकम् ॥ ३ ॥ सृजत्यहंतथाध्यस्तंसृजामीदंचराचरम् ॥ नत्वहंसर्वकार्यात्मामायाभासनमंतरा ॥ ४ ॥ व्यापारांतरमप्यत्रविदधेविक्रियातिगः ॥ अनेनाध्यक्षभावेननिमित्तेनचराचरम् ॥ ५ ॥ जननादिविनाशांतंविकारमनुयात्यदः ॥ अतोऽहंभासकत्वाख्यव्यापारेणसृजामितत् ॥ ६ ॥ तावतास्वर्यवन्नास्तिकर्तृत्वंममसर्वथा ॥ उदासीनवदासीनमित्युक्तेर्नविरुद्धता ॥ ७ ॥ अस्यद्वैतेंद्रजालस्यदुपादानकारणम् ॥ अज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यते ॥ ८ ॥ अपूर्वानपरंब्रह्मतस्यकार्येनकारणम् ॥ अधिष्ठानत्वमात्रेणकारणंब्रह्मगीयते ॥ ९ ॥ इत्युक्तेर

मयाध्यक्षेणप्रकृतिःसूयतेसचराचरम् ॥ हेतुनाऽनेनकौंतेयजगद्विपरिवर्तते ॥ १० ॥
अवजानंतिमांमूढामानुषींतनुमाश्रितम् ॥ परंभावमजानंतोममभूतमहेश्वरम् ॥ ११ ॥

पिहेतुत्वंमाययानतुवस्तुतः ॥ प्रवृत्तिःसर्वजगतश्चिदधीनासदैवहि ॥ १० ॥ अतस्तदुभयंनैवविरुद्धंस्यात्परस्परम् ॥ ११ ॥ १० ॥ एवंनित्यविशुद्धंमामानंदघनमद्वयम् ॥ नित्यमुक्तस्वभावंतमात्मानंसर्वदेहिनाम् ॥ १ ॥ परमेश्वरोऽयंसाक्षादित्येवंदृढनिश्चयात् ॥ नाद्रियंतेऽथवामूढानिंदंत्येवाविवेकिनः ॥ २ ॥ तेषांस्खचयतीशोऽपिह्यवज्ञाकारणंभ्रमम् ॥ मनुष्यत्वेनतद्बुद्ध्याभासमानोनिजेच्छया ॥ ३ ॥ मूर्तिंगृहीतवंतंमांस्वभक्तानुग्रहायच ॥ तथाव्यवहरंतंचनृनाटकतयाद्भुतम् ॥ ४ ॥ मनुष्योऽयमितिभ्रांत्यावृतांतःकरणाःशठाः ॥ प्रकृष्टंवास्तवंतत्त्वमजानंतोममेशितुः ॥ ५ ॥ ब्रह्मादिसर्वभूतानांमहांतंपरमेश्वरम् ॥ इत्थंमांनाद्रियंतेवानिंदंत्येवाविवेकिनः ॥ ६ ॥ तस्यानुरूपमेवास्तिमूढत्वस्येतिचध्वनिः ॥ ७ ॥ ११ ॥

किंनिमित्तेश्वरस्येयंसृष्टिर्नोभोगसिद्धये ॥ साक्षिचिन्मात्ररूपत्वाद्भोक्तृत्वंनास्तितस्यवै ॥ १ ॥ अतएवनमोक्षार्थाबंधाभावतयेशितुः ॥ नवाप्यन्योऽस्तिभोक्ताऽत्रतदन्यन्नास्तिचेतनम् ॥ २ ॥ जीवरूपेणतस्यैवसर्वत्रस्थितभावतः ॥ अचितोनास्तिभोक्तृत्वमित्याद्यनुपपत्तितः ॥ ३ ॥ सृष्टेर्मायामयत्वंयेसाधयंतोऽत्रवादिनः ॥ प्रतिकूलानचास्माकंनिराकार्यानतेकिल ॥ ४ ॥ इत्यभिप्रेत्यमिथ्यात्वंजगतोमायिकस्यच ॥ वक्तुमारभतेश्रीशस्त्रिभिःश्लोकैरुदारगीः ॥ ५ ॥ प्रकृतिंस्वामनिर्वाच्यांमायांस्वस्मिन्प्रकल्पिताम् ॥ स्वसत्तास्फूर्तिदानेनदृढीकृत्याहमीश्वरः ॥ ६ ॥ मायायाःप्रकृतेस्तस्याःप्रभावादखिलंजगत् ॥ स्वाविद्यादिपराधीनंप्रमाणैःसन्निधापितम् ॥ ७ ॥ भूतभौतिकसंघंचमायावीवपुनःपुनः ॥ विविधंस्वप्नदृग्वच्चसंकल्पेनसृजाम्यहम् ॥ ८ ॥ गगनपवनतेजोवारिमह्योविवर्ताभगवतइतिसिद्धंसर्ववेदांतजाले ॥ नहित्रणमपिवि

प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः ॥ भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात् ॥ ८ ॥
नचमांतानिकर्माणिनिबध्नंतिधनंजय ॥ उदासीनवदासीनमसक्तंतेषुकर्मसु ॥ ९ ॥

ष्णोर्भिन्नसत्तांलभेतविधिशतमपितद्वन्नैवविष्णोर्विभिन्नम् ॥ ९ ॥ ८ ॥ भूतवर्गमिमंकृत्स्नंतारतम्यान्वितंसृजन् ॥ नतत्कर्तृत्वसंबंधंभजामीत्याहमापतिः ॥ १ ॥ सृष्टिस्थितिलयाख्यानिक्रियमाणानिमायया ॥ मायाविनेवकर्माणितानिस्वप्नदृशेवच ॥ २ ॥ निग्रहानुग्रहाभ्यांवाननिबध्नंतिमांहरिम् ॥ मिथ्यात्वान्नैवकुर्वंतिपुण्यपापादिभागिनम् ॥ ३ ॥ उपेक्षकोयथाकश्चिद्वयोर्विवदमानयोः ॥ जयाजयाद्यसंसर्गीतत्रास्तेनिर्विकारधीः ॥ ४ ॥ निर्विकारतयातद्वदासीनंनिरहंकृतिम् ॥ तेषुकर्मसुतस्मान्मांननिबध्नंतितानिवै ॥ ५ ॥ अन्यस्यापिफलासगाभावोनिरभिमानिता ॥ सर्वकर्मस्वबंधस्यकारणंहरिणेरितम् ॥ ६ ॥ ९ ॥

तेचकेनप्रकारेणभजंतीत्युच्यतेऽधुना ॥ उपसृत्यगुरुंब्रह्मनिष्ठंवेदांतसद्विराम् ॥ १ ॥ विचारेणतथोंकारजपोपनिषदीरणैः ॥ वेदांतप्रतिपाद्यं मांकीर्तयंतोऽद्वयंसदा ॥ २ ॥ वेदांतश्रवणेनैतेनिश्चिन्वंतोहिमेतिदिक् ॥ यतंतोमननंनित्यंसत्तर्कैःश्रुतमादरात् ॥ ३ ॥ कुर्वंतःसंयुताःशांति दांतिक्षांत्यादिसाधनैः ॥ चालयितुमशक्यान्यहिंसासत्यमुखानिच ॥ ४ ॥ व्रतानिप्रतिपक्षैश्चयेषांतेदृढसंयमाः ॥ कायेनमनसावाचानम स्कुर्वंतआदरात् ॥ ५ ॥ मांसदावासुदेवंश्रीभगवंतंकृपानिधिम् ॥ इष्टदैवतरूपेणगुरुरूपेणचस्थितम् ॥ ६ ॥ भक्त्यामद्विषयेणातिप्रेम्णायु क्ताःसदैवमाम् ॥ उपासतेसजातीयप्रत्ययेननिरंतरम् ॥ ७ ॥ विजातीयंतिरस्कृत्यनिदिध्यासनतत्पराः ॥ इतिसाधनपौष्कल्येसतिवेदांतवा

सततंकीर्तयंतोमांयतंतश्चदृढव्रताः ॥ नमस्यंतश्चमांभक्त्यानित्ययुक्ताउपासते ॥ १४ ॥
ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते ॥ एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखम् ॥ १५ ॥

क्यजम् ॥ ८ ॥ ब्रह्मैक्यगोचरंज्ञानंसाक्षात्काराख्यंफलम् ॥ भवत्येवततःसद्योमुक्तिरित्याशयोहरेः ॥ ९ ॥ १४ ॥ भगवद्गोचरंज्ञानंप्रमारूपं प्रदर्श्यच ॥ तत्राक्षमधियांब्रह्मोपासनाबहुधोच्यते ॥ १ ॥ ज्ञानयज्ञेनवेदोक्ताहंग्रहोपासनेनच ॥ त्वंवाहमस्मिभगवोंदेवतेऽहमितीरिते ॥ २ ॥ ज्ञानंतदेवगोविंदयजनंतेनतत्पराः ॥ उपास्योपासकाभेदाचतारूपेणनिःस्पृहाः ॥ ३ ॥ मामेवभद्व्यावृत्त्याचिंतयंत्युत्तमाजनाः ॥ अन्येभेदेन वेदोक्तादित्योब्रह्मेतितत्पराः ॥ ४ ॥ प्रतीकोपासनेनैतेमध्यमामामुपासते ॥ उभयत्राक्षमाकांचिदुपासीनाश्चदेवताम् ॥ ५ ॥ अन्येकर्माणिकु र्वाणाःप्रकारैर्बहुभिःसदा ॥ मामेवोपासतेविश्वरूपंसर्वगतंहरिम् ॥ ६ ॥ १५ ॥

बहुधोपासतेतेचेत्कथंत्वामेवतत्पराः ॥ सेवंतइत्यपेक्षायांप्राहस्वस्याखिलात्मताम् ॥ १ ॥ श्रौतोऽध्वरोऽग्निष्टोमादिःक्रतुःस्मार्तस्तुयज्ञकः ॥
प्रसिद्धोवैश्वदेवादिर्महायज्ञतयास्मृतौ ॥ २ ॥ पितृभ्योदीयमानंचयदन्नंतत्स्वधेरितम् ॥ प्राणिभिर्भुज्यमानंवाभेषजंवौषधंस्मृतम् ॥ ३ ॥
याज्यापुरोनुवाक्यादिमंत्रोयेनाध्वरेहविः ॥ देवेभ्योदीयतेऽथाज्यंघृतंसर्वोपलक्षणम् ॥ ४ ॥ अग्निराहवनीयादिर्हविःप्रक्षेपणाश्रयः ॥ हुतं
हवनमित्येतत्सर्वंविष्णुरहंहरिः ॥ ५ ॥ एतदेकैकविज्ञानमपिविष्णोरुपासनम् ॥ क्रियाकारकमुख्यंयत्सर्वंनास्तिहरेःपृथक् ॥ ६ ॥ १६ ॥
सर्वस्यप्राणिजातस्यपिताऽस्यजगतोऽस्म्यहम् ॥ जनयित्रीतथाकर्मफलदातापितामहः ॥ १ ॥ वेदितव्यंपवित्रंचशुद्धिहेतुरहंहरिः ॥ ज्ञानसा

अहंक्रतुरहंयज्ञःस्वधाहमहमौषधम् ॥ मंत्रोऽहमहमेवाज्यमहमग्निरहंहुतम् ॥ १६ ॥ पिता
हमस्यजगतोमाताधातापितामहः ॥ वेद्यंपवित्रमोंकारऋक्सामयजुरेवच ॥ १७ ॥ गति
र्भर्ताप्रभुःसाक्षीनिवासःशरणंसुहृत् ॥ प्रभवःप्रलयःस्थानंनिधानंबीजमव्ययम् ॥ १८ ॥

धनमोंकारोनियताक्षरपादऋक् ॥ २ ॥ सामगीतिविशिष्टासायज्ञुर्ह्यनियताक्षरम् ॥ एतत्त्रिविधमत्रोक्तंश्रौतकर्मोपयोगिच ॥ ३ ॥ अथर्वा
गिरसोऽप्यत्रचाद्रियंतेऽहमस्मिते ॥ ४ ॥ १७ ॥ गतिःकर्मफलंभर्तापोष्टाशोभनसाधनैः ॥ प्रभुःस्वामीमदीयोऽयमितिस्वीकारसंमुखः ॥ १ ॥
साक्षीशुभाशुभद्रष्टासर्वेषांप्राणिनांसदा ॥ भोगस्थानंनिवासःस्याच्छरणंचार्तिहृत्सताम् ॥ २ ॥ सुहृत्प्रत्युपकारानपेक्षःसन्नुपकारकः ॥ उ
त्पत्तिस्थितिरंतोवात्रयःस्रष्ट्रादयोऽथवा ॥ ३ ॥ कालांतरोपभोगार्हवस्त्वाधारोनिधानकम् ॥ निधिर्वापद्मशंखादिर्बीजमुत्पत्तिकारणम् ॥ ४ ॥
अनाद्यनंतमेवाहंसर्वंमत्तःपृथङ्न च ॥ ५ ॥ १८ ॥

आदित्यःसंस्तपामीदंततस्तापवशादहम् ॥ वर्षंपूर्वरसंभूमेराकर्षाम्यर्करश्मिभिः ॥ १ ॥ कैश्चिदष्टासुमासेषुनिगृहीतंरसंपुनः ॥ कैश्चिच्चतुर्षु मासेषुवृष्ट्याभूमौक्षिपाम्यहम् ॥ २ ॥ देवानाममृतंसर्वप्राणिनांजीवनंचवा ॥ मर्त्यानांमृत्युरथवाविनाशःसर्वदेहिनाम् ॥ ३ ॥ अधिष्ठान तयायत्सदसदध्यस्तमस्तियत् ॥ एतत्सर्वमहंमत्तःपृथङ्नैवास्तिकिंचन ॥ ४ ॥ सर्वात्मानंविदित्वामांस्वाधिकारानुसारतः ॥ एवंप्रकारैर्बहु भिर्मामेवोपासतेबुधाः ॥ ५ ॥ १९ ॥ एकत्वेनपृथक्त्वेनबहुधेतित्रिधाजनाः ॥ निष्कामाःसमुपासीनाभगवंतमधोक्षजम् ॥ १ ॥ धीशु द्ध्यातत्त्वबोधाप्तिद्वारामुच्यंतएवते ॥ येसकामाःकथंचिन्नभगवंतमुपासते ॥ २ ॥ किंतुकाम्यानिकर्माण्यनुतिष्ठंतिस्वकामतः ॥ तेसत्वशु

तपाम्यहमहंवर्षंनिगृण्हाम्युत्सृजामिच ॥ अमृतंचैवमृत्युश्चसदसच्चाहमर्जुन ॥ १९ ॥ त्रैविद्यामांसोमपाः पूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते ॥ तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेवभोगान् ॥ २० ॥

द्ध्यभावेनतत्त्वज्ञानपराङ्मुखाः ॥ ३ ॥ पुनःपुनर्जरामृत्युप्रबंधेनैवसर्वदा ॥ संसारदुःखभाजःस्युरित्याहभगवान्स्वयम् ॥ ४ ॥ तिस्रोवि द्याऋगाद्याहिहौत्रादिज्ञानहेतवः ॥ संतियेषांत्रिविद्यास्तेत्रैविद्याःस्वार्थतद्धितात् ॥ ५ ॥ तिस्रोविद्याविदंतीतियाज्ञिकावाध्वरैःक्रमात् ॥ अग्निष्टोमादिभिस्तेमांवस्वाद्यात्मानमीश्वरम् ॥ ६ ॥ तथात्वेनाप्यजानंतःपूजयित्वाहिवस्तुतः ॥ अभिषुत्यहुत्वासोमंपिबंतीतिचसोम पाः ॥ ७ ॥ तेपैवध्वस्तस्वर्गाप्तिप्रतिबंधककल्मषाः ॥ स्वर्गतिंप्रार्थयंतेतेनतुधीशुद्धिमाकुलाः ॥ ८ ॥ तेस्वपुण्यफलंप्राप्यलब्ध्वास्थानंशत क्रतोः ॥ देवदेहोपभोग्यांश्चकामानश्नंतिनाकगान् ॥ ९ ॥ २० ॥

तेश्रीनारायणावज्ञानिंदनोद्भूतपातकैः ॥ विभ्रांतबुद्धयोनित्यंनिरयार्हाइतीर्यते ॥ १ ॥ फलंदास्यंतिकर्माणिविनैवेश्वरमत्रनः ॥ इत्येवंनिष्फलैवाशायेषांतेव्यर्थजीवनाः ॥ २ ॥ अतईश्वरवैमुख्याच्छ्रममात्रात्मकानिच ॥ अग्निहोत्रादिकर्माणियेषांतेव्यर्थचेष्टिताः ॥ ३ ॥ तथैवनिष्फलंयेषांज्ञानंभ्रांतंकुतर्कजम् ॥ ईशनिंदादिजैःपापैःप्रविबद्धधियोयतः ॥ ४ ॥ मदवज्ञावशात्तेचराक्षसींतामसींजनाः ॥ वृथाहिंसावृथाद्वेषप्रधानामासुरींतथा ॥ ५ ॥ शास्त्रनिंद्यकुभोगादिरागलोभादिकारिणीम् ॥ मोहिनींशास्त्रजज्ञानभ्रंशहेतुंसमाश्रिताः ॥ ६ ॥ प्रकृतिंदुःस्वभावाख्यांनिरयार्हास्ततश्चते ॥ ७ ॥ १२ ॥ फलाशाकर्मचज्ञानमैहिकामुष्मिकार्थदम् ॥ भगवद्विमुखानांस्यान्निष्फलंमूढचेतसाम् ॥ १ ॥ अ

मोघाशामोघकर्माणोमोघज्ञानाविचेतसः ॥ राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः ॥ १२ ॥
महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः ॥ भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययम्॥१३॥

तःसर्वपुमर्थेभ्योबाह्याःशोच्यास्तएवच ॥ वराकाइतिसंप्रोक्तमिदानींकेतउत्तमाः ॥ २ ॥ भगवच्छरणायेस्युःपुरुषार्थैकभागिनः ॥ अशोच्याःसंतिशिष्टास्तइत्याहभगवान्स्वयम् ॥ ३ ॥ बहुजन्मार्जितैःपुण्यैर्येषांधीःसंस्कृताभवेत् ॥ कामैरनभिभूतास्तेमहात्मानोगुणाकराः ॥ ४ ॥ अभयंसत्वसंशुद्धिरित्यादिप्रकृतिंश्रिताः ॥ अतएवनचान्यस्मिन्मनोयेषांहिगोचरे ॥ ५ ॥ तेमांसर्वजगद्धेतुमविनाशिनमीश्वरम् ॥ ज्ञात्वाचार्योपदिष्टेनसेवंतेवैदिकाध्वना ॥ ६ ॥ १३ ॥

अहंविष्णुःसमस्तानांयज्ञानामाश्रयःप्रभुः ॥ मत्स्वामिकाहियज्ञास्तेयज्ञभोक्ताहमीश्वरः ॥ १ ॥ तथातेमांनजानंतियथावच्छास्त्रगोचरम् ॥
अतस्तेतत्फलंभुक्त्वापतंत्यस्यांकुसंसृतौ ॥ २ ॥ येतुसर्वेश्वरंतत्तद्देवतास्वपिमांहरिम् ॥ प्रपश्यंतोयजंतेतेमुक्तिभाजःशनैःशनैः ॥ ३ ॥ २४ ॥
अनावृत्तिफलाभावेऽप्यन्यदैवतयाजिनाम् ॥ ध्रुवाक्षुद्रफलावाप्तिरित्येवंभगवान्वदन् ॥ १ ॥ भगवद्याजिनांतेभ्योवैलक्षण्यंव्रदत्यलम् ॥ व
सुरुद्रादयोदेवास्तत्संबंधिव्रतंहितत् ॥ २ ॥ पूजनंचास्तियेषांतेवस्वादीनवयांतिवै ॥ अग्निष्वात्तादिपितृणांयेश्राद्धादिभिरर्चकाः ॥ ३ ॥

अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच ॥ नतुमामभिजानंतितत्त्वेनातश्च्यवंतिते ॥ २४ ॥ यां तिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः ॥ भूतानियांतिभूतेज्यायांतिमद्याजिनोऽपिमाम् ॥ २५ ॥

तानेवयांतिपितृंस्तेराजसास्तत्परायणाः ॥ यक्षौरक्षौगणादीनांभूतानांपूजकाश्चतान् ॥ ४ ॥ यांत्येवंभगवद्भक्तामांविष्णुंपरमेश्वरम् ॥ स
दापूजयितुंशीलंयेषांमद्याजिनश्चते ॥ ५ ॥ येदेवतासुसर्वासुभगवद्भावदर्शिनः ॥ तेमत्परायणायांतिमामेवपरमेश्वरम् ॥ ६ ॥ अहोसमा
नेऽप्यायासेत्यक्त्वान्यांक्षुद्रदेवताम् ॥ मामेववासुदेवाख्यंभगवंतंभजंतिन ॥ ७ ॥ मदज्ञानादतीवाल्पफलभाजोभवंतिते ॥ अज्ञानांमंदभा
ग्यानामहोदुर्दैवसंभवम् ॥ ८ ॥ इत्यभिप्रायईशस्यकृपाब्धेर्जगतांगुरोः ॥ ९ ॥ २५ ॥

विस्तीर्णंस्वर्गलोकंतेभुक्त्कारंभामृतादिना ॥ स्वप्नाभेनैवभोगेनक्षीणेपुण्येसतीष्टदे ॥ १ ॥ तद्देहनाशतोभूयोदेहग्रहणसिद्धये ॥ पुनर्गर्भनिवासादियातनांकौविंशंतिच ॥ २ ॥ एवंतेवैदिकंकर्मज्योतिष्टोमादिकंपुनः ॥ कृत्वातेनपुनःस्वर्गंमर्त्यलोकंपुनश्चते ॥ ३ ॥ इत्थंगतागतं भोगकामुकास्तेनिरंतरम् ॥ लभंतेसंसृतौदुःखंलभंतेनैवनिर्वृतिम् ॥ ४ ॥ २१ ॥ इत्थंसकामतादुःखंविचार्यागमयुक्तिभिः ॥ निष्कामाःसंतउत्कृष्टामांभजंतीतिकथ्यते ॥ १ ॥ भेददृग्गोचरायेषांनास्तितेभोगनिःस्पृहाः ॥ अहमेवास्मिभगवान्वासुदेवोऽखिलात्मकः ॥ २ ॥ मत्तः किंचित्पृथङ्नास्तीत्येवंप्रत्यंचमद्वयम् ॥ ज्ञात्वात्मत्वेनमांविष्णुंचिंतयंतोनिरंतरम् ॥ ३ ॥ येजनाःशांतिदांत्यादिसंपन्नाःसर्वतोधिया ॥ पश्यंतिमदभेदेनकृतकृत्यास्तएवहि ॥ ४ ॥ अद्वैततत्त्वनिष्ठानांनिष्कामानांत्वदात्मनाम् ॥ तेषामयतमानानांयोगक्षेमौकथंस्वयम् ॥ ५ ॥ स्या

तेतंभुक्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशंति ॥ एवंत्रयीधर्ममनुप्रपन्नागतागतंकामकामा लभंते ॥ २१ ॥ अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते ॥ तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहम् ॥ २२ ॥ येऽप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः ॥ तेऽपिमामेवकौंतेययजंत्यविधिपूर्वकम् ॥ २३ ॥

तामित्यत्रभगवानाहयोगविदांगतिः ॥ आदरेणसदाध्यानेव्यापृतानांमहात्मनाम् ॥ ६ ॥ तेषामनिच्छतांयोगक्षेमंसंप्रापयाम्यहम् ॥ सर्वेषांयद्यपीशोऽयंयोगक्षेमंवहत्यपि ॥ ७ ॥ तथापियत्नमुत्पाद्यतद्द्वारावहतीश्वरः ॥ अन्येषांज्ञानिनांत्वीशोऽनुत्पाद्येच्छाकृतीस्वयम् ॥ ८ ॥ वहतीतिविशेषोऽस्तिज्ञानीत्वाप्नोतिवाक्यतः ॥ ९ ॥ २२ ॥ नन्वन्येऽपित्वमेवेशोदेवास्त्वत्तःपृथङ्नते ॥ तद्भक्ताअपिसेवंतेत्वामेवेत्यत्रकाभिदा ॥ १ ॥ येनतेसंसृतिंयांतित्वद्भक्तानेतितद्वद ॥ अन्यदेवान्यजंतेयेफलार्थंभेददर्शिनः ॥ २ ॥ आस्तिकास्तेऽपिमामेवयजंत्यज्ञानपूर्वकम् ॥ सर्वात्मत्वेनमामीशमज्ञात्वाभेदवत्तया ॥ ३ ॥ कल्पयित्वाचवस्वादीन्यजंतीत्याशयोहरेः ॥ ४ ॥ २३ ॥

भजनस्येदृशस्येशःफलमाहजगद्गुरुः ॥ एवंसिद्धेऽप्यनायासान्मद्भजनेसतीष्टदे ॥ १ ॥ इष्टानिष्टफलेयेषांतैस्त्वंकर्माख्यबंधनैः ॥ मोक्ष्यसेनतुसं
सर्गंप्राप्स्यसीशसमर्पणात् ॥ २ ॥ संन्यासोमयिगोविंदेसर्वकर्मसमर्पणम् ॥ धीशोधकतयायोगस्तेनयुक्तःसमाहितः ॥ ३ ॥ शोधितोयो
ग्यतांनीतआत्मायस्यांतरंमनः ॥ जीवन्नेवविमुक्तःसन्नज्ञानावृतिबाधनात् ॥ ४ ॥ साक्षात्कृतात्मतत्त्वःसन्मांकैवल्यपदाभिधम् ॥ पति
ऽतेस्मिन्शरीरेत्वंक्षयात्प्रारब्धकर्मणः ॥ ५ ॥ उपैष्यस्यधुनाब्रह्मरूपःसन्नेवमद्वपुः ॥ सर्वोपाधिनिवृत्त्यास्वेमहिम्न्येवप्रतिष्ठितः ॥ ६ ॥ भवि
ष्यसीतितात्पर्यंश्रीमद्भगवतोहरेः ॥ ७ ॥ २८ ॥ अनुगृण्हासिभक्तांश्चेन्नाभक्तांस्त्वंततःकथम् ॥ रागद्वेषादिवत्त्वेनसर्वेशोऽसीतिचेच्छृणु ॥ १ ॥
सर्वप्राणिष्वतुल्योऽहंसच्चिदानंदरूपतः ॥ अंतर्यामितयातद्वन्नकश्चिद्वेषगोचरः ॥ २ ॥ प्रियोवामेप्रकाशस्यसावित्रस्येवकश्चन ॥ कथंफले

शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः ॥ संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि ॥ २८ ॥
समोऽहंसर्वभूतेषुनमेद्वेष्योऽस्तिनप्रियः ॥ येभजंतितुमांभक्त्यामयितेतेषुचाप्यहम् ॥ २९ ॥

ऽस्तिवैषम्यंस्वभक्ताभक्तयोस्तदा ॥ ३ ॥ सेवंतेयेतुमांभक्त्यासर्वकर्मार्पणाख्यया ॥ चित्तशुद्ध्यात्मबोधेनतेमय्यात्मनिचिद्घने ॥ ४ ॥ स्वभा
वात्संततत्त्वैकाकारवृत्त्याऽतिशुद्धया ॥ अहमप्यतिशुद्धायांसद्धीवृत्तौनिरंतरम् ॥ ५ ॥ प्रतिबिंबतयातेषुवर्तएवस्वभावतः ॥ यथाग्निर्नापन
यतिदूरस्थानांनृणांतमः ॥ ६ ॥ शीतंवातेननद्वेष्याअग्नेःस्युर्दूरगामिनः ॥ शीतंतमोऽपनयतिसमीपमुपसर्पताम् ॥ ७ ॥ तेनतेनप्रियास्तस्य
तद्वत्कल्पतरोरपि ॥ स्वस्वकामानुसारेणविचित्रफलदायिनः ॥ ८ ॥ तथैवभक्तयभक्तिभ्यांविचित्रफलदायिनः ॥ नवैषम्यंननैर्घृण्यंभवेत्स
र्वसमस्यमे ॥ ९ ॥ २९ ॥

मद्भक्तेरेवमाहात्म्यंयत्समेऽपिमयीश्वरे ॥ आपादयतिवैषम्यंशृणुत्वंतत्समाहितः ॥ १ ॥ अतीवकुत्सिताचारोऽजामिलादिरिवाप्रियः ॥ कुत श्चिद्भाग्यवशतःसेवतेमामनन्यभाक् ॥ २ ॥ सप्रागसाधुरप्येषमंतव्यःसाधुरेवहि ॥ साधुनिश्चयवान्यस्मात्प्रवृत्तःसम्यगीश्वरे ॥ ३ ॥ ३० ॥ ससम्यङ्निश्चयादस्मान्मत्प्रसादोन्मुखोजनः ॥ सदुराचारतांहित्वातथापूर्वार्जितानघान् ॥ १ ॥ मत्सेवनमहिम्नैवशीघ्रंधर्मात्मुगांतरः ॥ भूत्वासम्यक्सदाचारःशांतिंवैतृष्ण्यनामिकाम् ॥ २ ॥ प्राप्नोतिनितरांतत्रमन्वीथानैतदद्भुतम् ॥ मद्भक्तेरीदृशंयस्मान्माहात्म्यंनिश्चितंमहत् ॥३॥ अतोविप्रतिपन्नानांत्वंपुरस्तादपिस्वयम् ॥ सावज्ञंचसगर्वंचप्रतिज्ञांकुरुसर्वथा ॥ ४ ॥ ममश्रीवासुदेवस्यभक्तोऽनन्यरतिःसदा ॥ प्राणसंकट मापन्नोदुराचारोऽपिदुर्लभम् ॥ ५ ॥ वस्तुप्रार्थयमानोऽपिमूढोऽप्यशरणोऽपिसन् ॥ नप्रणश्यतिकिंत्वेषकृतार्थोभवतिस्वयम् ॥ ६ ॥ प्रह्लादा

अपिचेत्सुदुराचारोभजतेमामनन्यभाक् ॥ साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसः ॥ ३० ॥
क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छति ॥ कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ॥ ३१ ॥
मांहिपार्थव्यपाश्रित्ययेऽपिस्युःपापयोनयः ॥ स्त्रियोवैश्यास्तथाशूद्रास्तेऽपियांतिपरांगतिम् ॥३२॥

जामिलौत्तानपादिहस्त्यादयोयथा ॥ नवासुदेवभक्तानामशुभंविद्यतेक्वचित् ॥ ७ ॥ इत्यादिशास्त्रप्रामाण्यादित्यर्थःश्रीहरेर्गिराम् ॥ ८ ॥ ॥ ३१ ॥ एवमागंतुकैर्दोषैर्दुष्टानामपिसंस्तुतेः ॥ भगवद्भक्तिमाहात्म्यान्निस्तारमभिधायच ॥ १ ॥ इदानींजातिदोषेणदुष्टानामपिकथ्यते ॥ येमांशरणमागत्यतिर्यंचोवांत्यजाजनाः ॥ २ ॥ तथास्त्रियोऽपिनिष्कृष्टावैश्याःकृष्यादितत्पराः ॥शूद्राश्चजातितोवेदाध्ययनादेरभावतः ॥ ३ ॥ मोक्षायोग्यास्तएतेऽपिसर्वेयांतिपरांगतिम् ॥ ४ ॥ यस्यांघ्रिमाश्रितवतांभवपाशहानिर्यस्यांघ्रिपद्मविमुखाजनिमृत्युभाजः ॥ यन्नामशोधक मनंतभवोन्मुखानांपापीयसामपिसमेशरणंमुकुंदः ॥ ५ ॥ ३२ ॥

ब्राह्मणायेसदाचारास्तथैवोत्तमयोनयः ॥ तथाराजर्षयःपुण्याःसूक्ष्मवस्तुविवेकिनः ॥ १ ॥ मद्भक्तायांतिमोक्षंतेकिमुवाच्यमिहास्तिभोः ॥ मद्भक्तेरीदृशोयस्मान्महिमाऽतोऽतियत्नतः ॥ २ ॥ नरदेहमिमंप्राप्यपुरुषार्थैकसाधनम् ॥ क्षणभंगुरगर्भांतर्वासदुःखादिभिर्हतम् ॥ ३ ॥ न श्यत्ययंनयावत्त्वंतावच्छीघ्रंभजस्वमाम् ॥ अनित्यत्वादनानंदरूपत्वाच्चास्यकिंचन ॥ ४ ॥ विलंबंमाकुरुत्वंभोभोगार्थंमास्पृहांकुरु ॥ दुर्लभं प्राप्यविप्रत्वंनृपत्वंवाऽथयोनरः ॥ ५ ॥ शरणंनैतिगोविंदंदुर्दैवेनैषवंचितः ॥ अतस्त्वंपार्थराजर्षिर्मामेवशरणंकुरु ॥ ६ ॥ नोचेत्तेजन्मसाफ ल्यंकथमित्याशयोहरेः ॥ ७ ॥ ३३ ॥ भजनप्रकारंश्रीशोदर्शयन्नाहसद्वचः ॥ मनोमयीश्वरेयस्मसत्वंमद्भक्तएवसन् ॥ १ ॥ मद्याजीसततं

किंपुनर्ब्राह्मणाःपुण्याभक्तारजर्षयस्तथा ॥ अनित्यमसुखंलोकमिमंप्राप्यभजस्व मामू ॥ ३३ ॥ मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु ॥ मामेवैष्यसियुक्त्वैवमा त्मानंमत्परायणः ॥ ३४ ॥ इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो गशास्त्रेश्रीकृष्णार्जुनसंवादेराजविद्याराजगुह्ययोगोनामनवमोऽध्यायः ॥ ९ ॥

भूत्वामामेवत्वंनमस्कुरु ॥ मनोवाक्कायसद्भावैःप्रकारैरेभिरेवच ॥ २ ॥ मदेकशरणोभूत्वासमाधायमनोमयि ॥ मामेवस्वप्रकाशंत्वंसच्चिदा नंदविग्रहम् ॥ ३ ॥ सर्वोपाधिविनिर्मुक्तमभयंप्राप्स्यसिस्वयम् ॥ ४ ॥३४॥ यद्विद्याराजविद्यात्रिभुवनविसृतोयस्यभूतेःकणांशोयस्निन्यस्तांत राल्मात्यजतिजडरतिंदुःखदांभ्रांतिमूलाम् ॥ दुष्टाचारोऽपियस्यप्रथितसुयशसोभक्तिलेशेनसाधुस्तंभूमानंविशुद्धंविधिहरशरणंकृष्णमेवाश्रया मि ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ तदर्थज्ञेयताप्रोक्तिर्नवमःपूर्णतांगतः ॥ ९ ॥ २२६ ॥ आदितआरभ्यटीकाश्लो कसंख्या ॥ २६६२ ॥

अनावृत्तिफलावाप्त्यैकार्याभक्तिर्नकेवलम् ॥ श्रीहरेःकिंत्वनायासाराध्यत्वादपिसज्जनैः ॥ १ ॥ पत्रंपुष्पंफलंतोयमन्यद्वावस्तुकिंचन ॥ यदनायासलभ्यंयःकश्चनापिनृदेहभृत् ॥ २ ॥ अनंतैश्वर्यपतयेमह्यंश्रीविष्णवेसुधीः ॥ वासुदेवात्परंनास्तिकिंचनेतिमनीषया ॥ ३ ॥ प्रीत्या भृत्यवदेवासावीश्वरायार्पयत्यतः ॥ मत्स्वत्वानास्पदद्रव्याभावात्सर्वस्यवस्तुनः ॥ ४ ॥ मयार्जिततयासर्वमदीयंमेऽर्पयत्ययम् ॥ प्रीत्या प्रयच्छतस्तस्यशुद्धबुद्धेर्महात्मनः ॥ ५ ॥ पुष्पपत्रादितत्फल्गुवस्त्वहंपरमेश्वरः ॥ स्वीकृत्याशनवत्प्रीत्यातृप्यामिप्रीतिभुग्घरिः ॥ ६ ॥ यस्मात्स मर्पितंप्रीत्यामत्स्वीकारेऽस्तिकारणम् ॥ श्रीदामब्राह्मणानीततंडुलाशनवद्व्रतः ॥ ७ ॥ परितोषनिमित्तंमेभक्तिरेवनवैभवम् ॥ अतोदेवांतरं

पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति ॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ॥ २६ ॥ यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणम् ॥ २७ ॥

हित्वामामेवसततंभजेत् ॥ ८ ॥ २६ ॥ यत्करोषिस्वतःप्राप्तंयदश्नासिस्वतृप्तये ॥ श्रौतंवास्मार्तमथवायज्जुहोषिविधेर्बलात् ॥ १ ॥ अतिथिब्राह्मणादिभ्योहेमान्नाददासियत् ॥ चांद्रायणादिकंदोषशांत्यैचरसियत्तपः ॥ २ ॥ उच्छृंखलप्रवृत्तेर्वानिरासायात्मसंयमम् ॥ लौकिकंवैदिकंप्राणिस्वभावाद्वाकरोषियत् ॥ ३ ॥ मय्यर्पितंयथातत्स्यात्कुरुष्वत्वंतथासदा ॥ समर्पकगतंसर्वंसमर्पणफलंयतः ॥ ४ ॥ इत्यात्मनेपदेनात्रहरिणादर्शितंस्फुटम् ॥ अवश्यंभाविनांसर्वकर्मणांपरमेश्वरे ॥ ५ ॥ प्रीत्यासमर्पणंनित्यंभजनंमेमयेरितम् ॥ नतुक्वचित्तदर्थेऽस्तिकर्तव्याव्यापृतिःपृथक् ॥ ६ ॥ इत्येवंवासुदेवस्यश्रीहरेराशयःपरः ॥ ७ ॥ २७ ॥

सर्वलोकमहेशत्वंदर्शयत्यात्मनोहरिः ॥ अंतःकरणसामर्थ्यंसूक्ष्माद्यर्थावबोधने ॥ १ ॥ बुद्धिर्ज्ञानंतथात्मादिपदार्थेष्वत्यभिज्ञता ॥ उपस्थिते ष्वकार्येषुबोद्धव्येषुचतत्क्षणे ॥ २ ॥ अव्याकुलतयासम्यक्प्रवृत्तिर्याविवेकतः ॥ असंमोहःक्षमानिंदाताडनादौसमत्वधीः ॥ ३ ॥ प्रमाणेनावबु द्धस्यतथोक्तिःसत्यमर्थतः ॥ दमःस्यात्स्वस्वविषयेबाह्येंद्रियनिवर्तनम् ॥ ४ ॥ शमोऽतःकरणेशांतिश्चित्तस्याल्हादनंसुखम् ॥ दुःखंचित्तस्यसं तापोजन्मनाशौभवाभवौ ॥ ५ ॥ भयंत्रासोभयंतस्माद्विपरीतमुदाहृतम् ॥ ६ ॥ ४ ॥ अहिंसाप्राणिपीडायानिवृत्तिःसमतामुनेः ॥ चित्त स्यद्वेषरागादिशून्यावस्थाप्रकीर्तिता ॥ १ ॥ तुष्टिर्भोगेष्वलब्धेषुसदालंप्रत्ययोधियः ॥ तपःशास्त्रीयमार्गेणशरीरेंद्रियशोषणम् ॥ २ ॥ यथा शक्तिस्ववित्तानांदानंपात्रेसमर्पणम् ॥ यशोधर्मोद्भवाकीर्तिरकीर्तिःस्यादधर्मजा ॥ ३ ॥ एतेबुद्ध्यादयोभावाःकार्यभेदाःसहेतुकाः ॥ धर्मा

बुद्धिर्ज्ञानमसंमोहःक्षमासत्यंदमःशमः ॥ सुखंदुःखंभवोभावोभयंचाभयमेवच ॥ ४ ॥
अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः ॥ भवंतिभावाभूतानांमत्तएवपृथग्विधाः ॥ ५ ॥
महर्षयःसप्तपूर्वेचत्वारोमनवस्तथा ॥ मद्भावामानसाजातायेषांलोकइमाःप्रजाः ॥ ६ ॥

धर्मादिहेतूनांवैचित्र्येणपृथग्विधाः ॥ ४ ॥ सर्वेषांप्राणिनांमत्तोभवंतिपरमेश्वरात् ॥ तस्माल्लोकमहेशत्वंकिंवाच्यंश्रीहरेर्मम ॥ ५ ॥ ५ ॥ वेद वेदार्थद्रष्टारःसर्वज्ञायेमहर्षयः ॥ सर्गाद्यकालेसंभूताःसंप्रदायप्रवर्तकाः ॥ १ ॥ सावर्णामनवस्तद्वच्चत्वारोयेदिवाऽपरे ॥ सप्तभृग्वादयस्तेभ्यःप्रथ माःसनकादयः ॥ २ ॥ स्वायंभुवादयस्तद्वन्मनवोयेचतुर्दश ॥ मयीशेभावनायेषांमच्चिंतनपराहिते ॥ ३ ॥ मद्भावनावशादाविर्भूतमज्ज्ञानशक्त यः ॥ संकल्पादेवसंभूतानतुयोनिसमुद्भवाः ॥ ४ ॥ अतोविशुद्धजन्मत्वात्सर्वप्राणिवरामताः ॥ प्रादुर्भूताहिसर्गादौमत्तोविश्वसृगात्मनः ॥ ५ ॥ येषांसप्तमहर्षीणांमन्वनांचतथैवच ॥ चतुर्णांसनकादीनामस्मिँल्लोकेचजन्मना ॥ ६ ॥ विद्ययाचप्रजाःसर्वाब्राह्मणाद्याइमाःकिल ॥ ७ ॥ ६ ॥

एवमुक्त्काभगवतःप्रभावंसविशेषतः ॥ तज्ज्ञानफलमाहात्रभगवान्सात्वतांपतिः ॥ १ ॥ विस्तारसंज्ञिकामेतांविभूतिंपूर्वकीर्तिताम् ॥ योगं चपरमैश्वर्यंसर्वसामर्थ्यमद्भुतम् ॥ २ ॥ यथावन्ममयोवेत्तिसोऽत्यंताचलितेनच ॥ सम्यग्धीस्थैर्यरूपेणयुज्यतेसत्समाधिना ॥ ३ ॥ नकश्चित्प्रतिबंधोऽत्रशंकनीयःकदाचन ॥ ४ ॥ ७ ॥ अहंश्रीवासुदेवोऽस्यसर्वस्यजगतःप्रभुः ॥ उपादानंनिमित्तंचमत्तःसर्वलयस्थिती ॥ १ ॥ मयांतर्यामिणासर्वशक्तिनासर्ववेदिना ॥ प्रेर्यमाणंजगत्सर्वंस्वस्वकार्येप्रवर्तते ॥ २ ॥ इत्येवंसद्विवेकेनज्ञाततत्त्वाःसदाबुधाः ॥ प्रेम्णावास्त वतत्त्वैक्यबोधेनैवसमन्विताः ॥ ३ ॥ भजंतेमांपरानंदघनंश्रीपरमेश्वरम् ॥ ४ ॥ यस्मिन्निदंजगदशेषमशेषहेतौमायाविलासपरिभावितम

एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः ॥ सोऽविकंपेनयोगेनयुज्यतेनात्रसंशयः ॥ ७ ॥
अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते ॥ इतिमत्वाभजंतेमांबुधाभावसमन्विताः ॥ ८ ॥
मच्चित्तामद्गतप्राणाबोधयंतःपरस्परम् ॥ कथयंतश्चमांनित्यंतुष्यंतिचरमंतिच ॥ ९ ॥

च्छबोधे ॥ कालत्रयेऽर्कमरुभूजलवन्मृषैवमाभातितत्ररमतांह्रदयंहरौमे ॥ ५ ॥ ८ ॥ विवृणोतितमेवेशोभजनंप्रेमपूर्वकम् ॥ येषांमयीश्वरे चित्तंमद्गतेंद्रियवृत्तयः ॥ १ ॥ मद्गतंजीवनंयेषांमद्जनोन्मुखाश्रते ॥ मामेवसत्सभायांयेश्रुतिभिर्युक्तिभिःसदा ॥ २ ॥ तत्त्वजिज्ञासुकथ याज्ञापयंतःपरस्परम् ॥ स्वशिष्येभ्यश्चमामेवोपदिशंतोनिरंतरम् ॥ ३ ॥ इत्येवंमत्परप्रेम्णाभजनेनैवसर्वदा ॥ संतोषंप्राप्नुवंत्यंतःप्राप्तप्राप्यत याऽऽदरात् ॥ ४ ॥ संतोषेणरमंतेचमत्प्रेमविवशीकृताः ॥ प्रियस्यसंगमेनैवानुभवंतिसुखंपरम् ॥ ५ ॥ अत्युत्तमसुखप्राप्तिःसंतोषा देवनान्यतः ॥ ६ ॥ ९ ॥

यथोक्तेनप्रकारेणभजंतेमांयउत्तमाः ॥ तेषामेकाग्रबुद्धीनांसततंपरमेश्वरे ॥ १ ॥ लाभाद्यनभिसंधायप्रीतिपूर्वकमेवहि ॥ भजतांसेवमानानांबुद्धियोगंपुरेरितम् ॥ २ ॥ मत्तत्त्वविषयंसम्यग्दर्शनंतंददाम्यहम् ॥ येनतेबुद्धियोगेनमामजंपरमेश्वरम् ॥ ३ ॥ आत्मत्वेनोपयांत्येतेयेपुरोक्ताश्रमद्रताः ॥ ४ ॥ यस्यावतारचरितश्रवणादिशुद्धस्वांताविवेकविरतिप्रभृतीन्गुणांश्च ॥ प्राप्यात्मबोधमवधीरितबंधपाशामुक्तास्तमीश्वरमहंहरिमाश्रयेंऽतः ॥ ५ ॥ १० ॥ दीयमानस्ययोगस्यब्रह्मप्राप्तौफलेहरिः ॥ सुखबोधायसंग्राह्व्यापारंमध्यवर्तिनम् ॥ १ ॥ तेषामेवकथंश्रेयोभवेदित्यनुकंपया ॥ आत्मैकाकारधीवृत्तौविषयत्वेनसंस्थितः ॥ २ ॥ स्वप्रकाशचिदानंदाद्वयात्माहंनिरामयः ॥ धीपरिणामरूपेणज्ञानदीपेनभास्वता ॥ ३ ॥ चैतन्याभासयुक्तेनाप्रतिबद्धेनसर्वतः ॥ अज्ञानहेतुकंध्वांतंमिथ्याप्रत्ययलक्षणम् ॥ ४ ॥ तद्धेत्वज्ञाननाशेननाशयामि

तेषांसततयुक्तानांभजतांप्रीतिपूर्वकम् ॥ ददामिबुद्धियोगंतंयेनमामुपयांतिते ॥ १० ॥
तेषामेवानुकंपार्थमहमज्ञानजंतमः ॥ नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ॥ ११ ॥

स्वगोचरम् ॥ यथानिवर्तनीयेहिदीपेनतिमिरेऽखिले ॥ ५ ॥ दीपोत्पत्तिंविनानान्यकर्माभ्यासाद्यपेक्षणम् ॥ तथाज्ञानेनचाज्ञानेनाशनीयेऽत्यनर्थदे ॥ ६ ॥ ज्ञानोत्पत्तिंविनानान्यकर्माभ्यासाद्यपेक्षणम् ॥ स्वच्छेनज्ञानदीपेनविवेकप्रत्ययात्मना ॥ ७ ॥ हरिभक्तिप्रसादात्मस्वच्छस्नेहयुतेनच ॥ मत्प्रेमाभिनिवेशानुकूलवातेरितेनच ॥ ८ ॥ ब्रह्मचर्यादिसंस्काररयुक्तप्रज्ञासुवर्तिना ॥ विरक्तपुरुषस्यांतःकरणाधारशोभिना ॥ ९ ॥ रागद्वेषाद्यसंस्पृष्टचित्तसद्मस्थितेनच ॥ ऐकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ॥ १० ॥ नाशितंमोहतिमिरंसमूलंसविलासकम् ॥ येषांतेबंधनिर्मुक्ताःसाक्षात्स्युःपुरुषोत्तमाः ॥ ११ ॥ ११ ॥

श्रीगणेशायनमः ॥ अथदशमाध्यायव्याख्याप्रारंभः॥ पवित्रंश्रीभूमिंसकलगुणलक्ष्मीर्निधिनिधिंसवित्रंतर्ध्येयंविमलमतिसेव्यंगतिगतिम् ॥ धराधीशाधीशंनिखिलजगदीशंक्रतुपतिंविधीशेशंश्रीशंभजजनमुकुंदंश्रुतिपदम् ॥ १ ॥ सप्तमादित्रयेणोक्तंसोपाधिनिरुपाधिकम् ॥ श्रीमद्भगवतस्तत्त्वंतत्पदार्थस्यधीकृते ॥ २ ॥ सविशेषस्यतस्यप्राग्ध्यानोपायाविभूतयः ॥ निर्विशेषस्यतस्यैवज्ञानोपायास्तथेरिताः ॥ ३ ॥ अथेदानींपुनस्तासांवक्तव्योविस्तरोयतः ॥ दुर्विज्ञेयंपरंतत्त्वंश्रीमद्भगवतोहरेः ॥ ४ ॥ अतोज्ञानायतत्तत्त्वंतद्ध्यानायविभूतयः॥ दशमेसंप्रपंच्यंतेमुमुक्षूणांहितायच ॥ ५ ॥ प्रोत्साहयितुमत्रादौश्रोतारंहरिरब्रवीत् ॥ पुनरप्यत्रशृणुमेप्रकृष्टंवचआदरात् ॥ ६ ॥ यत्तुभ्यंप्रीयमाणायसुधापानादिवार्जुन ॥ प्रीतिंप्राप्नुवतेनित्यंमद्वाक्यादतउत्तमम् ॥ ७ ॥ वक्ष्याम्यहंपरोह्यास्तवाभीष्टाभिवांछया ॥ ८ ॥ १ ॥ कुतःपूर्वोक्तमेवत्वंपुनर्वक्ष्यसिचेच्छृ

श्रीभगवानुवाच ॥ भूयएवमहाबाहोशृणुमेपरमंवचः ॥ यत्तेऽहंप्रीयमाणायवक्ष्यामिहितकाम्यया ॥ १ ॥ नमेविदुःसुरगणाःप्रभवंनमहर्षयः ॥ अहमादिर्हिदेवानांमहर्षीणांचसर्वशः ॥ २ ॥ योमामजमनादिंचवेत्तिलोकमहेश्वरम् ॥ असंमूढःसमर्त्येषुसर्वपापैःप्रमुच्यते ॥ ३ ॥

णु ॥ नानाविभूतिभिर्दिव्यमाविर्भावंविलक्षणम् ॥ १ ॥ नशक्राद्याःसुरगणानभृग्वाद्यामहर्षयः ॥ सर्वज्ञाअपिमेविष्णोःप्रभावंतेविदुःपरम् ॥ २ ॥ यतस्तेषांहिदेवानांमहर्षीणांचसर्वशः ॥ उत्पादकतयाबुद्धिप्रेरकत्वेनसर्वथा ॥ ३ ॥ अहमादिर्जगत्कर्तानातोजानंतिमत्कलाम् ॥ ४ ॥ २ ॥ महाफलतयाकश्चिदेवजानातिसज्जनः ॥ श्रीमद्भगवतोदिव्यंप्रभावंहर्यनुग्रहात् ॥ १ ॥ सर्वहेतुतयायस्यनास्त्यादिःकारणंहरेः ॥ अनादित्वेनजन्मादिशून्यंलोकस्यसर्वतः ॥ २ ॥ महांतमीश्वरंयोमांवेत्तिमर्त्येषुमध्यतः ॥ उत्तमःसचदेहादावध्यासेनविवर्जितः ॥ ३ ॥ मुच्यतेकिल्बिषैःसर्वैर्बुद्धिपूर्वकृतैरपि ॥ ४ ॥ ३ ॥

यतस्त्वमेषांसर्वेषांपिताऽचिंत्यगतिःप्रभुः ॥ स्वयमेवोपदेशादिमंतरेणत्वमेवच ॥ १ ॥ प्रत्यक्षेनस्वरूपेणस्वात्मानंनिरुपाधिकम् ॥ जानास्य विषयत्वेनतथासोपाधिकंस्वयम् ॥ २ ॥ त्वंसर्वातिशयज्ञानैश्वर्यादिशक्तिमत्तया ॥ जानासिनापरःकश्चित्त्वांज्ञातुंपुरुषोत्तमम् ॥ ३ ॥ स मर्थोऽस्तियतःसर्वेपुरुषास्त्वदपेक्षया ॥ अपकृष्टाअतस्तेषामशक्यंज्ञानमस्तितें ॥ ४ ॥ सर्वभूतपितासर्वोत्पादकत्वेनसंमतः ॥ पितापिकश्चिन्नै वेष्टेत्वंतुसर्वनियामकः ॥ ५ ॥ नियंताकश्चिन्नाराध्यस्त्वंत्वाराध्योदिवौकसाम् ॥ आराध्योऽपिनकश्चित्स्यात्पालयितृतयापतिः ॥ ६ ॥ त्वंतु वेदप्रणेतृत्वाद्धितादेरुपदेशतः ॥ पतिःसर्वस्यजगतोरक्षकत्वेनसंमतः ॥ ७ ॥ सर्वैरेतादृशैरेवविशिष्टस्त्वंविशेषणैः ॥ सर्वेषांजनकःस्वामीगुरूरा

स्वयमेवात्मनात्मानंवेत्थत्वंपुरुषोत्तम ॥ भूतभावनभूतेशदेवदेवजगत्पते ॥ १५ ॥ वक्तुम
र्हस्यशेषेणदिव्याह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यातिष्ठसि ॥ १६ ॥
कथंविद्यामहंयोगिंस्त्वांसदापरिचिंतयन् ॥ केषुकेषुचभावेषुचिंत्योऽसिभगवन्मया ॥ १७ ॥

जामहेश्वरः ॥ ८ ॥ अतःसर्वैःप्रकारैस्त्वमाराध्यःसर्वदेहिनाम् ॥ किंवाच्यंतेजगत्स्वामिन्पुरुषौत्कृष्ट्यमद्भुतम् ॥ ९ ॥ १५ ॥ यस्माज्ज्ञातुंहिसर्वे षामशक्यास्तेविभूतयः ॥ ज्ञातव्याश्चाप्यवश्यंमेतस्माद्याभिर्विभूतिभिः ॥ १ ॥ सर्वाँल्लोकानिमान्व्याप्यतिष्ठसित्वंतवैवताः ॥ दिव्याज्ञातुम शक्याहियस्मात्तस्मात्त्वमेवच ॥ २ ॥ सर्वज्ञःसर्वशक्तिश्चवक्तुमर्हस्यशेषतः ॥ ३ ॥ १६ ॥ हेनिरतिशयैश्वर्यशक्तिशालिन्जगद्गुरो ॥ अति स्थूलमतिस्त्वाहंदेवाद्यैरपिसर्वथा ॥ १ ॥ अशक्यंसंपरिज्ञातुंजानीयांकथमीदृशम् ॥ सदाध्यायंस्तथाकेषुकेषुचिज्जडवस्तुषु ॥ २ ॥ त्वद्वि भूतिस्वरूपेषुचिंत्योऽसिभगवन्मया ॥ ३ ॥ १७ ॥

आत्मनस्तवयोगंचसंसार्वज्ञादिनिरंकुशम् ॥ ऐश्वर्यातिशयंतद्वद्विभूतिंध्यानगोचराम् ॥ १ ॥ संक्षेपेणपुराप्रोक्तांसप्तमेनवमेत्वया ॥ पुनर्देवेश कथयविस्तरेणाधुनास्फुटम् ॥ २ ॥ याच्यसेत्वंजनैःसर्वैर्भोगमोक्षप्रयोजनम् ॥ अतोममापियाच्ञेयंसर्वथैवोचितात्वयि ॥ ३ ॥ कथनंपुनरुक्तस्यकिमर्थंयाचसेशृणु ॥ त्वद्वाक्यममृतंयस्माच्छ्रोत्रेणपिबतोमम ॥ ४ ॥ नास्त्यलंप्रत्ययेनेच्छाविच्छित्तिःस्वादुवत्परम् ॥ माधुर्यातिशयादेवत्वद्वाक्यमितिनेरितम् ॥ ५ ॥ उत्कंठातिशयेनोक्तममृतंचेतिकेवलम् ॥ ६ ॥ १८ ॥ परमोत्कंठितंपार्थंविश्रंभयितुमीश्वरः ॥ प्रोक्तवानुत्तरंसम्यक्करुणानिधिरादरात् ॥ १ ॥ हंतेत्यनुमतौज्ञेयंयत्त्वयाप्रार्थितंकिल ॥ तत्करिष्यामिमाभूत्खंव्याकुलोऽनुमतिस्त्वियम् ॥ २ ॥ इत्य

विस्तरेणात्मनोयोगंविभूतिंचजनार्दन ॥ भूयःकथयतृप्तिर्हिश्रृण्वतोनास्तिमेऽमृतम् ॥ १८ ॥ श्रीभगवानुवाच ॥ हंततेकथयिष्यामिदिव्याह्यात्मविभूतयः ॥ प्राधान्यतःकुरुश्रेष्ठनास्त्यंतोविस्तरस्यमे ॥ १९ ॥ अहमात्मागुडाकेशसर्वभूताशयस्थितः ॥ अहमादिश्चमध्यंचभूतानामंतएवच ॥ २० ॥

र्जुनंसमाश्वास्यकर्तुमारभतेहितत् ॥ ममासाधारणादिव्याःप्रसिद्धायाविभूतयः ॥ ३ ॥ अशक्याविस्तराद्वक्तुंनास्त्यंतोविस्तरस्यमे ॥ अतः प्रधानभूतास्ताविभूतीःकाश्चिदेवहि ॥ ४ ॥ तुभ्यंसंकथयिष्यामिकुरुश्रेष्ठोयतोभवान् ॥ ५ ॥ १९ ॥ तत्रादौचिंतनीयंयन्मुख्यंतत्प्रथमंशृणु ॥ हृद्देशेसर्वभूतानामंतर्यामितयास्थितः ॥ १ ॥ प्रत्यगात्मात्मनाचैवपरानंदघनोऽच्युतः ॥ स्वयैववासुदेवोऽहंध्येयोनित्यंजितालस ॥ २ ॥ चेतनानांसमस्तानांयतोऽहंजन्मकारणम् ॥ मध्येस्थितिर्लयोंऽतेचमत्तोभिन्नंनकिंचन ॥ ३ ॥ सर्वचेतनवर्गाणांजनिस्थितिलयात्मना ॥ तत्कारणात्मनावाहमेवध्येयइतीरितः ॥ ४ ॥ २० ॥

तत्राशक्तैर्बुधैश्चिंत्योयेषुतांश्चवदाम्यहम् ॥ आदित्यानांद्वादशानांमध्येऽहंविष्णुसंज्ञितः ॥ १ ॥ आदित्योवामनोवास्मिषष्ठीनिर्धारणेऽखिला ॥ अत्रप्रायेणसंबंधेकचिदेवेतिसंग्रहः ॥ २ ॥ रामादयोऽवतारास्तुसमस्तैश्वर्यशालिनः ॥ तेनतेनस्वरूपेणाप्यत्रध्यानविवक्षया ॥ ३ ॥ स्वयं महेश्वराःसाक्षात्पठ्यंतेतेविभूतिषु ॥ वृष्णीनांवासुदेवोऽस्मीत्यत्रस्वस्यापिशार्ङ्गिणः ॥ ४ ॥ श्रीविष्णोस्तेनरूपेणसम्यक्ध्यानविवक्षया ॥ दर्शितत्वात्तथैवाग्रेवक्ष्यतेतत्रतत्रच ॥ ५ ॥ प्रकाशकानांमध्येऽहंरविर्विश्वप्रकाशकः ॥ मरुतांसप्तसप्तानांमरीचिर्नामतोऽस्म्यहम् ॥ ६ ॥ नक्षत्राधिपतिश्चंद्रोनक्षत्राणामहंहरिः ॥ ७ ॥ २१ ॥ मध्येचतुर्णांवेदानांसामवेदोऽस्म्यहंहरिः ॥ रुद्रादित्यादिदेवानांमध्येऽहंपाकशासनः ॥ १ ॥

आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान् ॥ मरीचिर्मरुतामस्मिनक्षत्राणामहंशशी ॥ २१ ॥
वेदानांसामवेदोऽस्मिदेवानामस्मिवासवः ॥ इंद्रियाणांमनश्चास्मिभूतानामस्मिचेतना ॥ २२ ॥
रुद्राणांशंकरश्चास्मिवित्तेशोयक्षरक्षसाम् ॥ वसूनांपावकश्चास्मिमेरुःशिखरिणामहम् ॥ २३ ॥
पुरोधसांचमुख्यंमांविद्धिपार्थबृहस्पतिम् ॥ सेनानीनामहंस्कंदःसरसामस्मिसागरः ॥ २४ ॥

एकादशेंद्रियाणांचमनोऽहंतत्प्रवर्तकम् ॥ कार्यकारणसंघातेचिदभिव्यंजकाधियः ॥ २ ॥ वृत्तिःसमस्तभूतानांचेतनानामहंहरिः ॥ ३ ॥ ॥ २२ ॥ यएकादशरुद्राणांशंकरःसोऽस्म्यहंहरिः ॥ यक्षाणांरक्षसांमध्येकुबेरोऽहंधनाधिपः ॥ १ ॥ वसूनामग्निरष्टानांमध्येयोऽहमीश्वरः ॥ मेरुःशिखरिणांमध्येदेवतानांनिवासभूः ॥ २ ॥ २३ ॥ राज्ञांपुरोधसांमध्येशक्राचार्योबृहस्पतिः ॥ देवसेनापतिःस्कंदःसेनानीनामहंबलो ॥ १ ॥ सागरःसरसांमध्येनिर्मितानांचदैवतैः ॥ २ ॥ २४ ॥

एवंभगवतोयोगंविभूतिंचाद्भुतोपमाम् ॥ श्रुत्वार्जुनउवाचेदंपरमोत्कंठितोहरौ ॥ १ ॥ परंब्रह्माद्वयानंदंपरंधामाश्रयोमहः ॥ प्रकृष्टंपावनं यस्माद्भवानेवपरंपदम् ॥ २ ॥ पुरुषंपरमात्मानंसर्वदैकरसंयतः ॥ दिविव्योम्निभवंसर्वप्रपंचातीतमद्भुतम् ॥ ३ ॥ समस्तकारणंदेवंस्वज्योतिर्द्योतनात्मकम् ॥ अतएवजनेःशून्यंविभुंसर्वगतंध्रुवम् ॥ ४ ॥ १२ ॥ कथयंतिवसिष्ठाद्याऋषयस्त्वांविदांवराः ॥ देवर्षिर्नारदोलोकशास्त्राव्याहृतदर्शनः ॥ १ ॥ असितोदेवलोधौम्यज्येष्ठभ्रातातथैवच ॥ व्यासश्चभगवान्कृष्णद्वैपायनउदारगीः ॥ २ ॥ एतेऽपिमह्यंत्वामाहुःपूर्वोक्त

अर्जुनउवाच ॥ परंब्रह्मपरंधामपवित्रंपरमंभवान् ॥ पुरुषंशाश्वतंदिव्यमादिदेवमजंविभुम् ॥ १२ ॥ आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्तथा ॥ असितोदेवलोव्यासःस्वयंचैवब्रवीषिमे ॥ १३ ॥ सर्वमेतदृतंमन्येयन्मांवदसिकेशव ॥ नहितेभगवन्व्यक्तिंविदुर्देवानदानवाः ॥ १४ ॥

गुणसंयुतम् ॥ किमन्यैर्वक्तृभिःसाक्षात्स्वयमेवब्रवीषिमे ॥ ३ ॥ नारदादेर्विशिष्टत्वादृषित्वेऽपिपृथक्स्मृतिः ॥ ४ ॥ १३ ॥ सर्वमेतत्त्वयोक्तं यदृषिभिश्चयदीरितम् ॥ सत्यमेवह्यहंमन्येयन्मांप्रतिवदस्यज ॥ १ ॥ नमेप्रामाण्यशंकास्तिकुत्रापित्वदुदीरिते ॥ विधीशावप्यनुग्राह्यौकिमज्ञातंतवप्रभो ॥ २ ॥ सर्वैश्वर्यादिसंपन्नंप्रभावंतेसुराअपि ॥ ज्ञानातिशयसंपन्नानविदुर्नापिदानवाः ॥ ३ ॥ नवामहर्षयश्चैवतत्सर्वंतत्तथैवहि ॥ ४ ॥ १४ ॥

दितिवंशोद्भवानांचप्रह्लादोऽस्मिसतांवर ॥ गणनंकुर्वतांमध्येकालोऽहंसर्वविश्वगः ॥ १ ॥ मृगाणांमृगराजोऽहंपक्षिणांविनतासुतः ॥ २ ॥ ॥ ३० ॥ पवनःपावयितृणांसर्वप्राणकलेश्वरः ॥ शस्त्रास्त्रधारिणांमध्येरामोदाशरथिर्विभुः ॥ १ ॥ सर्वरक्षःकुलध्वंसीमहावीरोऽहमीश्वरः ॥ साक्षाद्विस्वस्वरूपस्यानेनरूपेणदेहिनाम् ॥ २ ॥ चिंतनार्थंदाशरथेःपाठोज्ञेयोविभूतिषु ॥ ३ ॥ धनुःपाणीरक्षःकुलवनदवाग्निर्द्विजगतिःप्रतापीसंश्लिष्टोजनकतनयाबाहुलतया ॥ शरच्चंद्राकारंस्मितमधुरवक्त्रामृतरुहंदधानोध्येयोऽसौरघुकुलरविर्लक्ष्मणसखः ॥ ४ ॥ कृतज्ञोमेधावीस्मृतिधृतिनिधिःशांतिजलधिःकृपासिंधुर्वीरोनिरवधिसुखागारपददः ॥ प्रभुर्लावण्याब्धिर्दशरथकुमारोऽत्यभयदःसदाध्येयोहीत्थंरघुकुलहिमांशुःस्वहृदये ॥ ५ ॥ अनेकमत्स्यजातीनांमकराख्योऽहमीश्वरः ॥ चलज्जलानांवेगेनगंगाहंसरितांवरा ॥ ६ ॥ ३१ ॥ जन्मस्थितिलयाःसर्वसृष्टी

प्रह्लादश्चास्मिदैत्यानांकालःकलयतामहम् ॥ मृगाणांचमृगेंद्रोऽहंवैनतेयश्चपक्षिणाम् ॥ ३० ॥
पवनःपवतामस्मिरामःशस्त्रभृतामहम् ॥ झषाणांमकरश्चास्मिस्रोतसामस्मिजाह्नवी ॥ ३१ ॥
सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन ॥ अध्यात्मविद्याविद्यानांवादःप्रवदतामहम् ॥ ३२ ॥

नामहमर्जुन ॥ जीवाधिष्ठितभूतानांपूर्वमुक्तमुपक्रमे ॥ १ ॥ अध्यात्मविद्याविद्यानांमोक्षहेतुरहंहरिः ॥ वादजल्पवितंडानांमध्येवादोऽहमीश्वरः ॥ २ ॥ तत्रतत्त्वबुभुत्सोर्वाशिष्यदैशिकयोस्तथा ॥ प्रमाणेनचतर्केणसाधनेदूषणात्मकः ॥ ३ ॥ तत्त्वनिर्णयपर्यंतःपक्षद्वयपरिग्रहः ॥ वादःस्याच्छास्त्रसिद्धांतनिर्णयेहेतुरुत्तमः ॥ ४ ॥ विजिगीषुकथेजल्पवितंडेभ्रांतिशालिनाम् ॥ जयाजयफलेलोकप्रतिष्ठामात्रहेतुके ॥ ५ ॥ यत्रैकेनस्वकःपक्षःस्थाप्यतेदूष्यतेऽन्यतः ॥ सावितंडाकथाज्ञेयालौकिकीचातुरीकला ॥ ६ ॥ स्वपक्षःस्थाप्यतेजल्पेउभाभ्यामेवयुक्तिभिः ॥ दूष्यतेपरपक्षश्चविशेषोऽयंतयोर्द्वयोः ॥ ७ ॥ ३२ ॥

वर्णानांसर्ववाग्रूपतयाकारःश्रुतेर्मतः ॥ समासस्यसमूहोऽहंद्वंद्वोऽस्म्युभयतोवरः ॥ १ ॥ कालोऽहंपरमेशाख्यःकालकालोऽक्षयःपरः॥ क्षयी कालाभिमानीयःपूर्वोक्तःसविलक्षणः ॥ २ ॥ धाताहंसर्वतःपूर्णःप्राणिकर्मफलप्रदः ॥ ३ ॥३३॥ संहारकारिणांमध्येमृत्युःसर्वहरोह्यहम् ॥ भाविकल्याणरूपाणांसमुत्कर्षोऽहमेवच ॥ १ ॥ कीर्तिःसद्धर्मतःख्यातिःश्रीर्धर्मार्थादिसंपदा ॥ वाग्वाणीसंस्कृतासर्वपदार्थानांप्रकाशिका ॥ २ ॥ स्मृतिश्चिरानुभूतार्थस्मरणेशक्तिरद्भुता ॥ मेधाह्यनेकग्रंथार्थधारणाशक्तिरांतरी ॥ ३ ॥ अवसादेऽपिदेहादिसंघातोत्तंभिकाधृतिः ॥ क्षमाहर्षविषादादिहेतौधीनिर्विकारता ॥ ४ ॥ धर्मपत्न्यइमामुख्यानारीणामहमेवच ॥ यासामाभासमात्रस्यसंबंधेनापिजंतवः

अक्षराणामकारोऽस्मिद्वंद्वःसामासिकस्यच ॥ अहमेवाक्षयःकालोधाताहंविश्वतोमुखः ॥ ३३ ॥
मृत्युःसर्वहरश्चाहमुद्भवश्चभविष्यताम् ॥ कीर्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिःक्षमा ॥३४॥
बृहत्सामतथासाम्नांगायत्रीछंदसामहम् ॥ मासानांमार्गशीर्षोऽहमृतूनांकुसुमाकरः ॥ ३५ ॥

॥ ५ ॥ आदर्तव्याःसमस्तेषुसंतिलोकेषुसाधवः ॥ ६ ॥ ३१ ॥ वेदानांसामवेदोऽस्मीत्युक्तंतत्रापराभिदा ॥ साम्नामृगक्षरारूढगीतिभेदान्न नामहम् ॥ १ ॥ बृहत्सामातिरात्रेतत्पृष्टंस्तोत्रंमहत्तरम् ॥ सर्वेश्वरतयेंद्रस्यस्तुतिरूपमितोऽप्यहम् ॥ २ ॥ गायत्रीवाइदंसर्वमित्यादौब्रह्मरूपतः ॥ छांदोग्येसंस्तुतासम्यक्तथाशतपथश्रुतौ ॥ ३ ॥ मध्येछंदोविशिष्टानांनियताक्षरभाग्ऋचाम् ॥ सर्वात्मत्वेननिर्णीतागायत्रीछंदसामहम् ॥ ४ ॥ मासानांमार्गशीर्षोऽहंसुखहेतुतयावरः ॥ नातिशीतंनचात्युष्णंयस्मिन्धान्यादिशालिनि ॥ ५ ॥ पुष्पाणामाकरोयस्माद्ब्राह्मणानामृतुर्यतः ॥ रमणीयवसंतोऽसावृतूनामहमित्यतः ॥ ६ ॥ ३५ ॥

द्यूतंछलस्यकर्तृणांयत्सर्वस्यापहारकृत् ॥ अतीवोग्रप्रभावानांतेजस्तेजस्विनामहम् ॥ १ ॥ जेतृणामहमुत्कर्षलक्षणोजयएवच ॥ शश्वत्फलोद्यमोऽहंचजनानांव्यवसायिनाम् ॥ २ ॥ सात्त्विकानामहंसत्वंधर्मज्ञानादिलक्षणम् ॥ ३ ॥ ३६ ॥ वृष्णीनांत्वत्सखःसाक्षाद्वासुदेवोऽहमव्ययः ॥ साक्षाच्छ्रीवासुदेवस्यमहामायाविनोहरेः ॥ १ ॥ विभूतिमध्येश्रीशस्यपाठोध्यानार्थइष्यते ॥ वसुदेवसुतत्वेनचिदानंदघनात्मनः ॥ २ ॥सुरप्रार्थ्योद्भूतिर्यदुकुलपयोधौरसमयःसमाल्हादाल्हादोभ्रमतिमिरविध्वंसिकरजः॥ भृशंशृंगारार्द्रोऽपरिमितगतिःस्वच्छवलयोहृदाकाशेध्येयोऽद्भुतवपुरयंकृष्णउडुपः ॥ ३ ॥ पांडवानांत्वमेवासिमद्विभूतिर्धनंजयः ॥ मुनीनांसर्ववेदार्थाभिज्ञानांबादरायणः ॥ ४ ॥ कवीनाम

द्यूतंछलयतामस्मितेजस्तेजस्विनामहम् ॥ जयोऽस्मिव्यवसायोऽस्मिसत्वंसत्ववतामहम् ॥ ३६ ॥
वृष्णीनांवासुदेवोऽस्मिपांडवानांधनंजयः ॥ मुनीनामप्यहंव्यासःकवीनामुशनाकविः॥ ३७॥ दंडो
दमयतामस्मिनीतिरस्मिजिगीषताम् ॥ मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहम् ॥ ३८ ॥ यच्चा
पिसर्वभूतानांबीजंतदहमर्जुन ॥ नतदस्तिविनायत्स्यान्मयाभूतंचराचरम् ॥ ३९ ॥

स्म्यहंशुक्रःसूक्ष्मार्थविवेकिनाम् ॥ ५ ॥ ३७ ॥ दांतिहेतुरदांतानांदंडोदमयतामहम् ॥ नीतिरस्मिजयेप्सूनांजयोपायप्रकाशकः ॥ १ ॥ वाचंयमत्वंगोप्यानामभिप्रायस्यगूढता ॥ निदिध्यासनमेवात्रमौनंवागुह्यमस्म्यहम् ॥ २ ॥ अज्ञाननाशकंब्रह्मज्ञानंज्ञानवतामहम् ॥ ३ ॥ ३८ ॥ मायोपाधिकचैतन्यंबीजंयत्सर्वदेहिनाम् ॥ तदहंनपृथङ्मत्तःकिंचिदस्तिचराचरम् ॥ १ ॥ मदात्मनाततंसर्वंचराचरमिदं जगत् ॥ २ ॥ ३९ ॥

महर्षीणांमहातेजाभृगुरस्मिविदांवरः ॥ वाचांपदात्मनांमध्येऽक्षरमोंकारईश्वरः ॥ १ ॥ जपयज्ञोऽस्मियज्ञानांशोधकःप्राण्यहिंसकः ॥ अहं स्थितिमतांमध्येध्येयत्वेनहिमालयः ॥ २ ॥ २५ ॥ पिप्पलःसर्ववृक्षाणांमध्येध्येयोऽहमादरात् ॥ मंत्रदर्शितयादेवाःसंतोयेचर्षितांगताः ॥ १ ॥ तेचदेवर्षयस्तेषांनारदोऽस्मिसुहृत्सताम् ॥ गानधर्मविशिष्टानांमध्येचित्ररथोऽस्म्यहम् ॥ २ ॥ जन्मनैवमहांतोयेधर्मज्ञानादिभिर्गताः ॥ सिद्धत्वंकपिलस्तेषांसिद्धानांध्येयईश्वरः॥ ३ ॥ २६ ॥ उच्चैःश्रवसमश्वानांमांजानीहिसुधोद्भवम् ॥ ऐरावतमिरावत्याअपत्यंहस्तिनांवरम्

महर्षीणांभृगुरहंगिरामस्म्येकमक्षरम् ॥ यज्ञानांजपयज्ञोऽस्मिस्थावराणांहिमालयः ॥ २५ ॥
अश्वत्थःसर्ववृक्षाणांदेवर्षीणांचनारदः ॥ गंधर्वाणांचित्ररथःसिद्धानांकपिलोमुनिः ॥ २६ ॥
उच्चैःश्रवसमश्वानांविद्धिमाममृतोद्भवम् ॥ ऐरावतंगजेंद्राणांनराणांचनराधिपम् ॥ २७ ॥
आयुधानामहंवज्रंधेनूनामस्मिकामधुक् ॥ प्रजनश्चास्मिकंदर्पःसर्पाणामस्मिवासुकिः ॥ २८ ॥
अनंतश्चास्मिनागानांवरुणोयादसामहम् ॥ पितॄणामर्यमाचास्मियमःसंयमतामहम् ॥ २९ ॥

॥ १ ॥ सुधामथनजंविद्धिमामेवध्येयमीश्वरम् ॥ नृणांमध्येनृपंविद्धिमामेवजगतःपतिम् ॥ २ ॥ २७ ॥ आयुधानामहंवज्रंदधीचेरस्थिसंभवम् ॥ सर्वकामैकदोग्ध्रीणांवसिष्ठस्यास्मिकामधुक् ॥ १ ॥ प्रजाजनयिताकामोधर्महेतुरहंहरिः ॥ वासुकिःसर्पराजोऽहंसर्पाणामस्मिधार्मिकः ॥ २ ॥ ॥ २८ ॥ अनंतोनागराजोऽहंनागानांभगवत्कला ॥ जलेश्वराणांवरुणोराजाऽहंसर्वयादसाम् ॥ १ ॥ अर्यमापितृराजाऽहंपितॄणांसर्वभोगदः ॥ यमोऽहंधर्मराजाख्यःसंयमनंप्रकुर्वताम् ॥ २ ॥ २९ ॥

इयत्तानास्तिदिव्यानांविभूतीनांममेशितुः ॥ सर्वज्ञेनापिवक्तुंवाज्ञातुंवानैवशक्यते ॥ १ ॥ इयत्तामद्विभूतीनामनंतानांकथंचन ॥ विभूतेरेषविस्तारःप्रोक्तस्तेचैकदेशतः ॥ २ ॥ ४० ॥ संगृहीतुमनुक्ताहिविभूतीरीशितुर्हरेः ॥ सम्यक्बोधायतदिदमुपलक्षणमुच्यते ॥ १ ॥ लोकेविभूतियुक्तंयद्यत्प्राणिश्रीयुतंभवेत् ॥ बलाद्यैश्वर्ययुक्तंवातत्तत्सर्वंमदंशजम् ॥ २ ॥ जानीहित्वंनमत्तोऽन्यत्किंचिद्वस्त्वस्तिजागतम् ॥ ३ ॥ ॥ ४१ ॥ श्रीभगवान्विभूतिंस्वामुक्त्वावयवशोऽधुना ॥ साकल्येनैकतामाहकरुणामृतसागरः ॥ १ ॥ ज्ञानेनसविशेषेणकिंतेस्यादेवमादिना ॥ व्याप्यैकदेशमात्रेणजगत्सर्वमहंस्थितः ॥ २ ॥ किमनेनपरिच्छिन्नदर्शनेनतवार्जुन ॥ मद्दृष्टिंकुरुसर्वत्रसर्वानर्थक्षयंकरीम् ॥ ३ ॥

नांतोऽस्तिममदिव्यानांविभूतीनांपरंतप ॥ एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया ॥ ४० ॥
यद्यद्विभूतिमत्सत्वंश्रीमदूर्जितमेववा ॥ तत्तदेवावगच्छत्वंममतेजोंऽशसंभवम् ॥ ४१ ॥ अ
थवाबहुनैतेनकिंज्ञानेनतवार्जुन ॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ॥ ४२ ॥ इतिश्री
मद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ०विभूतियोगोनामदशमोऽध्यायः ॥ १० ॥

पादोऽस्यविश्वाभूतानीत्यादिश्रुत्याहमीश्वरः ॥ एकएवविनिर्णीतस्त्वंमांविद्धिसर्वथा ॥ ४ ॥ ४२ ॥ यस्यैश्वर्यादिभावंमुनिदिविजगणानैवजानंतिसर्वेयस्येक्षामात्रसिद्धंचरमचरमिदंसृज्यजालंसहेशैः ॥ यस्यांतोनास्तिभूतेरतिगहनगतेरंशतोयेनसर्वंविश्वंव्याप्तंतमीशंसकलसुरपतिंकृष्णमाद्यंनतोऽस्मि ॥ १ ॥ यंयोगिनोविगतभोगभराभिलाषाःशांताःसमाधिनिरताविगतैषणांकाः ॥ प्राणान्नियम्यहृदिसौख्यपदंविशुद्धंध्यायंतितंयडुपतिंहृदिचिंतयामि ॥ २ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ तदर्थध्येयनिष्ठाख्योदशमःपूर्णतांगतः ॥ १० ॥ १७६ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ २८३८ ॥

॥ इतिश्रीमद्भगवद्गीतायांभावप्रकाशेदशमोऽध्यायःसमाप्तः ॥

यथायेनप्रकारेणपरमेश्वरमापते ॥ सोपाधिकात्मनातद्वन्निरुपाधिकरूपतः ॥ १ ॥ परमैश्वर्यसंपन्नंस्वात्मानंकथयस्यलम् ॥ एवमेवैतदस्तीहना
स्तिशंकामनागपि ॥२॥ यद्यप्येवंतथाप्यत्राहंकृतार्थीबुभूषया ॥ द्रष्टुमिच्छामितेरूपंज्ञानैश्वर्यादिसंयुतम् ॥३॥ सर्वशक्त्याश्रयंश्रीमत्पारमेश्वरम
द्भुतम् ॥ त्वद्वाक्येनास्त्यविश्वासोदिदृक्षामहतीचमे ॥ ४ ॥ अंतर्यामितयावेत्सिपुरुषोत्तमचान्तरम् ॥ ५ ॥ ३ ॥ सृष्टिस्थितिलयादिभ्यःप्रभुः
प्रभवतीहयः ॥ हेप्रभोसकलस्वामिन्रूपंयत्तत्तवैश्वरम् ॥ १ ॥ मयार्ज्जुनेनशक्यंचेद्रष्टुंचिंतयसीश्वर ॥ हेयोगेश्वरसर्वेषांयोगिनांसिद्धिशालिना
म्॥२॥ योगानांचैवसर्वेषामीश्वरोऽसिरमापते ॥ त्वदीयेच्छावशादेवमह्यमत्यर्थिनेविभो ॥३॥ आत्मानमैश्वरंरूपमक्षयंकरुणानिधे ॥ चाक्षुषज्ञा

एवमेतद्यथात्थत्वमात्मानंपरमेश्वर ॥ द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तम ॥ ३ ॥ मन्यसेयदि
तच्छक्यंमयाद्रष्टुमितिप्रभो ॥ योगेश्वरततोमेत्वंदर्शयात्मानमव्ययम् ॥ ४ ॥ श्रीभगवानुवा
च ॥ पश्यमेपार्थरूपाणिशतशोऽथसहस्रशः॥ नानाविधानिदिव्यानिनानावर्णाकृतीनिच ॥ ५ ॥
पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा ॥ बहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ॥ ६ ॥

नविषयीकारयत्वमिहाधुना ॥ ४ ॥ ४ ॥ एवमत्यंतभक्तेनप्रार्थितोहरिरब्रवीत् ॥ अत्यद्भुतानिरूपाणिदर्शयिष्यामिसर्वशः॥१॥ सावधानोभवे
त्येवमाभिमुख्यायतस्यच ॥ पश्येत्यस्येरितावृत्तिरत्रश्लोकचतुष्टये ॥२॥ अनंतानिस्वरूपाणिदिव्यान्यत्यद्भुतानिमे ॥ तथानेकप्रकाराणिद्रष्टुमर्हो
भवार्ज्जुन ॥ ३ ॥ वर्णानानाविधायेषांनीलपीतारुणादयः ॥ तथावयवसंस्थानभेदोयेषामनेकधा ॥ ४ ॥ तानिमेपश्यरूपाणिसावधानेनचेतसा
॥ ५ ॥५ ॥ पश्येत्युक्तांशतोद्वाभ्यांतान्यनुक्रामतीश्वरः ॥ पश्यत्वंद्वादशादित्यान्वसूनष्टाश्विनावुभौ ॥ १ ॥ रुद्रानेकादशैकोनपंचाशन्मरुतस्त
था ॥ तथान्यानपिदेवांस्त्वंद्रष्टुमर्होभवार्ज्जुन ॥ २ ॥ बहूनिप्रागदृष्टानित्वयावान्येनकेनचित् ॥ अत्यद्भुतैकरूपाणिपश्यभारतभूषण ॥ ३ ॥६ ॥

त्वंममास्मिन्शरीरेऽद्यह्येकस्मिन्सकलंजगत् ॥ एकावयवरूपेणस्थितंसस्थाणुजंगमम् ॥१॥ वर्षकोटिसहस्रेणभ्रमतातत्रतत्रयत् ॥ अशक्ष्यंद्रष्टु
मद्यत्वंतत्पश्यजितनिद्रक ॥२॥ जयाजयादिकंयद्यत्संदिग्धंद्रष्टुमिच्छसि ॥ पश्यसंदेहनाशायतत्सर्वमच्छरीरगम् ॥ ३ ॥७॥ अनेनप्राकृतेन
त्वंनशक्तोषिस्वचक्षुषा ॥ दिव्यंविश्वात्मकंद्रष्टुंसर्वाश्चर्यमयंहिमाम् ॥ १ ॥ ददाम्यप्राकृतंचक्षुःक्षमंयद्दिव्यदर्शने ॥ दिव्येनचक्षुषातेनमहामा
याश्रयंपरम् ॥ २ ॥ ममासाधारणंरूपंपश्यत्वंचाद्भुतोपमम् ॥ ३ ॥ ८ ॥ समस्ताश्चर्यनिलयंसमस्तैश्वर्यसंयुतम् ॥ भगवान्प्रार्थितोरूपंदर्श
यामासजिष्णवे ॥ १ ॥ तद्दृष्ट्वाविस्मयाविष्टःसविज्ञापितवान्हरिम् ॥ इतीमंसर्ववृत्तांतंधृतराष्ट्रनृपंप्रति ॥ २ ॥ उवाचसंजयःषड्भिःश्लोकैरै

इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरम् ॥ ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥ ७ ॥ नतुमां
शक्यसेद्रष्टुमनेनैवस्वचक्षुषा ॥ दिव्यंददामितेचक्षुःपश्यमेयोगमैश्वरम् ॥ ८ ॥ संजयउवाच ॥
एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः ॥ दर्शयामासपार्थायपरमंरूपमैश्वरम् ॥ ९ ॥ अने
कवक्त्रनयनमनेकाद्भुतदर्शनम् ॥ अनेकदिव्याभरणंदिव्यानेकोद्यतायुधम् ॥ १० ॥

श्वर्यतत्परैः ॥ दिव्यंददामितेचक्षुरेवमुक्त्वार्जुनंप्रति ॥ ३ सर्वोत्कृष्टोऽस्तियोयोगस्तस्यासौपरमेश्वरः ॥ दिव्यचक्षुःप्रदायादौदर्शयामासतद्व
पुः ॥ ४ ॥ भक्तक्लेशहरःस्वामीदर्शनानर्हमप्यसौ ॥ दर्शयामासपार्थायदिव्यंतत्पारमेश्वरम् ॥ ५ ॥ ९ ॥ तदेवरूपंश्रीविष्णोर्विशिनष्टिससं
जयः ॥ यस्मिन्वक्त्राण्यनेकानिनेत्राणितत्तथावपुः ॥ १ ॥ अद्भुतानामनेकेषांयस्मिन्रूपेऽस्तिदर्शनम् ॥ यस्मिन्दिव्यान्यनेकानिभूषणानिच
तत्तथा ॥ २ ॥ यस्मिन्दिव्यान्यनेकानिप्रोद्यतान्यायुधानितत् ॥ ३ ॥ १० ॥

भ्रियंतेयेनदिव्यानिमाल्यानिवसनानितत् ॥ दिव्योगंधोऽस्यतेनानुलेपनंयस्यतत्तथा ॥ १ ॥ अनेकाश्चर्यप्रचुरमनंतंद्योतनात्मकम् ॥ तद्रू
पमपरिच्छिन्नंसर्वतोमुखसंयुतम् ॥ २ ॥ दर्शयामासपार्थायेत्यनेनान्वयइष्यते ॥ ३ ॥ ११ ॥ अन्तरिक्षेसहस्रस्यसमूहस्यविवस्वताम् ॥ यु
गपद्योत्थितस्यस्यात्प्रभायुगपदुत्थिता ॥ १ ॥ तदासाविश्वरूपस्यदीप्तेस्तुल्याभवेन्नवा ॥ ततोऽपिविश्वरूपस्यप्रभासैवातिरिच्यते ॥ २ ॥
इत्यहंस्वधियामन्येनान्यास्तीहोपमैवहि ॥ ३ ॥ १२ ॥ तत्रैकत्रस्थितंसर्वंप्रविभक्तंजगत्पृथक् ॥ देवपित्रमनुष्यादिप्रकारैर्भिन्नमद्भुतम् ॥१ ॥

दिव्यमाल्यांबरधरंदिव्यगंधानुलेपनम् ॥ सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखम् ॥ ११ ॥
दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता ॥ यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः ॥१२॥
तत्रैकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्यशरीरेपांडवस्तदा ॥ १३ ॥
ततःसविस्मयाविष्टोहृष्टरोमाधनंजयः ॥ प्रणम्यशिरसादेवंकृतांजलिरभाषत ॥ १४ ॥

दृष्टवानर्जुनोदेहेदेवदेवस्यशार्ङ्गिणः ॥ तदाश्चर्यमयानेकदर्शनावसरेकिल ॥ २ ॥ १३ ॥ एवंदिव्याद्भुतंरूपंदृष्ट्वाभगवतोऽर्जुनः ॥ नबिभ
यांचकारासौसंचचारनचक्षुषी ॥ १ ॥ विसस्मारनकर्तव्यंस्थानान्नापससारह ॥ किंतुधीरतयाचक्रेव्यवहारंयथोचितम् ॥ २ ॥ चित्तक्षो
भेऽपिमहतिप्राहेत्येवंससंजयः ॥ तद्रूपदर्शनाज्जातविस्मयेनावृतस्ततः ॥ ३ ॥ हृष्टरोमांचनोभूत्वाविश्वरूपधरंहरिम् ॥ भूमिलग्नेनशिरसाभ
क्तिश्रद्धासमन्वितः ॥ ४ ॥ प्रकर्षेणनमस्कृत्यस्वाभिमानंविहायच ॥ संपुटीकृतहस्तःसन्नुवाचानतकंधरः ॥ ५ ॥ १४ ॥

श्रीगणेशायनमः ॥ अथैकादशाध्यायव्याख्याप्रारंभः ॥ सदालक्ष्म्यावासेसकलमुनिवंद्येसुखनिधौमहाभाग्यैर्ध्येयेचिदणुमकरंदेसुमतिदं ॥ विधीशाद्यास्वाद्येऽकुशयवसुचिन्हेरतिपदेमनोभृंगोमेश्रीहरिपदसरोजेप्रविशतु ॥ १ ॥ पूर्वाध्यायेविभूतीःस्वाःप्रोक्तांतेप्रोक्तवानिति ॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ॥ २ ॥ इतिविश्वात्मकंरूपंश्रुत्वाभगवतेरितम् ॥ तत्साक्षात्कर्तुकामःसन्पूर्वोक्तमभिनंदति ॥३॥ अर्जुनोभगवद्भक्तिविशुद्धांतर्मनायतः ॥ ममशोकनिवृत्त्यर्थंवाक्यंगोप्यंत्वयेरितम् ॥ ४ ॥ यदुत्कृष्टफलेमोक्षेपर्यवसायिसर्वथा ॥ आत्मा नात्मविवेकैकविषयंसंशयापहम् ॥ ५ ॥ तेनमोहोविनष्टोमेदेहाद्यध्यासलक्षणः ॥ अशोच्यानन्वशोचस्त्वमित्यारभ्यविवेचनम् ॥ ६ ॥ षष्ठा

अर्जुनउवाच॥ मदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितम्॥ यत्त्वयोक्तंवचस्तेनमोहोऽयंविगतोमम ॥ १ ॥ भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया॥ त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययम् ॥ २ ॥

ध्यायांतमेवोक्तंत्वंपदार्थस्यमुख्यतः ॥ तेनहंताहमेतेषांहन्यंतेतेमयेतिच ॥ ७ ॥ मोहोनष्टोऽक्रियंश्रुत्वास्वात्मानमजरामरम् ॥ तथैवसप्तमा ध्यायादारभ्यदशमांततः ॥ ८ ॥ तत्पदार्थोविनिर्णीतःश्रीहरेर्वचसाश्रुतः ॥ कृष्णपादारविंदेयन्मानसंषट्पदायते ॥ ९ ॥ मायादुरत्ययातीर्णातेनेत्थंतेननिश्चितम् ॥ १० ॥ १ ॥ भूतानांजन्मविलयौविस्ताराद्भवतःश्रुतौ ॥ पद्मपत्रविशालाक्षतवैश्वर्यमपिश्रुतम् ॥ १ ॥ विश्वसृष्ट्या दिकर्तृत्वेऽप्यविकारित्वमात्मनः ॥ शुभादेःकारयितृत्वेऽप्यवैषम्यंमहेशितुः ॥ २ ॥ विचित्रफलदातृत्वेऽप्यौदासीन्यमसंगता ॥ इत्यादित वमाहात्म्यमक्षयंचश्रुतंमया ॥ ३ ॥ २ ॥

एवंतवात्यतर्क्यश्रीतेजऐश्वर्यदर्शनात् ॥ इत्थंशास्त्रोत्थयाबुद्ध्यासम्यगनुमिनोम्यहम् ॥ १ ॥ त्वमक्षरंपरंब्रह्मवेदितव्यंमुमुक्षिभिः॥ वैराग्यादियु
तैःसम्यग्वेदांतश्रवणादिना ॥ २ ॥ विश्वस्यास्यसमस्तस्यपरोत्कृष्टस्त्वमाश्रयः ॥ अतएवासिनित्यस्त्वंशाश्वतोधर्मरक्षकः ॥ ३ ॥ धर्मस्यनित्य
वेदेनप्रतिपाद्यतयास्यच ॥ त्वंहिपालयितानाशशून्यस्तस्माच्चिरंतनः ॥ ४ ॥ परमात्मासिपुरुषोविदितोमेपरात्परः ॥ ५ ॥१८ ॥ आदिर्मध्यं
तथांतश्चयस्यतेनास्तिकार्हिचित् ॥ अपरिच्छिन्नवीर्यत्वादनंतायस्यबाहवः ॥ १ ॥ नेत्रेयस्येंदुसूर्यौस्तःप्रचंडाग्निसमाननम् ॥ स्वतेजसाखिलं
विश्वंतापयंतमिदंतथा ॥ २ ॥ तंत्वांपश्यामिविश्वेशंव्याप्तंयेनजगत्त्रयम् ॥ ३ ॥ १९ ॥ विश्वरूपभृताव्याप्तंद्यावाभूम्योर्यदंतरम् ॥ दिशः

त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानम् ॥ त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वं
पुरुषोमतोमे ॥ १८ ॥ अनादिमध्यांतमनंतवीर्यमनंतबाहुंशशिसूर्यनेत्रम् ॥ पश्यामित्वांदीप्तहु
ताशवक्त्रंस्वतेजसाविश्वमिदंतपंतम् ॥ १९ ॥ द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदिशश्च
सर्वाः ॥ दृष्ट्वाद्भुतंरूपमुग्रंतवेदंलोकत्रयंप्रव्यथितंमहात्मन् ॥२०॥ अमीहित्वांसुरसंघाविशंतिके
चिद्भीताःप्रांजलयोगृणंति ॥ स्वस्तीत्युक्त्वामहर्षिसिद्धसंघास्तुवंतित्वांस्तुतिभिःपुष्कलाभिः॥२१॥

सर्वास्त्वयैकेनव्याप्तास्तेरूपमीदृशम् ॥ १ ॥ अतिविस्तीर्णकंदृष्ट्वामहातेजस्त्वतस्तव ॥ उग्ररूपमिदंलोकत्रयंभीतमतीवच ॥ २ ॥ साधूनाम
भयंदेहित्वंमहात्मतयाहरे ॥ ३ ॥ २० ॥ अथभूभारसंहारकारित्वंस्वात्मनःपरम् ॥ पश्यन्प्रकटयंतंश्रीभगवंतमुवाचह ॥ १ ॥ भुवोभारात्व
तारार्थंदेवसंघाःसहस्रशः ॥ नृरूपेणावतीर्णायेयुध्यमानाविशंतिते ॥ २ ॥ त्वामेवासुरसंघाश्चदुर्योधनमुखानृपाः ॥ दृश्यंतेप्रविशंतोऽत्रभी
ताःप्रांजलयोविभुम् ॥ ३ ॥ स्तुवंतित्वांपरेशक्ताःसंतोऽप्यत्रपलायने ॥ उत्पातादिनिमित्तानिह्युपलभ्यमहारणे ॥ ४ ॥ स्वस्त्यस्तुसर्वभूते
भ्यइत्युच्चार्यपुनःपुनः ॥ महर्षीणांचसिद्धानांसमूहास्त्वांस्तुवंतिच ॥ ५ ॥ स्तुतिभिःपरिपूर्णाभिर्गुणैरैश्वर्यबोधकैः ॥ ६ ॥ २१ ॥

दर्शितंविश्वरूपंयच्छ्रीमद्भगवताद्भुतम् ॥ तद्दृत्तेनैवदिव्येनसर्वादृश्यमपीहतत् ॥ १ ॥ अहोपश्यामिनेत्रेणममभाग्यप्रकर्षतः ॥ इतिस्वानुभ
वंप्राहुःकुर्वन्प्रोवाचपांडवः ॥ २ ॥ पश्यामितवदेहेऽस्मिन्विश्वरूपेसुरानहम् ॥ समस्तानेववस्वादींस्वदृत्तेनैवचक्षुषा ॥ ३ ॥ तथाभूतविशेषा
णांस्थाणुजंगमरूपिणाम् ॥ नानासंस्थानयुक्तानांसमूहान्नेत्रगोचरान् ॥ ४ ॥ चतुर्मुखंसमस्तानामीशितारंत्वयिस्थितम् ॥ भूपद्ममध्येमे
वोर्ध्वकर्णिकासनसंस्थितम् ॥ ५ ॥ तथैवर्षीन्वसिष्ठादीन्समस्तान्मंत्रदर्शिनः ॥ वासुकिप्रभृतीन्सर्पान्दिव्यान्दिविभवांस्तथा ॥ ६ ॥ १५॥

अर्जुनउवाच ॥ पश्यामिदेवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान् ॥ ब्राह्माणमीशंकमलास
नस्थमृषींश्चसर्वानुरगांश्चदिव्यान् ॥१५॥ अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोऽनंतरूपम् ॥
नांतंनमध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपम् ॥ १६ ॥ किरीटिनंगदिनंचक्रिणंचतेजो
राशिंसर्वतोदीप्तिमंतम् ॥ पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥ १७ ॥

बाहवश्चोदराणीहवक्त्राणिनयनानिच ॥ यस्यानेकानितंत्वाहंपश्यामिविश्वरूपिणम् ॥ १ ॥ सर्वत्रानंतरूपंचापरिच्छिन्नंमहत्तरम् ॥ नावसा
नंनमध्यंतेनादिंपश्याम्यहंतव ॥ २ ॥ हेविश्वेशसमस्तात्मन्नित्येवंसंभ्रमाद्वचः ॥ ३ ॥ १६ ॥ तंप्रकारांतरेणेशंविशिनष्टिचिदद्वयम् ॥ गदाकि
रीटचक्रादिधारिणंतेजसांनिधिम् ॥ १ ॥ सर्वतोदीप्तियुक्तंचपश्यामीशानमद्भुतम् ॥ विनादिव्येननेत्रेणत्वामशक्यंनिरीक्षितुम् ॥ २ ॥
सर्वतोदीप्तयोर्वन्हिसूर्ययोरिवभायुतम् ॥ अत्यशक्यंपरिच्छेत्तुमित्थंचायमियानिति ॥ ३ ॥ १७ ॥

येभ्यःपराजयाशंकाममासीत्तेनृपाअमी ॥ दुर्योधनप्रभृतयोधृतराष्ट्रसुताःशतम् ॥ १ ॥ शल्यादीनांमहीपानांसमूहैःसहतेऽखिलाः॥ त्वांविशं
तितथाभीष्मद्रोणकर्णादयोऽप्यमी ॥ २ ॥ अजेयत्वेनयेलोकेशूराःसंभावितादहिते ॥ अस्मदीयैःसहानेकैर्धृष्टद्युम्नादिभिस्तथा ॥ ३ ॥ यो
धमुख्यैर्विशंतित्वामित्यनेनान्वयोऽस्यच ॥ ४ ॥ २६ ॥ तवदंष्ट्राकरालानिवक्त्राणितेत्वरान्विताः ॥ विशंतिभीषणान्येतेसर्वेदुर्योधनादयः
॥ १ ॥ तत्रचूर्णीकृतैःकेचिच्छिरोभिःसंयुताभटाः ॥ दंतांतरेषुसंलग्नादृश्यंतेतेमयास्फुटम् ॥ २ ॥ २७ ॥ कथंतेप्रविशंत्येतद्दृष्टांताभ्यांनिदर्श्य

**अमीचत्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैवावनिपालसंघैः ॥ भीष्मोद्रोणःसूतपुत्रस्तथासौसहास्मदी
यैरपियोधमुख्यैः॥ २६ ॥ वक्त्राणितेत्वरमाणाविशंतिदंष्ट्राकरालानिभयानकानि ॥ केचिद्विलग्ना
दशनान्तरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः ॥ २७ ॥ यथानदीनांबहवोऽबुवेगाःसमुद्रमेवाभिमुखाद्र
वंति ॥ तथातवामीनरलोकवीराविशंतिवक्त्राण्यभिविज्वलंति ॥ २८ ॥ यथाप्रदीप्तंज्वलनंपतं
गाविशंतिनाशायसमृद्धवेगाः ॥ तथैवनाशायविशंतिलोकास्तवापिवक्त्राणिसमृद्धवेगाः॥ २९ ॥**

ते ॥ बहुमार्गप्रवृत्तानांनदीनांबहवोऽप्यपाम् ॥ १ ॥ वेगवन्तःप्रवाहावैसमुद्राभिमुखायथा ॥ समुद्रंप्रविशंत्येवंनृणांवीरामहत्तराः ॥ २ ॥
भीष्मद्रोणादयःसर्वेतववक्त्राणिसर्वतः ॥ प्रविशंतिज्वलंत्येतेमहाकालेनयोजिताः ॥ ३ ॥ २८ ॥ यथापतंगाउद्धृतवेगास्तेबुद्धिपूर्वकम् ॥
विशंत्यग्निंज्वलंतंचस्वनाशायतथैवते ॥ १ ॥ दुर्योधनादयःसर्वेवेगवंतोमुखानिते ॥ मरणायविशंतीमेबुद्धिपूर्वंप्रवाहतः ॥ २ ॥ २९ ॥

नृपाणांयोद्धुकामानांश्रीमद्भगवतोमुखे ॥ प्रवेशप्रकारंप्रोच्यतदाभगवतोहरेः ॥ १ ॥ तद्वासांसंप्रवृत्तेश्चप्रकारंप्राहपांडवः॥ आस्वादयसितान्सर्वान्दुर्योधनमुखान्नृपान् ॥ २ ॥ ग्रसमानोऽतिवेगेनविशतस्खांसमंततः॥ अंतःप्रवेशयन्वक्त्रैःप्रज्वलद्भिःसमंततः॥ ३ ॥ समस्तंजगदापूर्यतेजोभिःसर्वतस्तव ॥ दीप्तयस्तीव्रवन्ह्याभाःसंतापंजनयंत्यमूः ॥ ४ ॥ ३० ॥ कोभवानुग्ररूपस्खंमह्यंकथयसद्गुरो ॥ अतएवनमस्तुभ्यमस्तुसर्वेश्वरायच ॥ १ ॥ प्रसन्नोभवभक्तायानुग्राह्यायादिदैवत ॥ भवंतंज्ञातुमिच्छामिसर्वहेतुंविशेषतः॥ २ ॥ तवचेष्टांनजानामियस्मात्तवसखापिसन् ॥ ३ ॥ ३१ ॥ एवंसंप्रार्थितोविष्णुर्जिष्णुनातिप्रियेणसः ॥ स्वयंयश्चयदर्थाचप्रवृत्तिस्तच्चिभिर्वदन् ॥ १ ॥ उवाचपरमैश्वर्यनिधिः

लेलिह्यसेग्रसमानःसमंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राःप्रतपंतिविष्णो॥३०॥आख्याहिमेकोभवानुग्ररूपोनमोऽस्तुतेदेववरप्रसीद ॥ विज्ञातुमिच्छामिभवंतमाद्यंनहिप्रजानामितवप्रवृत्तिम् ॥३१॥ श्रीभगवानुवाच ॥ कालोऽस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृत्तः ॥ ऋतेऽपित्वांनभविष्यंतिसर्वेयेऽवस्थिताःप्रत्यनीकेषुयोधाः ॥३२॥

श्रीभगवानिति ॥ कालोऽहंसर्वसंहर्ताक्रियाशक्त्युपबृंहितः ॥२॥ सर्वेश्वरोभवामीहेदानींवृद्धिंगतःपराम् ॥ लोकान्दुर्योधनादींश्चसर्वान्भक्षयितुंह्यहम् ॥ ३ ॥ प्रवृत्तोऽस्मिजगत्कर्तापातासंहारकृद्विभुः ॥ मत्प्रवृत्तिंविनाह्येवंकथंस्यादितिचेच्छृणु ॥ ४ ॥ त्वामर्जुनंविनाशूरंत्वद्व्यापारंविनापिते ॥ मद्व्यापारेणशुद्धेनभीष्मद्रोणादयोऽखिलाः ॥ ५ ॥ विनंक्ष्यंत्यत्यजेयत्वाल्लोकेसंभाविताअपि ॥ येचाप्यवस्थिताअन्येप्रतिपक्षचमूषुभोः ॥ ६ ॥ योद्धारस्तेमयासर्वेहतत्वादेवसंतिनो ॥ व्यापारस्तवतत्रस्यादकिंचित्करएवहि ॥ ७ ॥ ३२ ॥

त्वद्व्यापारंविनाप्येतेमयैवनिहतायतः ॥ तस्मात्त्वंभवयुद्धायसमुद्युक्तोऽत्रकेवलम् ॥ १ ॥ भीष्मादयोमहाशूराअजेयाअमरैरपि ॥ अर्जुनन जिताइत्थंलभस्वत्वंयशोऽमलम् ॥ २ ॥ जित्वाशत्रूननायासाद्भुंक्ष्वराज्यमकंटकम् ॥ मयैवैतेहताःपूर्वंनिमित्तंकेवलंभव ॥ ३ ॥ रथान्नपा तितास्तेत्वद्यशोलाभायकेवलम् ॥ शरान्वामेनसंधातुंशीलंयस्यतवेतिसः ॥ ४ ॥ त्वद्व्यापारोत्तरंतस्मान्मयैवैतेषुतद्रथात् ॥ पात्यमानेष्वकर्तृत्वं कल्पयिष्यंतितेत्वयि ॥ ५ ॥ ३३ ॥ धनुर्वेदाचार्योममगुरुरयंद्रोणउचितैःस्वयंदिव्यैरस्त्रैर्युतइहविजेतुंनसुशकः ॥ तथाभीष्मोवीरोरणभु विगतोऽत्यंतसुबलोनजेतुंशक्योऽभूद्युधिपरशुरामेणचपुरा ॥ १ ॥ तथाजयद्रथोयस्यपितोग्रेतपसिस्थितः ॥ यःशिरोममपुत्रस्यपृथिव्यांपात यिष्यति ॥ २ ॥ पतिष्यतिस्वयंतस्यशिरश्चेतिविनिश्चयः ॥ तथाकर्णोऽपिसंपन्नशक्त्यावासवदत्तया ॥ ३ ॥ एकातिवीरघातिन्यामोघीकर्तु

तस्मात्त्वमुत्तिष्ठयशोलभस्वजित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धम् ॥ मयैवैतेनिहताःपूर्वमेवनिमित्त मात्रंभवसव्यसाचिन् ॥ ३३ ॥ द्रोणंचभीष्मंचजयद्रथंचकर्णंतथान्यानपियोधवीरान् ॥ मया हतांस्त्वंजहिमाव्यथिष्ठायुध्यस्वजेतासिरणेसपत्नान् ॥ ३४ ॥

मशक्यया ॥ स्वयंचसूर्यपुत्रोऽस्तिदिव्यास्त्रबलसंयुतः ॥ ४ ॥तथान्येऽपिमहाशूराअश्वत्थामकृपादयः॥ सर्वथादुर्जयाःसंतितेषुसत्सुकथंजयः ॥ ५ ॥ कथंनिष्कंटकंराज्यंयशोलप्स्येऽथवाकथम् ॥ इत्यर्जुनाशयंश्रीशोऽभिलक्ष्याहोत्तरंवचः ॥६॥ द्रोणंभीष्मंतथाकर्णंजयद्रथमथापरान् ॥ योधवीरांस्त्वदाशंकागोचरानखिलानिमान् ॥ ७ ॥ कालात्मनामयेशेनहतांस्त्वंजहिसंगरे ॥ हतानांहननेकोवातवपार्थपरिश्रमः ॥ ८ ॥ यथाबोधप्रतापेनध्वस्तंविश्वंसहेतुकम् ॥ तत्त्वमस्यादिवाग्जन्मधीर्हिनस्तिप्रमात्मिका ॥ ९ ॥ तथात्वंमत्प्रतापेनविध्वस्तंशत्रुसैनिकम् ॥ ज हिस्थैर्यंसमाश्रित्यनतेतद्धननेश्रमः ॥ १० ॥ शक्ष्याम्यहंकथंत्वेवंपीडांमागाभयोद्भवाम् ॥ युद्ध्यस्वत्वंभयंत्यक्त्वाजेष्यस्येवरणेरिपून् ॥ ११ ॥ तस्मात्कृतोऽपिस्वस्यत्वंमाशंकिष्ठाःपराजयम् ॥ पापवधनिमित्तंवाश्रीहरेरयमाशयः ॥ १२ ॥ ३४ ॥

रुद्रावसवआदित्याःसाध्याविश्वेऽश्विनौतथा ॥ मरुतःपितरश्चैतेगंधर्वाणांसमूहकाः॥ १ ॥ यक्षाणामसुराणांचसिद्धानांयेव्रजास्तथा ॥ तएते विस्मिताःसंतस्त्वादृशाद्भुतदर्शनम् ॥ २ ॥ पश्यंतित्वांमहद्भूतंविश्वरूपमलौकिकम् ॥ अलौकिकचमत्कारमापद्यंतेऽखिलाअपि ॥ ३॥२२॥ अतिप्रमाणंतेरूपंबहुनेत्रमुखान्वितम् ॥ बहवोबाहवोयस्मिन्पादाःसंततथोरवः ॥ १ ॥ उदराणिबहून्येवंबहुदंष्ट्राभिरुग्रकम् ॥ तथारूपममी लोकादृष्ट्वाभीताअहंतथा ॥ २ ॥ २३ ॥ नभोव्यापिनमत्यंतंप्रज्वलंतंसमंततः ॥ नानासंस्थानसंयुक्तंभीषणंविवृताननम् ॥ १ ॥ दीप्तवि

रुद्रादित्यावसवोयेचसाध्याविश्वेऽश्विनौमरुतश्चोष्मपाश्च ॥ गंधर्वयक्षासुरसिद्धसंघावीक्षंते त्वांविस्मिताश्चैवसर्वे ॥२२ ॥ रूपंमहत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादम् ॥ बहूदरंबहुदंष्ट्रा करालंदृष्ट्वालोकाःप्रव्यथितास्तथाहम् ॥ २३ ॥ नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशा लनेत्रम् ॥ दृष्ट्वाहित्वांप्रव्यथितांतरात्माधृतिंनविंदामिशमंचविष्णो ॥२४॥ दंष्ट्राकरालानिचते मुखानिदृष्ट्वैवकालानलसन्निभानि ॥ दिशोनजानेनलभेचशर्मप्रसीददेवेशजगन्निवास ॥ २५ ॥

स्तीर्णनेत्रंत्वांदृष्ट्वाभीतंमनोमम ॥ नापिधैर्यंलभेविष्णोनशांतिंमनसोलभे ॥ २ ॥ २४ ॥ भयंकराणिदंष्ट्राभिर्विकृतत्वान्मुखानिते ॥ प्रलयान लतुल्यानिदृष्ट्वैवातिभयान्वितः ॥ १ ॥ पूर्वापरविवेकेननजानेऽहंदिशोभ्रमात् ॥ नलभेऽहंसुखंस्वामिंस्वद्रूपस्यापिदर्शने ॥ २ ॥ प्रसन्नोभवदे वेशजगदाधारमांप्रति ॥ यथाऽहंनिर्भयोभूत्वात्वद्दर्शनसुखंलभे ॥ ३ ॥ २५॥

हर्षादिविषयत्वेऽपिहेतुमाहजगत्पतेः ॥ कस्माद्धेतोर्नतेतुभ्यंनमस्कुर्युःपुरेऽरिताः ॥ १ ॥ सर्वेऽपिहेमहात्मंस्त्वंपरमोदारचिद्घनः ॥ अपरिच्छिन्नदेवेशनियंतात्वंविधेरपि ॥ २ ॥ हेसमस्ताश्रयेशानतुभ्यंकीदृग्विधायच ॥ ब्रह्मणोऽपिनियंत्रेतत्पित्रेतद्वैशिकायच ॥ ३ ॥ किंचप्रतीयमानंयत्तत्सद्विधिमुखेनवै ॥ नास्तीतिभानविषयमसत्तद्यन्निषेधतः ॥ ४ ॥ व्यक्ताव्यक्तंचवासर्वंसदसच्चांपरंतथा ॥ यदक्षरंपरंब्रह्मतदपित्वंपरात्पर ॥ ५ ॥ त्वत्तोभिन्नंनचस्थूलंनसूक्ष्मंनापिकारणम् ॥ त्वमात्मासर्ववस्तूनांत्वामेतैर्हेतुभिर्विभुम् ॥ ६ ॥ सर्वेलोकानमंतीतिनचित्रं किमपीश्वरे ॥ ७ ॥ ३७ ॥ भक्त्युद्रेकात्पुनःस्तौतिभगवंतमुदारधीः ॥ जगतःसर्गहेतुत्वादादिदेवःसनातनः ॥ १ ॥ त्वमनादिरशेषस्यल

कस्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्मणोऽप्यादिकर्त्रे ॥ अनंतदेवेशजगन्निवासत्वमक्षरं सदसत्तत्परंयत् ॥ ३७ ॥ त्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानम् ॥ वेत्तासिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूप ॥ ३८ ॥

यस्थानतयास्यच ॥ निधानंजगतःसर्वोपादानत्वेनकारणम् ॥ २ ॥ वेदितासर्वविश्वस्यवेदनार्हत्वमेवच ॥ समस्तस्यापिवेद्यस्यज्ञातरिज्ञानरूपिणि ॥ ३ ॥ कल्पितत्वान्नसंबंधोवास्तवोदृश्यसाक्षिणोः ॥ अविद्यादिविनिर्मुक्तंसच्चिदानंदमद्वयम् ॥ ४ ॥ यत्परंधामविष्णवाख्यंतत्त्वमेवपरंपदम् ॥ सत्तास्फूर्तिस्वरूपेणत्वयाव्याप्तमिदंजगत् ॥ ५ ॥ स्वतःसत्तादिशून्यंतद्विश्वंकार्यंहिमायिकम् ॥ त्वयिमायिकसम्बन्धात्स्थितिकालेऽस्तिसर्वग ६ ॥ ३८ ॥

हतेभीष्मेतथाद्रोणेकर्णेचविनिपातिते ॥ जयद्रथप्रभृतिषुहतेषुजयशंसिषु ॥ १ ॥ हतोदुर्योधनोवनंतैर्विनासनिराश्रयः ॥ इत्यंतरमनुसंधाय धृतराष्ट्रोनृपोयदि ॥ २ ॥ स्वजयाशांपरित्यज्यसंधिंकुर्यात्तदास्वयम् ॥ उभयेषांभवेच्छांतिरित्यभिप्रायवांस्ततः ॥ ३ ॥ किंवृत्तमित्यपेक्षा यामुवाचेतिससंजयः ॥ पूर्वोक्तंवचआकर्ण्यकेशवस्यमहेशितुः ॥ ४ ॥ इन्द्रदत्तकिरीटेनयुक्तोऽसौशूरसत्तमः ॥ निवातकवचादीनांरणेसंहा रकोऽर्जुनः॥ ५ ॥ कृतांजलिःकंपमानःपरमाश्चर्यदर्शनात् ॥ नमस्कृत्यपुनःकृष्णंभक्तक्लेशापहंविभुम् ॥६॥ प्राहसगद्गदंवाक्यंश्रवणेऽतिसुरवा वहम् ॥ हर्षेणचभयेनाश्रुपूर्णाक्षित्वेसतिस्वयम् ॥ ७ ॥ कफरुद्धगलत्वेनविकारोयोगिरांभवेत् ॥ मंदत्वसप्रकंपत्वरूपःसोऽयंहिगद्गदः ॥ ८ ॥

संजयउवाच ॥ एतच्छ्रुत्वावचनंकेशवस्यकृताजलिर्वेपमानःकिरीटी ॥ नमस्कृत्वाभूयएवाहकृ ष्णंसगद्गदंभीतभीतःप्रणम्य ॥ ३५ ॥ अर्जुनउवाच ॥ स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृ ष्यत्यनुरज्यतेच ॥ रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ॥ ३६ ॥

तद्युक्तंवचनंप्राहात्यंतभीतश्चसंस्तथा ॥ प्राङ्नमस्कृत्यभूयोऽपिप्रणम्यानतकंधरः ॥ ९ ॥ ३५ ॥ सर्वेंद्रियगणाधीशत्वमत्यंताद्भुतेश्वरः ॥ कीर्तनेनतवात्यंतप्राशस्त्यश्रवणेनच ॥ १ ॥ नाहमेवप्रहृष्यामिकेवलंकिंतुसर्वतः ॥ जगच्चेतनमात्रंहिदुष्टरक्षोविरोधियत् ॥ २ ॥ प्रकृष्टंहर्ष माप्नोतीत्येवंयद्युक्तमेवतत् ॥ त्वद्विषयेजगत्सर्वमनुरागमुपैतियत् ॥ ३ ॥ युक्तंतदपितद्वच्चभयाविष्टानिसंतियत् ॥ सर्वासुदिक्षुरक्षांसिपला यंतेऽतिसांप्रतम् ॥ ४ ॥ सिद्धानांकपिलादीनांसमूहास्त्वांजगद्गुरुम् ॥ नमस्यंतीतियत्तच्चयुक्तमेवजगद्गुरो ॥ ५ ॥ प्रकीर्त्येत्यस्यसर्वत्रतवेत्य स्यतथान्वयः ॥ स्थानेइतिपदस्यार्थोविषयेतद्विशेषणम् ॥ ६ ॥ ससर्वाभासुद्भत्स्वामीहर्षादिविषयोहरिः ॥ ७ ॥ ३६ ॥

यच्चावपरिहासार्थंक्रीडाशय्यासनादिषु ॥ मयात्वंपरिभूतोऽसिरहसिस्थितएववा ॥ १ ॥ यद्वातेषांसखीनांचसमक्षंहाससंसदि ॥ हेनिर्विका
रतत्सर्वमपराधसहस्रकम् ॥ २ ॥ क्षमांत्वांकारयेऽचिंत्यप्रभावाहंकृपांकुरु ॥ अतोऽचिंत्यप्रभावेणनिर्विकारेणचक्षया ॥ ३ ॥ अतिकारु
णिकेनैवत्वन्माहात्म्याप्रवेदिनः ॥ ममापराधाःक्षंतव्याःश्रीमद्भगवताऽधुना ॥ ४ ॥ ४२ ॥ अत्यचिंत्यप्रभावत्वंप्रपंचयतिपांडवः ॥ चराच
रस्यलोकस्यपितात्वंपूज्यईश्वरः ॥ १ ॥ गुरुःशास्त्रोपदेष्टाऽसिगरीयान्सर्वथाऽप्यसि ॥ त्वत्समोनास्तिकुत्रापिकुतःस्यादधिकोहरेः ॥ २ ॥

**यच्चावहासार्थमसत्कृतोऽसिविहारशय्यासनभोजनेषु ॥ एकोऽथवाऽप्यच्युततत्समक्षंतत्क्षाम
येत्वामहमप्रमेयम् ॥ ४२॥ पिताऽसिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् ॥ नत्वत्स
मोऽस्त्यभ्यधिकःकुतोऽन्योलोकत्रयेऽप्यप्रतिमप्रभाव ॥ ४३ ॥ तस्मात्प्रणम्यप्रणिधायकायंप्र
सादयेत्वामहमीशमीड्यम् ॥ पितेवपुत्रस्यसखेवसख्युःप्रियःप्रियायार्हसिदेवसोढुम् ॥ ४४ ॥**

त्वत्तोऽन्यस्येश्वरस्यैवाभावादप्रतिमैश्वर ॥ ३ ॥ ४३ ॥ तस्मात्त्वाहंनमस्कृत्यपतित्वादंडवत्क्षितौ ॥ प्रसादयेऽखिलस्तुत्यंत्वामीश्वरपदास्प
दम् ॥ १ ॥ यथापुत्रस्यक्षमतेह्यपराधंपितायथा ॥ सख्युःसखापतिःसत्याभार्यायाःक्षमतेयथा ॥ २ ॥ तथाममापराधंत्वंसोढुमर्हसिकेशव ॥
अनन्यशरणत्वाच्चकल्याणगुणसागर ॥ ३ ॥ इत्थंस्तुवंतमनिशंजगतामधीशःकृष्णःकृपाजलधिरात्मवतांशरण्यः ॥ स्वीयंपदंनयतिशांतिसु
खैकधामयत्तंभजेसततमीशमहंमुकुंदम् ॥ ४ ॥ ४४ ॥

अपराधक्षमांप्रार्थ्यपुनःप्राग्रूपदर्शनम् ॥ विश्वरूपोपसंहारद्वाराप्रार्थयतेऽधुना ॥ १ ॥ कदाप्यदृष्टंपूर्वंयद्विश्वरूपंमहत्तरम् ॥ दृष्ट्वाहृष्टोऽस्मि तद्रूपंश्रीमद्भगवतोहरेः ॥ २ ॥ भीषणत्वाद्भयेनैवमनोमेव्याकुलीकृतम् ॥ अतस्तदेवप्राचीनंममप्राणादपिप्रियम् ॥ ३ ॥ मह्यंदर्शयदेवेश प्रसीदजगतांपते ॥ ४ ॥ ४५ ॥ प्रार्थनीयंस्वरूपंतद्विवृणोतिहरेर्जयः ॥ किरीटिनंगदावंतंचक्रहस्तमहंप्रियम् ॥ १ ॥ पूर्ववद्द्रष्टुमिच्छामित्वांश्रियोवासमच्युतम् ॥ चतुर्भुजेनतेनैवरूपेणप्रकटोभव ॥ २ ॥ सहस्रबाहोविश्वात्मन्नुपसंहृत्यसर्वतः ॥ विश्वरूपंस्वसौम्येनरूपेणप्रकटोभव ॥ ३ ॥ ४६ ॥ एवंप्रसादितोविष्णुर्भीतंदृष्ट्वार्जुनंप्रियम् ॥ उपसंहृत्यतद्रूपमुवाचाश्वासयन्गिरा ॥ १ ॥ माभैषीस्त्वंयतःपार्थप्रसन्ने

अदृष्टपूर्वंहृषितोऽस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे ॥ तदेवमेदर्शयदेवरूपंप्रसीददेवेशजगन्निवास ॥ ४५ ॥ किरीटिनंगदिनंचक्रहस्तमिच्छामित्वांद्रष्टुमहंतथैव ॥ तेनैवरूपेणचतुर्भुजेनसहस्रबाहोभवविश्वमूर्ते ॥ ४६ ॥ श्रीभगवानुवाच ॥ मयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगात् ॥ तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्वम् ॥ ४७ ॥ नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः ॥ एवंरूपःशक्यअहंनृलोकेद्रष्टुंत्वदन्येनकुरुप्रवीर ॥ ४८ ॥

नमयातव ॥ विश्वरूपात्मकंश्रेष्ठंदर्शितंकरुणावशात् ॥ २ ॥ असाधारणसामर्थ्यादात्मयोगाभिधात्परम् ॥ तेजोमयंसमस्तंयच्चाद्यमंतविवर्जितम् ॥ ३ ॥ त्वदन्येननकेनापिदृष्टपूर्वंकथंचन ॥ ४ ॥ ४७ ॥ एतन्मद्रूपमैश्वर्यपदंदृष्ट्वासुदुर्लभम् ॥ कृतार्थोऽसित्वमित्याहतद्दौर्लभ्यंवदन्हरिः ॥ १ ॥ अध्ययनेनवेदानांवेदार्थस्यविचारणैः ॥ तुलापुरुषादिदानैःश्रौतकर्मभिरप्युत ॥ २ ॥ कृच्छ्रादिभिस्तपोभिर्वादुष्करैर्देहशोषकैः ॥ एवंरूपोनशक्योऽहंत्वदन्येनमहीतले ॥ ३ ॥ द्रष्टुंकुरुकुलश्रेष्ठमदनुग्रहमंतरा ॥ ४ ॥ ४८ ॥

मातेभयनिमित्तेयंपीडाभून्माविमूढता ॥ इदंघोरंमहद्रूपमीदृक्चातिभयंकरम् ॥ १ ॥ दृष्ट्वासर्वात्मकंनानाकारयुक्तंममेश्वरम् ॥ निर्भयोभव प्रीतात्मापुनस्त्वंपश्यमद्वपुः ॥ २ ॥ तदेवचघनश्यामंचतुर्बाहुंश्रियोज्ज्वलम् ॥ ३ ॥४९॥ इत्येवमर्जुनंप्रोच्यस्वकीयंरूपमीश्वरः॥ किरीटिनं गदाशंखचक्रादियुतमद्भुतम् ॥१॥ चतुर्भुजंचश्रीवत्सकौस्तुभप्रभयान्वितम् ॥ वनमालापरीतांगंहारकेयूरशोभितम् ॥२॥ पीतांबरधरंसर्वसौं दर्यरसवारिधिम् ॥ दर्शयामासभीतंतंभूत्वासौम्यवपुर्हरिः॥३॥ पुनराश्वासयामासपूर्ववत्करुणाकरः ॥ सर्वज्ञःसर्वशक्तिश्चकल्याणगुणसागरः ॥ ४ ॥ ५० ॥ ततोऽसौनिर्भयोभूत्वावाक्यमाहार्जुनोहरिम् ॥ दृष्ट्वेदंसौम्यरूपंतेवासुदेवाभिधंपरम् ॥ १ ॥ इदानींनिर्भयोभूत्वास्वास्थ्यं

मातेव्यथामाचविमूढभावोदृष्ट्वारूपंघोरमीदृङ्ममेदम् ॥व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेवमेरूपमिदंप्रपश्य ॥४९॥ संजयउ० ॥ इत्यर्जुनंवासुदेवस्तथोक्त्वास्वकंरूपंदर्शयामासभूयः ॥ आश्वासयामासचभीतमेनंभू त्वापुनःसौम्यवपुर्महात्मा ॥५०॥ अर्जुनउ० ॥ दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन ॥ इदानीमस्मिसंवृत्तःस चेताःप्रकृतिंगतः ॥ ५१ ॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम ॥ देवाअप्यस्यरूपस्यनि त्यंदर्शनकांक्षिणः॥५२॥ नाहंवेदैर्नतपसानदानेननचेज्यया ॥ शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा॥५३॥

प्राप्यात्मतांगतः ॥ २ ॥ ५१ ॥ स्वकृतस्यप्रसादस्यदुर्लभत्वंप्रदर्शयन् ॥ उवाचभगवानेवंस्वभावस्थंजयंप्रति ॥ १ ॥ विश्वरूपंमदीयंयत्त्वमिदं दृष्टवानसि ॥ तदत्यंतमशक्यंहिद्रष्टुंदेववरैरपि ॥ २ ॥ देवास्तद्रूपुमिच्छंतिसततंसात्विकाअपि ॥ नतुत्वमिवपूर्वंतेदृष्टवंतःकदाचन ॥ ३ ॥ नचैवाग्रेऽपिद्रक्ष्यंतिश्रीहरेरयमाशयः ॥ ४ ॥ ५२ ॥ कुतएतन्नदेवास्तेदृष्टवंतोनवापुनः ॥ द्रक्ष्यंतीतिश्रृणुत्वंमद्भक्तिर्यास्प्रेमलक्षणा ॥ १ ॥ नयेषांसासमुत्पन्नानतेतत्राधिकारिणः ॥ वेदैरधीतैस्तपसादानैर्यज्ञैरहंहरिः ॥ २ ॥ द्रष्टुमेवंविधोनास्मिशक्योदृष्टोयथात्वया ॥ ३ ॥ ५३ ॥

वायुःसर्वजगत्प्राणोयमःप्राणिनियामकः ॥ अग्निःसमस्तदेवानांमुखंप्राण्यन्नपाचकः ॥ १ ॥ प्राणाप्यायनकर्तासौवरुणोरसपालकः ॥ श
शांकओषधिस्वामीतथास्वर्यादयोऽधिपाः ॥ २ ॥ प्रजापतिर्विराट्संम्राट्सृष्टिकर्ताचविश्वसृक् ॥ पितामहस्त्वष्टुश्चपितात्वंजगदीश्वरः
॥ ३ ॥ सर्वदेवात्मकत्वेननमस्कार्योऽसिसर्वकैः ॥ यतस्तस्माद्वराकस्यममाप्यस्तुनमोनमः ॥ ४ ॥ तुभ्यंसर्वात्मनेभूयोभूयोऽप्यस्तुसहस्रशः॥
सहस्रकृत्वोभूयोऽपितुभ्यमस्तुनमोनमः ॥ ५ ॥ भक्त्याधिक्यान्नमस्कारेष्वलंबुद्धेरभावतः ॥ अत्रानयानमस्कारावृत्त्यास्रुच्यतइत्यपि ॥ ६ ॥
॥ ३९ ॥ अग्रभागेनमस्तुभ्यंपृष्ठतोऽपिनमोऽस्तुते ॥ दिक्षुस्थितायसर्वासुसर्वरूपनमोऽस्तुते ॥ १ ॥ अपरिच्छिन्नवीर्यस्त्वंतथाऽमितपराक्रमः॥

**वायुर्यमोऽग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च ॥ नमोनमस्तेऽस्तुसहस्रकृत्वःपुनश्चभू
योऽपिनमोनमस्ते ॥ ३९ ॥ नमःपुरस्तादथपृष्ठतस्तेनमोऽस्तुतेसर्वतएवसर्व ॥ अनंतवीर्यामि
तविक्रमस्त्वंसर्वंसमाप्नोषिततोऽसिसर्वः ॥ ४० ॥ सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेस
खेति ॥ अजानतामहिमानंतवेदंमयाप्रमादात्प्रणयेनवापि ॥ ४१ ॥**

जगत्सर्वंत्वमेकेनसद्रूपेणाखिलात्मना ॥ २ ॥ सम्यग्व्याप्नोष्यतःसर्वस्त्वंवत्तोनपृथङ्मनाक् ॥ ३ ॥ ४० ॥ त्वत्प्रभावापरिज्ञानाद्यतोऽहं
नित्यशोहरेः ॥ अपराधमकार्षंयत्ततत्क्षांकरुणाकरम् ॥ १ ॥ कारयामिप्रणम्याहमपराधक्षमामिति ॥ मयातुल्यवयाहीतिमत्वास्वोत्कर्ष
ताभ्रमात् ॥ २ ॥ हेकृष्णयादवसखेचेतिमूढेनसाम्यतः ॥ अभिभूययदुक्तंतेमहिमानमजानता ॥ ३ ॥ प्रमादाच्चित्तविक्षेपाच्चोक्तंस्नेहे
नवामया ॥ ४ ॥ ४१ ॥

यदिद्रष्टुमशक्यस्त्वंतपोवेदाध्वरादिभिः ॥ केनोपायेनतत्तर्हिद्रष्टुंशक्योऽसिचेतिचेत् ॥ १ ॥ साधनांतरव्यावृत्त्यैतुशब्दोबोध्यउत्तमैः ॥ मदेकनिष्ठयाप्रेमभक्त्यैवाहंमहेश्वरः ॥ २ ॥ दिव्यरूपधरोज्ञातुंशक्यःशास्त्रान्नरोत्तमैः ॥ साक्षात्कर्तुंस्वरूपेणवेदवाक्योत्थयाधिया ॥ ३ ॥ शक्य श्चास्मिसदाप्रेमभक्त्यैवाराधितोजनैः ॥ साक्षात्कारादविद्यातत्कार्यहान्याचतत्त्वतः ॥ ४ ॥ मत्स्वरूपतयैवाशुंशक्योऽहंहेपरंतप ॥ अन न्ययैवभक्त्यात्वंसदामामाश्रयार्जुन ॥ ५ ॥ ५४ ॥ गीताशास्त्रस्यसर्वस्यसारभूतोऽर्थआदरात् ॥ निःश्रेयसार्थिनांसम्यगनुष्ठानायचाधु ना ॥ १ ॥ पुंजीकृत्योच्यतेश्रीमद्धरिणाकरुणाब्धिना ॥ मदर्थकर्मवेदोक्तंकुर्वन्योमत्परायणः ॥ २ ॥ सुप्राप्यत्वेनयस्याहंनिश्चितोनापरो ऽर्थकः ॥ मदवाप्याशयानश्रमद्भक्तःसर्वथोत्तमः॥ ३ ॥ मामेवसर्वथाप्रीत्यासर्वोत्साहेनसर्वदा ॥ सर्वात्मनायोभजतेमत्प्रेम्णाविष्टमानसः॥ ४ ॥

भक्त्यात्वनन्ययाशक्यअहमेवंविधोऽर्जुन ॥ ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप ॥ ५४ ॥ मत्कर्मकृ न्मत्परमोमद्भक्तःसंगवर्जितः॥ निर्वैरःसर्वभूतेषुयःसमामेतिपांडव ॥५५॥ इतिश्रीमद्भगवद्गीता सूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविश्वरूपदर्शनंनामैकादशोऽध्यायः ॥११॥

पुत्रवित्तकलत्रादौभोगेष्वस्नेहवर्जितः ॥ सर्वभूतेष्वमद्दृष्ट्यात्यक्तशत्रुमतिःपुमान् ॥ ५ ॥ स्वस्यात्यंतापकारादिवृत्तेष्वप्युपकारकृत् ॥ ईदृशो दंभशून्योयोमद्भक्तोमामुपैतिसः ॥ ६ ॥ परागतिरहंतस्यहरिरेवनचापरा ॥ अयमर्थस्त्वयाज्ञातुमिष्टोऽतस्तेमयोदितः ॥ ७ ॥ नातःपरंचक र्तव्यंकिंचिदित्याशयोहरेः ॥ ८ ॥५५ ॥ सम्यग्वेदैरधीतैःश्रुतिमतिविधिनाकस्वनुष्ठानतोऽपिस्वांतःक्लेशैस्तपोभिर्निजसमकनकैर्ब्राह्मणेभ्यो ऽपिदत्तैः ॥ यःशक्योनैवलोकेकथमपिदिविजैर्द्रष्टुमिच्छद्भिरीशःशक्योयोऽनन्यभक्त्याप्रविशतुहृदयंमेसकृष्णःसभक्तिः ॥ १ ॥ इतिभावप्र काशेश्रीसदानंदविदाकृते ॥ हरिप्रसादमाहात्म्यंपूर्तिमेकादशोगतः ॥ २२७ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ३०६५ ॥

॥इतिश्रीमद्भगवद्गीतायांभावप्रकाशेएकादशोऽध्यायःसमाप्तः॥

अनयोर्योगयोर्मध्येपृच्छचतेसुशकोऽस्तिकः॥ योगोवापृच्छचतेसाक्षान्मोक्षहेतुरितिक्रमात् ॥१॥ विकल्प्यभगवानेवंसर्वज्ञोभक्तवत्सलः॥ उत्त
रंप्राहसगुणब्रह्मनिष्ठाप्रशंसया ॥ २ ॥ वासुदेवेभगवतिमयीडचेपरमेश्वरे ॥ सगुणेब्रह्मणिस्वच्छमनन्यशरणंमनः ॥ ३ ॥ प्रवेश्यमन्मयंकृत्वा
येमांयोगेश्वरेश्वरम् ॥ सर्वज्ञंसर्वकल्याणनिधिंसाकारमद्भुतम् ॥४॥ सात्विक्याश्रद्धयोपेताःसदोद्युक्तानिरंतरम् ॥ चिंतयंतितएतेमेऽभिप्रेता
योगवित्तमाः ॥ ५ ॥ सुशकोयोगएतेषांमतइत्याशयोहरेः ॥ ६ ॥ २ ॥ द्वितीयश्चेत्तदातस्यवक्ष्यमाणतयाधुना ॥ नास्तिप्रष्टव्यतातत्रे
त्याहश्रीमद्रमापतिः॥ १ ॥ येऽक्षरंनिर्विशेषंमांनिर्गुणंपर्युपासते ॥ मामेवप्राप्नुवंतीतिद्वितीयेनान्वयोऽस्यापि ॥ २ ॥ वैलक्षण्यंचपूर्वेभ्यस्तुश
ब्देनात्रसूच्यते ॥ अनिर्देश्यमशक्यंयद्व्यपदेष्टुंगिराक्षरम् ॥३॥ यतोऽव्यक्तंगिरांवृत्तिहेतुजातिगुणोज्झितम् ॥ गुणजातिक्रियायोगंद्वारीकृत्य

श्रीभगवानुवाच ॥ मय्यावेश्यमनोयेमानित्ययुक्ताउपासते ॥ श्रद्धयापरयोपेतास्तेमेयुक्ततमा
मताः ॥ २ ॥ येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते ॥ सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवम् ॥ ३ ॥

गिरांयतः ॥ ४ ॥ प्रवृत्तिर्निर्विशेषेतुनास्तितेषामभावतः ॥ कुतोजात्यादिराहित्यमित्यत्राहरमापतिः ॥ ५ ॥ सर्वत्रगंयतोव्यापिसर्वकार
णमद्वयम् ॥ परिच्छिन्नस्यकार्यस्यजात्यादेर्योगदर्शनात् ॥ ६ ॥ अपरिच्छिन्नचिद्धातोर्नास्तितद्योगइत्यतः ॥ अचिंत्यंतन्मनोवृत्तेरप्यगोच
रमक्षरम् ॥ ७ ॥ मायातत्कार्यरूपेयत्कूटेऽधिष्ठानभावतः ॥ तिष्ठत्याध्यासिकेनैवसंबंधेनाविकारिच ॥ ८ ॥ कूटस्थत्वेनसर्वेषांदोषाणांवार
णंकृतम् ॥ अतोमायाविकाराणामधिष्ठानतयाचलम् ॥ ९ ॥ अतएवध्रुवंनित्यंपरिणामविवर्जितम् ॥ शुद्धमेतादृशंब्रह्मवेदांतश्रवणादिभिः
॥ १० ॥ उपास्यार्थंयथाशास्त्रंविषयीकृत्यसंततम् ॥ तुल्यप्रत्ययसंतत्यातैलधारावदासनम् ॥ ११ ॥ यदस्त्युपासनंतेननिदिध्यासनसंज्ञि
ना ॥ साक्षात्कुर्वंतिमांप्रत्यगभिन्नंचिद्घनंसुखम् ॥ १२ ॥ ३ ॥

विषयेंद्रियसंयोगेसतिविक्षेपकारणे ॥ कथंपुनर्विजातीयप्रत्ययानांतिरस्कृतिः ॥ १ ॥ अतआहेंद्रियग्राममुपसंहृत्यसर्वतः ॥ उक्ताशमादि संपत्तिरेतेनसुविपश्चिताम् ॥ २ ॥ सतिभोगाभिलाषेस्यादिंद्रियाणांनसंयमः ॥ अतःसर्वत्रभोगेषुतुल्यायेषांमतिःसदा ॥ ३ ॥ शून्याहर्ष विषादाभ्यांरागद्वेषोज्झितामतिः ॥ सम्यग्ज्ञानेनतद्धेतोरज्ञानस्यविनाशनात् ॥ ४ ॥ विषयेषुपुराभ्यस्तदोषदृष्टेर्बलात्स्वयम् ॥ अभिलाषनिवृत्तेःस्यादिंद्रियाणांसुसंयमः ॥ ५ ॥ एतेनैववशीकारसंज्ञंवैराग्यमीरितम् ॥ अतएवात्मदृष्ट्यैतेहिंसाकारणवर्जिताः ॥ ६ ॥ सर्वदासर्वभूता

सन्नियम्येंद्रियग्रामंसर्वत्रसमबुद्धयः ॥ तेप्राप्नुवंतिमामेवसर्वभूतहितेरताः ॥ ४ ॥

नांहितएवरताबुधाः ॥ अभयंसर्वभूतेभ्योमत्तःस्वाहेतिमंत्रतः ॥ ७ ॥ दत्तायैःसर्वभूतेभ्योऽप्यभयात्मकदक्षिणा ॥ एतेनकृतसंन्यासाःस्मृतौ सिद्धाःप्रकीर्तिताः ॥ ८ ॥ अभयंसर्वभूतेभ्योदत्वासंन्यासमाचरेत् ॥ सर्वसाधनसंपन्नाःसंतएवंविधाजनाः ॥ ९ ॥ ब्रह्मभूताःस्वयंसाक्षा त्कारेणफलरूपिणा ॥ मामक्षरंपरंब्रह्मशुद्धमेवाप्नुवंतिते ॥ १०॥ प्रागपिस्वात्मभूतामेऽविद्याहान्याऽद्वयेमयि ॥ तिष्ठंतीत्याशयोविष्णोःश्रीम द्भगवतोहरेः ॥ ११ ॥ ४ ॥

किमाधिक्यंतदातेषामेतेभ्यःपूर्वयोगिनाम् ॥ इत्यत्राहजगन्नाथःसर्वनिष्ठास्पदास्पदम् ॥ १ ॥ पूर्वेषामपिभोगेभ्यआहृत्यसगुणेहरौ ॥ मनःप्रवेशेतत्कर्मरतत्वेचनिरंतरम् ॥ २ ॥ परश्रद्धान्वितत्वेचतेषांक्लेशोऽधिकोऽस्त्यपि ॥ परंतुनिर्गुणब्रह्मचिंतनासक्तचेतसाम् ॥३॥ आयासोऽतिशयेनास्तिहेतुमत्राहमापतिः ॥ यतोऽक्षरात्मकंब्रह्मगंतव्यंतत्फलात्मकम् ॥ ४ ॥ दुःखंयथातथाचैवकृच्छ्रेणैतदवाप्यते ॥ सर्वसाधनसंपन्नैरपिदेहाभिमानिभिः ॥ ५ ॥ अतोऽक्षरधियांदेहाभिमानत्यागहेतुकः ॥ वेदांतश्रवणाद्यैश्चसंदेहापनयात्मकः ॥ ६ ॥ क्लेशोऽधिकतरःप्रोक्तःपूर्वापे

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ॥ अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यते ॥ ५ ॥

क्षोविपश्चिताम् ॥ यद्यप्येकफलंतेषामुभयेषांतथापितु ॥ ७ ॥ सगुणब्रह्मनिष्ठानांसुकरोपायतोहरेः ॥ पदंप्राप्नुवतांश्रैष्ठ्यंसंमतंतदपेक्षया ॥ ८ ॥ यथाब्रह्मविदांतत्त्वसाक्षात्कारेणमुक्तता ॥ तथासगुणनिष्ठानामीश्वराराधनेनच ॥ ९ ॥ निरस्तप्रतिबंधानांविनाचार्योपदेशनम् ॥ श्रवणादेर्विनावृत्तिमीश्वरानुग्रहेणच ॥ १० ॥ तत्त्वज्ञानोदयेनैवसकार्याज्ञानबाधनात् ॥ प्रह्लादादिवदेवैषांकैवल्यंभवतिस्वयम् ॥ ११ ॥ ब्रह्मलोकगतानांवाभोगैश्वर्यावसानतः ॥ भवेत्कैवल्यसंसिद्धिर्ब्रह्मविद्याफलंपरम् ॥ १२ ॥ ५ ॥

श्रीगणेशायनमः ॥ अथद्वादशाध्यायव्याख्याप्रारंभः ॥ अनादौसंसारेजनिमृतिमयेभ्रांतिनिबिडेनिमग्नानांपुंसांक्वचिदपिसुखंनास्तिविमलम् ॥ तपोभिर्वादानैःक्रतुभिरपिवेदानुवचनैर्क्रतेऽत्यंतप्रेम्णाहरिपदसरोजेऽच्छसुखदे ॥ १ ॥ अतोऽहंतेनाथश्रुतिविशदकीर्तेर्मधुरिपोःशरण्यं पादाब्जंभ्रमरइवशांत्यादिनिलयम् ॥ सदाध्यातुंप्रेम्णारतिमतिगतीनांनिजगृहंधियायाचेज्ञातुंतवनिजवपुश्राद्वयमजम् ॥ २ ॥ मत्कर्मकृन्मत्परमोमद्भक्तोयःसएतिमाम् ॥ पूर्वाध्यायांतइत्यत्रमच्छब्दार्थोऽस्तिसंशयः॥३॥ किंनिराकारमेवोक्तंवस्तुमच्छब्दतोऽथवा॥ साकारमितिमच्छब्दउभयत्रापिदृश्यते ॥ ४ ॥ बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते ॥ शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा॥५॥ इत्येवमुभयोर्विष्णोरुपदेशोऽस्तिवस्तु

अर्जुनउवाच ॥ एवंसततयुक्तायेभक्तास्त्वांपर्युपासते ॥ येचाप्यक्षरमव्यक्तंतेषांकेयोगवित्तमाः ॥ १ ॥

नोः ॥ तत्राधिकारिभेदेनभवितव्यंव्यवस्थया ॥ ६ ॥ तत्रकिंचिंतनीयंस्यान्मयावस्तुमुमुक्षुणा ॥ साकारंवानिराकारमितिसंदेहशांतये ॥ ७ ॥ विद्ययोरुभयोर्मध्येकास्याच्छ्रेष्ठतरामता ॥ हरेरेवंबुभुत्सुःसन्नर्जुनःपरिपृच्छति ॥ ८ ॥ मत्कर्मकृन्मत्परमइत्यत्रोक्तप्रकारतः ॥ सावधानतया नित्यंयेप्रवृत्तामहोत्सवे ॥ ९ ॥ अनन्यशरणाःसंतस्वत्कर्मादौत्वयेरिते ॥ त्वामेवंविश्वरूपंश्रीभगवंतंगुणालयम् ॥१०॥ नैरंतर्येणसाकारंचिंतयंतिविचक्षणाः ॥ येचसंन्यस्तकर्माणस्त्यक्तसर्वैषणाबुधाः ॥ ११ ॥ परंब्रह्माक्षरंशुद्धंनिर्गुणंनिष्कलंशिवम् ॥ सर्वोपाधिविनिर्मुक्तंनिराकारंनिरामयम् ॥ १२ ॥ त्वांपर्युपासतेनित्यमखंडात्मानमव्ययम् ॥ केविशिष्टतरास्तेषामुभयेषांहियोगिनाम् ॥ १३ ॥ मयामुमुक्षुणास्थेयं केषामाश्रित्यसन्मतम् ॥ १४ ॥ १ ॥

तेषामेकाग्रभावेनमय्यावेशितचेतसाम् ॥ मिथ्याज्ञानंचतत्कार्यंमृत्युस्तद्रूपसागरात् ॥ १ ॥ अनायासेनसर्वोर्ध्वेशुद्धेब्रह्मणिचिद्घने ॥ सर्व बाधावधौतत्त्वज्ञानदानेनसत्वरम् ॥ २ ॥ अहंधारयितापार्थतस्मिन्नेवैकजन्मनि ॥ ३ ॥ यस्यातिसौष्ठवगुणामृतसारवार्धेःसौंदर्यसाररसिकाः प्रशमेऽप्यनीप्साः ॥ लोकान्पुनंतिकृपयांघ्रिरजोभिरद्धातंवासुदेवमुपयामिसतांशरण्यम् ॥ ४ ॥ ७ ॥ प्रबंधेनेयताह्येवंसगुणोपासनांहरिः ॥ स्तुत्वेदानींविधत्तेऽत्रमय्येवेत्यादिनास्फुटम् ॥ १ ॥ मय्येवसगुणेविष्णौसंकल्पाद्यात्मकंमनः ॥ स्थापयत्वंतथाबुद्धिंनिश्चयैकस्वरूपिणीम् ॥ २॥

तेषामहंसमुद्धर्तामृत्युसंसारसागरात् ॥ भवामिनचिरात्पार्थमय्यावेशितचेतसाम् ॥ ७॥
मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय ॥ निवसिष्यसिमय्येवअतऊर्ध्वंनसंशयः ॥ ८ ॥

विषयातरसंत्यागान्नामीशमनुचिंतय ॥ एवंचिंतयतस्तेयत्फलंस्याच्छृणुतत्स्फुटम् ॥ ३ ॥ निवत्स्यसिमयिध्येयेलब्धज्ञानोमदात्मना ॥ एत द्देहलयादूर्ध्वंनात्रशंकास्तिकाचन ॥ ४ ॥ ब्रह्मादयोऽपिसततंश्रुतिसारविज्ञायस्मिन्रताह्यवगणय्यपदंस्वकीयम् ॥ पद्मारताकमलपद्मविहा ययत्रश्रीशेतमेवमनसाहरिमाश्रयामि ॥ ५ ॥ ८ ॥

योगिनामुभयेषांप्राङ्मुमुक्षूणांविभज्यवै ॥ निष्ठोक्तातत्फलंमोक्षःसद्यःकालांतरेस्मृतः ॥ १ ॥ इदानींभक्तिरसिकाभोगमोक्षादिनिःस्पृहाः॥
येसंतिविरलाःकृष्णपादपद्मरसग्रहाः ॥ २ ॥ तेषामनिच्छतामप्याश्वहंमोक्षपदेपरे ॥ सतांधारयितेत्याहप्रेमभक्तिप्रियोहरिः ॥ ३ ॥ यद्यपी
शोऽस्तिसर्वेषांमोक्षदाताजनार्दनः ॥ तथापियत्नमुख्याद्यमुमुक्षुत्वंचयोगिनाम् ॥ ४ ॥ मोक्षेधारयितास्वामीज्ञानद्वाराधिकारिणाम् ॥ नि
ष्कामानांतुभक्तानांकृष्णपादानुरागिणाम् ॥ ५ ॥ नमुमुक्षाबुभुक्षेस्तःप्रह्लादेनतथेरितम् ॥ नाथयोनिसहस्रेषुयेषुयेषुव्रजाम्यहम् ॥ ६ ॥ ते

येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः ॥ अनन्येनैवयोगेनमांध्यायंतउपासते ॥ ६ ॥

षुतेष्वच्युताभक्तिस्त्वय्यच्युतसदास्तुमे ॥ याप्रीतिरविवेकानांविषयेष्वनपायिनी ॥ ७ ॥ त्वामनुस्मरतःसामेहृदयान्मापसर्पतु ॥ अतस्तेभ्यो
ऽप्यनिच्छञ्चःस्वयंमोक्षंजनार्दनः॥ ८ ॥ ददातीतिविशेषोऽपितुशब्देनात्रसूच्यते ॥ येतुसर्वाणिकर्माणिवासुदेवेमयीश्वरे ॥ ९ ॥ समर्प्यात्यं
तमत्प्रेम्णामत्पराःसंतआदरात् ॥ नान्यदालंबनंयस्यभगवंतंविहायमाम् ॥ १० ॥ तेनभक्त्याख्ययोगेनवासुदेवंरमापतिम् ॥ मामेवसर्वसौं
दर्यसारसर्वस्वमीश्वरम् ॥ ११ ॥ चिंतयंतःसदानंदंविषयीकर्तुमुद्यताः ॥ चित्तवृत्त्यैकसंतत्यातिष्ठंत्यांतरगेमयि ॥ १२ ॥ ६ ॥

इदानींसाधनस्यात्रविधेःपर्यवसानतः ॥ सर्वकर्मफलत्यागमिमंस्तौतिहरिःस्वयम् ॥ १ ॥ ज्ञानार्थश्रवणाभ्यासाज्ज्ञानंश्रेष्ठतरंभवेत् ॥ निष्पन्नंश्रुतियुक्तिभ्यांततोध्यानंविशिष्यते ॥ २॥ निदिध्यासनसंज्ञंयत्तत्त्वज्ञानैककारणम् ॥ ततोऽप्यज्ञकृतःकर्मफलत्यागोविशिष्यते ॥३॥ इत्येवंस्तूयतेतस्मात्सहेतोःसंसृतेःक्षयः॥ तत्क्षणेशांतिसिद्धिर्नकालांतरमपेक्षते ॥ ४ ॥ यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदिश्रिताः॥ अथमर्त्योऽमृतो भवत्यत्रब्रह्मसमश्नुते ॥ ५ ॥ प्रजहातियदाकामानित्यादौचश्रुतौस्मृतौ ॥ सर्वकामपरित्यागोमोक्षहेतुतयामतः ॥ ६ ॥ सर्वकर्मफलत्यागः कामत्यागत्वसाम्यतः ॥ स्तूयतेकेवलंयस्माद्रोचनार्थाखियंस्तुतिः ॥ ७ ॥ यथागस्त्येनपीतःप्राग्ब्राह्मणेनाब्धिरित्यतः ॥ ब्राह्मणाब्राह्मणत्वेनस्तूयंतेऽद्यतनाअपि ॥ ८ ॥ तथात्रापिपरित्यागसामान्यात्स्तूयतेहिसः ॥ तदेवंदुष्करत्वेनाक्षरोपासनतोवरम् ॥ ९ ॥ सगुणोपासनं

श्रेयोहिज्ञानमभ्यासाज्ज्ञानाद्ध्यानंविशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरम् ॥१२॥

प्रोक्तंसुकरत्वादिहेतुना ॥ अशक्तितारतम्यानुवादेनभगवान्स्वयम् ॥ १० ॥ विदधौसाधनान्यत्रदृष्ट्वामंदाधिकारिणः ॥ कथंनुनाममद्भक्ता भूत्वामुख्याधिकारिणः ॥ ११ ॥ विशेयुःफलभूतायांविद्यायामक्षरात्मनः ॥ इत्यभिप्रायईशस्यतदुक्तंसांप्रदायिकैः ॥१२॥ निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः ॥ येमंदास्तेऽनुकंप्यंतेसविशेषनिरूपणैः ॥ १३ ॥ वशीकृतेमनस्येषांसगुणब्रह्मशीलनात् ॥ तदेवाविर्भवेत्साक्षाद्रुपेक्ष्योपाधिकल्पनम् ॥ १४ ॥ अक्षरोपासकास्तस्माद्वस्तुतोयोगवित्तमाः ॥ प्रियोहिज्ञानिनोऽत्यर्थमहंसचममप्रियः ॥ १५ ॥ उदाराःसर्व एवैतेज्ञानीत्वाह्मेवमेमतम् ॥ इत्यादौज्ञानिप्राशस्त्यमत्यंतंहरिणेरितम् ॥ १६ ॥ तेषामेवत्वयाज्ञानंसमासाद्याधिकारिताम् ॥ सदानुसरणीयंचेत्याशयःश्रीहरेरयम् ॥ १७ ॥ १२ ॥

अथतत्त्वविदांधर्मजातंमोक्षैकसाधनम् ॥ मुमुक्षूणांहितार्थायहरिणात्रोपदिश्यते ॥ १ ॥ पश्यन्सर्वाणिभूतानिस्वात्मत्वेनाक्षरात्मवित् ॥ दुःख हेतावपिस्वस्यप्रतिकूलधियोज्झितः ॥ २ ॥ नद्वेष्टासर्वभूतानांकिंतुमैत्रीयुतोऽखिले ॥ दुःखितेषुदयावांश्चसर्वभूताभयप्रदः ॥३॥ देहेदेहोपक रणेममेतिप्रत्ययोज्झितः ॥ अद्वैतात्मावबोधेननिष्कांतोऽहंकृतेर्मलात् ॥ ४ ॥ रागद्वेषविहीनत्वाद्यस्यदुःखसुखेसमे ॥ आक्रुष्टस्ताडितोवान्यै र्निर्विकारमनाःक्षमी ॥ ५ ॥ १३ ॥ प्राप्तालंप्रत्ययोलाभालाभयोःसर्वदावशी ॥ समाहितमनादांतशरीरेंद्रियआत्मनि ॥ १ ॥ अचाल्यो निश्चयोयस्यवादिभिश्चकुतार्किकैः ॥ समर्पितांतःकरणोवासुदेवेपरेमयि ॥ २ ॥ ईदृशोमत्स्वरूपोऽसौमद्भक्तोऽतिप्रियोमम ॥ ३ ॥ १४ ॥

अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच ॥ निर्ममोनिरहंकारःसमदुःखसुखःक्षमी ॥ १३ ॥
संतुष्टःसततंयोगीयतात्माद्दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः ॥ १४ ॥
यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः ॥ हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः ॥ १५ ॥
अनपेक्षःशुचिर्दक्षउदासीनोगतव्यथः ॥ सर्वारंभपरित्यागीयोमद्भक्तःसमेप्रियः ॥ १६ ॥

संतप्यतेनयःकश्चिदपिब्रह्मविदोयतः ॥ नयःसंतप्यतेदुष्टजनादप्यद्वयात्मवित् ॥ १ ॥ प्रियलाभेमनोवृत्तिःसुखाभिव्यंजिकास्तिया ॥ रोमां चनाश्रुपातादिहेतुःसाहर्षशब्दिता ॥ २ ॥ इष्टघातेऽसहिष्णुत्वममर्षश्चभयंतथा ॥ चित्तव्याकुलतोद्वेगइत्येतैर्भ्रांतिहेतुकैः ॥ ३ ॥ स्वयमेवप रित्यक्तस्तत्त्वदर्शीसमेप्रियः ॥ ४ ॥ १५ ॥ निःस्पृहःसर्वभोगेषुबाह्याभ्यंतरशौचवान् ॥ उपस्थितेषुकार्येषुसद्योज्ञातुंक्षमोऽर्थतः ॥ १ ॥ क स्यचिन्नैवमित्रादेःपक्षंभजतिनिर्भयः ॥ दुर्जनैस्ताड्यमानोऽपियोऽनुत्पन्नव्यथोऽथवा ॥ २ ॥ इहामुत्रार्थकर्माणित्यक्तुंशीलंहियस्यसः ॥ मद्भ क्तस्तत्त्वदृङ्नित्यंप्रियोभगवतोमम ॥ ३ ॥ १६ ॥

नहृष्यतीष्टसंपत्तौतप्यतेनविपर्यये ॥ नशोचतीष्टनाशेयोनाप्राप्तमभिकांक्षति ॥ १ ॥ पुण्यपापेपरित्यक्तुंशीलंयस्यसमेप्रियः ॥ २ ॥ १७ ॥
शत्रौमित्रेचपूजायांसमःपरिभवेचयः ॥ शीतोष्णादावसह्येऽपिसमोऽध्यासविवर्जितः ॥ १ ॥ १८ ॥ तुल्येनिंदास्तुतीदोषगुणकीर्तनलक्ष

योनहृष्यतिनद्वेष्टिनशोचतिनकाक्षति ॥ शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः ॥ १७ ॥
समःशत्रौचमित्रेचतथामानापमानयोः ॥ शीतोष्णसुखदुःखेषुसमःसंगविवर्जितः ॥ १८ ॥
तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित् ॥ अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः ॥ १९ ॥

णे ॥ यस्यसंयतवाङ्मौनीसंतुष्टोयेनकेनचित् ॥ १ ॥ शरीरयात्रामात्रार्थेप्राप्तेऽपिविगतस्पृहः ॥ शून्योनियतवासेनस्थिरायस्याद्बुद्धेमतिः ॥ २ ॥
ईदृशोभक्तिमांस्तत्त्वदर्शीनित्यंममप्रियः ॥ पुनःपुनरुपादानंभक्तेस्तेनेतिगम्यते ॥ ३ ॥ पुष्कलंकारणंमोक्षेभगवद्भक्तिरेवहि ॥ ४ ॥ १९ ॥

इदानींसगुणब्रह्मध्यानाशक्तौनृणांहरिः ॥ अशक्तितारतम्येनविधत्तेसाधनत्रयम् ॥ १ ॥ प्रतिमादौहरिध्यानाभ्यासःस्यात्प्रथमंनृणाम् ॥ तदशक्तौनृभिःकार्योधर्मोभागवतःसदा ॥ २ ॥ सर्वकर्मफलत्यागस्तदशक्तौचसाधनम् ॥ अशक्तितारतम्येनसाधनत्रयमुच्यते ॥ ३ ॥ मदुक्तरीत्याचित्तंचेन्नत्वंस्थापयितुंक्षमः ॥ मयीश्वरेवासुदेवेनिश्चलंतर्हिसर्वदा ॥ ४ ॥ आहृत्यसर्वतोबाह्यादेकस्मिन्नवलंबने ॥ चेतसःस्थापनंभूयोभूयोऽभ्यासःसउच्यते ॥ ५ ॥ तत्पूर्वकसमाधिर्यस्तेनमांप्राप्तुमीश्वरम् ॥ यतस्वप्रतिमादौत्वंचित्तंकुरुसमाहितम् ॥ ६ ॥ ९ ॥

अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरम् ॥ अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय ॥ ९ ॥
अभ्यासेऽप्यसमर्थोऽसिमत्कर्मपरमोभव ॥ मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥
अथैतदप्यशक्तोऽसिकर्तुंमद्योगमाश्रितः ॥ सर्वकर्मफलत्यागंततःकुरुयतात्मवान् ॥ ११ ॥

तत्रापियद्यशक्तोऽसितदामत्प्रीतिसाधनम् ॥ मत्कीर्तनंमच्छ्रवणंमदर्चेत्यादिकर्मयत् ॥ १ ॥ धर्मोभागवतःसस्यात्तस्मिन्नेकरतोभव ॥ एवं भागवतान्धर्मान्कुर्वन्निष्कामचेतसा ॥ २ ॥ सत्त्वशुद्ध्यात्मविज्ञानोत्पत्तिद्वारेणमत्पराम् ॥ सिद्धिंप्राप्स्यसिसच्छांतिंब्रह्मभावैकलक्षणाम् ॥३॥ ॥ १० ॥ विषयाक्रांतचित्तत्वाद्यद्यशक्तोऽसिकर्मतत् ॥ कर्तुंतर्ह्यखिलंकर्मसमर्प्यजगदीश्वरे ॥१॥ मयिमच्छरणोभूत्वाविवेकीसंयतेंद्रियः ॥ सर्वकर्मफलासंगंत्यजत्वंमुक्तिसिद्धये ॥ २ ॥ ११ ॥

अद्वेष्टृत्वादिचिह्नानिजीवन्मुक्तशरीरिणाम् ॥ स्वभावभूतानीमानितदुक्तंवार्तिकेस्फुटम् ॥ १ ॥ उत्पन्नात्मावबोधस्यह्यद्वेष्टृत्वादयोगुणाः ॥
अयत्नतोभवंत्येवनतुसाधनरूपिणः ॥ २ ॥ संपाद्यमानंयत्नेनधर्मजातमिदंसतः ॥ विरक्तस्यात्मजिज्ञासोर्मुमुक्षोर्मोक्षसाधनम् ॥ ३ ॥ इ
त्युपपादयन्नीशउपसंहरतीहतत् ॥ येसन्मुमुक्षवोधर्मजातंसर्वंमयेरितम् ॥ ४ ॥ मोक्षहेतुतयास्वाद्यामृतवत्पर्युपासते ॥ यत्नेनश्रद्धयोपेता
अनुतिष्ठंतिमत्पराः ॥ ५ ॥ आस्थिताउत्तमांभक्तिंब्रह्मैक्यज्ञानलक्षणाम् ॥ भगवान्वासुदेवोऽहंयेषांप्राप्यतयामतः ॥ ६ ॥ भक्तास्तेऽत्यंतम
न्निष्ठाममात्यंतप्रियाःसदा ॥ यस्माद्धर्ममिमंसम्यगनुतिष्ठन्प्रियोहरेः ॥ ७ ॥ तस्मान्मुमुक्षुणायत्नात्संपाद्यःश्रद्धयैवसः ॥ तदेवंसगुणब्रह्माभिध्या

येतुधर्म्यामृतमिदंयथोक्तंपर्युपासते ॥ श्रद्दधानामत्परमाभक्तास्तेऽतीवमेप्रियाः ॥ २० ॥
इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायायोगशास्त्रेश्रीकृष्णार्जुनसंवादेभक्तियोगो
नामद्वादशोऽध्यायः ॥ १२ ॥ ॥ समाप्तोऽयंमध्यमःकांडः ॥

नपरिपाकतः ॥ ८ ॥ ब्रह्मानुसंदधानस्याद्वेष्टृत्वादियुतस्यच ॥ मुमुक्षोर्ज्ञानसंसिद्ध्यैश्रवणाद्यनुतिष्ठतः ॥ ९ ॥ तत्त्वसाक्षात्कृतेर्मोक्षसिद्धिर
स्तिनिरंकुशा ॥ तद्धेतुश्रुतिवाक्यार्थान्वययोग्योमुमुक्षुभिः ॥ १० ॥ तत्पदार्थोऽनुसंधेयइतिसिद्धंहिमध्यमे ॥ भक्तियोगप्रधानोऽयंमध्यमः
पूर्णतांगतः ॥ ११ ॥ २० ॥ योब्रह्मात्माक्षराख्यःशमदमनिरतैर्नित्यमध्यात्मविद्भिर्ध्येयोऽप्यत्यंतसूक्ष्मस्तनुयुगमतिभिर्दुष्कराराधनोऽज्ञैः ॥ भक्तिर्य
स्योदितांतर्हृदिसपदिजनान्मोचयेद्भ्रांतिजन्याद्देहाद्यध्यासपाशात्सचवसतुमतौकृष्णएवेश्वरोमे ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृ
ते ॥ युग्मोपासाविवेकोऽयंद्वादशःपूर्णतांगतः ॥ १३५ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ३२०० ॥ ॥ समाप्तोऽयंमध्यमःकांडः ॥

॥ इतिश्रीमद्भगवद्गीतायांभावप्रकाशेद्वादशोऽध्यायःसमाप्तः ॥

तिक्षेत्रंविलक्षणाः ॥ कथमेकेनशुद्धेनतेषामैक्यंपरात्मना ॥ १३ ॥ इत्याशंकापनोदायभगवान्परमेश्वरः ॥ संसारित्वंचभिन्नत्वमविद्याक
लितंपरे ॥ १४ ॥ शुद्धाहिवस्तुतोजीवाःपरमात्मस्वरूपिणः ॥ एवंहृदिनिधायादौक्षेत्रेभ्योऽस्यविवेचनम् ॥ १५ ॥ देहेंद्रियादिरूपेभ्यःक्षेत्र
ज्ञस्यकरोत्यजः ॥ विवेकेसतिजीवोऽयंक्षेत्रज्ञःपुरुषःपरः ॥ १६ ॥ एकएवप्रतिक्षेत्रंनिर्विकारोऽद्वयात्मकः ॥ एतन्निरूपणायैवक्षेत्रक्षेत्रज्ञयोर्द्वै
योः ॥ १७ ॥ विवेकःक्रियतेह्यस्मिन्नध्यायेहरिणास्वयम् ॥ सप्तमेप्रकृतीद्वेप्राक्परापरगिरेरिते ॥ १८ ॥ भूम्यादिक्षेत्ररूपोक्ताक्षेत्रज्ञोजीवश
ब्दितः ॥ तत्त्वंतयोर्विवेकेननिरूपयितुमीश्वरः ॥१९॥ उवाचभ्रांतितिमिरविध्वंसनकरंवचः ॥ इदंभोगालयंस्थूलंसेंद्रियंसमनोजडम् ॥२०॥

एतद्योवेत्तितंप्राहुःक्षेत्रज्ञइतितद्विदः ॥ १ ॥

शरीरंदृश्यमनृतंक्षेत्रमित्यभिधीयते ॥ असकृत्कर्मणांसिद्धिःसस्यानामिवदेहके ॥ २१ ॥ अहंममाभिमानेनक्षेत्रंयोवेत्तिसर्वतः ॥ तंक्षेत्रज्ञइ
तिप्राहुःक्षेत्रक्षेत्रज्ञवेदिनः ॥ २२ ॥ अभिधीयतइत्यत्रकर्मण्येवप्रयोगतः ॥ क्षेत्रस्यजाड्यात्कर्मत्वमस्तीत्येवंप्रदर्शितम् ॥ २३ ॥ विनाद्विती
यंक्षेत्रज्ञइतीत्यत्रेतिशब्दतः ॥ क्षेत्रज्ञेस्वप्रकाशत्वात्कर्मत्वाभावइष्यते ॥ २४ ॥ अतःक्षेत्राभिधानेहिनविशेषोऽस्तिकर्तृगः ॥ स्थूलंवस्तुज
डंक्षेत्रंयैःकैश्चिदभिधीयते ॥ २५ ॥ क्षेत्रज्ञंस्वप्रकाशत्वाद्विनाकर्मत्वमेवतम् ॥ सम्यग्विवेकिनःप्राहुरज्ञान्यविषयत्वतः ॥ २६ ॥ १ ॥

एवंदेहेंद्रियादिभ्यस्त्वंपदार्थोविलक्षणः ॥ क्षेत्रज्ञःस्वप्रकाशोऽस्तीत्यभिधायश्रुतेर्मतम् ॥ १ ॥ तस्ययद्वास्तवंतत्त्वंमहावाक्यार्थमद्वयम् ॥ ब्रह्मात्मैक्यंस्वयंग्राहभगवान्करुणानिधिः ॥ २ ॥ ब्रह्मादिस्थावरांतेषुसर्वक्षेत्रेषुचिद्घनः ॥ क्षेत्रज्ञएकएवास्तिस्वप्रकाशोऽद्वयोविभुः ॥ ३ ॥ तस्मिन्नविद्ययाध्यस्तंकर्तृत्वाद्यखिलंभ्रमम् ॥ परित्यज्यतमात्मानंक्षेत्रज्ञंमामवेहिभोः ॥ ४ ॥ अहमेवाद्वयानंदःप्रत्यगात्माक्षरोऽचलः ॥ सर्वक्षेत्रेषुमय्येवकल्पितेष्वनृतेषुच ॥ ५ ॥ जीवांतर्यामिसाक्ष्यात्मतयातत्रस्थितःस्वयम् ॥ माययाकल्पितोभेदःक्षेत्रज्ञेमयिचिद्घने ॥ ६ ॥ विद्ययातांचतत्कार्यंभेदंत्यक्त्वात्मगोचरम् ॥ निर्विकारंसदामुक्तंमामखंडंचिदद्वयम् ॥ ७ ॥ विद्धित्वंप्रत्यगात्मानंक्षेत्राद्भिन्नंस्वमादरात् ॥ यतोमायाकृतोबंधःक्षेत्रज्ञेनतुवस्तुतः ॥ ८ ॥ नित्यमुक्तस्वभावोऽतःक्षेत्रज्ञोऽहंमहेश्वरः ॥ परात्मनोऽप्यनंतस्यक्षेत्रज्ञत्वमविद्यया ॥ ९ ॥ क्षेत्रज्ञंचापिमांविद्धीत्येवंसत्युपपद्यते ॥ सर्वज्ञत्वादयोऽधर्मामायायापरमेश्वरे ॥ १० ॥ कल्पितास्तेनसत्येऽस्मिन्कथंस्युःस्वात्मनीश्वरे ॥ तथाल्पज्ञ

क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानंमतंमम ॥ २ ॥

त्वमुख्यायेधर्मामायाप्रकल्पिताः॥ ११ ॥ नैवतैरात्मनःसंगःकूटस्थस्यामलात्मनः ॥ तेनजीवगतोबंधोनप्रसज्येतईश्वरे ॥ १२ ॥ नसार्वज्ञ्यादयोधर्माजीवेवासंत्यसंकरात् ॥ यतऔपाधिकोभेदःपरमेश्वरजीवयोः ॥ १३ ॥ व्यवहारस्थलेऽस्माभिःस्वीकृतस्तएतयोः॥ धर्माणांसंकरोनास्तिनतत्राभेदइष्यते ॥ १४ ॥ ननुस्वाभाविकोभेदःप्रसिद्धोऽस्तीशजीवयोः॥ प्रत्यक्षेणानुमानेनवेदांतैःस्मृतिभिस्तथा ॥ १५ ॥ प्रत्यक्षंतावदस्त्यत्रभेदेजीवेशयोःस्फुटम् ॥ नाहंसर्वज्ञइत्याद्यनुभवोनिर्विवादतः ॥ १६ ॥ नचानध्यक्षभावत्वाद्ब्रह्मणःपरमात्मनः ॥ तद्भिदापिनचाध्यक्षास्तीतिवाच्यंकदाचन ॥ १७ ॥ यत्सत्त्वंतर्कितंयत्रानुपलब्धिविरोधिच ॥ तदभावःसदाध्यक्षगोचरस्तत्रसंमतः ॥ १८ ॥ यस्मादभावप्रत्यक्षेप्रत्यक्षंप्रतियोगिनः ॥ अन्वयव्यतिरेकाभ्यांव्यभिचारान्नकारणम् ॥ १९ ॥ पृथिवीत्वाद्यभावस्यजलाणौनैवदृश्यते ॥ प्रत्यक्षत्वम

तोनास्तिस्वतंत्रत्वस्यचान्वयः ॥ २० ॥ स्तंभःपिशाचोनास्तीतिप्रत्यक्षस्यचदर्शनात् ॥ अस्त्येवंव्यतिरेकेऽपिव्यभिचारस्तयोर्द्वयोः ॥ २१ ॥ अतोभानानुसारेणकल्प्यंसद्भिःप्रयोजकम् ॥ अन्यथाजीवपरयोरभेदश्रुतिसद्गिराम् ॥ २२ ॥ अप्रसक्तनिषेधस्यकर्तृत्वंभवतांमते ॥ किंचजीवेशसद्भेदबोधिवेदगिरांस्वतः ॥ २३ ॥ प्रमाणत्वान्नशंक्यास्यादनुवादकतात्वया ॥ तत्रैववेदतात्पर्यनत्वैक्येतवसंमते ॥ २४ ॥ ननुबुद्धिविशिष्टस्यभेदईशात्प्रतीयते ॥ सममापीष्टएवास्तिव्यवहारस्थलेकिल ॥ २५ ॥ यश्चनेष्टोविशुद्धस्यपरस्यात्प्रत्यगात्मनः ॥ भेदःसोऽत्रनभातीत्याशंकायामभिधीयते ॥ २६ ॥ सुप्तज्ञानाश्रयस्यैवभेदईशात्प्रतीयते ॥ सुप्तज्ञानाश्रयस्तेऽस्तिप्रत्यगात्माहिचिन्मयः ॥ २७ ॥ योऽधुनात्राहमस्याप्संयस्यमेज्ञानमीदृशम् ॥ संसारीसोऽहमानंदस्वरूपात्परमेश्वरात् ॥ २८ ॥ भिन्नोऽस्मीत्यावृते भ्रांतेःसंसारस्याश्रयोहियः ॥ सजीवोभिन्नएवास्तिपरस्मान्नित्यमुक्ततः ॥ २९ ॥ ईश्वरस्यापिभेदोऽस्तिजीवात्संसारिणोऽज्ञतः ॥ ममैवांशो जीवलोकइत्यादितद्वदीरणात् ॥ ३० ॥ तेनैवानुमितंतस्यप्रत्यक्षमपिसाधकम् ॥ दुःखाननुभवित्वादभ्रांतत्वात्सुखत्वतः ॥ ३१ ॥ असंसारितयाब्रह्मजीवाद्भिन्नंविनिश्चितम् ॥ असर्वज्ञतयाऽसर्वशक्तित्वाद्भ्रांतभावतः ॥ ३२ ॥ अस्वतंत्रतयाजीवोब्रह्मणोभिन्नईर्यते ॥ इत्यध्यक्षानुमानाभ्यांसिद्धोभेदस्तयोर्द्वयोः ॥ ३३ ॥ द्वासुपर्णेतिमुख्यास्तिश्रुतिर्भेदैकतत्परा ॥ शारीरश्चोभयेऽपीहभेदेनैनमधीयते ॥ ३४ ॥ इत्यादीन्यपिसूत्राणिभेदनिष्ठानिसंतिच ॥ नचप्रत्यक्षप्राप्तस्यानुवादोऽयंश्रुतेःस्मृतेः ॥३५॥ प्रत्यक्षस्यप्रमाणत्वेभेदसिद्धिस्ततोऽपिच ॥ आगमस्यानुवादत्वेऽपीष्टसिद्धिर्भवेन्मम ॥ ३६ ॥ भेदप्रत्यक्षदार्ढ्यसहेतुत्वादेवनक्षतिः ॥ अनभ्यस्तजलेपुंसस्तृषार्तस्यादितःस्वयम् ॥ ३७ ॥ प्रवृत्तमानदार्ढ्यायमानांतरप्रवृत्तिवत् ॥ अग्नेरौष्ण्यगताध्यक्षप्रामाण्यनिश्चयेसति ॥ ३८ ॥ अग्निर्हिमस्यचेत्येवमनुवादोऽपिसाधकः ॥ भेदप्रत्यक्षदार्ढ्यायतथात्रापिसइष्यताम् ॥ ३९ ॥ किंचभेदश्रुतेर्मानंमूर्धन्यायाःस्वतोयतः ॥ भेदाध्यक्षानपेक्षत्वान्नसापेक्षानुवादता ॥ ४० ॥ निरपेक्षानुवादत्वंनाप्रामाण्यस्यसाधकम् ॥ धारावाहकबुद्धेर्हियथाप्रामाण्यमिष्यते ॥ ४१ ॥ निरपेक्षानुवादत्वेतथात्रापीष्यतांश्रुतेः ॥ अपि

श्रीगणेशायनमः ॥ अथत्रयोदशाध्यायव्याख्याप्रारंभः ॥ मुमुक्षूणांवित्तंस्थिरचरनिमित्तंस्थिरपदंहामायाचित्तंश्रुतिहृदयमद्वैतचरितम् ॥ अखंडानंदंश्रीपतिमजमनंतंयदुपतिंमुकुंदंनंदांकेविलसितमहंनौमिशतशः ॥ १ ॥ तदेवंमध्यमैःषड्भिरध्यायैर्भगवान्हरिः ॥ तत्पदार्थोऽनुसंधेयोमुक्तयेचेत्युदीरितम् ॥ २ ॥ अंतःकरणसंशुद्धिर्विवेकादिचतुष्टयम् ॥ ज्ञानंमोक्षोहरेर्भक्त्यासिद्ध्यत्येतच्चतुष्टयम् ॥ ३ ॥ हरिभक्तिंविना कर्मनस्याद्धीशुद्धिकारणम् ॥ नवासिद्ध्येद्विवेकादिनज्ञानंनापिमुक्तता ॥ ४ ॥ दुरत्ययाहरेर्मायासर्वव्यामोहकारिणी ॥ हरिभक्तिंसमाश्रित्यतर्तुंशक्यामुमुक्षुभिः ॥ ५ ॥ हरिरेवजगत्सर्वंहरेर्भिन्नंनकिंचन ॥ तस्मात्सच्छ्रद्धयोपेतैरुपास्योमुक्तयेहरिः ॥ ६ ॥ इत्थंनिरूपितंषड्भिरध्या

श्रीभगवानुवाच ॥ इदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते ॥

यैर्मध्यमैरिति ॥ उपासनाप्रधानोऽसौकांडःसंपूर्णतांगतः ॥ ७ ॥ तथाप्रागादिषट्केनत्वंपदार्थोनिरूपितः ॥ इदानीमुत्तरःषट्कोऽखंडवाक्यार्थगोचरः ॥ ८ ॥ सम्यग्बोधप्रधानोऽयंसम्यगारभ्यतेततः ॥ प्रत्यगात्मप्रमादाख्यान्मृत्योरुद्धरणंनृणाम् ॥ ९ ॥ प्रत्यगात्मावबोधेनविना नास्तीतिनिश्चितम् ॥ यादृगात्मावबोधेनमृत्योरुद्धरणंभवेत् ॥ १० ॥ यादृग्बोधयुताःपूर्वंजीवन्मुक्ततयेरिताः ॥ तादृगात्मावबोधोऽत्रवक्तव्योबंधमुक्तये ॥ ११ ॥ सबोधोब्रह्मणासाकंजीवस्याभेदमेवच ॥ विषयीकुरुतेयस्मात्तद्विद्यानर्थकारिणी ॥ १२ ॥ तत्रसंसारिणोजीवाःप्र

शास्त्रंविनाप्राप्तेरपूर्वत्वमपीष्यते ॥ ६४ ॥ पुण्यपापेविधूयेतिफलंसम्यगुदाहृतम् ॥ अस्यमहिमानमितिवीतशोकइतिश्रुतौ ॥ ६५ ॥
स्तुतिरूपोऽर्थवादोऽस्तिनफलंयतईशितुः ॥ महिमायःसजीवस्यनैवसंभवतीत्यपि ॥ ६६ ॥ अनश्नन्नन्यइत्येवमुपपत्तिरपीरिता ॥ इत्थंहिष
ड्विधंलिंगंभेदेतात्पर्यनिर्णये ॥ ६७ ॥ निषेधवाक्यरूपत्वात्प्रबलैक्यश्रुतिर्यदि ॥ असद्वेत्यादिवाक्यंस्यात्प्रबलंतर्हिवैदिकम् ॥ ६८ ॥ अतो
ऽप्यैक्यनिषेधात्माभेदएवश्रुतेर्मतः ॥ किंचभेदश्रुतिश्चैवप्रबलैक्यश्रुतेर्भवेत् ॥ ६९ ॥ प्रत्यक्षादिकसंवादात्तथानिरवकाशिका ॥ यतऐक्य
श्रुतिर्ब्रह्मपदवाच्येपरेश्वरे ॥ ७० ॥ तत्परानहिलोकेऽस्मिन्सजातीयःपरेशितुः ॥ नहिभेदश्रुतिस्तद्वद्भेदाभावेऽवकाशगा ॥ ७१ ॥ नव्याव
हारिकोऽयंचभेदोमुक्तावपिश्रुतेः॥ सकामानश्रुतेसर्वान्ब्रह्मणेतिभिदाश्रुता ॥७२॥ नहिसावांतरामुक्तिर्मुख्येयंहरिणेरिता ॥ इदंज्ञानमुपाश्रि
त्यममसाधर्म्यमागताः ॥ ७३ ॥ सर्गेऽपिनोपजायंतेप्रलयेनव्यथंतिच ॥ इतिसर्गाद्यभावोक्तेःपरमामुक्तिरेवसा ॥ ७४ ॥ भूमविद्याफलं
प्रोक्तंछांदोग्येऽपितथैवच ॥ तस्यसर्वेषुलोकेषुकामचारोभवत्यथ ॥ ७५ ॥ एकधाभवतीत्यत्रभेदस्योक्तिःश्रुताश्रुतौ ॥ परंज्योतिरुपेत्यादौ
स्वेनरूपेणतद्विदः ॥ ७६ ॥ आविर्भावोक्तितोमुक्तिस्तत्रभेदःश्रुतःस्फुटम् ॥ पुण्यपापेविधूयेतिसर्वकर्मक्षयश्रुतेः ॥ ७७ ॥ मुक्तिःसापरमाज्ञे
यानातःसावांतराभवेत् ॥ प्रेरितारंयदाजुष्टंपश्यत्यन्यंमहेश्वरम् ॥ ७८ ॥ तेनामृतत्वमेतीतिभेदधीर्मुक्तिसाधनम् ॥ प्रत्युतैक्येप्रमाणंनोकिं
चिदस्तीहसाधकम् ॥ ७९ ॥ आत्मत्वान्नैवभिद्यंतेजीवावैपरमात्मनः ॥ परमात्मवदेवेत्यनुमानंमानमत्रचेत् ॥ ८० ॥ मैवंप्रत्यक्षमानेनाप
हृतोविषयोऽस्यभोः ॥ विज्ञातृत्वादिरूपस्यह्यात्मत्वस्यमतेतव ॥ ८१ ॥ हेतोरसिद्धेस्तद्वन्मेवेद्यत्वादेरसिद्धता ॥ नवाप्यैक्येश्रुतिर्मानंतस्या
अन्यपरत्वतः ॥ ८२ ॥ प्रत्यक्षादिकसंसिद्धभेदश्रुतिविरोधतः ॥ तस्माच्छ्रुत्यादिसिद्धत्वाज्जीवेश्वरभिदास्वतः ॥ ८३ ॥ परमार्थस्वरूपास्ती
त्येवंभेदनयोजयी ॥ अतःस्वाभाविकेभेदेसत्यत्रेश्वरजीवयोः ॥ ८४ ॥ क्षेत्रज्ञब्रह्मणोरैक्यंकथंभगवतोमतम् ॥ संमतंस्याद्यतोऽवादित्वयैक्यं
ब्रह्मजीवयोः ॥ ८५ ॥ तस्मात्क्षेत्रज्ञमित्यादेरयमर्थोहरेर्मतः ॥ सर्वक्षेत्रेषुदेवादिदेहेषुफलशालिषु ॥ ८६ ॥ ज्ञातृत्वैकांत्यमात्मानंक्षेत्रज्ञंमांमदा

चद्वासुपर्णेतिमुख्यायाःश्रुतिसद्भिरः ॥ ४२ ॥ अस्त्यनुवादमात्रत्वेविचारांतरमप्यथ ॥ निरर्थकानुवादस्यायोगादेषाविचारणा ॥४३॥ विधि
स्तुत्यर्थमथवान्यविधानार्थमेववा ॥ अनुवाद्यनिषेधायानुवादोवेष्यतेश्रुतेः ॥ ४४ ॥ नाद्योऽस्तिवायुःक्षेपिष्ठेत्यादिवत्स्तुतयेमतः ॥ विध्येक
वाक्यतानास्तिनार्थवादत्वमस्त्यतः ॥ ४५ ॥ द्वितीयेऽन्यविधानायानुवादत्वेत्वयातदा ॥ तात्त्विकत्वमनूद्यस्यवक्तव्यंस्याद्विचारतः॥ ४६ ॥
मानेनान्यविधानायानूदितस्यचदृश्यते ॥ नियमस्तात्त्विकत्वस्ययथादध्नाजुहोत्यपि ॥ ४७ ॥ नानुवाद्यनिषेधायानुवादोऽस्तीहचश्रुतेः ॥
वाक्येऽस्मिन्नेहनानास्तिकिंचनेतिनिषेधके ॥४८॥ भेदस्याकिंचनेत्यत्रानूदितत्वात्पृथग्वृथा ॥ अनुवादोमतोऽन्यत्रद्वासुपर्णेतिचश्रुतौ ॥४९॥
द्वासुपर्णेतिवाक्यस्याज्ञातज्ञापकलक्षणम् ॥ अस्त्येवविधिशेषत्वमनश्नन्निति सद्विधेः ॥ ५० ॥ जीवसंघात्परोभिन्नोऽचिंत्यइत्यादिकश्रुतेः॥
नान्योऽतोऽस्तीतिवाक्यंस्यात्प्रत्युतैक्यानुवादकम् ॥ ५१ ॥ अनादिवादिसंसिद्धाभेदप्राप्तिर्यतःक्षितौ ॥ तत्त्वमस्यादिवाक्यंतुनैवभेदविरो
ध्यपि ॥ ५२ ॥ तदाश्रयतयायद्वातज्जन्यत्वेनतस्यच ॥ तद्व्यपदेशइत्येवंतत्त्वमित्यत्रनिर्णयः॥ ५३ ॥ दौर्बल्यंविदितार्थत्वाद्यदिभेदश्रुतेर्म
तम् ॥ विरुद्धार्थतयातर्हिदौर्बल्यमभिदाश्रुतेः ॥ ५४ ॥ यद्यध्यक्षाविरुद्धैक्यपराचैक्यश्रुतिर्मता ॥ तर्हिभेदश्रुतिर्लोकसिद्धभेदपरास्तुभोः
॥ ५५ ॥ यदिषड्विधतात्पर्यलिंगवत्त्वेनसर्वतः ॥ प्रबलैक्यश्रुतिस्तर्हितत्तुल्यंस्याद्भिदाश्रुतेः ॥ ५६ ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वताफल
म् ॥ अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णये ॥ ५७ ॥ एतच्चषड्विधंलिंगंभेदेतात्पर्यनिर्णये ॥ अस्त्येवतत्कथंचेत्याकांक्षायामभिधीयते
॥ ५८ ॥ आथर्वणश्रुतौभेदेद्वासुपर्णेत्युपक्रमः ॥ परंसाम्यमुपैतीत्थमुपसंहारइष्यते ॥ ५९ ॥ भिन्नाश्रयतयालोकेसादृश्यस्यचदर्शनम् ॥
अतोऽस्त्यत्रोपसंहारोभेदमात्रैकगोचरः ॥ ६० ॥ तयोरन्यस्तथानश्नन्नन्यइत्यादिकश्रुतौ ॥ अभ्यासोऽस्तितथान्यत्रभिदासत्यमि
तिश्रुतौ ॥ ६१ ॥ शास्त्रैकगम्योयोभेदईश्वरप्रतियोगिकः ॥ कालत्रयेऽप्यबाध्योऽस्तितथातद्धर्मिकोऽपियः ॥ ६२ ॥ विना
धर्म्यादिविज्ञानंभेदज्ञानंनजायते ॥ धर्मिणःपरमेशस्ययदिवाप्रतियोगिनः ॥ ६३ ॥ मानांतरागोचरत्वात्तद्भेदोऽपितथेष्यते ॥ अतः

स्त्यपि ॥ ८ ॥ शास्त्रतोबाध्यमस्त्येवतथाभेदोऽपिबाध्यते ॥ नान्योऽतोऽस्तीत्यतोद्रष्टानश्रोताऽतोविलक्षणः ॥ ९ ॥ इत्यादिभेदबाधेनब्रह्मा
ऽभैक्यपराश्रुतिः ॥ नन्वन्यपरतास्त्यस्याःश्रुतेरन्यविरोधतः ॥११०॥ भिन्नोऽचिंत्योजीवसंघादित्यस्याःसानुवादिका ॥ मैवंश्रुतित्वमेवास्य
दुर्भणंवचसोयतः ॥ ११ ॥ नप्रसिद्धासुशाखासुपाठःकुत्रापिदृश्यते ॥ श्रुतित्वेऽप्यस्यनाभेदप्रतिषेधकताभवेत् ॥ १२ ॥ प्रत्युतास्यैववा
क्यस्यभेदबाधकतेर्यते ॥ जीवसंघान्नभिन्नोऽयंचिंत्यइत्यर्थतःस्फुटम् ॥ १३ ॥ शब्दतोवार्थतोवाक्यंनाभेदप्रतिषेधकम् ॥ किंचायंप्रतिषे
धोऽपिकस्याभेदस्यबाधकः ॥ १४ ॥ प्रातीतिकस्याभेदस्यकिंव्यावहारिकस्यवा ॥ उताहोवास्तवस्यास्तिनाद्यःसंगच्छतेशृणु ॥ १५ ॥
शुक्तिरूप्यादिवन्नायमपरोक्षप्रतीतिभाक् ॥ भेदप्रमाविरोधाच्चनायंप्रातीतिकोभवेत् ॥ १६ ॥ नद्वितीयोऽनयोर्यस्मात्तुल्यसत्ताक
योर्द्वयोः ॥ विरोधादेकदैकत्रविभेदाभेदयोःस्वतः ॥ १७ ॥ वास्तवस्याप्यभेदस्यनिषेधोनोपपद्यते ॥ नव्यावहारिकोभेदोह्यभेदं
पारमार्थिकम् ॥ १८ ॥ बाधतेऽतोप्यबाध्योऽस्तिह्यभेदःश्रुतिसंमतः ॥ एतेनभेदवाक्येनजीवतादात्म्यमीश्वरे ॥ १९ ॥ प्रतिषि
द्ध्यतइत्येवंप्रत्युक्तंतत्कथंशृणु ॥ नजीवस्यावच्छिन्नस्ययद्रूपंव्यावहारिकम् ॥ १२० ॥ तदेवब्रह्मणोरूपंवेदांतिभिरितीष्यते ॥ नान्यो
ऽतोस्तीतिवाक्यार्थोऽप्यभेदःपरमार्थतः ॥ २१ ॥ ननुभेदोऽपिमानेनसिद्धोऽस्तिश्रुतिवाक्यतः ॥ सत्यआत्मासत्योजीवःसत्यंभिदासती
तिचेत् ॥ २२ ॥ मैवंप्रसिद्धशाखासुनेदंवाक्यंप्रदृश्यते ॥ श्रुतित्वेऽप्यस्यभेदापवादश्रुतिविरोधतः ॥ २३ ॥ नस्यात्स्वार्थपरत्वंतद्वा
क्यभेदपरंवचः ॥ सत्यआत्मेतिचिद्धातोस्त्रिकालाबाद्ध्यतेरिता ॥ २४ ॥ नन्वात्मनोहिसत्यत्वेजीवत्वमपिवास्तवम् ॥ किंनस्यादितिशं
कायामसत्योजीवउच्यते ॥ २५ ॥ विशिष्टप्रतिषेधस्यसंक्रमःस्याद्विशेषणे ॥ विशेष्यबाधेसत्येवंजीवत्वंनैववास्तवम् ॥ २६ ॥ बहुश्रु
त्यनुरोधेनभेदोऽसत्यइतिश्रुतेः ॥ अनेनेहभिदासत्यासजातीयानिराकृता ॥ २७ ॥ सत्यंभिदासत्यमितिविजातीयनिराकृतिः ॥ पंचभूता
त्मकंविश्वंसत्यशब्देनकीर्तितम् ॥ २८ ॥ सच्चत्यच्चाभवत्सत्यंभिदाभिद्यतएवतत् ॥ इत्यसत्यमनिर्वाच्यंतद्बाढार्थायपुनर्वचः ॥ २९ ॥ भिदासत्यं

भिदेत्येवकाकाक्षिन्यायतोभवेत् ॥ उभयत्रान्वयीत्येवंतद्वाक्यंभेदबाधकम् ॥ १३० ॥ विभेदजनकेज्ञानेनाशमात्यंतिकंगते ॥ आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यति ॥ ३१ ॥ इत्येवंभेदमाहृत्यस्मृतिरेषानिषेधति ॥ आत्मेतितूपगच्छंतिग्राहयंतिचसज्जनाः॥३२॥ इत्यादीन्यपिसूत्राणिभेदंचापवदंत्यलम् ॥ अभेदश्रुतिरेवंहितत्परत्वेनहेतुना ॥३३॥ स्वतोबलवतीज्ञेयाप्यज्ञातज्ञापकत्वतः॥ तदात्मानमेवावेदहंब्रह्मास्मीतिवाक्यतः ॥ ३४ ॥ ब्रह्मात्मैक्यधियामोक्षःसर्वात्मत्वाप्तिलक्षणः ॥ प्रतिवेदांतमस्त्येवलिंगमात्मैक्यनिर्णये ॥ ३५ ॥ अतःस्वार्थपराभेदश्रुतिर्बलवतीभवेत् ॥ नचभेदेऽस्तितात्पर्यंकस्याअपिश्रुतेःस्मृतेः ॥ ३६ ॥ नन्वृक्द्वासुपर्णेतिश्रुतेर्भेदपरत्वकम् ॥ मैवंतस्याहिभेदानुवादात्तत्प्रतिषेधतः ॥ ३७ ॥ अभेदएवतात्पर्यनभेदेतत्कथंश्रृणु ॥ ब्रह्मात्मैवेदममृतंपुरस्तादितिवाक्यतः॥ ३८ ॥ सर्वात्मत्वेविनिर्दिष्टब्रह्मणःपरमात्मनः॥ भोक्तृभेदाच्चभोक्तृस्याद्ब्रह्मापितार्हितच्चन ॥ ३९॥ युक्तंतस्मान्नसर्वात्मब्रह्मेत्याशंक्यपठ्यते ॥ मंत्रोऽयंद्वासुपर्णेतितस्यार्थोऽयमुदीर्यते ॥१४०॥ यौद्वौजीवेश्वरौबिंबप्रतिबिंबस्वरूपिणौ ॥ अस्मिन्शरीरेवर्तेतेतयोर्मध्येऽन्यईशितुः ॥ ४१ ॥ धीप्रतिबिंबभूतस्तद्भेदाध्यासतोभ्रमी ॥ सतद्धर्माभिमानीसन्भुंक्तेकर्मफलंततः॥ ४२ ॥ सएवान्यःस्वयंबिंबभूतःसाक्षीचिदद्वयः॥ बुद्धितादात्म्यशून्यःसंश्रिदानंदघनात्मना ॥ ४३ ॥ अनश्नन्भोगशून्यःसन्नुदासीनःप्रकाशते ॥ अनश्नन्नितिभोक्तृत्वनिषेधःप्रत्यगात्मनः ॥ ४४ ॥ सर्वथातत्रजीवस्यसाक्षाद्भोगनिषेधतः ॥ कस्यस्यात्तर्हिभोक्तृत्वमित्याशंक्याहवेदगीः ॥ ४५ ॥ सएवाध्यस्तयाबुद्ध्यातादात्म्याध्यासतःफलम् ॥ भुंक्तइत्थंनभोक्तृत्वधीविरोधोऽपिचिद्घने ॥ ४६ ॥ अतःपैंगिरहस्येऽस्यव्याख्यानंशुद्धसत्वयोः ॥ सत्वंचिच्छाययायुक्तमंतःकरणमुच्यते ॥ ४७ ॥ क्षेत्रज्ञःशुद्धआत्माचिद्घनःसाक्षीतथेरितः ॥ सत्वेभोक्तृत्वमापाद्यशुद्धेतच्चनिषिद्ध्यते ॥ ४८ ॥ भेदानुवादपूर्वेणमंत्रोऽयंशुद्धचिद्घने ॥ तत्परोनतुजीवेशभेदमप्यवगाहते ॥ ४९ ॥ अतआविद्यकंभोक्तृभावमेवमनूद्यसः ॥ द्वासुपर्णेतिनिर्दुष्टचैतन्यात्मैक्यतत्परः ॥ १५० ॥ ब्रह्मात्मनोहिजीवस्यनित्यमुक्तस्यवस्तुनः॥ बुद्धितादात्म्यमात्रेणसंसारित्वंनवस्तुतः॥ ५१ ॥ उपक्रमादितात्पर्यलिंगाभावाद्विदाश्रुतेः॥ नभेदपरतासिद्ध्येद्वृथातत्साधनश्रमः॥५२॥

त्वन्मतेचतयोर्मध्यएकोऽश्नातीत्युदीरिते ॥ अर्थादीशोनचाश्नातीत्येवंसिद्धेपृथग्वचः ॥ ५३ ॥ वृथास्यादनुवादस्यगतौसत्यांनसंभवः॥ पश्यत्ययंदेवदत्तोवामेनाक्ष्णेत्युदीरणात् ॥ ५४ ॥ नपश्यतीतरेणेतिनिषेधोऽर्थाद्धिसिद्ध्यति ॥ द्वासुपर्णेतिमंत्रोऽयंशुद्धब्रह्मात्मतत्परः ॥ ५५ ॥ अशनायादिराहित्यंवस्तुतःप्रत्यगात्मनः ॥ भोगस्यकल्पितत्वात्तदधिष्ठानेऽत्यसंगता ॥ ५६ ॥ यदाभुंक्तेतदैवायंनभुंक्तेपरमार्थतः ॥ भासमानेऽपिवर्णेखेनखेवर्णोऽस्तिवस्तुतः ॥ ५७ ॥ जीवेश्वराश्रयेदेहेसमानेपुरुषोऽप्ययम् ॥ निमग्नोऽविद्ययाभातिकर्तृत्वाद्यभिमानतः ॥ ५८ ॥ मोहावृतस्वरूपत्वाच्छोचतीवनवस्तुतः ॥ अतोब्रह्मात्मनोरैक्यसाक्षात्कारोदयादयम् ॥ ५९ ॥ देहत्रयात्पृथक्भूतंदेहत्रितयसाक्षिणम् ॥ कार्यकारणसंघातैःसेवितंजुष्टमुच्यते ॥ १६० ॥ शोधितंत्वंपदार्थंवासंतमीशंचपश्यति ॥ साक्षात्करोतिस्वात्मानंब्रह्मभूतमकल्मषम् ॥ ६१ ॥ तदास्यमहिमानंस्वमपरिच्छिन्नमक्षयम् ॥ एत्यानंदंस्वयंवीतशोकइत्यर्थिकाश्रुतिः ॥ ६२ ॥ स्यात्तात्पर्यवतीभेदेकथंब्रह्मैक्यगोचरा ॥ यद्वाजुष्टंविवेकाद्यैःशोधिताशयकिल्बिषैः ॥ ६३ ॥ सनकाद्यैःसदासेव्यमानमाम्नतयांतरम् ॥ अन्यंदेहत्रयाद्भिन्नमीदृशंयर्हिपश्यति ॥ ६४ ॥ नखन्यंजीवतोभिन्नंपश्यतीत्यर्थइष्यते ॥ त्वयोक्तानांविकल्पानांनास्त्यतःसावकाशता ॥ ६५ ॥ नहेतुर्भेदधीर्मुक्तेःसाक्षाच्छ्रुतिविरोधतः ॥ तंज्ञात्वामृत्युमत्येतिनान्यःपंथाविमुक्तये ॥ ६६ ॥ भेदेऽस्यमहिमानंसयातीत्येतद्विरुद्धकम् ॥ नान्योऽन्यदीयंप्राप्नोतिमहिमानमिहांजसा ॥६७॥ तत्तुल्यंभजतीत्येवंकल्पनापिनयुज्यते ॥ नापिस्तुतिपरत्वेनव्याख्येयंमुख्यसंभवात् ॥६८॥ ब्रह्मवेदसब्रह्मैवभवतीतिश्रुतेरपि ॥ निरंजनपदेनात्राविद्याराहित्यमुच्यते ॥ ६९ ॥ परमंसाम्यमित्यैक्यमाहाद्वैतामृतंपरम् ॥ यस्मादत्यंतसादृश्यमेकत्वेपर्यवस्यति ॥ १७०॥ अल्पमप्यंतरंकुर्वन्भयंयातीतिदोषतः॥ मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यति ॥ ७१ ॥ अन्योऽसावन्यएवाहमितिदेवपशुःश्रुतः॥ नात्रकाचिद्भिदेत्येवंभेदनिंदाश्रुतिर्बहु ॥ ७२ ॥ तत्रकोमोहःकःशोकएकत्वमनुपश्यतः ॥ यन्मदन्यन्नचास्तीहतत्कस्मान्नुबिभेम्यहम् ॥ ७३ ॥ यएवंवेदब्रह्माहमितिसर्वंभवत्ययम् ॥ इत्यभेदधियामोक्षाभयप्राप्तिप्रदर्शनात् ॥ ७४ ॥ यत्तुमुक्तौभिदासत्त्वात्सरमार्थात्तदप्यसत् ॥ स

त्मकम् ॥ विद्धिचापीत्यपेमांत्वंविद्धिक्षेत्रमपीश्वरम् ॥ ८७ ॥ क्षेत्रज्ञपरयोर्देहदेहिभावनिबंधनम् ॥ सामानाधिकरण्यमांक्षेत्रज्ञमितियुज्यते ॥ ८८ ॥ जीवरूपशरीरेणयुक्तांतर्यामिणश्रितः ॥ स्वमर्थस्यतदर्थेनसर्वज्ञेनपरात्मना ॥ ८९ ॥ अभेदबोधनंश्रीमद्धरिणैवंनिरूप्यते ॥ जीवस्येशशरीरत्वाच्छरीरीपरमेश्वरः ॥ ९० ॥ तयोरैक्यंस्वरूपेणप्रतिषिद्धंपुरैवच ॥ तज्जन्यत्वेनवातस्यतद्व्यपदेशइष्यते ॥ ९१ ॥ तदाश्रयतयावा स्तुक्षेत्रज्ञंविद्धिमामिति ॥ आत्मत्वजीवक्षेत्रज्ञशब्दानांहिनियंतरि ॥ ९२ ॥ सर्वांतर्यामिणीशेऽस्तिशक्तिरागमसंमता ॥ अंतर्यामिपरंमानंश्रुतेर्वाक्यंसहस्रशः ॥ ९३ ॥ अतआहस्वभगवान्क्षेत्रज्ञंविद्धिमामिति ॥ क्षेत्रक्षेत्रज्ञयोरेवंविवेकविषयंतयोः ॥ ९४ ॥ मदात्मकत्वविषयंज्ञानमुक्तमिहोत्तमम् ॥ तदेवादेयमादृत्यज्ञानमित्येवमेमतम् ॥ ९५ ॥ इत्थंस्वाभाविकेभेदेसत्येवेश्वरजीवयोः ॥ उक्तरीत्यास्त्यभेदोक्तिर्नान्यथातिविरोधतः ॥ ९६ ॥ सार्वज्ञादिगुणानंतशक्तयैश्वर्यादिशालिना ॥ अनैश्वर्यादिदुष्टस्याभेदोनैवास्तियुक्तिभाक् ॥ ९७ ॥ उपदेश्योपदेशादिव्यवहारोऽपिदुर्घटः ॥ ऐक्यवादेततोऽप्येषभेदपक्षोऽतियुक्तिमान् ॥ ९८ ॥ एवंचिदचिदीशानांस्वरूपेणस्वभावतः ॥ भेदंसम्यग्वदंतीनांश्रुतीनामविरोधतः ॥ ९९ ॥ भिन्नोऽचिंत्योमहेशःस्थिरचरगणतःक्षेत्रवित्क्षेत्रदेहःशेष्यंतर्यामिगीर्भिःस्मृतिभिरपिभिदायस्यजीवात्सदेष्टा ॥ प्रत्यक्षादिप्रमाणैरहमनुभवतःसिद्धभेदोवरिष्ठःकृष्णःकक्कास्तिजीवोभ्रमशतवलितोभेदसिद्धिर्मतेत्थम् ॥ १०० ॥ अत्राभिधीयतेश्रौतसिद्धांतोहरिसंमतः ॥ स्यादेवंयदिसंसिद्ध्येद्भेदोजीवेशयोर्दृढः ॥ १ ॥ मानशून्यतयानास्तिपरमार्थाभिदानयोः ॥ नान्योऽतोस्तीतिसद्वाक्यंभेदमेनंप्रबाधते ॥ २ ॥ जीवेशयोरभेदेतुप्रमाणंश्रुतयोऽखिलाः ॥ सूत्राणिस्मृतयोविद्वन्निर्णीतानुभवोऽनघः ॥ ३ ॥ पारमार्थिकताभेदेजातिर्गोत्वादिवन्नहि ॥ सत्तातिरिक्तायाजातेःसत्ताव्याप्यत्वसंभवात् ॥ ४ ॥ पदार्थमात्रेनैवास्तिजातिःकाचनसंमता ॥ सामान्यादौयतोजातिर्नैवांगीक्रियतेबुधैः ॥ ५ ॥ पराभिमतसत्ताख्यजातेर्द्रव्यादिकत्रये ॥ वृत्तित्वान्नैवसाभेदेभावधर्मतयेष्यते ॥ ६ ॥ नवाप्रामाणिकत्वंस्याद्भेदस्यश्रुतिबाधनात् ॥ प्रत्यक्षाबाध्यभेदस्यबाधिकाशतशःश्रुतिः ॥ ७ ॥ प्रत्यक्षाबाध्यमात्रेणनहिसत्याभिदाभवेत् ॥ चंद्रेप्रादेशिकत्वंचप्रत्यक्षाबाध्यम

ध्यक्षंयतस्तद्धिसत्तामात्रैकगोचरम् ॥ साचाधिष्ठानचिद्व्योमनततोव्यतिरिच्यते ॥ ९८ ॥ प्रत्यक्षमस्त्युदासीनंभेदसत्ताप्रसाधने ॥ अन्य
स्यभेदसत्तायांप्रमाणस्याप्यभावतः ॥ ९९ ॥ ननुप्रतीयमानायाभेदनिष्ठतयाहिसा ॥ सत्ताकथंभवेदात्मसत्तेत्यत्रश्रृणूत्तरम् ॥ २०० ॥ अधि
ष्ठानात्मसत्तातोऽध्यस्तसत्तानभिद्यते ॥ तदात्मानंस्वयंब्रह्माकुरुतेतिप्रमाणतः ॥ १ ॥ परब्रह्मविवर्तस्यजगतोब्रह्मतोनहि ॥ सत्ताभिन्नाततो
ऽध्यक्षंब्रह्मसत्तैकगोचरम् ॥ २ ॥ कार्यकारणभावोऽपिजगतोब्रह्मणोऽस्तियः ॥ कल्पितोयतआत्मायंनकार्यनापिकारणम् ॥३॥ इतोऽपिभे
दसत्तायाग्राहिप्रत्यक्षमात्रकम् ॥ जलादौगंधप्रत्यक्षवदन्यविषयंभवेत् ॥ ४ ॥ ममैवांशइतीशस्यवाक्यमद्वैतबोधकम् ॥ नांशांशिपरमद्वैतपरा
गमविरोधतः ॥ ५ ॥ अध्यस्तएवभेदोऽत्रब्रह्मात्मैक्येऽखिलश्रुतेः॥ नान्योऽतोऽस्तीतिवाक्येनतस्मादैक्यनयोजयी ॥ ६ ॥ नाध्यक्षविषयोभेदः
परमार्थोनचश्रुतेः॥ कल्पितोयोनतेनास्तिक्षतिरद्वैतवादिनाम् ॥ ७ ॥ तस्मादद्वैतसिद्धांतविजयेदुंदुभिःश्रुतिः ॥ नान्योऽतोऽस्तीतिजयतिभे
दवादिशुगावहा ॥ ८ ॥ किंचाध्यक्षेणभेदोऽपिगृह्यतेनचिदात्मनः॥ शुद्धस्यकिंतुजीवस्यधीतादात्म्यंगतस्यच ॥ ९ ॥ अहमित्यनुभूतिर्हिभे
दमत्रावगाहते ॥ साधीतादात्म्यमापन्नमात्मानंजीवशब्दितम् ॥ २१० ॥ विषयीकुरुतेनैषाशुद्धमानंदसाक्षिणम् ॥ ननुसंसारिणोऽज्ञानाद्या
श्रयस्यात्मनःकिल ॥ ११ ॥ सुप्तिसंबंधिनोभेदोऽहंविज्ञानेऽनुभूयते ॥ कथंबुद्ध्यवच्छिन्नस्यैवैषभेदोऽनुभूयते ॥ १२ ॥ मैवमज्ञानकालेयोऽह
मित्यनुभवेनृणाम् ॥ भातितस्माद्विभिन्नोऽस्तिसाक्षीप्रत्यक्चिदात्मनः ॥ १३ ॥ यदज्ञानकृतादेहादिष्वहंधीर्दृढानृणाम् ॥ भवेत्तथेशभेदादि
भ्रांतिधीरपितेदृढा ॥ १४ ॥ तद्विज्ञानदशायांतुनेशभेदोऽनुभूयते ॥ ईश्वरात्साक्षिणोभेदःकेनचिन्नानुभूयते ॥ १५ ॥ बुद्ध्यधिष्ठानचिद्व्यो
म्नःसुप्तादेरपिधर्मिता ॥ भातुतेनक्षतिर्नास्तिशुद्धस्यासंगिनोविभोः ॥ १६ ॥ केवलाज्ञानदोषेणभात्यज्ञोऽहमितिभ्रमः ॥ नाहमीशइतिभ्रां
तिःसत्यज्ञानेऽस्यदृश्यते ॥ १७ ॥ तन्निवृत्त्यानसाभ्रांतिर्दृश्यतेविदुषःक्वचित् ॥ किंत्वहंब्रह्मचिद्व्योमस्वभावोऽस्मीतिधीरुदेत् ॥ १८ ॥ नतं
विदाथयइमाजजानेत्यादिवेदगीः ॥ अज्ञानहेतुकंभेदंवदतीश्वरजीवयोः ॥ १९ ॥ अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः ॥ इतिमोहोविनि

र्वात्मत्वावबोधनविदुषोब्रह्मताश्रुतेः ॥ ७५ ॥ विरोधान्नास्तिभेदस्यगंधोऽपिपरजीवयोः ॥ इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः ॥ ७६ ॥
इत्यभेदपरंवाक्यंवैधर्म्यप्रतिषेधतः ॥ क्षेत्रज्ञंचापिमांविद्धिज्ञानीत्वाह्येवमेमतम् ॥ ७७ ॥ अविभक्तंचभूतेषुसमंसर्वेष्वितिस्फुटम् ॥ साक्षाज्जग
द्गुरुःश्रीशःप्राहाभेदंस्वजीवयोः ॥ ७८ ॥ नामरूपाद्विमुक्तःसन्नितिमुक्तौश्रुतिःस्वयम् ॥ नामरूपादिराहित्यंप्रतिपादयतिस्फुटम् ॥ ७९ ॥
सादृश्यायोग्यतःसाम्यंसर्वात्मत्वमितीष्यते ॥ तस्मात्तत्सर्वमभवदित्यादिश्रुतिदर्शनात् ॥१८० ॥ एतेनद्वासुपर्णादेर्भेदेयस्तुपुरात्वया ॥ उप
क्रमादिरुद्दिष्टःसचसम्यङ्निराकृतः ॥ ८१ ॥ उपक्रमादिकंलिंगंब्रह्मैक्येसर्वतःश्रुतौ ॥ निर्णीतंतच्चवेदांतभाष्यादौसूरिभिर्नयैः ॥ ८२ ॥
यत्तूक्तंसकलान्कामानश्नुतेब्रह्मणासह ॥ सहत्वंब्रह्मणोभेदंविनानेतितदप्यसत् ॥ ८३ ॥ कामभोगेहिविदुषःसहत्वंब्रह्मणाकथम् ॥ किंपुत्रे
णसहायातःपितेत्यत्रयथाभवेत् ॥ ८४ ॥ पितृगत्यनुकूलंहिपुत्रेऽपिगमनंतथा ॥ ब्रह्मण्यपिभवेद्भोगोविद्वद्भोगानुकूलतः ॥ ८५ ॥ तथाच
नित्यतृप्तत्वविरोधःस्यान्मतेतव ॥ भोगेऽनुज्ञातृतेशस्यसर्वत्रास्त्यविशेषतः ॥ ८६ ॥ मुक्तौविशेषनिर्देशवैयर्थ्यंतवसर्वथा ॥ किंचराजास्व
भृत्येनसहभुंक्तेयथातथा ॥ ८७ ॥ भुंक्तेविद्वद्ब्रह्मणातर्ह्यप्राधान्यंब्रह्मणोभवेत् ॥ ब्रह्मणःसर्वशेषित्वमपिभज्येततेमते ॥ ८८ ॥ ननुस्वामीयथा
दासीबालकस्यापिपोषकः ॥ नतच्छेषस्तथेशोऽपिमुक्तभोगानुकूलतः ॥ ८९ ॥ मैवंस्वामिनिमानुष्येभाविभृत्योपकारवत् ॥ ईश्वरेह्यात्मका
मेनोपकारःकोऽपितत्कृतः ॥ १९० ॥ तस्माद्ब्रह्मणईशस्यसहत्वायोगतोनहि ॥ सहयोगेतृतीयास्तिनवामुक्तौभिदाण्वपि ॥ ९१ ॥ किंतु
पृथग्जनानांयत्सुखंस्यात्कामभोगजम् ॥ क्रमेणतद्विमुक्तोऽयंयुगपत्सुखमश्नुते ॥ ९२ ॥ सर्वानंदलवानांहिब्रह्मानंदार्णवेलयः ॥ आप्तका
मोभवेद्विद्वानित्यभिप्रायआगमे ॥ ९३ ॥ सोऽश्नुतेसकलान्कामानक्रमेणसुरर्षभाः ॥ विदितब्रह्मरूपेणजीवन्मुक्तोनसंशयः ॥ ९४ ॥ इत्ये
वंब्रह्मगीतायामेतस्याअर्थईरितः ॥ सर्वेष्वित्यादिवाक्यंयद्भूमप्रकरणेस्थितम् ॥९५॥ तत्सार्वज्ञ्यपरंयद्वानिर्गुणोपासनास्तुतिः ॥ नतद्भेदपरंय
स्मान्निंदितातत्रभेदधीः ॥ ९६ ॥ यदल्पंभिन्नमस्तीतितन्मर्त्यमितिवाक्यतः ॥ तस्मान्नास्तिश्रुतिर्भेदेप्रमाणमितिसाधितम् ॥ ९७ ॥ नाप्य

स्त्येतद्यत्नाधिष्ठेयताकिल ॥ ४२ ॥ किंचेश्वरेशरीरित्वंवक्तुमेवनशक्यते ॥ सशरीरस्यनास्त्येवप्रियाप्रियनिवारणम् ॥ ४३ ॥ निष्कल
स्यातिशुद्धस्यस्वतंत्रस्यमहेशितुः ॥ नसंभवेच्छरीरित्वंवाङ्मनोऽतिगतस्यच ॥ ४४ ॥ शरीरत्वंप्रपंचेऽपिदुर्घटंनश्वरेचले ॥ अविद्याकल्पितं
विश्वंक्षेत्ररूपंपरेपदे ॥ ४५ ॥ कथंवातच्छरीरंस्याद्भोगायतनमीशितुः ॥ भोक्तृत्वमपिनास्तीशेनित्यतृप्तेनिरामये ॥ ४६ ॥ भोक्तृत्वंचशरी
रित्वंमायययाप्रत्यगात्मनि ॥ कल्पितंतेनसंसारीप्रत्यगात्मावभासते ॥ ४७ ॥ तन्निषेधेनशुद्धत्वंप्रत्यगात्मनिचिद्घने ॥ अभोक्तृत्वमदेहत्व
मसंसारित्वमिष्यते ॥ ४८ ॥ कथंवेदांतवेद्येऽस्मिन्शरीरित्वंत्वयेरितम् ॥ अंतर्यामिब्राह्मणंतुसर्वंविश्वंचराचरम् ॥ ४९ ॥ ब्रह्मणाव्याप्तमि
त्येतत्परंनान्यत्रतत्परम् ॥ चित्सत्ताभ्यांजगत्सर्वंब्रह्मणाततमन्यथा ॥ २५० ॥ नचस्यान्नस्फुरेन्नैवचेष्टेतानृतमित्यपि ॥ श्रुत्याप्रदर्शितंचां
तर्यामिब्राह्मणउत्तमम् ॥ ५१ ॥ नजीवपरयोर्देहदेहिभावनिबंधनम् ॥ सामानाधिकरण्यंमांक्षेत्रज्ञमित्यतःस्फुटम् ॥ ५२ ॥ ब्राह्मणोऽस्य
मुखमासीदितिवज्जीवजन्मच ॥ अस्त्येवेहेश्वराद्देहविशिष्टत्वेनतत्ततः ॥ ५३ ॥ क्षेत्रज्ञंचापिमांविद्धीत्याहविष्णुःकिलेतिचेत् ॥ मैवंनास्ती
श्वराज्जन्मकेवलस्यात्मनोऽजनेः ॥ ५४ ॥ अनादित्वाद्विशुद्धत्वान्नित्यत्वाच्चिद्घनत्वतः ॥ शरीरेणविशिष्टस्यपृथक्त्वंशुद्धजीवतः ॥ ५५ ॥
उत्पत्तिर्देहमात्रस्यश्रुतौप्रोक्तानचात्मनः ॥ अन्यथासर्ववेदांतविरोधंकोनिवारयेत् ॥ ५६ ॥ सर्वभूतेषुगूढोऽयंसाक्ष्येकोदेवउत्तमः ॥ सए
षोऽत्रप्रविष्टोऽस्तिसृष्ट्वासर्वंचराचरम् ॥ ५७ ॥ सवैप्रविष्टःसर्वेषुमाययाबहुरूपधृक् ॥ अमूढोमूढवत्सोऽयंव्यवहर्तास्तआग्रहात् ॥ ५८ ॥ इत्यत्रा
नुप्रविष्टस्यमूढत्वव्यवहर्तृते ॥ श्रूयेतेऽनेनजीवेनप्रविष्टइतिचश्रुतेः ॥ ५९ ॥ स्वप्रकाशस्यसत्यस्यशुद्धस्यपरमात्मनः ॥ जीवरूपेणदेहेषुप्रवेशः
श्रूयतेश्रुतौ ॥ २६० ॥ वेदाविनाशिनंनित्यंयएनमजमव्ययम् ॥ नित्यःसर्वगतःस्थाणुरचलोऽयंसनातनः ॥ ६१ ॥ अव्यक्तोऽयमचिंत्योऽय
मविकार्योऽयमुच्यते ॥ उत्पत्यसंभवादित्थंश्रुतिस्तत्रगणेष्वपि ॥ ६२ ॥ श्रीविष्णोःपरिपूर्णस्यक्षेत्रज्ञत्वंहरेर्मतम् ॥ अतआहहरिःसाक्षात्क्षेत्रज्ञं
विद्धिमामिति ॥ ६३ ॥ श्रीविष्णोर्नपृथग्जीवोविभुर्नाणुर्नमध्यमः ॥ किंत्वात्मासर्वभूतानांविष्णुरेवनचापरः ॥ ६४ ॥ क्षेत्रज्ञत्वंचक्षेत्रत्वं

मायय्याध्यस्तमीश्वरे ॥ ईश्वरात्मावबोधेनशिष्यतेविष्णुरव्ययः ॥ ६५ ॥ उपदेश्योपदेशादिव्यवहारस्तुकल्पितः ॥ ब्रह्मात्म्यैक्यमतेसम्यक्सिद्ध्यत्येवनिरंकुशम् ॥ ६६ ॥ स्ववशीकृतमायत्वाद्भगवान्जगतांगुरुः ॥ उपदेष्टास्तिसर्वत्राचार्यदेहेष्वपिस्वयम् ॥ ६७ ॥ स्ववर्णाश्रमसद्धर्मैर्नानाजन्मस्वनुष्ठितैः ॥ आराधितोहरिस्तुष्टोविद्यामुपदिशत्यजः ॥ ६८ ॥ स्वतःसिद्धात्मविज्ञानःस्वसाम्राज्यपदेस्थितः ॥ जीवाज्ञानानुसारेणतेभ्योह्युपदिशत्यसौ ॥ ६९ ॥ उपदेश्योपदेशादिर्यावदज्ञानभाव्ययम् ॥ भेदोध्वस्तेमहामोहेज्ञानेनास्तिमनागपि ॥ २७० ॥ तत्त्वज्ञानात्पुरैवायंव्यवहारोऽप्यपेक्ष्यते ॥ तत्सिद्धौमास्तुसर्वेयंव्यवहारपरंपरा ॥ ७१ ॥ यमेषवृणुतेदेवःसवेत्त्येनंनचापरः ॥ ददामिबुद्धियोगंतंयेनमामुपयांतिते ॥ ७२ ॥ इत्यादिमानसिद्धेऽर्थेनविवादोऽस्तिधीमताम् ॥ कल्पितेनापिभेदेनाप्युपदेशपरंपरा ॥ ७३ ॥ स्वप्नोपदिष्टमंत्रादावर्थसिद्धिरिवेष्यते ॥ यथावर्णेषुदीर्घत्वादयोधर्माध्वनेरपि ॥ ७४ ॥ आरोपिताअपिह्येतेसंप्रतिपत्तिहेतवः ॥ तथारोपितभेदोऽपितत्त्वविज्ञानकारणम् ॥ ७५ ॥ संभवत्येववेदांताःप्रमाणंसर्वथात्रनः ॥ एतेनस्वर्गनरकौबंधमोक्षौभवाभवौ ॥ ७६ ॥ व्याख्यातौमातृनिष्ठत्वान्नतेसंतिपरेपदे ॥ निर्दुष्टेऽपिमतेदोषोद्भावनंमंदबुद्धयः॥ ७७॥ कुर्वंतियदिकुर्वंतुतेनकाक्षतिरस्तिनः॥ नहिमंदधियांवेदसिद्धांतोद्धाटनेस्वयम्॥७८॥ सामर्थ्यंकिंतुगोविंदकृपापांगनिरीक्षणात् ॥ तच्चुसज्जननिर्णीतमार्गेश्रद्धावतांभवेत् ॥ ७९ ॥ सत्सुचेद्दोषकालुष्यंकगतिस्तर्हिदुर्धियाम् ॥ अतोनिर्दुष्टमालोच्यमतंग्राह्यंश्रुतेर्हरेः ॥ २८० ॥ क्षेत्रज्ञंमांमदीयंत्वंविद्धीत्यादियदर्थतः ॥ व्याख्यानमसमीचीनतयैतत्खंडितंबुधैः ॥ ८१ ॥ भेदाभेदमतंतद्वत्खंडितंबहुसूरिभिः ॥ नयुक्तंबंधमोक्षादेरप्यसंभवतोनयैः ॥ ८२ ॥ भेदाभेदमतेतत्त्वंपदार्थौब्रह्मजीवकौ ॥ दुर्निरूपौनयैस्तत्रकस्तावत्त्वंपदार्थकः ॥ ८३ ॥ जीवस्तेसंमतःकिंसभेदाभेदोभयात्मकः ॥ भिदाभिदाभ्यामंशाभ्यामंशीकिंवानचाग्रिमः ॥ ८४ ॥ जीवस्यावस्तुतादोषान्नहिजीवोभिदाभिदे ॥ तयोस्तुपरतंत्रत्वात्समुदायोनसंभवेत् ॥ ८५ ॥ द्वितीयेयद्यभेदांशोब्रह्मतर्ह्यस्तुतस्यच ॥ जीवांशत्वंहिजीवस्यसावयवत्त्वमापुयात् ॥८६॥ नाभेदांशोयदिब्रह्मतर्ह्यत्यंतभिदानयोः॥ तथाचज्ञानमोक्षादिव्यवहारोनसंभवेत्॥ ८७॥ शास्त्रोपदेशः

कस्यायंनाभेदांशस्यसंभवेत्॥ ब्रह्मरूपतयातस्यनोपदेशाद्यपेक्षता॥ ८८॥ भेदांशस्योपदेशोनाहंब्रह्मास्मीत्ययोगतः॥ मोक्षेऽपिनभिदांशस्यस्या
दभेदोविरोधतः॥ ८९॥ नचाविद्यादिदोषोऽस्याभेदांशस्यापिसंभवेत्॥ ब्रह्मण्यपिप्रसज्येतनापिभेदांशगःसच॥२९०॥ उपाधिजननात्पू
र्वंभेदाभावादथापिच॥ उपाधिमनपेक्ष्यैवभिन्नोंऽशोजीवउच्यते॥ ९१॥ तदंशनाशेजीवस्यनाशात्कस्यविमुक्तता॥ ब्रह्मणस्त्वभिदांशस्य
नित्यमुक्तत्वमेवहि॥ ९२॥ मोक्षेऽपिभिन्नाभिन्नश्चेत्तर्हिब्रह्मैवतत्त्ववित्॥ इत्येवकारस्त्वारस्यंनस्यान्मोक्षेऽपिसंस्तुतेः॥ ९३॥ अनेकदोषदु
ष्टत्वाद्भेदाभेदमतंस्वतः॥ खंडितंसर्वथाहेयतयोपेक्ष्यमितीरितम्॥ ९४॥ शांकरेदिग्जयेऽस्माभिर्बहुधेत्युपरम्यते॥ अतआविद्यकोभेदःपरमे
श्वरजीवयोः॥ ९५॥ तात्त्विकंत्वैक्यमेवास्तिवेदांतैःसिद्धमित्यलम्॥ विस्तरेणेतिजयतिब्रह्मात्मैक्यपराश्रुतिः॥ ९६॥ श्रुतिरपिपरमार्थं
ब्रह्मभावंविशुद्धंवदतिजडविकारान्संव्युदस्यप्रतीचः॥ विमलसुखघनैक्यंतत्त्वमस्यादिवाक्यैःस्मृतिरपिशतशश्चप्राहतत्त्वैक्यनिष्ठाम्॥९७॥
नचायंसंसारीभवतिहरितोभिन्नउदितःसएवादौसृष्ट्वाप्रविशतिहरिर्जीववपुषा॥ नचान्योऽस्माद्दृष्टेत्यपवदतिभेदंश्रुतिशिरःप्रवेशःसंबंधोभ्रम
कलितएवास्यनियतः॥ ९८॥ अहंकर्तेत्याद्याभ्रमवशतएवास्यकलनाभ्रमेनष्टेनश्यत्यहमितिममेत्यांश्यकलना॥ अतःक्षेत्रज्ञंमामितिवद
तिजीवात्मपरयोर्हरिःशुद्धंतत्त्वंनिरवधिसुखंचैक्यममृतम्॥ ९९॥ अतःपूर्वोक्तएवार्थःश्रीहरेःसंमतःश्रुतेः॥ नतत्रभेदकलनानभेदाभेदवि
भ्रमः॥ ३००॥ जीवत्वंमायायाशुद्धेकल्पितंबोधतःक्षतम्॥ शुद्धमैक्यंतयोःसिद्धंभेदस्त्वाविद्यकोऽनयोः॥ १॥ नह्यविद्याकृतोभेदःपरमा
र्थपदंस्पृशेत्॥ अध्यस्तगुणदोषाभ्यांनाधिष्ठानस्यसंगता॥ २॥ आकाशेकल्पितंनैल्यमूषरेवाजलंभ्रमात्॥ नरूपवत्कृतंव्योमनैल्येने
हमनागपि॥ ३॥ नवापंकीकृतोदेशःकल्पितेनांभसोषरः॥ तथाविद्याकृतंब्रह्माधिष्ठानंनस्पृशेन्मलम्॥ ४॥ संसारितामहेशेवाजीवेसर्व
ज्ञताथवा॥ नशंक्योपाधिभेदेनतयोर्भेदोयतोमतः॥ ५॥ एकमेवाद्वितीयंयद्वस्तुब्रह्माजरामरम्॥ स्वाविद्ययातदेवेहद्विधाभिन्नमुपाधि
तः॥ ६॥ अविद्यापित्रिधाभिन्नागुणत्रयविभागतः॥ विशुद्धसत्वंमायेतिसर्वशक्तिनियामिका॥ ७॥ रजस्तमोभ्यांमलिनमविद्येत्युच्य

र्दिष्टोहरिणाज्ञानहेतुकः ॥ २२० ॥ सार्वज्ञाल्पज्ञतादेस्तुमाययाकल्पितत्वतः ॥ नभेदस्तत्कृतःसत्यःपरमेश्वरजीवयोः ॥ २१ ॥ व्यावहारिक
भेदोऽस्तुपरमेश्वरजीवयोः ॥ व्यवहारस्थलेऽस्माभिरपिस्वीक्रियतेसच ॥ २२ ॥ व्यवहारेऽस्तुसर्वज्ञउपास्यःपरमेश्वरः ॥ उपासकोऽस्तुजी
वोऽयंश्रुतिस्मृतिप्रमाणतः॥२३॥ अतःसार्वज्ञमूढत्वेनिरुपाधौचिदद्वये ॥ माययाकल्पितेतत्रलौहित्यंस्फटिकेयथा ॥२४॥ भेदधीश्चेद्यथार्था
स्यात्तदाभेददृशोभयम् ॥ नैवब्रूयाच्छ्रुतिस्तस्माद्भेदधीर्विभ्रमात्मिका ॥ २५ ॥ अभेदोयदिनेष्टःस्यान्मोक्षंतद्ज्ञानतोनसा ॥ ब्रूयाद्भूतेततोवि
द्योद्यभेदःश्रुतिसंमतः ॥ २६ ॥ यत्तुक्षेत्रज्ञमित्यत्रव्याख्यातंपरजीवयोः ॥ नास्त्यैक्यंकिंतुजीवस्यशरीरत्वात्परेशितुः ॥ २७ ॥ तद्व्यपदेशइ
त्यादितत्तुच्छंतत्कथंशृणु ॥ तद्व्यपदेशइत्यत्रकिमभिप्रेतमस्तिते ॥ २८ ॥ किंतदाश्रयतावस्तुवृत्त्यावाकल्पिताथवा ॥ नाद्योजीवपराभेदः
श्रुतिस्मृतिशतैर्नयात् ॥ २९ ॥ सिद्धोऽस्तिवस्तुतोजीवेनपराश्रयताभवेत् ॥ नद्वितीयोयतस्तस्याःकल्पितायाअविद्यया ॥ २३० ॥
तत्त्वावेदकवेदांतप्रमेयत्वंनसंभवेत् ॥ अहंब्रह्मास्मितत्त्वंभोस्तत्त्वमेवत्वमेवतत् ॥ ३१ ॥ आत्माब्रह्मैवब्रह्मात्मैवेत्यत्रात्मबुभुत्सुभिः ॥
विचिकित्स्यंनहीत्यादिमहावाक्येषुबोधिषु ॥ ३२ ॥ त्वदुक्तकल्पनायोगान्नभेदोऽस्तिमनागपि ॥ किंचात्मजीवक्षेत्रज्ञशब्दानांहिनियं
तरि ॥ ३३ ॥ लक्षणातेमताकिंवामुख्यार्थत्वमधीश्वरे ॥ नाद्योऽनुपपत्यभावादीश्वरेलक्षणांविना ॥ ३४ ॥ नद्वितीयोयतोजीवोनश
रीरंपरेशितुः ॥ नहिजीवःपरस्यास्तिभोगायतनमंजसा ॥ ३५ ॥ जीवस्येशशरीरत्वेतद्वाचकपदस्यच ॥ प्रवृत्तिःस्यादनायासात्तद्युक्तेऽपि
शरीरिणि ॥ ३६ ॥ नैवमस्तियतोजीवेनशरीरस्यलक्षणम् ॥ ननुसाक्षात्प्रयत्नेनजन्यव्यापारवत्त्वकम् ॥ ३७ ॥ शरीरलक्षणंतच्चजीवेऽप्य
स्तितथेष्यते ॥ साक्षात्तस्येशयत्नस्याधिष्ठेयत्वादिहेतिचेत् ॥ ३८ ॥ अंगुल्यादेरपीत्थंस्यात्साक्षाद्यत्नाश्रयत्वतः ॥ शरीरत्वंनतद्युक्तंसर्वलो
कविरोधतः ॥ ३९ ॥ सत्यंत्यावयवित्वेचेच्छरीरत्वंतदप्यहो ॥ जीवेऽत्यावयवित्वस्याप्यभावान्नैवसांप्रतम् ॥२४०॥ ब्रह्मण्यपिप्रयत्नस्याभा
वाच्चैतन्नसांप्रतम् ॥ वेदांतवेद्येचिद्धातौब्रह्मण्यक्रियआत्मनि ॥ ४१ ॥ अनित्यस्याथनित्यस्यप्रयत्नस्यास्त्ययोग्यता ॥ अतोजीवस्यना

एवंचाखंडवाक्यार्थमभिधायसमासतः ॥ विस्तरेणैतमेवार्थंवक्तुमारभतेहरिः ॥ १ ॥ जडवर्गात्मकंक्षेत्रंतच्छरीरमितीरितम् ॥ जडंदृश्यंपरिच्छिन्नंयच्चवस्तुस्वरूपतः ॥ २ ॥ इच्छादिधर्मकंयादृग्यैर्विकारैःसमन्वितम् ॥ यतश्चोत्पद्यतेहेतोर्यत्कार्यंसचराचरम् ॥ ३ ॥ सक्षेत्रज्ञःस्वरूपेणयश्चिदानंदसद्वपुः ॥ यउपाधिकृतायस्यप्रभावाःशक्तयोऽर्थतः ॥ ४ ॥ क्षेत्रक्षेत्रज्ञयाथात्म्ययुतंसर्वैर्विशेषणैः ॥ शृणुसंक्षेपतस्त्वंमेवाक्याच्छ्रुत्वावधारय ॥ ५ ॥ चकारपंचकेनात्रज्ञेयःसर्वसमुच्चयः ॥ ६ ॥ ३ ॥ कैरिदंविस्तरेणोक्तंयस्यसंक्षेपउच्यते ॥ इत्यत्राहस्तुवन्नीशःश्रोतृ

तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत् ॥ सचयोयत्प्रभावश्चतत्समासेनमेशृणु ॥ ३ ॥
ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक् ॥ ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

धीरोचनायतत् ॥ १ ॥ ऋषिभिःसर्वधर्मज्ञैर्वसिष्ठादिभिरादरात् ॥ बहुधातत्त्वशुद्ध्यर्थंमोक्षोपायेनिरूपितम् ॥ २ ॥ ऋगादिमंत्रैरुक्तंयद्ब्राह्मणैश्चविवेकतः ॥ यैर्वाक्यैःस्फुच्यतेब्रह्मगम्यतेयुक्तिसंयुतैः ॥ ३ ॥ उपक्रमोपसंहाराद्यैक्यवाक्यतयादरात् ॥ निश्चयोत्पादकैःसम्यग्गीतमद्वैततत्परैः ॥ ४ ॥ सदेवेत्यादिवाक्यौघैर्हेतुमद्भिर्विनिश्चितैः ॥ कुतस्तुखलुसौम्येदंस्यादित्यादिकहेतुभिः ॥ ५ ॥ नास्तिकादिनिरासाय बहुधागीतमित्यपि ॥ एतैर्यद्विस्तरेणोक्तंतत्संक्षेपेणतेब्रुवे ॥ ६ ॥ ४ ॥

तेबुधैः ॥ तमःप्रधानाप्रकृतिस्तृतीयाभूतकारिणी ॥ ८ ॥ मायाशक्त्याश्रयोब्रह्मपरमेशइतीरितः ॥ ससर्वज्ञःसर्वशक्तिर्जगज्जन्मादिकारण
म् ॥ ९ ॥ नतस्यावृतिविक्षेपौकर्तुंशक्तामहेश्वरी ॥ सस्वप्रकाशचित्सौख्यसंविदालिंगितोयतः ॥३१० ॥ नित्यमुक्तस्वभावत्वात्स्वेमहिम्न्येव
तिष्ठति ॥ सृष्ट्यादिकरणेऽप्यस्यनश्रमःसर्वशक्तितः॥ ११ ॥ यदविद्याश्रयोब्रह्मसक्षेत्रज्ञइतीरितः॥ तस्यावृतस्वरूपत्वात्संसारित्वमितीरितम्
॥ १२ ॥ स्वाविद्याध्यस्तकर्तृत्वभोक्तृत्वाद्यभिमानतः ॥ वस्तुतःशुद्धएवासौक्षेत्रज्ञःपुरुषोत्तमः ॥ १३ ॥ तमःप्रधानयाशक्त्याब्रह्मांडंकल्पि
तंपरे ॥ समष्टिव्यष्टिभेदेनद्विविधंतदुदीरितम् ॥ १४ ॥ जीवेत्वंपदवाच्यार्थेव्यष्ट्याख्यंतत्प्रकल्पितम् ॥ ईशेतत्पदवाच्यार्थेसमष्ट्याख्यंप्रक
ल्पितम् ॥ १५ ॥ तद्वयंक्षेत्रशब्देनसमष्टिव्यष्टिसंज्ञकम् ॥ उक्तंभगवतातत्रक्षेत्रज्ञोभगवानसौ ॥ १६ ॥ तद्वयंभेदकंक्षेत्रंत्यक्त्वामायामयं
जडम् ॥ शुद्धंक्षेत्रज्ञमात्मानंप्रत्यंचंब्रह्मवेत्तियः॥ १७ ॥ ससम्यग्ज्ञानवान्धीरोमतोभगवतोहरेः ॥ तदेवमनृतंक्षेत्रंमायायाकल्पितंपरे ॥ १८ ॥
सत्यक्षेत्रज्ञएवैतद्भमाधिष्ठानमद्वयः ॥ क्षेत्रक्षेत्रज्ञयोरेवंयज्ज्ञानंवेदमानजम् ॥ १९ ॥ तदेवमोक्षहेतुत्वाज्ज्ञानमज्ञानबाधकम् ॥ ममश्रीवासुदे
वस्यमतंनान्यद्भमात्मकम् ॥ ३२० ॥ अत्रायमाशयोविष्णोरागमस्यापिसंमतः ॥ वस्तुतोब्रह्मचिन्मात्रमेकमेवाद्वयंपरम् ॥ २१ ॥ असंगो
दासीनंकर्तृभोक्तृभावादिवर्जितम् ॥ तदेवाविद्ययास्वस्मिन्संसारित्वंप्रकल्प्यच ॥ २२ ॥ जीवेश्वरभिदांतद्वदध्यस्यावृतचिद्वपुः॥ विस्मृ
त्यात्मपदंशुद्धंजीवोऽहमितिमन्यते ॥ २३ ॥ सजीवोऽप्यंधतमसिनिमग्नोलिंगसंवृतः ॥ जन्ममृत्युमयींघोरांसंसृतिंभजतेभ्रमात् ॥ २४ ॥
उपाधौक्षेत्ररूपेऽस्मिन्नहमित्यभिमानवान् ॥ क्षेत्रज्ञोजंतुरज्ञोऽसौजीवइत्यभिशब्दितः ॥ २५ ॥ पापपुण्यमयीसंविदुद्भूतास्यदृढांतरा ॥ अ
विद्याकामकर्मादिमलैराच्छादितांतरः ॥ २६ ॥ पुनर्जन्मपुनर्मृत्युंप्रयात्याकल्पमातुरः ॥ कदाचित्पुण्यसंपत्त्यात्यक्तपापमलोनरः ॥ २७॥
ईश्वराभिमुखत्वैकहेतुंभक्तिंपरांहरौ ॥ कृत्वाशुद्धिंततःप्राप्यवैराग्यादियुतःसुधीः ॥ २८॥ उपसृत्यगुरुंतस्माच्छ्रुत्वावेदांतसद्वचः ॥ तत्त्वमस्या
दितज्जन्यबोधेनात्मानमद्वयम् ॥२९॥ साक्षात्कृत्यस्वयंसाक्षात्पुरुषोत्तमएवसः ॥ अतआहहरिःसाक्षात्क्षेत्रज्ञंविद्धिमामिति ॥ ३३० ॥ २ ॥

एवंक्षेत्रमुदाहृत्यक्षेत्रज्ञंतस्यसाक्षिणम् ॥ क्षेत्राद्विवेकतोवक्तुंविस्तरेणहरिर्विभुः ॥ १ ॥ तज्ज्ञानयोग्यतासिद्ध्यैसाधनान्याहसर्ववित् ॥ विद्यमा
नैर्गुणैर्वाप्यविद्यमानैरुताऽऽत्मनः॥ २ ॥ श्लाघनंकिलमानिस्वंस्वपूज्यत्वाभिमानिता ॥ स्वधर्मख्यापनंलाभपूजाद्यर्थंहिदंभिता ॥ ३ ॥ प्राणिनां
पीडनंहिंसाकायेनमनसागिरा ॥ एतेषांवर्जनंज्ञानंज्ञानसाधनभावतः ॥ ४ ॥ परापराधेप्राप्तेऽपिचेतोविकृतिकारणे ॥ बुद्धेरविक्रियाक्षांति
रकौटिल्यंतथार्जवम् ॥ ५ ॥ परप्रतारणाशून्यंव्यवहारउपस्थिते ॥ मोक्षमार्गोपदेष्टासद्गुरुराचार्यईरितः ॥ ६ ॥ तस्यशुश्रूषणंभक्त्याज्ञानसा
धनमुत्तमम् ॥ मृज्जलाभ्यांबहिःशौचंशरीरमलशोधनम् ॥ ७ ॥ शत्रुभावनयात्यागोरागादेरांतरंस्मृतम् ॥ मोक्षमार्गेप्रवृत्तस्यस्थैर्यंविघ्नैरचा
ल्यता ॥ ८ ॥ देहेंद्रियादिवर्गस्यप्रवृत्तिर्यास्वभावतः ॥ तांनिरुद्ध्याथसन्मार्गेस्थापनंज्ञानसाधनम् ॥ ९ ॥ ७ ॥ दृष्टादृष्टेषुभोगेषुवृत्तीराग

अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवम् ॥ आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः ॥ ७ ॥
इंद्रियार्थेषुवैराग्यमनहंकारएवच ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥

विरोधिनी ॥ यास्त्यस्पृहात्मिकातत्स्याद्वैराग्यंज्ञानसाधनम् ॥ १ ॥ वैराग्यादियुतत्वेनसर्वोत्कृष्टोऽस्म्यहंबुधः ॥ इतिगर्वोऽस्त्यहंकारस्तदभा
वोऽनहंकृतिः ॥ २ ॥ अयोगव्यवच्छेदार्थएवकारइहेरितः ॥ समुच्चयार्थश्चस्वत्रतेनोक्तानांसमुच्चितिः ॥ ३ ॥ विंशतेःसाधनानांचयोगए
वात्रसाधनम् ॥ ज्ञानमित्युक्तमेकस्याप्यभावोनैवसंमतः ॥ ४ ॥ जन्मनोगर्भवासादियोनिद्वारेणनिःसृतेः ॥ मर्मच्छेदनरूपस्यमृत्योर्दुःखाक
रस्यच ॥ ५ ॥ प्रज्ञाशक्तिनिरोधादिरूपायाजरसस्तथा ॥ व्याधीनांज्वरमुख्यानांदुःखानांबहुरूपिणाम्॥ ६ ॥ आध्यात्मिकादिरूपाणामि
ष्टानिष्टयुजांतथा ॥ दोषस्यवातपित्तासृक्श्लेष्ममूत्रमलादिभिः ॥ ७ ॥ पूर्णत्वेनवपुर्निंदितत्वस्यालोचनंपुनः ॥ व्याध्यंतेष्वथवादुःखरूपदो
षानुदर्शनम् ॥ ८ ॥ इदंचभोगवैराग्यहेतुत्वेनात्मदर्शने ॥ सम्यगुपकरोत्येवंभूयोभूयोऽनुदर्शनम् ॥ ९ ॥ ८ ॥

सक्तिर्ममेदमित्येवप्रीतिमात्रमुदीरिता ॥ अभिष्वंगस्तुपुत्रादौतादात्म्याद्ध्यासलक्षणः ॥ १ ॥ अन्यस्मिन्पुत्रभार्यादौसुखदुःखान्वितेसति ॥
अहमेवसुखीदुःखीत्यादिरूपदुराग्रहः ॥ २ ॥ वर्ज्यौतौसक्त्यभिष्वंगौपुत्रदारगृहादिषु ॥ इष्टानिष्टपरिप्राप्तौसर्वदासमचित्तता ॥ ३ ॥
इष्टप्राप्तौनहर्षःस्यान्नानिष्टाप्तौविषादता ॥ ४ ॥ ९ ॥ वासुदेवेभगवतिमयिश्रीपरमेश्वरे ॥ सर्वोत्कृष्टत्वविज्ञानपूर्विकाप्रीतिरुत्तमा ॥ १ ॥
वासुदेवात्परोनान्यःपुमर्थःसचमेगतिः ॥ इत्येवंनिश्चयेनांतर्याविघ्नैर्नाभिभूयते ॥ २ ॥ साभक्तिरुत्तमंज्ञानसाधनंज्ञानमुच्यते ॥ स्वभावतोवासं
स्काराच्छुद्धोदेशोयथोक्तितः ॥ ३ ॥ तमेवसेवितुंशीलमस्यतद्भावएवतत् ॥ प्राकृतानांजनानांचसदाभोगैकचेतसाम् ॥ ४ ॥ सभायाम
रतिःशास्त्रप्रतिकूलानुवादिनाम् ॥ साधूनांतत्त्वनिष्ठानांसभायांतूचितारतिः ॥ ५ ॥ संगःसर्वात्मनाहेयःसचेद्धातुंनशक्यते ॥ ससद्भिःसह

असक्तिरनभिष्वंगःपुत्रदारगृहादिषु ॥ नित्यंचसमचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥
मयिचानन्ययोगेनभक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ १० ॥
अध्यात्मज्ञाननित्यत्वंतत्त्वज्ञानार्थदर्शनम् ॥ एतज्ज्ञानमितिप्रोक्तमज्ञानंयदतोऽन्यथा ॥११॥

कर्तव्यःसंतांसंगोहिभेषजम् ॥ ६ ॥ इत्थंमदालसामात्राप्यलर्कंप्रत्युदीरितम् ॥ ७ ॥ १० ॥ आत्मादिविषयंज्ञानमध्यात्मज्ञानमुच्यते ॥
तत्रैवसततंनिष्ठावत्त्वंज्ञानैकसाधनम् ॥ १ ॥ विवेकनिष्ठोवाक्यार्थज्ञानेहिभवतिक्षमः ॥ तत्त्वज्ञानस्यवेदांतवाक्यप्रामाणिकस्यच ॥ २ ॥
अहंब्रह्मास्मीतिसाक्षात्कारस्यभ्रांतिघातिनः ॥ अमानित्वादिकरणपरिपाकफलस्यच ॥ ३ ॥ प्रयोजनमविद्यातत्कार्यदुःखादिबाधनम् ॥
चिद्रूपपरमानंदावाप्तिर्मोक्षश्चतस्ययत् ॥ ४ ॥ आलोचनंतदप्यात्मज्ञानसाधनमीरितम् ॥ एतद्विंशतिसंख्याकंज्ञानार्थत्वेनहेतुना ॥ ५ ॥ ज्ञान
मित्युक्तमस्माद्यद्विपरीतमनर्थदम् ॥ मानित्वादितदज्ञानमुक्तंज्ञानविरोधियत् ॥ ६ ॥ अतोऽज्ञानपरित्यागाद्ग्राह्यंपूर्वोदितंजनैः ॥ ७ ॥ ११ ॥

किंज्ञानेनयथोक्तेनज्ञेयमित्यतआहच ॥ ज्ञेयंमुमुक्षुणायत्तत्स्पष्टंवक्ष्याम्यहंहरिः ॥ १ ॥ तत्फलेनस्तुवन्नाहश्रोतारंचप्रवर्तयन् ॥ ज्ञेयंयद्वक्ष्यमाणंचज्ञात्वाबंधात्प्रमुच्यते ॥ २ ॥ आदिमन्नैवयद्ब्रह्मपरमात्मचिदद्वयम् ॥ बहुव्रीहिसमासेनैवार्थलाभेऽपिवस्तुनः ॥ ३ ॥ प्रयोगोमतुपोज्ञेयोनित्ययोगेऽतिशायने ॥ निर्विशेषंपरंब्रह्मवस्तुवाचामगोचरम् ॥ ४ ॥ विधिद्वाराप्रमाणस्यविषयःसद्गिरोच्यते ॥ निषेधद्वारतोमानविषयोऽसद्गिरोच्यते ॥ ५ ॥ इदंतुनिर्विशेषत्वात्स्वप्रकाशतयाऽद्वयम् ॥ उभयस्माद्विभिन्नंतज्ज्ञेयंब्रह्मपरात्परम् ॥ ६ ॥ प्रतियोगिव्यवच्छेदशून्यत्वादेवचिद्घनम् ॥ यतोवाचोनिवर्तंतेअप्राप्यमनसासह ॥ ७ ॥ इत्यादिश्रुतिवाक्येभ्यःशब्दातीतंविनिश्चितम् ॥ नभावत्वाश्रयोब्रह्मनाभावत्वाश्रयोऽस्त्यतः ॥ ८ ॥ नैवकेनापिशब्देनमुख्यावृत्त्यातदुच्यते ॥ शब्दप्रवृत्तिहेतूनांजात्यादीनामभावतः ॥ ९ ॥ ज्ञेयस्यब्रह्मणोनास्ति

ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते ॥ १२ ॥

शब्दबोध्यत्वमंजसा ॥ लोकेगुणक्रियाजातिसंबंधाहेतवोगिराम् ॥ १० ॥ प्रवृत्तेस्तेनसंत्यस्मिन्निर्गुणत्वादिहेतुभिः ॥ शुक्लःपचतिगौरश्वोधनीगोमानितिस्फुटम् ॥ ११ ॥ दृष्टाप्रवृत्तिरेतासांगुणाद्यैर्हेतुभिर्गिराम् ॥ निर्गुणंनिष्क्रियंशुद्धमेकमेवाद्वितीयकम् ॥ १२ ॥ ब्रह्मतस्मान्नकेनापिवक्तुंशब्देनशक्यते ॥ कथंतर्हिप्रवक्ष्यामीत्येवंभगवतेरितम् ॥ १३ ॥ शृणुलक्षणयावस्तुप्रतिपादनमेवतत् ॥ यथाकथंचिज्जिज्ञासोर्बोधनार्थंगिरोच्यते ॥ १४ ॥ वस्तुतोवचनातीतंसर्ववेदांतसंमतम् ॥ निर्गुणंनिष्क्रियंशांतंतथासंगोह्ययंपुमान् ॥ १५ ॥ नेतिनेतीतिशतशःसंतिवाक्यानिचश्रुतेः ॥ नैतदस्तिननास्तीदंद्वयोर्मोहोद्भवत्वतः ॥ १६ ॥ नसत्तन्नासदित्येवंप्राहविश्वेश्वरोऽपिहि ॥ आविर्भावतिरोभावौबुद्धेर्यत्साक्षिकाविह ॥ १७ ॥ तमेकमंतरात्मानंविद्यादन्यभिचारिणम् ॥ इत्युक्तंसंप्रदायज्ञैर्वार्तिकेश्रीसुरेश्वरैः ॥ १८ ॥ १२ ॥

एवंप्ररोचितायाहभगवानर्जुनायच ॥ आदौक्षेत्रस्वरूपंतत्सर्वानर्थाश्रयत्वतः ॥ १ ॥ भूम्यादिपंचभूतानिमहांतिव्यापकत्वतः ॥ तत्कारण
महंकारोबुद्धिस्तत्कारणंमहत् ॥ २ ॥ तत्कारणंप्रधानंस्यादव्यक्तंत्रिगुणात्मकम् ॥ इत्थंसांख्यमतेनैतद्व्याख्यातंस्वमतेनतु ॥ ३ ॥ अव्यक्त
शब्दितामायाशक्तिर्यापारमेश्वरी ॥ अनिर्वाच्येतिसर्गादौतद्विषयंयदीक्षणम् ॥ ४ ॥ साबुद्धिःस्यादहंकारस्त्वीक्षणानंतरंहियः ॥ बहुस्यामि
तिसंकल्पस्ततोव्योमादिपंचकम् ॥ ५ ॥ इत्येवमष्टधाभिन्नायाप्रोक्ताप्रकृतिःपुरा ॥ श्रोत्रादिपंचकंचैवमनोवागादिपंचकम् ॥ ६ ॥ शब्दादिवि
षयाःपंचतान्येतानिहिकापिलाः॥ चतुर्विंशतितत्त्वानिप्राहुस्तत्क्षेत्रमुच्यते ॥ ७ ॥ ५ ॥ अथेदानींचयान्याहुःकाणादाआत्मनोगुणान् ॥ क्षेत्र
धर्मास्तएतेतुप्राहेतीशोनतद्गुणाः॥ १ ॥ सुखेतत्साधनेचेदंभूयान्मेचेतियास्पृहा ॥ चित्तवृत्तिर्भवेत्सेच्छाकामरागापराभिधा ॥२॥ दुःखेतत्साध

महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच ॥ इंद्रियाणिदशैकंचपंचचेंद्रियगोचराः ॥ ५ ॥
इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः ॥ एतत्क्षेत्रंसमासेनसविकारमुदाहृतम् ॥ ६ ॥

नेचेदंमाभूदित्येवचित्तगा ॥ वृत्तिःसाद्वेषइत्याहुःक्रोधेर्ष्याद्यपराभिधा ॥३॥ निरुपाधीच्छाविषयाधर्मासाधारणोद्भवा ॥ चित्तवृत्तिःसुखंतत्स्या
त्सुखाभिव्यंजिकात्मनः॥ ४ ॥ तथैवद्वेषविषयाधर्मासाधारणोद्भवा ॥ चित्तवृत्तिर्हिसादुःखमित्याहुर्मायिकांशजम् ॥ ५ ॥ पंचभूतविकारात्म
संघातःसेंद्रियंवपुः॥ चेतनाचित्तवृत्तिर्यावेदांतादिप्रमाणजा ॥ ६ ॥ ज्ञानाख्यासास्वरूपस्यज्ञानाभिव्यंजिकामता ॥ धृतिर्देहेंद्रियादेर्यावसन्न
स्याशुधारिणी ॥७॥ इच्छादिग्रहणंचात्रसर्वेषामुपलक्षणम् ॥ अंतःकरणधर्माणांसर्वंतत्क्षेत्रमुच्यते ॥८॥ जन्मनाशादियुक्तंयत्सविकारंतदुच्यते॥
महाभूतादिधृत्यंतंसविकारंसमासतः॥९॥एतत्क्षेत्रमितिप्रोक्तंक्षेत्रज्ञस्तुततःपृथक् ॥ निर्विकारःसएवास्तसाक्षीक्षेत्रस्यभासकः॥१०॥ क्षेत्रचिन्हं
विकारित्वंनिर्विकारस्तुतःपरम् ॥ नर्तेस्याद्विक्रियांदुःखीसाक्षितेकाविकारिणः॥११॥ धीविक्रियासहस्राणांसाक्ष्यतोऽहमविक्रियः ॥१२॥६॥

सर्वेषांकल्पितानांतत्कार्याणांपारमार्थिकम् ॥ अधिष्ठानतयाव्याप्तंबहिरंतस्त्वनावृतम् ॥ १ ॥ स्थावरंजंगमंयद्यद्भूतजातंप्रकल्पितम् ॥
तत्सर्वंब्रह्मचिन्मात्रंनततोव्यतिरिच्यते ॥ २ ॥ कल्पितानामधिष्ठानस्वरूपत्वंनभिन्नता ॥ एवंसर्वात्मकत्वेऽपिदुर्लक्ष्यत्वादरूपितत् ॥ ३ ॥
दुर्विज्ञेयमतोऽज्ञानांदेहाद्यात्मधियांनृणाम् ॥ वर्णकोटिसहस्रैस्तदप्राप्यत्वात्सुदूरगम् ॥ ४ ॥ विदुषांस्वात्मरूपेणनित्यप्राप्तंसमीपगम् ॥ ५ ॥
॥ १५ ॥ यदुक्तमेकमेवेदंसर्वमावृत्यतिष्ठति ॥ इत्येतद्विवृणोतीशोभेदवादनिवृत्तये ॥ १ ॥ अभिन्नंसर्वभूतेषुव्योमवद्व्यापकंमहत् ॥ देहता

बहिरंतश्चभूतानामचरंचरमेवच ॥ सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत् ॥ १५ ॥
अविभक्तंचभूतेषुविभक्तमिवचस्थितम् ॥ भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच ॥ १६ ॥

दात्म्यरूपेणभासमानतयाभ्रमात् ॥ २ ॥ प्रतिदेहंविभागंतत्संप्राप्तमिवचस्थितम् ॥ औपाधिकतयाध्यस्तभेदाभासेनकाक्षतिः ॥ ३ ॥ वा
स्तवाद्वैतचिद्धातोःक्षेत्रज्ञस्यात्मनोविभोः ॥ ननुक्षेत्रज्ञएकोऽस्तुव्यापकःसर्वजंतुषु ॥ ४ ॥ ब्रह्मतस्माद्विभिन्नंस्याज्जगज्जन्मादिकारणम् ॥ मै
वंब्रह्मैवचिन्मात्रंक्षेत्रज्ञोज्ञेयमद्वयम् ॥ ५ ॥ स्थितौबिभर्तिभूतानिलयेग्रसनशीलवत् ॥ सृष्टौसर्वप्रभवनशीलंज्ञेयंतदद्वयम् ॥ ६ ॥ यथार
ज्ज्वादिसर्पादेःकल्पितस्यमृषात्मनः ॥ जनिस्थितिलयाधारंतथाब्रह्माखिलस्यतत् ॥ ७ ॥ १६ ॥

एवंचनिर्विशेषस्यब्रह्मणःसदसद्विरा ॥ वक्तुंचेन्नास्तिसामर्थ्यंप्रत्ययाविषयत्वतः ॥ १ ॥ असत्वमेवकिंनस्यात्तर्हिज्ञेयस्यसर्वथा ॥ इत्याशं
कानिवृत्त्यर्थंतदस्तित्वंप्रदर्शयन् ॥ २ ॥ सर्वप्राणींद्रियोपाधिद्वारेणास्याखिलात्मताम् ॥ सच्चिदानंदक्षेत्रज्ञरूपत्वेनाहकेशवः ॥ ३ ॥ यस्यस
र्वेषुदेहेषुपाणयश्चरणाजडाः ॥ स्वस्वव्यापारविषयेप्रवृत्त्याचेतनस्यतत् ॥ ४ ॥ सर्वाचेतनवृत्तीनांचिदधिष्ठानतावशात् ॥ प्रवृत्तिरस्त्यतोज्ञे
यंसर्वतःपाणिपादवत् ॥ ५ ॥ तस्मिंश्चिद्ब्रह्मणिज्ञेयेजडवर्गप्रवर्तके ॥ नैवास्तिनास्तिताशंकाकाचिदित्याशयोहरेः ॥ ६ ॥ यस्यैवसर्वतोऽक्षी
णिशिरांसिचमुखानिच ॥ संतिप्रवर्तनीयानितज्ज्ञेयंसर्वशक्तिमत् ॥ ७ ॥ सर्वतोयस्यचिद्धातोर्लोकेऽस्तिश्रवणेंद्रियम् ॥ सर्वंजडसमूहंतद्व्या
प्याप्यत्यंतनिश्चलम् ॥ ८ ॥ स्वसत्तयास्वस्फूर्त्यातदध्यस्तंसर्वमात्मनि ॥ चालयन्नपिनोयातितत्कृतांविकृतिंमनाक् ॥ ९ ॥ रूपमौपाधिकं

सर्वतःपाणिपादंतत्सर्वतोऽक्षिशिरोमुखम् ॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति ॥ १३ ॥
सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितम् ॥ असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ॥ १४॥

मिथ्यैवास्तिस्वाधिगमायतत् ॥ ज्ञेयधर्मवदित्येवंपरिकल्प्योच्यतेतथा ॥ १० ॥ यथासर्वेषुदेहेषुचिद्घनंनित्यमद्वयम् ॥ एकमेवास्तिनोभिन्नं
तथाप्राग्वर्णितंस्फुटम् ॥११॥ १३ ॥ अध्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यते ॥ इतिन्यायेनतज्ज्ञेयंविश्वाध्यारोपणेनच ॥ १ ॥ व्याख्या
तमधुनाविश्वापवादेनतदुच्यते ॥ बाह्यांतरेंद्रियातीतंवस्तुतोब्रह्मचिद्घनम् ॥ २ ॥ बाह्यांतरेंद्रियाणांतत्सर्वेषामखिलैर्गुणैः ॥ संकल्पश्रवणा
द्यैश्चमाययाह्यवभासते ॥ ३ ॥ सर्वेंद्रियाणांव्यापारैर्ज्ञेयंव्यापृतवद्भवेत् ॥ ध्यायतीवेतिवाक्येऽपिध्यानंलेलायनंतथा ॥ ४ ॥ बुद्धेःकर्मेंद्रि
याणांचव्यापारउपलक्ष्यते ॥ सर्वसंबंधशून्यंसद्धारयत्यखिलंजगत् ॥ ५ ॥ माययाकल्पितंस्वस्मिन्सत्तयास्फुरणेनच ॥ वस्तुतस्तद्गुणैर्हीनं
माययागुणभोक्तृच ॥ ६ ॥ सत्वादीनांपरीणामवतांशब्दादिभिःपृथक् ॥ सुखाद्याकारतस्तेषामुपलब्धचिदद्वयम् ॥ ७ ॥ १४ ॥

उक्तक्षेत्रादिकस्येशःफलंचैवाधिकारिणम् ॥ स्तुवन्नेवोपसंहारंकरोत्याद्यःपरःपुमान् ॥ १ ॥ महाभूतादिधृत्यंतंक्षेत्रमित्थमुदाहृतम् ॥ अमानित्वादिचप्रोक्तंविंशतिज्ञानसाधनम् ॥ २ ॥ ज्ञेयंज्ञेयंयदित्यादिप्रोक्तमित्यंतमद्वयम् ॥ एतत्त्रयंसमासेनमयाकृष्यश्रुतेःस्मृतेः ॥ ३ ॥ एतावान्सर्ववेदार्थोगीतार्थश्चेत्युदाहृतम् ॥ कोऽत्राधिक्रियतेसम्यग्दर्शनेऽत्रोच्यतेऽधुना ॥ ४ ॥ वासुदेवेभगवतिमयिसर्वगुरौहरौ ॥ यःसमर्पितसर्वात्मभावोमच्छरणःपुमान् ॥ ५ ॥ समद्भक्तोयथोक्तंतत्सम्यग्दर्शनलक्षणम् ॥ विदित्वाममभावायमोक्षायैवोपपद्यते ॥ ६ ॥ यस्मान्मद्भक्तएवात्रतत्त्वज्ञानेऽधिकारवान् ॥ तस्माद्भोगस्पृहांत्यक्त्वामदेकशरणःसदा ॥ ७ ॥ अमानित्वादिसंपाद्यतत्त्वज्ञानपरोभवेत् ॥ ८ ॥ १८ ॥

अथेदानींभगवतःप्रकृतीद्वेपरापरे ॥ सप्तमेप्रागुपन्यस्यक्षेत्रक्षेत्रज्ञलक्षणे ॥ १ ॥ एतद्योनीनिभूतानीत्युक्तंतत्रापराभिधा ॥ याक्षेत्रलक्षणाप्रोक्ता

इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः ॥ मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते ॥ १८ ॥
प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि ॥ विकारांश्चगुणांश्चैवविद्धिप्रकृतिसंभवान् ॥ १९ ॥

पराक्षेत्रज्ञलक्षणा ॥ २ ॥ उक्तानयोरनादित्वंभूतयोनित्वमुच्यते ॥ प्रकृतिःक्षेत्ररूपायामायासात्रियुणात्मिका ॥ ३ ॥ याजीवारव्यापरा प्रोक्तापुरुषःसइहोच्यते ॥ नविद्यतेतयोरादिःकारणंविद्धितौतथा ॥ ४ ॥ अनादिजगतोहेतुरनादिःप्रकृतिर्मता ॥ हेत्वपेक्षायदातस्याअनवस्थाभवेत्तदा ॥ ५ ॥ पुरुषस्याप्यनादित्वंधर्मादेराश्रयत्वतः ॥ जातस्यहर्षशोकादेःसर्वसंप्रतिपत्तितः ॥ ६ ॥ अन्यथाकृतहानादिदूषणंकोनिवारयेत् ॥ अतस्तयोरनादित्वंसिद्धंवैदिकसंमतम् ॥ ७ ॥ महाभूतानिपंचैवमेकादशेंद्रियाणिच ॥ विकारांश्चगुणांश्चैवसुखाद्याकारधारिणः ॥ ८ ॥ मायाकारणकान्विद्धिनानारूपविपर्ययात् ॥ ९ ॥ १९ ॥

मायिकत्वंविकाराणांविवेकेनविवेचयन् ॥ पुरुषस्याविवेकेनसंसारित्वमिहोच्यते ॥ १ ॥ कार्यंशरीरमित्युक्तंकरणानींद्रियाणिच ॥ कार्यश
ब्देनभूतानिगृह्यंतेविषयास्तथा ॥ २ ॥ गुणाःकरणाश्रयत्वात्सुखाद्याःकरणोक्तितः ॥ तेषांकार्यकरणानामुत्पत्तौकारणंपरम् ॥ ३ ॥ माया
प्रकृतिशब्दोक्ताप्रोच्यतेसामहर्षिभिः ॥ प्रकृतेर्हेतुतामुक्त्वापुरुषस्यतदुच्यते ॥ ४ ॥ क्षेत्रज्ञःसुखदुःखानांभोग्यानांहेतुरुच्यते ॥ चित्तवृत्त्युप
रक्तोपलंभेभोक्तृत्वशब्दिते ॥ ५ ॥ २० ॥ भोक्तृत्वंयत्सुखादीनांसंसारित्वंयदीरितम् ॥ पुंसस्तस्यनिमित्तंकिमित्यत्राहरमापतिः ॥ १ ॥
मृषातादात्म्यतोमायांगतोऽयंपुरुषोगुणान् ॥ मायिकान्सुखदुःखादीन्भ्रांत्योपलभतेसदा ॥ २ ॥ पंडितोऽहंसुखीदुःखीमूढोऽहंचेत्यनेकधा ॥

कार्यकारणकर्तृत्वेहेतुःप्रकृतिरुच्यते ॥ पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते ॥ २० ॥
पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान् ॥ कारणंगुणसंगोऽस्यसदसद्योनिजन्मसु ॥ २१ ॥

एवंरूपोयआसंगःसोऽज्ञानेसतिकारणम् ॥ ३ ॥ देवतिर्यङ्नरादीनांपुरुषस्यास्यजन्मसु ॥ यद्वागुणेषुकामाख्यःसंगःशब्दादिरूपिषु ॥ ४ ॥
कारणंसंसृतेर्मुख्यमुच्चावचजनेःसदा ॥ अविद्यायांयआसंगस्तत्कार्येषुगुणेषुच ॥ ५ ॥ कारणंसंसृतेःसोऽस्तितादात्म्याध्यासलक्षणः ॥ हेयः
ससर्वथासंगइत्येवमर्जुनायच ॥ ६ ॥ उक्तंतथाचगीताख्येशास्त्रेतस्यनिवृत्तये ॥ सवैराग्यंससंन्यासंज्ञानमेवह्युदाहृतम् ॥ ७ ॥ तच्चज्ञानमुपन्य
स्तंक्षेत्रक्षेत्रज्ञगोचरम् ॥ ध्वस्ताविद्यांचतत्कार्यंज्ञात्वाब्रह्मचिदद्वयम् ॥ ८ ॥ विमुच्यतेगुणासंगात्तादात्म्याध्यासलक्षणात् ॥ ९ ॥ २१ ॥

तदेवंप्रकृतिस्थस्यमिथ्यातादात्म्यतोऽनया ॥ पुरुषस्यास्तिसंसारोनस्वतश्चेत्युदीरितम् ॥ १ ॥ कीदृशंपुरुषस्यास्तिस्वरूपंयत्रसंसृतिः ॥ स्वतोनास्तीत्यपेक्षायांपुरुषस्याद्वयस्यतत् ॥ २ ॥ यादृशंरूपमेतस्यक्षेत्रज्ञस्यमतंतथा ॥ साक्षादेवपुनस्तस्यनिर्देशःक्रियतेऽधुना ॥३॥ अस्मिन्नाविद्यकेदेहेवर्तमानोऽपिपूरुषः ॥ परोदेहाद्यसंसृष्टोऽसंसारीवस्तुतःस्वतः॥ ४ ॥ यस्मादयमुपद्रष्टासमस्तव्यापृतेःपरः ॥ यथर्त्विग्यजमानेषुव्यापृतेष्वस्वकर्मणि ॥ ५ ॥ अव्यापृतस्तटस्थोऽन्योयज्ञविद्याविशारदः ॥ ईक्षितायुणदोषाणामृत्विगादेश्चकर्मणः ॥ ६ ॥ तथादेहेंद्रियादीनांव्यापारेषुविलक्षणः ॥ स्वयमव्यापृतस्तेषांव्यापाराणांसमीपगः ॥ ७ ॥ द्रष्टैवनतुकर्तासौसाक्षित्वेनास्यविक्रियः ॥ द्रष्टारोबाह्यवस्तूनांदेहश्चक्षुर्मनोधियः ॥ ८ ॥ तेषामाभ्यंतरोद्रष्टोपद्रष्टाप्रत्यगंतिगः ॥ अव्यवधानरूपस्योपशब्दार्थस्यचिद्धने ॥ ९ ॥ प्रत्यगात्माद्वयेपर्यवसानादितिवार्थतः ॥ देहेंद्रियादिचेष्टासुस्वयमव्यापृतोऽपिसन् ॥ १० ॥ प्रवृत्तइवसांनिध्यादनुमंतावभासते ॥ यद्वादेहेंद्रियादीन्संप्रवृत्तान्निजकर्मसु ॥११॥ नवार

उपद्रष्टानुमंताचभर्ताभोक्तामहेश्वरः ॥ परमात्मेतिचाप्युक्तोदेहेऽस्मिन्पुरुषःपरः ॥ २२ ॥

यतियःसाक्षीसोऽनुमंतेत्युदीरितः ॥ संघातस्यशरीरादेश्चिदाभासान्वितस्यच ॥ १२ ॥ स्वसत्तास्फूर्तिदानेनपोषकोधारकस्तथा ॥ सभर्तानिर्विकारोऽपिसर्वाधिष्ठानभावतः ॥१३॥ स्वचैतन्येनसर्वान्धीप्रत्ययांस्त्रिगुणात्मिकान् ॥ भासयत्युपलब्धोक्तोभोक्तानैवेतिविक्रियाम् ॥ १४ ॥ सर्वात्मत्वात्स्वतंत्रत्वान्महानीशोमहेश्वरः॥ देहादिधिषणांतानांकल्पितानामविद्यया ॥१५॥आत्मत्वेनगृहीतानांप्रकृष्टात्मांतरांतरः॥ उक्तैर्विशेषणैर्युक्तःपरमात्मेतिशब्दितः॥१६॥ सएवपुरुषःसाक्षादसंसारीस्वरूपतः॥ क्षेत्रज्ञोनित्यमुक्तोऽपिभ्रांत्यासंसारितांगतः॥१७॥ वस्तुतोमत्स्वरूपोऽसौक्षेत्रज्ञःपुरुषोत्तमः॥सएवात्मापरब्रह्मदेहेऽस्मिन्पुरुषःस्मृतः॥१८॥ परमात्माद्वयानंदोमायोपाधिविवर्जितः॥प्रत्यगात्मतयाप्रोक्तःसाक्षीसर्वांतरःपरः॥१९॥देहेंद्रियमनोबुद्ध्यादिभ्योयस्तुविवेचितः॥क्षेत्रज्ञःपुरुषःसाक्षीसोऽद्वयानंदलक्षणः॥२०॥प्रत्यगात्माद्वयानंदःप्रत्यग्रूपोऽद्वयात्मकः॥ नानयोर्विद्यतेभेदोविनोपाधीमनागपि ॥२१॥ उपाध्योर्विनिवृत्तिस्तुब्रह्मात्मैक्यधियाभवेत् ॥ ऐक्यधीहेतुरेवात्रबहुधाहरिणेरितः॥२२॥२२॥

सर्वत्रविद्यमानंसन्नोपलभ्यतएवचेत् ॥ तर्हिज्ञेयंतमोरूपंस्यादित्यत्राहमाधवः ॥ १ ॥ तज्ज्योतिर्ब्रह्मसर्वेषांसूर्यादीनांप्रभावताम् ॥ बाह्यानामांतराणांचबुद्ध्यादीनांप्रकाशकम् ॥ २ ॥ चैतन्यज्योतिषोभास्यंजडज्योतिर्यतोभवेत् ॥ अविद्यातमसोऽध्यस्तात्परंसंसर्गवर्जितम् ॥ ३ ॥ यस्माज्ज्ञेयंस्वयंज्योतिर्जडासंस्पृष्टमस्तितत् ॥ निस्संगस्यससंगेनकूटस्थस्यविकारिणा ॥ ४ ॥ आत्मनोऽनात्मनायोगोवास्तवोनोपपद्यते ॥ अतएवहितज्ज्ञानंसंविद्रूपंहृदिस्थिम् ॥ ५ ॥ प्रमाणजमनोवृत्तावभिव्यक्तंभ्रमापहम् ॥ अज्ञातत्वात्तदेवास्तिज्ञातुंयोग्यंचिदद्व

ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते ॥ ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितम् ॥ १७ ॥

यम् ॥ ६ ॥ जडस्याज्ञानताभावाज्ज्ञातुमर्हत्वमेवनो ॥ कथंतर्हिनसर्वैस्तज्ज्ञायतेचेतिचेच्छृणु ॥ ७ ॥ अमानित्वादिनातत्त्वज्ञानहेतुतयाऽमुना ॥ ज्ञानसंशब्दितेनैवगम्यंप्राप्यंनतद्विना ॥ ८ ॥ ननुसाधनगम्यंचेत्तर्हिकिंदूरदेशगम् ॥ मैवंभोःप्राणिजातस्यसर्वस्यैवहृदिस्थितम् ॥ ९ ॥ सामान्येनापिसर्वत्रस्थितंयद्यपिसर्वगम् ॥ विशेषेणतथाप्यत्रहृद्यभिव्यक्तमेवतत् ॥१०॥ जीवांतर्यामिरूपेणसौरंतेजइवोदके ॥ वस्तुतःस्वात्मरूपंसद्भ्रांत्यादूरमिवस्थितम् ॥ ११ ॥ भ्रांत्यज्ञाननिवृत्त्यातत्संप्राप्यतइवेत्यपि ॥ १२ ॥ १७ ॥

अत्रात्मदर्शनेश्रीशःसाधनान्याहशास्त्रतः ॥ अधिकारानुसारेणविकल्पाईरिताअमी ॥ १ ॥ चतुर्विधाजनालोकेकेचित्स्युरुत्तमाबुधाः ॥ केचित्स्युर्मध्यमाःकेचिन्मंदामंदतराःपरे ॥ २ ॥ तत्रोत्तमानांब्रह्मैक्यज्ञानसाधनमुच्यते ॥ सम्यक्श्रुतंमतंतत्त्वंध्यानेनात्मनिसंस्कृते ॥ ३ ॥ सेंद्रियंचित्तमायम्यनिदिध्यासनरूपिणा ॥ अखंडंप्रत्यगात्मानंसाक्षात्कुर्वंतिचेतसा ॥ ४ ॥ स्वबुद्धौसंस्कृतेनैकेमुख्यास्तेज्ञानयोगिनः ॥ मध्यमाःसांख्ययोगेनवेदांतश्रवणेनच ॥ ५ ॥ नित्यानित्यविवेकेनयुक्तिभिर्मननेनच ॥ देहेंद्रियादयःसर्वेविकाराःप्रकृतेरिमे ॥ ६ ॥ मि

ध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मना ॥ अन्येसांख्येनयोगेनकर्मयोगेनचापरे ॥ २४ ॥

थ्याभूताअनात्मानस्तेभ्योभिन्नोऽहमांतरः ॥ साक्षिभूतोविभुर्नित्योनिर्विकारोऽस्मिकेवलः ॥ ७ ॥ जडसंबंधशून्योऽहमित्येवंयुक्तितत्पराः ॥ बुद्धौध्यानपरिप्राप्यापश्यंत्यात्मानमात्मना ॥ ८ ॥ श्रुत्वामत्वानिदिध्यास्यसाक्षात्कुर्वंतियेजनाः ॥ अखंडंवस्तुसद्बुद्ध्यासावधानास्तउत्तमाः ॥ ९ ॥ येतुश्रुत्वाथमननेतत्पराःश्रद्धयाजनाः ॥ किंचिद्ध्यानेप्रविष्टास्तेमध्यमाःसांख्ययोगिनः ॥ १० ॥ ईश्वरार्पणबुद्ध्यायेमंदाःकुर्वंति कर्मते ॥ फलाभिसंधिशून्येनानहंकारेणचेतसा ॥ ११ ॥ स्ववर्णाश्रमधर्मेणसत्वशुद्ध्याधिकारिणः ॥ भूत्वाबोधपरिप्राप्यापश्यंत्यात्मा नमात्मना ॥ १२ ॥ २४ ॥

यथोक्तंप्रत्यगात्मैक्यंवेत्तियस्तंस्तुवन्हरिः ॥ उपसंहरतीदानींभगवान्भूतभावनः ॥ १ ॥ यथोक्तेनप्रकारेणयोमुमुक्षुरुदारधीः ॥ पुरुषंप्रत्य
गात्मानंवेत्तिसाक्षात्करोत्यजम् ॥ २ ॥ मिथ्याभूतामविद्याख्यांबाधितांस्वगुणैःसह ॥ प्रकृतिंवेत्त्यसंदेहोविध्वस्ताखिलबंधनः ॥ ३ ॥
विनिवृत्तेममाज्ञानतत्कार्येचेत्यशेषतः ॥ सप्रारब्धवशाज्ज्ञानीवर्तमानोऽपिसर्वथा ॥ ४ ॥ शास्त्रीयेलौकिकेवापिकर्मण्युल्लंघ्यवाविधिम् ॥
लोकवन्नैवसंसारंदेहांतेयातिचिद्वपुः ॥ ५ ॥ पतितेऽस्मिन्शरीरेऽसौपुनर्देहंकदाचन ॥ नगृण्हातिविनष्टायामविद्यायामशेषतः ॥ ६ ॥ स्व

यएवंवेत्तिपुरुषंप्रकृतिंचगुणैःसह ॥ सर्वथावर्तमानोऽपिनसभूयोऽभिजायते ॥ २३ ॥

वृत्तिस्थोमहात्मायःसदाचारःस्वधर्मवान् ॥ नभूयोजायतेसोऽत्रकिमुवाच्यमितिस्फुटम् ॥ ७ ॥ अविद्याकामकर्मादिबीजंसकलसंसृतेः ॥
तत्त्वज्ञानाग्निनादग्धंपुनर्नारोहतीहतत् ॥ ८ ॥ बीजान्यग्न्युपदग्धानिनारोहंतियथापुनः ॥ ज्ञानदग्धैस्तथाक्लेशैर्नात्मासंपद्यतेपुनः ॥ ९ ॥
क्षीयंतेचास्यकर्माणीत्येवंश्रुत्यापिनिश्चितम् ॥ विस्तरस्त्वनुसंधेयोभाष्येऽतउपरम्यते ॥ १० ॥ २३ ॥

एवमाविद्यकंबंधंविद्याबाध्यंप्रदर्श्यच ॥ तन्निवर्तकविद्यायाःस्थैर्यायात्राधुनोच्यते ॥ १ ॥ सद्वस्तुनःस्वभावेनावैषम्यंविषमेष्वपि ॥ ब्रह्मा दिस्थावरांतेषुभूतेषुविषमेषुच ॥ २ ॥ परिणामस्वभावत्वाच्चंचलेषुविरोधिषु ॥ बाध्यबाधकरूपत्वादन्योन्यंक्षणनाशिषु ॥ ३ ॥ दृष्टनष्टस्व भावेषुयःसमंपरमेश्वरम् ॥ सर्वत्रैकस्वरूपत्वात्प्रतिदेहमखंडितम् ॥ ४ ॥ निर्विकारंस्थिरंसत्तास्फूर्तिदंजडवस्तुषु ॥ बाध्यबाधकताशून्यमबा ध्यंदोषवर्जितम् ॥ ५ ॥ सर्वद्वैतस्यबाधेऽपिनिर्विकल्पमबाधितम् ॥ एवंसर्वप्रकारेणजडवर्गविलक्षणम् ॥ ६ ॥ ब्रह्मात्मानंविवेकेनपश्यति श्रौतचक्षुषा ॥ सएवपश्यत्यात्मानंसकार्याज्ञानबाधनात् ॥ ७ ॥ स्वप्नभ्रमंयथात्यक्त्वाजाग्रद्बोधेनयुक्तधीः ॥ स्वप्नभ्रमविनिर्मुक्तमात्मानं

समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरम् ॥ विनश्यत्स्वविनश्यंतंयःपश्यतिसपश्यति ॥ २७ ॥

पश्यतिस्फुटम् ॥ ८ ॥ स्वप्नदर्शीतुविभ्रांत्यापश्यन्नपिनपश्यति ॥ तथाऽज्ञोभ्रांतिबाहुल्यात्पश्यन्नपिनपश्यति ॥ ९ ॥ नहिसर्पतयारज्जुंप श्यन्नपिसपश्यति ॥ तथात्मत्वेनदेहादिजडवर्गंविनश्वरम् ॥ १० ॥ पश्यन्नज्ञोविमूढात्माचिदात्मानंनपश्यति ॥ तत्त्वदर्शीमुनिस्तस्मात्सम्य क्पश्यतिनेतरः ॥ ११ ॥ एवमत्यंतभिन्नत्वाद्दृश्यासंसर्गिणंपरम् ॥विशुद्धंप्रत्यगात्मानंसाक्षात्कृत्याद्वयात्मना ॥ १२ ॥ सकार्याज्ञानबाधे नकृतकृत्योभवेन्नरः ॥ १३ ॥ २७ ॥

तदेतदात्मविज्ञानंफलेनस्तौतिमाधवः ॥ तुल्यत्वेनस्थितंयस्मात्सम्यग्दर्शीपरेश्वरम् ॥ १ ॥ सर्वभूतेषुपूर्वोक्तविशेषेणसमन्वितम् ॥ पश्यन्नात्मा
नमद्वैतमयमहमितिस्वयम् ॥ २ ॥ साक्षात्कुर्वन्ध्यासम्यक्त्वमस्यादिजातया ॥ स्वेनस्वंनहिनस्त्यस्माद्दर्शनान्मुक्तिमृच्छति ॥ ३ ॥ सर्वो
ऽज्ञएकमात्मानमकर्तारमसंगिनम् ॥ अविद्ययातिरस्कुर्वन्हिनस्त्येवात्मनास्वयम् ॥ ४ ॥ परानंदघनंनित्यंविद्यमानमपीश्वरम् ॥ भ्रांत्यानतु
भवन्मूढोमाययावंचितःसुखात् ॥ ५ ॥ अविद्याध्यस्तदेहादिमात्मानंसुपुरातनम् ॥ हत्वानूतनमादत्तेकर्मणातोहिनस्त्यसौ ॥ ६ ॥ सर्वोऽज्ञ
आत्महातस्मात्तथैवस्तःश्रुतिस्मृती ॥ असूर्यानामतेलोकाअंधेनतमसावृताः ॥ ७ ॥ तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः ॥ योऽन्य
थासंतमात्मानमन्यथाप्रतिपद्यते ॥ ८ ॥ किंतेननकृतंपापंचौरेणात्मापहारिणा ॥ अतोऽयमात्मवित्त्यक्त्वादेहादावात्मताभ्रमम् ॥ ९ ॥ स्वा

समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरम् ॥ नहिनस्त्यात्मनाऽऽत्मानंततोयातिपरांगतिम् ॥ २८ ॥
प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वशः ॥ यःपश्यतितथात्मानमकर्तारंसपश्यति ॥ २९ ॥

त्मबोधेनतत्त्वैक्येज्ञातेस्वंनहिनस्त्यसौ ॥ आत्मनोहननादेवसकार्याज्ञानबाधनात् ॥ १० ॥ प्रकृष्टांगतिमानंदावाप्तिरूपांप्रयात्यसौ ॥११॥
॥ २८ ॥ शुभाशुभादिकर्तारःप्रतिदेहंविलक्षणाः ॥ विचित्रफलभोक्तारोविषमाविषमाश्रयाः॥ १ ॥ कथंसमस्तभूतस्थमात्मानंसममद्वयम् ॥
पश्यन्नस्वंहिनस्तीतिशंकायामाहमापतिः ॥ २ ॥ वाङ्मनःकायकृत्यानिप्रकारैरखिलैरपि ॥ देहाद्याकारयामिथ्यात्रिगुणात्मकयानया ॥३॥
माययाक्रियमाणानिनात्मनाविक्रियात्मना ॥ यःपश्यतिविवेकेनतथाक्षेत्रेणसर्वथा ॥ ४ ॥ कर्मसुक्रियमाणेषुक्षेत्रज्ञमविकारिणम् ॥ असं
गमेकंसर्वत्रयःपश्यत्यक्रियंबुधः ॥ ५ ॥ सपरमार्थदर्शीतिसम्यक्पश्यतिवस्तुतः ॥ क्षेत्रस्यसविकारस्यवैषम्यंभिन्नतायतः ॥ ६ ॥ अकर्तुर्निर्वि
शेषस्यनवैषम्यंनभिन्नता ॥ ७ ॥ २९ ॥

एवमापाततःक्षेत्रभेददर्शनमादिशन् ॥ क्षेत्रज्ञस्यभिदादृष्टिर्विवेकेननिराकृता ॥ १ ॥ इदानींमायिकत्वेनक्षेत्रस्यापिभिदेक्षणम् ॥ अपाकरो
तिभगवान्दृश्यातीतोऽक्षरोऽद्वयः ॥ २ ॥ यस्मिन्कालेसमस्तानांस्थिरजंगमरूपिणाम् ॥ परस्परविभिन्नत्वमेकस्मिन्नात्मनिस्थितम् ॥ ३ ॥
अधिष्ठानादभिन्नत्वंकल्पितत्वेनसर्वतः ॥ शास्त्राचार्योपदेशेनस्वानुभूत्यानुपश्यति ॥ ४ ॥ मिथ्यात्मनांहिसर्वेषांसत्यादिगुणलक्षणम् ॥ व्या
विद्धाशेषसंसारमात्मानंतंप्रचक्षते ॥ ५ ॥ नह्यात्मवान्भवेत्सर्पोदंडाद्यध्यासरूपिणा ॥ आत्मनावितथेनैवसर्पोरज्ज्वात्मनात्मवान् ॥ ६ ॥
इत्युक्तंवार्तिकेद्वैतंव्याविद्धंब्रह्मणेत्यपि ॥ अधिष्ठानाद्विभिन्नत्वंकल्पितानांयदाभवेत् ॥ ७ ॥ कल्पितत्वक्षतिस्तर्हितथाधिष्ठानताक्षतिः ॥

यदाभूतपृथग्भावमेकस्थमनुपश्यति ॥ ततएवचविस्तारंब्रह्मसंपद्यतेतदा ॥ ३० ॥

सर्पदंडस्रगादीनांकल्पितानांगुणेऽद्वये ॥ ८ ॥ नभेदोयुक्तिभिःसिद्ध्येत्किंतुरज्ज्वात्मतैवहि ॥ एवंघटपटादीनांकल्पितानांचिदद्वये ॥ ९ ॥ अ
धिष्ठानस्वरूपत्वान्नभेदोऽस्तिमनागपि ॥ एवंमायावशात्तस्मादेकस्मादात्मनोऽद्वयात् ॥ १० ॥ स्वप्नवज्जडवर्गस्यपृथग्भावंप्रकल्पितम् ॥ स्व
यमालोचयत्येषआत्मैवेदमितिश्रुतेः ॥ ११ ॥ तस्मिन्कालेऽनुभूत्यैवंत्यक्तभेदमतिःपुमान् ॥ सजातीयविजातीयभेददर्शनबाधतः ॥ १२ ॥
समस्तानर्थशून्यंतद्ब्रह्मैवभवतिस्वयम् ॥ यस्मिन्सर्वाणिभूतान्यात्मैवाभूद्विजानतः ॥ १३ ॥ तत्रकोमोहःकःशोकएकत्वमनुपश्यतः ॥
प्रकृत्यैवेतिपद्येऽस्मिन्नात्मभेदोनिराकृतः ॥ १४ ॥ यदाभूतेतिपद्येत्त्वनात्मभेदोनिराकृतः ॥ १५ ॥ ३० ॥

अन्येत्वेषुविकल्पेषूपायेनान्यतरेणच ॥ अजानंतोविवेकेनयथोक्तात्मानमांतरम् ॥ १ ॥ आचार्येभ्योदयालुभ्यःश्रुत्वायेश्रद्धयान्विताः ॥ इदमेवंचिंतयतेत्युक्ताःसंतउपासते ॥ २ ॥ तेऽपिधीरास्तरंत्येवमृत्युंसंसारसागरम् ॥ स्वयंविचाराकुशलाःश्रद्धानतयाजनाः ॥ ३ ॥ गुरूपदेशश्रवणेतत्परामुक्तिभाजनाः ॥ येविचारेस्वयंदक्षाःश्रद्धानाजितेंद्रियाः ॥ ४ ॥ संसारंतेतरंतीतिकिमुवाच्यंविचक्षणाः ॥ ५ ॥ २५ ॥ संसाराख्यस्यबंधस्याविद्यकत्वाद्विद्यया ॥ मोक्षोपपत्तिरस्तीत्येतस्यार्थस्यावधारणे ॥ १ ॥ प्रपंचःक्रियतेबंधतन्निवर्तकबोधयोः॥ स्थावरंजंगमंसत्वंयत्किंचिद्वस्तुजायते ॥ २ ॥ क्षेत्रक्षेत्रज्ञयोस्तच्चान्योन्याध्यासात्प्रजायते ॥ अनिर्वाच्यमविद्यातत्कार्यंक्षेत्रंजडात्मकम् ॥ ३ ॥ ततोभिन्नं

अन्येत्वेवमजानंतःश्रुत्वान्येभ्यउपासते ॥ तेऽपिचातितरंत्येवमृत्युंश्रुतिपरायणाः ॥ २५ ॥
यावत्संजायतेकिंचित्सत्वंस्थावरजंगमम् ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ ॥ २६ ॥

चिदानंदब्रह्मवस्तुचिदद्वयम् ॥ उदासीनंपरंशुद्धंक्षेत्रज्ञंनिर्गुणात्मकम्॥४॥ तयोर्मायावशादन्योन्याविवेकनिमित्तकः॥मिथ्यातादात्म्यकोऽध्यासःसत्यानृतयुगात्मकः ॥ ५ ॥ तस्मादेवाखिलंसत्वजातंसंजायतेजगत् ॥ अतःस्वात्मापरिज्ञानहेतुकोबंधएवयः ॥ ६ ॥ संसाराख्यःसआत्म्यैक्यज्ञानान्नश्यतिसर्वथा ॥ स्वाप्नबंधोयथानिद्राक्षयेनश्यतितत्क्षणे ॥७॥ तथैवाविद्यकोबंधस्तत्त्वज्ञानाद्विनश्यति ॥ अतआध्यासिकंसर्वमाब्रह्मादितृणावधि ॥ ८ ॥ सत्यंब्रह्मैवचेत्येवंविनिश्चित्यधियाबुधः ॥ स्वेमहिम्निस्वतःसिद्धेप्रतिष्ठांप्राप्यनिश्चलाम् ॥ ९ ॥ जीवन्मुक्तोमुनिर्नित्यंकृतकृत्यःसतिष्ठति ॥ १० ॥ २६ ॥

नकेवलमसंगत्वादलेपत्वंचिदात्मनः ॥ प्रकाशकतयाप्यस्यभास्यधर्मैर्ननसंगता ॥ १ ॥ सदृष्टांतमितिप्राहभगवान्दीनवत्सलः ॥ एकएवरविः सर्वरूपवद्वस्तुमात्रकम् ॥ २ ॥ यथाप्रकाशयत्येषभास्यधर्मैर्नलिप्यते ॥ नापिप्रकाश्यभेदाद्वाभिद्यतेकिलभास्करः ॥ ३ ॥ तथैकएवक्षेत्र ज्ञोभासयत्यखिलंजडम् ॥ नासौप्रकाश्यधर्मैर्वालिप्यतेनापिभिद्यते ॥ ४ ॥ ३३ ॥ अध्यायार्थमशेषेणात्रोपसंहरतीश्वरः ॥ क्षेत्रक्षेत्रज्ञयोरेवं पूर्वंव्याख्यातयोर्भिदाम् ॥ १ ॥ जाडयचैतन्यमिथ्यात्वसत्यत्वाद्यात्मिकांजनाः॥ शास्त्राचार्योपदेशोत्थसम्यग्ज्ञानैकचक्षुषा ॥ २ ॥ येजा

यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंरविः ॥ क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशयतिभारत ॥ ३३ ॥
क्षेत्रक्षेत्रज्ञयोरेवमंतरंज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षंचयेविदुर्यांतितेपरम् ॥ ३४ ॥ इतिश्रीमद्भ
गवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो० क्षेत्रक्षेत्रज्ञविभागयोगोनामत्रयोदशोऽध्यायः ॥ १३ ॥

नंतितथासर्वप्रपंचस्यास्यकारणम् ॥ अविद्यामात्मबोधेनतन्निवृत्तिंचयेविदुः ॥ ३ ॥ तेयांतिपरमंब्रह्मकैवल्यमपुनर्भवम् ॥ ४ ॥ ३४ ॥ क्षेत्रक्षेत्रज्ञभेदंविमलमतिमतांप्राहमुक्त्यैयईशोज्ञानज्ञेयावबोधंप्रतिपदममृतंदर्शयामाससम्यक् ॥ भक्तेभ्यःप्रीतिमद्भ्योविशदपदमुदेद्यस्यभक्त्या मुमुक्षोस्तंश्रीकांतंमुकुंदंनिरवधिचरितंकृष्णमाराधयामि ॥ १ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ अखंडार्थैकनिष्ठोऽयंगतःपूर्तित्रयो दशः ॥ ६४० ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ३८४० ॥

नन्वात्मनःस्वतोमास्तुकर्तृत्वमविकारिणः॥ देहाद्यौपाधिकंकिंनकर्तृत्वंस्यादिहात्मनः॥१॥ इत्याशंक्यान्यसंबंधात्कर्तृत्वंखंड्यतेऽधुना॥ अप
रोक्षोयआत्मायंप्रत्यक्त्वाद्व्ययोऽक्षयः ॥२॥ निर्विकारोह्यनादित्वात्स्वरूपेणनजन्मभाक् ॥ निर्धर्मकतयानास्यजन्मधर्मनिमित्तकम् ॥ ३ ॥
प्रागसत्वंनचास्त्यस्याबाधितस्यकुतोजनिः॥ नह्यनादेर्भवेज्जन्मतदभावान्नचेतरे ॥४॥ विकाराःसंभवंत्यस्यकूटस्थस्याद्वयस्यच ॥ अविनाशीवे
तिश्रुत्यानिर्धर्मकतयेरितः ॥ ५ ॥ यद्यप्याध्यासिकेनासौसंबंधेनशरीरगः ॥ तथापिनकरोत्यात्माकुर्वत्यपिशरीरके ॥ ६ ॥ यथाध्यासिकसं
बंधाज्जलस्थोऽपिदिवाकरः ॥ चलत्यपिजलेनासौचलत्येवंचिदक्रिया ॥ ७ ॥ यतःकिंचिन्नकर्मात्माकरोतिप्रत्यगद्वयः ॥ अतःकर्मफलेनासौ
केनचिन्नोपलिप्यते ॥ ८ ॥ करोतियोहियत्कर्मतत्फलेनसलिप्यते ॥ नत्वयंनिर्विकारात्मानिष्क्रियोनिर्मलोविभुः॥९॥ इच्छाद्वेषःसुखंदुःखमि

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः॥ शरीरस्थोऽपिकौंतेयनकरोतिनलिप्यते ॥ ३१ ॥
यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते ॥ सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते ॥ ३२ ॥

त्यादीनांपुरास्फुटम् ॥ क्षेत्रधर्मत्वकथनाद्धर्मःकोऽपिनचात्मनि॥१०॥ प्रकृत्यैवचकर्माणीत्यत्रकर्तव्यमात्रकम् ॥ अविद्याकर्तृकंप्रोक्तंनकिंचि
त्कर्मचिद्धने॥११॥ अतएवपरब्रह्मप्रत्यगात्मैक्यदर्शिनाम् ॥ सर्वकर्माधिकारस्यनिवृत्तिःप्रागुदीरिता॥१२॥निर्धर्मकत्वकथनान्निरस्तास्वगता
भिदा ॥ प्रकृत्यैवेतिविध्वस्तासजातीयभिदांतरा॥१३॥ यदाभूतपृथक्भावमित्यत्रहरिणास्वयम् ॥ विजातीयभिदाध्वस्तानानानर्थसमाश्रया
॥१४॥ अनादित्वान्निर्गुणत्वादित्यत्रस्वगताभिदा ॥ विध्वस्तेत्यद्वितीयंतद्ब्रह्मैवात्मेतिनिर्णयः॥१५॥३१॥ असंगत्वात्स्वयंप्रत्यग्लिप्यतेनान्य
कर्मणा ॥ इत्यत्राहसदृष्टांतमलेपत्वंचिदात्मनः॥१॥ व्योमासंगस्वभावत्वात्सर्वगंनैवलिप्यते ॥ पंकादिभिर्यथातद्वदात्मासंगोनलिप्यते ॥२॥
असंगोह्ययमात्मात्रश्रुतयःस्युःसहस्रशः ॥ एवंनित्यमसंगात्मतत्त्वंज्ञात्वानुभूतितः॥ ३ ॥ स्वाराज्यसिद्धिरस्तीतिश्रीहरेरयमाशयः ॥४॥३२॥

श्रोतारंसंमुखीकृत्यतदैवंस्तुप्रशंसया ॥ क्षेत्रक्षेत्रज्ञयोरीशाधीनयोरेवहेतुता ॥ १ ॥ नतुस्वतंत्रयोःसर्वभूतोत्पत्तिंप्रतिस्वयम् ॥ सांख्यंनिरीश्वरंचेत्थंपराकर्तुमितीर्यते ॥ २ ॥ स्वकार्यापेक्षयाधिक्यात्कारणंमहदुच्यते ॥ कार्याणांवृद्धिहेतुत्वाद्बृंहणत्वाच्चकारणम् ॥ ३ ॥ ब्रह्मास्त्यव्याकृतंमायाप्रकृतिस्त्रिगुणात्मिका ॥ ममेश्वरस्यतच्चोक्तंयोनिर्गर्भधृतेःस्थलम् ॥ ४ ॥ तस्मिन्महतिमायाख्येसर्वभूतैककारणम् ॥ गर्भमीक्षणसंकल्पंधारयाम्यहमीश्वरः ॥ ५ ॥ तद्बहुस्यांप्रजायेयेतीक्षणरूपमीरितम् ॥ यथाकश्चित्पितापुत्रमनुशयिनमांतरम् ॥ ६ ॥ व्रीह्याद्याहाररूपेणस्वस्मिँल्लीनमलक्षणम् ॥ योजयितुंशरीरेणयोनौरेतःप्रसेचनात् ॥ ७ ॥ गर्भमाधत्तएतस्माद्गर्भाधानात्सपुत्रकः ॥ युज्यतेचशरीरेणतदर्थंमध्यगाअपि ॥ ८ ॥ भवंतिकलिलाद्याायाअवस्थाबहुधाहिताः ॥ तथामयिलयेलीनमविद्याकामकर्मभिः ॥ ९ ॥ क्षेत्रज्ञंसृष्टिसमयेक्षेत्रे

ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहम् ॥ संभवःसर्वभूतानांततोभवतिभारत ॥ ३ ॥
सर्वयोनिषुकौंतेयमूर्तयःसंभवंतियाः ॥ तासाब्रह्ममहद्योनिरहंबीजप्रदःपिता ॥ ४ ॥

णानर्थशालिना ॥ कार्यकारणसंघातरूपेणाविद्यकात्मना ॥ १० ॥ योजयितुंचिदाभासाख्येरेतःसेकपूर्वकम् ॥ मायावृत्त्याख्यगर्भंचधारयाम्यहमीश्वरः ॥ ११ ॥ तदर्थंमध्यआकाशाद्युत्पत्त्यादिदशाअपि ॥ गर्भाधानाज्जनिस्तस्माद्ब्रह्मादीनांशरीरिणाम् ॥ १२ ॥ नत्वीश्वरकृतंचैवं गर्भाधानमृतेजनिः ॥ १३ ॥ ३ ॥ कथंसमस्तभूतानांततएवास्तिसंभवः ॥ देवादिदेहभेदानांकारणांतरसंभवात् ॥ १ ॥ शृणुदेवमनुष्यादिसर्वयोनिष्वमूर्तयः ॥ जरायुजादिभेदेनदेहाःसंस्थानलक्षणाः ॥ २ ॥ मूर्छितांगावयवास्ताःसंभवंतिसहस्रशः ॥ कौंतेयतासांमूर्तीनांतत्तत्कारणभावतः ॥ ३ ॥ महद्ब्रह्मैवतन्मातृस्थानीयायोनिरुच्यते ॥ गर्भाधानस्यकर्ताहंजनकःपरमेश्वरः ॥ ४ ॥ महतोब्रह्मणस्तेनावस्थाभेदा अनेकधा ॥ हेत्वंतराणितस्मात्तत्कारणंजगतांमहत् ॥ ५ ॥ ४ ॥

एवंनिरीश्वराःसांख्याहरिणैवनिराकृताः ॥ क्षेत्रक्षेत्रज्ञसंयोगईश्वराधीनइत्यतः ॥ १ ॥ कस्मिन्गुणेकथंसंगोगुणाःकेवाकथंचते ॥ बध्नंतीत्युच्यतेश्लोकैश्चतुर्दशभिरेवच ॥२॥ सत्वंरजस्तमइतिनामानोहिगुणाजडाः॥ पुरुषंप्रतितेनित्यंपरतंत्राभवंत्यमी ॥ ३ ॥ अचेतनानांसर्वेषांचेतनार्थत्वहेतुना ॥ ननुद्रव्याश्रिताज्ञेयावैशेषिकमतागुणाः ॥ ४ ॥ गुणगुणवतोरत्रनैवान्यत्त्वंविवक्षितम् ॥ गुणत्रयात्मिकामायाविद्याप्रकृतिरुच्यते ॥ ५ ॥ कथंप्रोक्तंतदात्रेतिगुणाःप्रकृतिसंभवाः ॥ शृणूच्यतेत्रयाणांयागुणानांसमतादशा ॥ ६ ॥ मायाप्रकृतिरित्युक्ताशक्तिर्भगवतोहरेः ॥ तस्याःसकाशादन्योन्यांगांगिभावेनतेगुणाः ॥ ७ ॥ वैषम्येणपरीणामंगताःप्रकृतिसंभवाः ॥ शरीरेंद्रियसंघातेतदध्यासेनदेहिन

सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः ॥ निबध्नंतिमहाबाहोदेहेदेहिनमव्ययम् ॥ ५ ॥
तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयम् ॥ सुखसंगेनबध्नातिज्ञानसंगेनचानघ ॥ ६ ॥

म् ॥ ८ ॥ वस्तुतोनिर्विकारंतंबध्नंतीवगुणाइमे ॥ यथाकाशस्थमादित्यंप्रतिबिंबमुखेनहि ॥ ९ ॥ कंपादिमत्तयावारिदर्शयत्यचलंचलम् ॥ तथैनंनिर्विकारंतेस्वविकारैकवत्तया ॥ १० ॥ दर्शयंतीवचभ्रांत्यातादात्म्याध्यासरूपया ॥ ११ ॥ ५ ॥ कोगुणःकेनसंगेनबध्नातीत्युच्यतेऽधुना ॥ गुणेषुतेषुमध्येयत्सत्वंस्वच्छतयामलम् ॥ १ ॥ चिच्छायाग्रहयोग्यत्वात्तिरोधायकमावृतेः ॥ चितोऽभिव्यंजकंदुःखविरोधित्वात्सुखस्यच ॥ २ ॥ सुखज्ञानेमनोवृत्तीक्षेत्रधर्मतयेरिते ॥ तयोरात्मनिनिःसंगेऽध्यासःसंगइतीरितः॥ ३॥ सुख्यहंज्ञान्यहंचेतिदृश्यधर्मोऽप्यविद्यया ॥ चिद्दृष्टरियतोऽध्यस्तोभातिभ्रांत्यानवस्तुतः ॥ ४ ॥ ६ ॥

भोगेषुरज्यतेऽनेनेतिरागःकामसंज्ञकः ॥ सआत्मायस्यरजसस्तादात्म्याद्धर्मधर्मिणोः ॥ १ ॥ तृष्णाप्राप्ताभिलाषास्यात्प्राप्तस्योपस्थितेक्षये ॥ संरक्षणाभिलाषोयःसआसंगस्तयोर्जनिः ॥ २ ॥ यस्मात्तद्धिरजोऽप्येनंकर्मसंगेनदेहिनम् ॥ करोम्यहमिदंकर्मतत्फलंभोक्ष्यइत्ययम् ॥ ३ ॥ आग्रहःकर्मसंगःस्यात्तेनबध्नात्यसंगिनम् ॥ वस्तुतस्तमकर्तारंकर्तृत्वाभिनिवेशतः ॥ ४ ॥ रजःप्रवृत्तिहेतुत्वात्स्ववशेस्थापयत्यमुम् ॥ ५ ॥७॥ तमस्सत्वरजोभिन्नमज्ञानादावृतेःपदात् ॥ उद्भूतंविद्ध्यतःसर्वभूतानांभ्रांतिकारणम् ॥ १ ॥ अविवेकतयानर्थजालैर्बध्नातिदेहिनम् ॥ सत्व कार्यप्रकाशस्यविरोधीतत्त्ववस्तुनः ॥ २ ॥ विवेकासामर्थ्यरूपःप्रमादोऽनवधानता ॥ रजःकार्यप्रवृत्तेस्तुविरोध्यालस्यमुच्यते ॥ ३ ॥ तमो

रजोरागात्मकंविद्धितृष्णासंगसमुद्भवम् ॥ तन्निबध्नातिकौंतेयकर्मसंगेनदेहिनम् ॥ ७ ॥
तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनाम् ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत ॥ ८ ॥
सत्वंसुखेसंजयतिरजःकर्मणिभारत ॥ ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत ॥ ९ ॥

गुणाश्रयावृत्तिर्निर्द्वोभयविरोधिनी ॥ त्रिभिर्भावैस्तमोऽप्येनंस्ववशेस्थापयत्यदः ॥ ४ ॥ ८ ॥ कस्मिन्कार्येचकस्यास्तिगुणस्योत्कर्षउच्यते ॥ उत्कृष्टंसत्वमात्मानंसुखेसंश्लेषयत्यदः ॥ १ ॥ दुःखहेतुंतिरस्कृत्यसुखाभिव्यंजकंचसत् ॥ एवंरजःसदुत्कृष्टंविक्षेपकतयाजनम् ॥ २ ॥ सुखहे तुंतिरस्कृत्यसंश्लेषयतिकर्मणि ॥ जायमानमपिज्ञानंसत्वकार्यप्रमाणतः ॥ ३ ॥ आच्छाद्याज्ञानसंबद्धेप्रमादेनिक्षिपेत्तमः ॥ प्राप्तकर्तव्यता कस्याप्यालस्येतद्विपर्यये ॥ ४ ॥ तामस्यांचैवनिद्रायांदेहिनंसंजयत्यपि ॥ ५ ॥ ९ ॥

श्रीगणेशायनमः ॥ अथचतुर्दशाध्यायव्याख्याप्रारंभः ॥ गुणातीतालंबंपरमपदमंभोधररुचंविचित्रारंभांतर्गतगुणकलालंबममलम् ॥ स्वयं भूशंभुश्रीनिधिगुणविलासांकितपदंमुकुंदंवंदेऽहंप्रकृतिगुणदंभादिहरणम् ॥ १ ॥ पूर्वाध्यायेजगत्सर्वंक्षेत्रक्षेत्रज्ञसंगतः ॥ जायतेतदितिप्रोक्तंत त्कथंचेतिकथ्यते ॥ २ ॥ क्षेत्रक्षेत्रज्ञसंगस्येश्वराधीनत्ववर्णनात् ॥ सांख्यानिरीश्वराअत्रनिराकार्याश्चतुर्दशे ॥ ३ ॥ कारणंगुणसंगोऽस्यसद सद्योनिजन्मसु ॥ इत्युक्तंतत्रकस्मिन्वागुणेसंगःकथंचवा ॥ ४ ॥ केवागुणाःकथंवातेबध्नंतिकिंस्वभावकाः ॥ गुणेभ्यश्चकथंमोक्षःकिंमुक्तस्यच लक्षणम् ॥ ५ ॥ तदेतद्विस्तरेणैववक्तुमारभ्यतेऽधुना ॥ परंभूयःप्रवक्ष्यामीत्याद्यध्यायश्चतुर्दशः॥ ६ ॥ तत्रद्वाभ्यांस्तुवन्नर्थंवक्ष्यमाणंजगद्गुरुः॥ श्रोतृणांरोचनार्थंश्रीभगवानाहसर्ववित् ॥ ७ ॥ ज्ञायतेऽनेनतज्ज्ञानंपरात्मज्ञानसाधनम् ॥ श्रेष्ठंश्रेष्ठास्पदत्वेनयज्ञादीनामिदंवरम् ॥ ८ ॥

श्रीभगवानुवाच ॥ परंभूयःप्रवक्ष्यामिज्ञानानांज्ञानमुत्तमम् ॥ यज्ज्ञात्वामुनयःसर्वेपरांसिद्धिमि तोगताः ॥ १ ॥ इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः॥ सर्गेऽपिनोपजायंतेप्रलयेनव्यथंतिच ॥ २ ॥

बहिरंगसाधनानांमध्येश्रेष्ठफलत्वतः ॥ अमानित्वादिज्ञानानांत्वंतरंगत्वमीरितम् ॥ ९ ॥ उत्कृष्टविषयत्वंचपरमित्यमुनेरितम् ॥ उत्तमंचेत्यने नोक्ताप्रकृष्टफलतातथा ॥ १० ॥ प्रवक्ष्यामीदृशंज्ञानमुक्तमप्यसकृत्पुनः ॥ शास्त्रार्थस्यावगंतारोयज्ज्ञानंप्राप्यसाधनम् ॥ ११ ॥ सर्वेप्रकृष्टां मोक्षाख्यांसिद्धिंप्राप्ताइतःपरम् ॥ देहबंधंपरित्यज्यकैवल्यैकपदंगताः ॥ १२ ॥ १ ॥ ऐकांतिकत्वमेतस्याःसिद्धेर्दर्शयतीश्वरः ॥ इदंसम्यगनु ष्ठाययथोक्तंज्ञानसाधनम् ॥ १ ॥ मद्रूपतामभेदेनप्राप्ताःसंतोविपश्चितः॥ भूतेषूत्पद्यमानेषुनोत्पद्यंतेकदाचन ॥ २ ॥ ब्रह्मणोनाशकालेऽपि नलीयंतेचलंतिन ॥ ३ ॥ २ ॥

सत्वादीनांप्रवृद्धानांमृत्युकालेऽधुनाफलम् ॥ आहद्वाभ्यांविशेषेणभगवान्परमागतिः ॥ १ ॥ वृद्धेसत्वगुणेजीवोमृत्युंप्राप्नोतिचेत्तदा ॥ हिरण्यगर्भमुख्यायेउपास्यत्वेनचोत्तमाः ॥ २ ॥ तदुपासकसल्लोकान्दिव्यभोगोपबृंहितान् ॥ रजस्तमोमलैर्हीनांस्तानाप्नोतितदांजसा ॥ ३ ॥ ॥ १४ ॥ वृद्धेरजसिसंप्राप्यमृत्युंकर्माधिकारिषु ॥ जायतेऽसौमनुष्येषुफलासक्तियुतेषुच ॥ १ ॥ मृतःप्रवृद्धेतमसिपश्वादिष्वप्रजायते ॥ २ ॥ ॥१५॥ स्वानुरूपक्रियाद्वाराविचित्रफलतांहरिः ॥ संक्षिप्याहाधुनातेषांसत्वादीनांविशेषतः ॥ १ ॥ सात्विकस्यचधर्मस्यहीनंरजस्तमोमलैः ॥ फलंसत्वेननिर्वृत्तंप्राहुर्वेदविदांवराः ॥ २ ॥ पापमिश्रस्यपुण्यस्यफलंदुःखंहिराजसम् ॥ तामसस्याप्यधर्मस्यदुःखंमोहयितुंफलम् ॥ ३ ॥ अ

यदासत्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् ॥ तदोत्तमविदाँल्लोकानमलान्प्रतिपद्यते ॥ १४ ॥
रजसिप्रलयंगत्वाकर्मसंगिषुजायते ॥ तथाप्रलीनस्तमसिमूढयोनिषुजायते ॥ १५ ॥
कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलम् ॥ रजसस्तुफलंदुःखमज्ञानंतमसःफलम् ॥ १६ ॥
सत्वात्संजायतेज्ञानंरजसोलोभएवच ॥ प्रमादमोहौतमसोभवतोऽज्ञानमेवच ॥ १७ ॥

त्रजस्तमःशब्दौपरौतत्कार्यकर्मणि ॥ कार्यहेत्वोरभेदोपचाराद्धान्यमसीतिवत् ॥ ४ ॥ धान्यशब्दोयथातत्रतद्भूतेऽस्तितंडुले ॥ तथारजस्तमःशब्दौतत्कार्येकर्मणीत्यपि ॥ ५ ॥ गोभिःश्रीणीतवेत्यत्रगोशब्दोऽपितद्भवे ॥ पयसिप्रकृतित्वात्स्याद्यथातद्वदिहापिच ॥ ६ ॥ १६ ॥ ईदृशेफलवैचित्र्येहेतुमाहपुरेरितम् ॥ सत्वात्प्रकाशरूपंतज्ज्ञानंसंजायतेस्फुटम् ॥ १ ॥ रजसस्त्वत्कटोलोभोऽभिलाषाख्योऽभिजायते ॥ प्रमादमोहौव्याख्यातौजायेतेतमसोगुणात् ॥ २ ॥ प्रमादमोहयोर्हेतुरज्ञानंवृद्धिमेत्यतः ॥ ३ ॥ १७ ॥

शास्त्रीयेकर्मणिज्ञानेरतास्तत्तारतम्यतः ॥ तेसत्यलोकपर्यंतंयांतिदेवेषुजन्मना ॥ १ ॥ लोभादिपूर्वकेवृत्तेरतायेराजसाजनाः ॥ मध्येमनुष्यलोकेतेपुण्यपापविमिश्रिते ॥ २ ॥ तिष्ठंतिनतुगच्छंतिचोर्ध्ववाप्यथवाप्यधः ॥ पश्वादिषुप्रजायंतेनिद्रालस्यादितत्पराः ॥ ३ ॥ तमःप्रधानास्तद्वृत्तेनिद्रालस्यादिकेरताः ॥ निकृष्टगुणवृत्तिस्थाजायंतेतामसाःसदा ॥ ४ ॥ नजातुसात्त्विकामूढाराजसावाभवंतिते ॥ अतस्तमोरजस्त्यक्त्वासुखार्थीसत्त्वमाश्रयेत् ॥ ५ ॥ १८ ॥ अध्यायेऽस्मिन्नुपक्रांतमर्थत्रयमितिद्वयम् ॥ त्रिष्टुप्प्रोक्तंतृतीयंचावशिष्टंवर्णयत्यजः ॥ १ ॥ क्षेत्रक्षेत्रज्ञसंयोगईश्वराधीनइत्यपि ॥ केवागुणाःकथंवातेबध्नंतीत्यर्थकद्वयम् ॥ २ ॥ उक्त्वाधुनागुणेभ्योऽस्यमोक्षणंस्यात्कथंतथा ॥ लक्षणंकिंविमु

ऊर्ध्वंगच्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः ॥ जघन्यगुणवृत्तिस्थाअधोगच्छंतितामसाः ॥ १८ ॥
नान्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति ॥ गुणेभ्यश्चपरंवेत्तिमद्भावंसोऽधिगच्छति ॥ १९ ॥

क्तस्यवाच्यमित्यवशिष्यते ॥ ३ ॥ मिथ्याज्ञानस्वरूपत्वाद्गुणानांतत्त्वबोधतः॥ तेभ्योमोक्षणमित्याहभगवान्करुणाकरः ॥४ ॥ कार्यकरणविषयाकारेणबहुधागुणाः ॥ परिणामंगतास्तेभ्यःकर्तारंनविलक्षणम् ॥ ५ ॥ विचारकुशलोद्रष्टायदापश्यतिवीक्षणात् ॥ देहेंद्रियमनोबुद्धिविषयाकारतांगताः ॥ ६ ॥ गुणाएवहिकर्तारःसर्वदासर्वकर्मणाम् ॥ इत्येवंपश्यतिद्रष्टास्वानुभूत्यादमैर्नयैः॥ ७ ॥ तत्तदवस्थापन्नेभ्योगुणेभ्यःपरमक्रियम् ॥ गुणकार्याद्यसंस्पृष्टंगुणव्यापारसाक्षिणम् ॥ ८ ॥ सर्वत्रसममानंदंक्षेत्रज्ञंचैकमक्षयम् ॥ चिद्घनंनिष्कलंशुद्धंसर्ववृत्त्यवभासकम् ॥ ९ ॥ भास्यधर्मैरसंस्पृष्टमादित्यमिववेत्तियः ॥ सद्रष्टाजीवतांहित्वामद्रूपत्वंचगच्छति ॥ १० ॥ १९ ॥

त्वद्भावंसकथंयातीत्येवंचेच्छृणुतत्त्वतः ॥ मायाभवान्गुणानेतान्रजःसत्वतमोऽभिधान् ॥ १ ॥ देहोत्पत्तौनिमित्तत्वाद्बीजभूतानतीत्यच ॥
जीवन्नेवात्मबोधेनत्रीनतिक्रम्यबाधितान् ॥ २ ॥ जन्ममृत्युजराद्दुःखैस्तद्बाधेनैवबाधितैः ॥ जीवन्नेवविमुक्तःसंस्तत्संसर्गविवर्जितः ॥ ३ ॥
विद्वान्कैवल्यमानंदंमद्भावंयातिमद्वपुः ॥ ४ ॥ २० ॥ जीवन्नेवगुणानेतानतीत्यामृतमश्नुते ॥ इत्येतद्वचनंश्रुत्वापार्थोभगवतोहरेः ॥ १ ॥
गुणातीतस्यचिन्हानितथाचारंमहात्मनः ॥ सम्यग्बुभुत्समानःसन्गुणातीतत्वसाधनम् ॥ २ ॥ उवाचवचनंचारुप्रश्नपीयूषपूरितम् ॥ गुणा

गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान् ॥ जन्ममृत्युजराद्दुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ अर्जुन उवाच ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतोभवतिप्रभो ॥ किमाचारःकथंचैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥

नेतानतीतोयःसकैर्लिंगैर्युतःपुमान् ॥ ३ ॥ ज्ञातुंशक्यःसयैर्लिंगैस्तानिमेब्रूहिपृच्छतः ॥ प्रभुत्वाद्भृत्यदुःखानिवारणीयानिसर्वथा ॥ ४ ॥
श्रीमद्भगवतैवेतिसूचयन्नाहहेप्रभो ॥ किमाचारोगुणातीतःस्यात्प्रश्नोऽयंद्वितीयकः ॥ ५ ॥ सकिंयथेष्टचेष्टःस्यात्किंवाशास्त्रनियंत्रितः ॥
एतान्केनप्रकारेणगुणांस्त्रीनतिवर्तते ॥ ६ ॥ कोगुणातीततोपायःप्रश्नोऽयंचतृतीयकः ॥ ७ ॥ २१ ॥

उक्तंकार्यंकदाह्येतेकुर्वंतीत्युच्यतेऽधुना ॥ रजस्तमश्चयुगपदभिभूयगुणौयदा ॥ १ ॥ सत्वंविवर्धतेतर्हिस्वीयंकार्यंकरोतितत् ॥ सत्वंतमोऽभिभूयैवंरजःस्वीयंकरोतितत् ॥ २ ॥ सत्वंरजस्तिरस्कृत्यकरोत्येवंस्वकंतमः॥ ३ ॥१०॥ लिंगान्याहप्रवृद्धानांगुणानांत्रिभिरीश्वरः ॥ अस्मिन्भोगालयेदेहेश्रोत्रादिकरणेष्वपि ॥ १ ॥ यदाप्रकाशोधीवृत्तिविशेषोवस्तुगोचरः॥ स्वगोचरावृतेर्यस्तुविरोधीदीपवद्भवेत् ॥ २ ॥ ज्ञानंतदेवशब्दादिविषयंचोपजायते ॥ तदाज्ञानप्रकाशेनलिंगेनैतत्प्रकाशकम् ॥ ३ ॥ उद्भूतंसत्वमित्येवंविद्यात्तद्भूत्सुखादिना ॥ ४ ॥ ११ ॥ अनुक्षणंवर्धमानोऽभिलाषोलोभउच्यते ॥ अतीवधनलाभेऽपियोनशाम्यतिकर्हिचित् ॥ १ ॥ नित्यंप्रयतमानत्वंप्रवृत्तीराजसीकला ॥ गृहादि

रजस्तमश्चाभिभूयसत्वंभवतिभारत ॥ रजःसत्वंतमश्चैवतमःसत्वंरजस्तथा ॥ १० ॥
सर्वद्वारेषुदेहेऽस्मिन्प्रकाशउपजायते ॥ ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत ॥ ११ ॥
लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा ॥ रजस्येतानिजायंतेविवृद्धेभरतर्षभ ॥ १२ ॥
अप्रकाशोऽप्रवृत्तिश्चप्रमादोमोहएवच ॥ तमस्येतानिजायंतेविवृद्धेकुरुनंदन ॥ १३ ॥

विषयाणांचव्यापाराणांयउद्यमः ॥ २ ॥ बह्वायासकराणांस्यादारंभःकाम्यकर्मणाम् ॥ इदंकृत्वाकरिष्यामीदमित्येवाशमःस्मृतः ॥ ३ ॥ उच्चावचेषुवित्तेषुपरस्यापीक्षितेषुच ॥ येनकेनाप्युपायेनोपादित्साप्रोच्यतेस्पृहा ॥ ४ ॥ रागात्मकानिलिंगानिप्रवृद्धेचरजोगुणे ॥ उक्तान्येतानिजायंतेविद्यालिंगैरजोमहत् ॥ ५ ॥ १२ ॥ अप्रकाशोह्ययोग्यत्वंबोधेसत्यपिबोधके ॥ सतिशास्त्रेतथाबोधेप्रवृत्तेःकारणेऽपिच ॥ १ ॥ प्रवृत्त्ययोग्यताधर्मेऽप्रवृत्तिस्तामसीकला ॥ कर्तव्यत्वेनप्राप्तस्यानानुसंधानमेवच ॥ २ ॥ प्रमादईरितोमोहोनिद्रावास्याद्विपर्ययः ॥ वृद्धेतमसिजायंतेलिंगान्येतानिसर्वथा ॥ ३ ॥ एतैर्लिंगैस्तमोवृद्धंविद्यादव्यभिचारिभिः ॥ ४ ॥ १३ ॥

समेदुःखसुखेयस्यानात्मधर्मतयानृते ॥ द्वैतदर्शनशून्यत्वात्स्वस्मिन्नेवस्थितोयतः ॥ १ ॥ हेयादेयत्वशून्यानिलोष्टाश्मादीनियस्यसः ॥ तुल्ये प्रियाप्रियेयस्यसाधनेसुखदुःखयोः ॥ २ ॥ उपेक्षणीयभावेनहिताहितविकल्पनाः ॥ यस्यध्वस्ताअतोऽसौस्याद्धीमान्धैर्ययुतोबुधः ॥ ३ ॥ अतएवात्मनस्तुल्येनिंदासम्यक्स्तुतीउभे ॥ यस्यदोषगुणादीनांसम्यग्बोधेनबाधनात् ॥ ४ ॥ ईदृशोब्रह्मविद्धीरोगुणातीतःसउच्यते ॥ ५ ॥ ॥ २४ ॥ मानःसत्कारइत्युक्तआदरापरनामकः ॥ अपमानस्तिरस्कारोऽनादरापरसंज्ञकः ॥ १ ॥ तयोर्हर्षविषादाभ्यामसंस्पृष्टतयासमः ॥

समदुःखसुखःस्वस्थःसमलोष्टाश्मकाचनः ॥ तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः ॥२४॥
मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः ॥ सर्वारंभपरित्यागीगुणातीतःसउच्यते ॥ २५ ॥

निंदास्तुतीतुशब्दैकस्वरूपेपरिकीर्तिते ॥ २ ॥ शब्दंविनापिव्यापारविशेषःकायचित्तयोः ॥ मानापमानावित्युक्ताविति भेदस्तयोर्द्वयोः ॥ ३ ॥ तुल्योद्वेषाद्यनाक्रांतोयस्तुमित्रारिपक्षयोः ॥ आरंभाःसर्वकर्माणित्यक्तुंशीलंचयस्यसः ॥ ४ ॥ देहयात्रार्थमेवास्यकर्माभासोनचा परम् ॥ यथोक्ताचारसंपन्नोगुणातीतःसउच्यते ॥ ५ ॥ यावत्प्रयत्नसाध्यंस्याद्गुणातीतत्वसाधनम् ॥ तावन्मुमुक्षुणानित्यमनुष्ठेयमिहादरात् ॥ ६ ॥ उत्पन्नायांतुविद्यायांजीवन्मुक्तस्यसन्मतेः ॥ अयत्नसिद्धंतस्योक्तंगुणातीतत्वलक्षणम् ॥ ७ ॥ २५ ॥

कथंगुणानतिक्रामेदित्यस्योत्तरमुच्यते ॥ मांपरमेश्वरंसर्वभूतानांहृदयेस्थितम् ॥ १ ॥ भगवंतंपरानंदघनंनारायणंविभुम् ॥ नित्यमव्यभिचारेणपरप्रेमैकलक्ष्मणा ॥ २ ॥ दृढेनभक्तियोगेनयश्चिंतयतिसर्वदा ॥ समद्भक्तोगुणानेतान्मत्प्रसादाप्ततत्त्वधीः ॥ ३ ॥ अद्वैतदर्शनेनैवबाधित्वात्मनिकल्पितान् ॥ ब्रह्मभूयायमोक्षायसमर्थोभवतिस्वयम् ॥ ४ ॥ भगवच्चिंतनंनित्यंगुणातीतत्वसाधनम् ॥ मुख्यंतस्मात्सदाधीमांश्चिंतयेत्कृष्णमीश्वरम् ॥ ५ ॥ भ्रमावर्तागारंप्रचुरभयभारंश्रमपदंह्यसारंसंसारंजनिमृतिघनाधारमुदधिम् ॥ गुणानामाकारंगहनगतिमुत्तर्तुमधुनापरांभक्तिंकृष्णेश्रयतकृतिनोमोक्षजननीम् ॥ ६ ॥ २६ ॥ हरिभक्तिर्दृढाप्रेम्णागुणातीतत्वसाधनम् ॥ कुतएतदपेक्षायांहेतुमाहजगत्पतिः ॥ १ ॥ ब्रह्मणःसविकल्पस्यसर्वशक्तेर्महेशितुः ॥ श्रुतौतत्पदवाच्यस्यजगद्धेतोरहंयतः ॥ २ ॥ प्रतिष्ठावास्तवंतत्त्वंनिर्विकल्पकमद्वय

मांचयोऽव्यभिचारेणभक्तियोगेनसेवते ॥ सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते ॥ २६ ॥
ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच ॥ शाश्वतस्यचधर्मस्यसुखस्यैकांतिकस्यच ॥ २७ ॥
इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो०गुणत्रयविभागयोगोनामचतुर्दशोऽध्यायः॥१४॥

म् ॥ चिदानंदघनंसत्यंनिरुपाधिकमक्षयम् ॥ ३ ॥ अहंतत्पदलक्ष्यंश्रीवासुदेवःस्वयंप्रभः॥ अतोमांसेवतेयःसब्रह्मभूयायकल्पते ॥ ४ ॥ ब्रह्मणःकीदृशस्याहंप्रतिष्ठातच्छृणुस्फुटम् ॥ नाशशून्यस्यसत्यस्यकूटस्थस्यचिदात्मनः ॥ ५ ॥ नित्यस्यतत्त्वविज्ञाननिष्ठाप्राप्यस्यवस्तुनः ॥ परमानंदरूपस्यसर्वदाऽव्यभिचारिणः ॥ ६ ॥ ईदृशस्यस्वरूपंमांचिंतयन्पारमार्थिकम् ॥ संसारान्मुच्यतेधीरोमद्भक्तोमय्यवस्थितः ॥ ७ ॥ यद्वात्वद्भावमाप्तोतुत्वद्भक्तस्त्वत्परायणः ॥ ब्रह्मत्वयोग्यःसकथंब्रह्मान्यत्वात्तवेतिचेत् ॥ ८ ॥ पर्याप्तिरहमेवास्मिब्रह्मणःपरमात्मनः ॥ नमद्भिन्नंपरंब्रह्मसम्यक्पश्यत्वमात्मना ॥ ९ ॥ तथामृतस्यमोक्षस्यानुच्छेद्यस्यचसर्वथा ॥ प्रतिष्ठाहंसमय्येवमोक्षोमत्प्राप्तिरेवहि ॥ १० ॥ नित्यमो

क्षफलस्यास्यधर्मस्याप्यहमेवच ॥ पर्यायिर्ज्ञाननिष्ठाख्योधर्मोमय्येवतिष्ठति ॥११॥ नतेनाकिंचिन्मद्भिन्नंप्राप्यंधर्मेणवैसुखम् ॥ सुखस्यैकांतिक
स्यापिपर्यायिरहमेवंच ॥ १२ ॥ परमानंदरूपत्वान्नमद्भिन्नंसुखंक्वचित् ॥ किंचित्प्राप्यंयतोमत्तःपृथग्दुःखंचबाधितम् ॥ १३ ॥ तस्माद्यु
क्तियुतंप्रोक्तंमद्भक्तोमत्परायणः ॥ ब्रह्मभूयायमोक्षायसमर्थोभवतीतिच ॥ १४ ॥ तस्मान्मुमुक्षुभिर्धीरैःप्रेमभक्त्याहमीश्वरः ॥ यदाश्रित
स्तदैवैतेगुणातीतत्वभागिनः ॥ १५ ॥ २७ ॥ सत्वादीनांगुणानांजनिमृतिगहनेदुस्तरेऽस्मिन्भवाब्धौकार्याकारेणनित्यंपरिणतवपुषांपात
हेतुत्वमुक्त्वा ॥ तेभ्योमोक्षंस्वबोधात्स्वपदरतधियांलक्षणादिप्रदर्श्यस्वीयांनिष्ठांजगौयोविमलमतिमतांनौमितंकृष्णमीड्यम् ॥ १ ॥ इति
भावप्रकाशेश्रीसदानंदविदाकृते ॥ गुणातीतत्वनिष्ठोऽयंपूर्तियातश्चतुर्दशः ॥ १६४ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ४००४ ॥

समेदुःखसुखेयस्यानात्मधर्मतयानृते ॥ द्वैतदर्शनशून्यत्वात्स्वस्मिन्नेवस्थितोयतः ॥ १ ॥ हेयादेयत्वशून्यानिलोष्टाश्मादीनियस्यसः ॥ तुल्ये प्रियाप्रियेयस्यसाधनेसुखदुःखयोः ॥ २ ॥ उपेक्षणीयभावेनहिताहितविकल्पनाः ॥ यस्यध्वस्ताअतोऽसौस्याद्धीमान्धैर्ययुतोबुधः ॥ ३ ॥ अतएवात्मनस्तुल्येनिंदासम्यक्स्तुतीउभे ॥ यस्यदोषगुणादीनांसम्यग्बोधेनबाधनात् ॥ ४ ॥ ईदृशोब्रह्मविद्धीरोगुणातीतःसउच्यते ॥ ५ ॥ ॥ २४ ॥ मानःसत्कारइत्युक्तआदरापरनामकः ॥ अपमानस्तिरस्कारोऽनादरापरसंज्ञकः ॥ १ ॥ तयोर्हर्षविषादाभ्यामसंस्पृष्टतयासमः ॥

समदुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः॥२४॥
मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः ॥ सर्वारंभपरित्यागीगुणातीतःसउच्यते ॥ २५ ॥

निंदास्तुतीतुशब्दैकस्वरूपेपरिकीर्तिते ॥ २ ॥ शब्दंविनापिव्यापारविशेषःकायचित्तयोः ॥ मानापमानावित्युक्ताविति भेदस्तयोर्द्वयोः ॥ ३ ॥ तुल्योद्वेषाद्यनाक्रांतोयस्तुमित्रारिपक्षयोः ॥ आरंभाःसर्वकर्माणित्यक्तुंशीलंचयस्यसः ॥ ४ ॥ देहयात्रार्थमेवास्यकर्माभासोनचापरम् ॥ यथोक्ताचारसंपन्नोगुणातीतःसउच्यते ॥ ५ ॥ यावत्प्रयत्नसाध्यंस्याद्गुणातीतत्वसाधनम् ॥ तावन्मुमुक्षुणानित्यमनुष्ठेयमिहादरात् ॥ ६ ॥ उत्पन्नायांतुविद्यायांजीवन्मुक्तस्यसन्मतेः ॥ अयत्नसिद्धंतस्योक्तंगुणातीतत्वलक्षणम् ॥ ७ ॥ २५ ॥

द्याः श्रुतयस्तद्वत्स्मृतयोऽपिसहस्रशः॥१८॥ अव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः ॥ बुद्धिस्कंधमयश्चैवइंद्रियांतरकोटरः॥१९॥ महाभूतविशाखश्चविषयैःपत्रवांस्तथा ॥ धर्माधर्मसुपुष्पश्चसुखदुःखफलोदयः॥२०॥ आजीव्यःसर्वभूतानांब्रह्मवृक्षःसनातनः॥ एतद्ब्रह्मवनंचैतद्ब्रह्माचरतिसाक्षिवत् ॥२१॥ एतच्छित्त्वाचभित्त्वाचज्ञानेनपरमासिना ॥ ततश्चात्मगतिंप्राप्यतस्मान्नावर्ततेपुनः॥२२॥ मायोपाधिकमव्यक्तंमूलंतस्मात्समुद्भवः॥ यस्यसंसारवृक्षस्येत्याद्यर्थाःस्मृतयःस्मृताः॥२३॥ वृक्षरूपकविन्यासैरुपमेयंविवक्षिता ॥ श्रीमद्गंगातरंगैर्यस्तुद्यमानस्तरुर्महान्॥२४॥ तत्तीरेद्युन्नतेऽत्यंतवायुनोन्मूलितोबलात् ॥ तिर्यङ्निपतितोजीवञ्छाखापत्रादिभिर्वृतः॥२५॥ तमेवोपमानीकृत्याश्वत्थंजीवंतमक्षतम् ॥ पुराणेच श्रुतौगीतास्वियंरूपककल्पना ॥२६॥ तेनोर्ध्वमूलभावादेर्नानुपपत्तिरण्वपि ॥ यस्यमायामयस्यास्याश्वत्थस्याच्छादनात्तरोः॥२७॥ तत्त्वप्रावरणाद्यद्वासंसारतरुरक्षणात् ॥ छंदासिकर्मकांडानिपर्णानीवभवंतिवै ॥२८॥ यथावृक्षस्यपर्णानिरक्षणार्थानिसंत्युत ॥ तथासंसारवृक्षस्यकर्म

छंदांसियस्यपर्णानियस्तंवेदसवेदवित् ॥ १ ॥

कांडानिसर्वतः ॥२९॥ ऋग्यजुःसामरूपाणिरक्षणार्थानिसंत्यपि ॥ धर्माधर्मादितद्धेतुफलभासकतायतः ॥३०॥ छंदसामस्तितस्मात्तत्पर्णत्वंतत्रदर्शितम् ॥ मायामयंतमश्वत्थंयथाव्याख्यातमेवयः ॥३१॥ समूलमभिजानातिशास्त्रतोयुक्ततःस्वतः ॥ कर्मब्रह्मात्मवेदार्थवित्सएवास्तिवेदवित् ॥३२॥ मूलंसंसारवृक्षस्यशुद्धंब्रह्मस्वमायया ॥ शाखाहिरण्यगर्भाद्याजीवाःसंतिसहस्रशः॥३३॥ सचसंसारवृक्षोऽस्तिस्वरूपेणविनश्वरः॥ प्रवाहरूपेणतथानाद्यनंततयाऽव्ययः ॥ ३४ ॥ वेदोक्तैःकर्मभिर्जीवैःसेव्यतेसचसर्वदा ॥ छिद्यतेब्रह्मबोधेनसाक्षात्काराच्चनासच ॥ ३५॥ इत्येतावान्हिवेदार्थःसंगृहीतोयथार्थतः ॥ नसंसारतरोरस्मात्समूलादागमार्थतः ॥ ३६ ॥ ज्ञेयोऽणुमात्रोऽप्यन्योऽस्तिह्यवशिष्टोऽतएवहि ॥ समूलंवेत्तिसंसारवृक्षंयःसचवेदवित् ॥ ३७॥ यश्चवेदार्थवित्प्राज्ञःसएवास्तीहसर्ववित् ॥ इत्थंसमूलवृक्षस्यज्ञानंस्तौतिहरिःस्वयम् ॥ ३८ ॥ १ ॥

एवंवेदार्थविच्चेनसमूलतरुवेदिनम् ॥ स्तुत्वातस्यैवसंसारवृक्षस्यकल्पनापरा ॥ १ ॥ वैराग्यायोच्यतेह्यंगसंबंधिन्यक्षराप्तये ॥ पूर्वंहिरण्यगर्भाद्याःकार्योपाधितयातरोः ॥ २ ॥ शाखास्थानीयभावेनप्रोक्ताअत्राधुनात्वयम् ॥ विशेषस्तद्वतोऽन्योऽपिवैराग्यायोच्यतेस्फुटम् ॥ ३ ॥ कपूयचरणायेतेपापाःपश्वादियोनिषु ॥ सुविस्तारंगतायेतुधर्मात्मानस्तऊर्ध्वगाः ॥ ४ ॥ देवादियोनिषुप्राप्ताविस्तारमतएवहि ॥ अधश्चातोमनुष्यत्वादारभ्यार्वाक्तृणावधिः ॥ ५ ॥ ऊर्ध्वंचततआरभ्यसत्यलोकांतमास्थिताः ॥ शाखाःसंसारवृक्षस्यकीदृश्यस्तागुणैस्त्रिभिः ॥ ६ ॥ देहेंद्रियाद्याकारेणसम्यक्परिणतैश्चतैः ॥ स्थूलीभूताःप्रवृद्धास्ताःसेचनैरिवपाथसाम् ॥ ७ ॥ विषयारंजकत्वेनशब्दाद्याःपल्लवाइव ॥ यासां

अधश्चोर्ध्वंप्रसृतास्तस्यशाखागुणप्रवृद्धाविषयप्रवालाः ॥
अधश्चमूलान्यनुसंततानिकर्मानुबंधीनिमनुष्यलोके ॥ २ ॥

संसारवृक्षस्यशाखानांतास्तथेरिताः ॥ ८ ॥ अधश्चशब्दादूर्ध्वंचमूलान्यवांतराण्यपि ॥ तत्तद्भोगजरागादिवासनालक्षणानिवै ॥ ९ ॥ धर्माधर्मप्रवृत्तेश्चकारकाणिसमंततः ॥ तस्यसंसारवृक्षस्यानुस्यूतानिभवंत्यतः ॥ १० ॥ मुख्यंतुमूलंब्रह्मैवेत्यतोदोषोनकश्चन ॥ तान्यवातरमूलानिकीदृशानीतिकथ्यते ॥ ११ ॥ धर्माधर्मात्मकंकर्मानुबद्धंपरिणामतः ॥ येषांजनयितुंशीलमधिकारिजनेभुवि ॥ १२ ॥ तानिकर्मानुबंधीनितत्रायंभावईशितुः ॥ संसारवासनानांचधर्माधर्माख्यकर्मणाम् ॥ १३ ॥ बीजांकुरवदन्योन्यजन्महेतुतयासदा ॥ तत्कृतोजन्ममृत्यादिसंतानात्मात्यनर्थदः ॥ १४ ॥ संसारतरुरुच्छेद्योज्ञानेनपरमासिना ॥ नोपेक्ष्योदीर्घरोगोऽयंसज्जनैःसन्मुमुक्षुभिः ॥ १५ ॥ २ ॥

यस्त्वयंवर्णितोवृक्षःसंसारारव्योऽस्यजंतुभिः ॥ संसारेऽस्मिन्स्थितैर्वेदेयथावर्णितमद्भुतम् ॥ १ ॥ रूपंतेनप्रकारेणनोपलभ्यतऐश्वरम् ॥ दृष्ट नष्टस्वरूपत्वात्तस्यमायामयस्यच ॥ २ ॥ स्वप्नमायामरीच्यंभोगंधर्वनगरादिवत् ॥ अतोनास्यावसानंचकथंचिदुपलभ्यते ॥ ३ ॥ एतावता सौकालेनसमाप्तिंयास्यतीतिवा ॥ अपर्यंततयाप्यस्यतथादिर्नोपलभ्यते ॥ ४ ॥ प्रवृत्तइतआरभ्येत्यनादित्वेनकेनचित् ॥ संप्रतिष्ठास्थितिर्ना पिमध्यमस्योपलभ्यते ॥ ५ ॥ तस्माद्यंतनिरूप्यत्वाद्यस्यादेवमयंतरुः ॥ संसाराख्योदुरुच्छेदःसर्वानर्थकरस्ततः ॥ ६ ॥ अनाद्यविद्ययात्यंत बद्धमूलंपुरेरितम् ॥ एनमश्वत्थनामानंसंसारतरुमव्ययम् ॥ ७ ॥ वैराग्याख्येनशस्त्रेणरागद्वेषविरोधिना ॥ दृढीकृतेनब्रह्मैक्यज्ञानौत्सुक्या

नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठा ॥ अश्वत्थमेनंसुविरूढमूल
मसंगशस्त्रेणदृढेनछित्वा ॥ ३ ॥ ततःपदंतत्परिमार्गितव्यंयस्मिन्गतानिवर्त
तिभूयः ॥ तमेवचाद्यंपुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणी ॥ ४ ॥

त्पुनःपुनः ॥ ८ ॥ विवेकाभ्यासतीक्ष्णेनछित्वोद्धृत्यसमूलतः ॥ वैराग्यात्पङ्क्तिसंपत्त्याकृत्वासंन्यासमादरात् ॥ ९ ॥ ३ ॥ ततोगुरुमुपागम्यत स्मात्संसारवृक्षतः ॥ ऊर्ध्वंव्यवस्थितंविष्णोःपदंश्रुतिशिरोगिराम् ॥ १ ॥ श्रवणादिविचारेणज्ञातव्यंतज्जयाधिया ॥ किंतत्पदंयदाचार्यमुपे त्यज्ञेयमादरात् ॥ २ ॥ यस्मिन्पदेप्रविष्टाश्चतत्त्वज्ञानेनसज्जनाः ॥ पुनःसंसारदुःखायनावर्ततेकदाचन ॥ ३ ॥ परिमार्गयितव्यंतत्कथमित्यु च्यतेशृणु ॥ पदशब्देनयःप्रोक्तस्तमेवादौभवंपरम् ॥ ४ ॥ येनपूर्णमिदंसर्वंशयानंपूर्षुपूरुषम् ॥ तंप्रपद्येयतःसर्वकारणात्पुरुषात्परात् ॥ ५ ॥ मायामयस्यवृक्षस्यसंसाराख्यस्यसर्वथा ॥ प्रवृत्तिःप्रसृतानादिःसेनैंद्रजालिकादिव ॥ ६ ॥ तमेवशरणंयामिमुमुक्षुःसन्नहंखिति ॥ तदेक शरणत्वेनज्ञातव्यंतत्पदंहरेः ॥ ७ ॥ ४ ॥

श्रीगणेशायनमः ॥ अथपंचदशाध्यायव्याख्याप्रारंभः ॥ अविद्याकामाद्यैर्दृढतरमूलैरुपचितंफलैर्दुःखाकारैर्निबिडमजरंभ्रांतिबहुलम् ॥ द्रुमंसंसाराख्यंविषमगतिमुच्छेत्तुमचिरात्क्षमायस्यादाजेरतिरनुदिनंनौमितमजम् ॥ १ ॥ क्षरंमायाकार्यंचरमचरमुच्चावचमिदंमहामायाशक्त्यक्षरमपितदध्यस्तमखिलम् ॥ चिदानंदेयस्मिन्परमपुरुषेब्रह्मणिविभौतमीशानंकृष्णंश्रुतिहृदयमीडेऽनवरतम् ॥ २ ॥ पूर्वाध्यायेगुणान्बंधहेतूनुक्त्वाहरिःपुनः ॥ तेभ्यस्तत्त्वधियामोक्षंसामद्भक्त्येतिचावदत् ॥ ३ ॥ भगवत्तत्त्वविज्ञानेविरक्तस्याधिकारिता ॥ नान्यस्येत्यर्जुनंप्राहनिमित्तीकृत्यकेशवः ॥ ४ ॥ सर्वेषांप्राणिनांकर्मफलंज्ञानफलंविदाम् ॥ ईशायत्तमतःसर्वैरुपास्योभगवान्हरिः ॥ ५ ॥ मांचयोऽव्यभिचारेणेत्यतःसंप्रोक्तवान्स्वयम् ॥ मद्भक्त्याप्राप्तविज्ञानागुणातीताःपरंपदम् ॥ ६ ॥ प्रयांतीतिहरिःप्रोच्यसम्यग्ज्ञानैकसाधनम् ॥ वैराग्यंतत्समुत्पत्तिःसारासारविवेचनात् ॥ ७ ॥ अतस्तदर्थंसंसारस्वरूपंवस्तुचाद्वयम् ॥ विवक्षुर्वृक्षरूपेणसंसारंवर्णयत्यजः ॥ ८ ॥ ब्रह्मणोहिप्रतिष्ठेतिश्लो

श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययम् ॥

कःसूत्रात्मकःस्मृतः ॥ वृत्तिस्थानीयएतस्याध्यायआरभ्यतेऽधुना ॥ ९ ॥ सर्वभूतहितैषित्वाद्विशेषादर्जुनप्रियः ॥ अपृष्टोऽपिस्वयंप्राहभगवान्साक्षतांपतिः ॥१०॥ वैराग्यंतत्त्वविज्ञानसाधनंपुष्कलंमतम् ॥ संसाराद्बंधनागारान्मुमुक्षोरितिवीक्ष्यच ॥११॥ तत्सिद्ध्यैप्राहभगवान्वृक्षकमादितः ॥ उत्कृष्टंकारणंब्रह्मस्वप्रकाशंचिदद्वयम् ॥१२॥ यद्वोर्ध्वंसर्वसंसारबाधेऽपियदबाधितम् ॥ माययासर्वसंसारभ्रमाधिष्ठानमद्वय ॥१३॥ ब्रह्ममूलंतदेवास्येत्यूर्ध्वमूलस्तमीदृशम् ॥ अधोहिरण्यगर्भाद्याअर्वाचीनाउपाधयः॥१४॥ सर्वतःप्रसृतत्वात्तेशाखाइवयतोऽस्यतम् ॥ धितयात्यंतविश्वासानर्हभावतः॥१५॥ श्वोऽपिप्रभातपर्यन्तंस्थातुंयोग्योनचास्त्ययम् ॥ मायामयंतमश्वत्थंसंसारतरुमव्ययम् ॥१६॥ नंतिदेहादिसंतानाश्रयमामृतम् ॥ तत्त्वज्ञानंविनोच्छेद्याभावादाहुस्तमव्ययम् ॥१७॥ ऊर्ध्वमूलोऽर्वाक्शाखएषोऽश्वत्थःसनातनः॥ इत्या

यस्त्वयंवर्णितोवृक्षःसंसारारव्योऽस्यजंतुभिः ॥ संसारेऽस्मिन्स्थितैर्वेदेयथावर्णितमद्भुतम् ॥ १ ॥ रूपंतेनप्रकारेणनोपलभ्यतऐश्वरम् ॥ दृष्ट नष्टस्वरूपत्वात्तस्यमायामयस्यच ॥ २ ॥ स्वप्नमायामरीच्यंभोगंधर्वनगरादिवत् ॥ अतोनास्यावसानंचकथंचिदुपलभ्यते ॥ ३ ॥ एतावता सौकालेनसमाप्तिंयास्यतीतिवा ॥ अपर्यंततयाप्यस्यतथादिर्नोपलभ्यते ॥ ४ ॥ प्रवृत्तइतआरभ्येत्यनादित्वेनकेनचित् ॥ संप्रतिष्ठास्थितिर्ना पिमध्यमस्योपलभ्यते ॥ ५ ॥ तस्माद्यंतनिरूप्यत्वाद्यस्मादेवमयंतरुः ॥ संसाराख्योदुरुच्छेदःसर्वानर्थकरस्ततः ॥ ६ ॥ अनाद्यविद्ययात्यंत बद्धमूलंपुरेरितम् ॥ एनमश्वत्थनामानंसंसारतरुमव्ययम् ॥ ७ ॥ वैराग्याख्येनशस्त्रेणरागद्वेषविरोधिना ॥ दृढीकृतेनब्रह्मैक्यज्ञानौत्सुक्या

नरूपमस्येहतथोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठा ॥ अश्वत्थमेनंसुविरूढमूल मसंगशस्त्रेणदृढेनछित्वा ॥ ३ ॥ ततःपदंतत्परिमार्गितव्यंयस्मिन्गतानिवर्त तिभूयः ॥ तमेवचाद्यंपुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणी ॥ ४ ॥

त्पुनःपुनः ॥ ८ ॥ विवेकाभ्यासतीक्ष्णेनछित्वोद्धृत्यसमूलतः ॥ वैराग्यात्पङ्क्तिसंपत्त्याकृत्वासंन्यासमादरात् ॥ ९ ॥ ३ ॥ ततोगुरुमुपागम्यत स्मात्संसारवृक्षतः ॥ ऊर्ध्वंव्यवस्थितंविष्णोःपदंश्रुतिशिरोगिराम् ॥ १ ॥ श्रवणादिविचारेणज्ञातव्यंतज्जयाधिया ॥ किंतत्पदंयदाचार्यमुपे त्यज्ञेयमादरात् ॥ २ ॥ यस्मिन्पदेप्रविष्टाश्चतत्त्वज्ञानेनसज्जनाः ॥ पुनःसंसारदुःखायनावर्तंतेकदाचन ॥ ३ ॥ परिमार्गयितव्यंतत्कथमित्यु च्यतेशृणु ॥ पदशब्देनयःप्रोक्तस्तमेवादौभवंपरम् ॥ ४ ॥ येनपूर्णमिदंसर्वंशयानंपूर्षुपूरुषम् ॥ तंप्रपद्येयतःसर्वकारणात्पुरुषात्परात् ॥ ५ ॥ मायामयस्यवृक्षस्यसंसाराख्यस्यसर्वथा ॥ प्रवृत्तिःप्रसृतानादिःसेनैंद्रजालिकादिव ॥ ६ ॥ तमेवशरणंयामिमुमुक्षुःसन्नहंखिति ॥ तदेक शरणत्वेनज्ञातव्यंतत्पदंहरेः ॥ ७ ॥ ४ ॥

श्रीगणेशायनमः ॥ अथपंचदशाध्यायव्याख्याप्रारंभः ॥ अविद्याकामाद्यैर्दृढतरसुमूलैरुपचितंफलैर्दुःखाकारैर्निबिडमजरंभ्रांतिबहुलम् ॥ द्रुमंसंसाराख्यंविषमगतिमुच्छेत्तुमचिरात्क्षमायस्यादाब्जेरतिरनुदिनंनौमितमजम् ॥ १ ॥ क्षरंमायाकार्यंचरमचरमुच्चावचमिदंमहामायाशक्त्य क्षरमपितदध्यस्तमखिलम् ॥ चिदानंदेयस्मिन्परमपुरुषेब्रह्मणिविभौतमीशानंकृष्णंश्रुतिहृदयमीडेऽनवरतम् ॥ २ ॥ पूर्वाध्यायेगुणान्बंधहेतूनु क्त्वाहरिःपुनः ॥ तेभ्यस्तत्त्वधियामोक्षंसामद्भक्त्येतिचावदत् ॥ ३ ॥ भगवत्तत्त्वविज्ञानेविरक्तस्याधिकारिता ॥ नान्यस्येत्यर्जुनंप्राहनिमि त्तीकृत्यकेशवः ॥ ४ ॥ सर्वेषांप्राणिनांकर्मफलंज्ञानफलंविदाम् ॥ ईशायत्तमतःसर्वैरुपास्योभगवान्हरिः ॥ ५ ॥ मांचयोऽव्यभिचारेणेत्य तःसंप्रोक्तवान्स्वयम् ॥ मद्भक्त्याप्राप्तविज्ञानागुणातीताःपरंपदम् ॥ ६ ॥ प्रयांतीतिहरिःप्रोच्यसम्यग्ज्ञानैकसाधनम् ॥ वैराग्यंतत्समुत्प त्तिःसारासारविवेचनात् ॥ ७ ॥ अतस्तदर्थंसंसारस्वरूपंवस्तुचाद्वयम् ॥ विवक्षुर्वृक्षरूपेणसंसारंवर्णयत्यजः ॥ ८ ॥ ब्रह्मणोहिप्रतिष्ठेतिश्लो

श्रीभगवानुवाच ॥ ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययम् ॥

कःसूत्रात्मकःस्मृतः ॥ वृत्तिस्थानीयएतस्याध्यायआरभ्यतेऽधुना ॥ ९ ॥ सर्वभूतहितैषित्वाद्विशेषादर्जुनप्रियः ॥ अपृष्टोऽपिस्वयंप्राहभग वान्साक्षतांपतिः ॥१०॥ वैराग्यंतत्त्वविज्ञानसाधनंपुष्कलंमतम् ॥ संसाराबंधनागारान्मुमुक्षोरितिवीक्ष्यच ॥११॥ तत्सिद्ध्यैप्राहभगवान्वृ क्षरूपकमादितः ॥ उत्कृष्टंकारणंब्रह्मस्वप्रकाशंचिदद्वयम् ॥१२॥ यद्वोर्ध्वसर्वसंसारबाधेऽपियदबाधितम् ॥ माययासर्वसंसारभ्रमाधिष्ठानमद्व यम् ॥१३॥ ब्रह्ममूलंतदेवास्येत्यूर्ध्वमूलस्तमीदृशम् ॥ अधोहिरण्यगर्भाद्याअर्वाचीनाउपाधयः॥१४॥ सर्वतःप्रसृतत्वात्तेशाखाइवयतोऽस्यतम् ॥ आशुनाशितयात्यंतविश्वासानर्हभावतः॥१५॥ श्वोऽपिप्रभातपर्यन्तंस्थातुंयोग्योनचास्त्ययम् ॥ मायामयंतमश्वत्थंसंसारतरुमव्ययम् ॥१६॥ अनाद्यनंतदेहादिसंताना श्रयमामृतम् ॥ तत्त्वज्ञानंविनोच्छेद्याभावादाद्युस्तमव्ययम् ॥१७॥ ऊर्ध्वमूलोऽर्वाक्शाखएषोऽश्वत्थःसनातनः॥ इत्या

गंतव्यंतत्पदंभूयोविशिनष्टिहरिःस्वयम् ॥ यद्वैष्णवंपदंगत्वानिवर्ततेनयोगिनः॥ १ ॥ तत्पदंनैवसर्वावभासकोभानुरुत्तमः ॥ प्रकाशयतिनापींदुर्नवावन्हिःस्वयंप्रभम् ॥ २ ॥ भासकत्वंकुतोनास्तिसूर्यादीनामितीर्यते ॥ स्वयंप्रकाशंतद्धामसूर्यादिजडतेजसाम् ॥ ३ ॥ प्रकाशकतयोत्कृष्टंममविष्णोःपरंपदम् ॥ नहिस्वभासकंभासईष्टेभासयितुंजडः॥ ४ ॥ नतत्रसूर्योभातीतिश्रुत्याप्येवमुदीरितम् ॥ अवेद्यत्वेसतिज्योतिरपरोक्षंपदंमम ॥ ५ ॥ तत्रावेद्यत्वमर्कांद्यभास्यत्वेनात्रकीर्तितम् ॥ सर्वावभासकत्वेनापरोक्षत्वमपीरितम् ॥ ६ ॥ अयमत्राशयोविष्णोःश्रीमद्भगवतोहरेः॥ चक्षुर्योग्यंहियद्वस्तुतदनुग्राहकेणतत् ॥ ७ ॥ भास्यंसूर्येणनतथानीरूपत्वादिदंपदम् ॥ मनोग्राह्यंहियद्वस्तुमनोऽनुग्राहकेणतत् ॥ ८ ॥

नतद्भासयतेसूर्योनशशांकोनपावकः ॥ यद्गत्वाननिवर्ततेतद्धामपरमंमम ॥ ६ ॥

भास्यंचंद्रेणनेदंतुतथाचिंत्यत्वहेतुना ॥ यद्वाचांगोचरंवस्तुवागनुग्राहकेणतत् ॥ ९ ॥ भास्यंस्यात्पावकेनापिनतथेदमवाच्यकम् ॥ यन्मनसानमनुतइत्यादिश्रुतिभिःस्वयम् ॥ १० ॥ चिदानंदघनंसत्यंनिर्विशेषमनामयम् ॥ सर्वावभासकंसर्वाभास्यंप्राप्यंचयोगिनाम् ॥ ११ ॥ यत्प्रतिपादितंसम्यक्तद्धामपरमंमम ॥ अपरंवृत्तिरूपंस्याज्ज्ञानंनिर्विषयंपरम् ॥ १२ ॥ राहोःशिरइतीवात्रोपचारात्स्यान्ममेत्यपि ॥ तज्ज्योतिःस्वप्रकाशाख्यंमदभिन्नंपरंपदम् ॥ १३ ॥ यंनप्रकाशयतिभानुरपींदुरग्निःस्वज्योतिषासकलभासकमप्रमेयम् ॥ यंप्राप्यसंसृतिनिधौनपतंतिधीरास्तंसर्वभूतहृदयंहरिमाश्रयेऽहम् ॥ १४ ॥ ६ ॥

परिमार्गणपूर्वंचगच्छतांवैष्णवंपदम् ॥ ज्ञानस्यांगातराण्याहभगवान्करुणानिधिः ॥ १ ॥ मानोगर्वस्तथामोहोऽविवेकोवाविपर्ययः ॥ तौनिर्गतावुभौयेभ्यस्तेताभ्यांवर्जिताबुधाः ॥ २ ॥ भोग्येषुशोभनाध्यासःसंगोदोषःसएवसः ॥ जितोयैस्तत्तदाप्तौयेरागद्वेषविवर्जिताः ॥ ३ ॥ परमात्मस्वरूपैक्यालोचनैकपरायणाः ॥ अथवाचार्यवेदांतनारायणरताःसदा ॥ ४ ॥ विशेषेणनिवृत्ताश्चकामायेषांससाधनाः ॥

निर्मानमोहाजितसंगदोषाअध्यात्मनित्याविनिवृत्तकामाः ॥
द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छंत्यमूढाःपदमव्ययंतत् ॥ ५ ॥

वैराग्यादियुणद्वारात्यक्तकर्माणएववा ॥ ५ ॥ सुखदुःखैकहेतुत्वात्सुखदुःखाभिधैस्तुये ॥ शीतोष्णक्षुत्पिपासाद्यैर्द्वंद्वैर्मुक्ताविशेषतः ॥ ६ ॥ अविद्ययावृतामूढास्तद्विन्नामोहवर्जिताः ॥ श्रुतिमौलिप्रमाणोत्थसम्यग्ज्ञानेननाशितः ॥ ७ ॥ आत्माज्ञानाख्यमोहोयैस्तेगच्छंत्यव्ययं पदम् ॥ ८ ॥ ५ ॥

ज्ञानकृतेप्राप्यप्राप्तीकंठमणेरिव ॥ १६ ॥ ब्रह्मभूतस्यजीवस्यनस्वतःसंभवेद्गतिः ॥ यद्यस्तिब्रह्मणोजीवःप्रतिबिंबस्तदायथा ॥ १७ ॥ प्रतिबिंबितसूर्यस्यसलिलेसलिलात्यये ॥ बिंबभूतार्कगमनंततोनावृत्तिरस्यच ॥ १८ ॥ यदिबुद्ध्यवच्छिन्नोऽत्रब्रह्मांशोजीवउच्यते ॥ तदायथाघटव्योम्नोघटापायेंऽबरंप्रति ॥ १९ ॥ गमनंचाप्यनावृत्तिस्तथाजीवस्यबोधतः ॥ बुद्ध्याद्युपाद्ध्यपायेस्वंनिरुपाधिवपुःप्रति ॥ २० ॥ गमनंपुनरावृत्यभावश्चप्रोच्यतेतदा ॥ ब्रह्मैक्यज्ञानतोजीवभेदबाधाद्गतिर्मृषा ॥ २१ ॥ जीवत्वब्रह्मभेदादिकल्पितंमाययापरे ॥ तत्त्वज्ञानेनतद्बाधेजीवोब्रह्मैवकेवलम् ॥ २२ ॥ तस्माद्वेदांतवाक्योत्थसाक्षात्काराच्चिदात्मनः ॥ अहंब्रह्मेतिजीवस्याज्ञाननाशोगतिःस्मृता ॥ २३ ॥ बाधेह्यना

मनःषष्ठानींद्रियाणिप्रकृतिस्थानिकर्षति ॥ ७ ॥

द्यविद्यायाःपुनर्जन्मकुतोभवेत् ॥ तत्कार्यसंसृतेर्बाधान्नावर्तंतेवचस्विति ॥ २४ ॥ कथंतर्ह्यस्यसंसारव्यवहारइतीर्यते ॥ मनःषष्ठंभवेद्येषांतानिश्रोत्रादिपंचच ॥ २५ ॥ इंद्रस्यात्मनआमोक्षंसाधनानींद्रियाणिच ॥ विषयोपलब्धौजाग्रत्स्वप्नयोःकर्मणोलये ॥ २६ ॥ भोगप्रदस्यसुप्तौतुतान्यज्ञानेस्वकारणे ॥ स्थितानिसूक्ष्मरूपेणपुनर्जाग्रत्फलप्रदे ॥ २७ ॥ कर्मण्युद्भवआत्मायमज्ञानात्तानिकर्षति ॥ विषयज्ञानसिद्ध्यर्थमाविर्भावयतीतिदिक् ॥ २८ ॥ अतोऽनात्मधियामात्माज्ञानादावृत्तिरेवहि ॥ तत्त्वज्ञानादनावृत्तिरेवंब्रह्मविदांस्वयम् ॥ २९ ॥ यद्गत्वानानिवर्तंतेयुक्तियुक्तंवचस्विति ॥ ३० ॥ ७ ॥

कदाकर्षतिजीवोऽयमिंद्रियाणीतिचेच्छृणु ॥ देहेंद्रियादिसंघातस्वामीजीवोयदाबहिः ॥ १ ॥ निर्गच्छतितदादेहाद्यस्माद्बुक्कामतीत्यतः ॥
मनःषष्ठानींद्रियाणिकर्षतीत्यन्वयोऽस्तिहि ॥ २ ॥ उक्कांत्युत्तरभावित्वाद्गमनस्यतस्ततः ॥ नकेवलंकर्षत्येवकिंतुपूर्वशरीरतः ॥३॥ यदाप्रो
त्यपरंदेहंतदैतानींद्रियाणिसः ॥ गृहीत्वामनसासार्धंगच्छत्यागमनोऽन्वितः ॥ ४ ॥ शरीरेसतिदृष्टांतइंद्रियग्रहणेह्ययम् ॥ पुष्पादेःस्थानतःसू
क्ष्मानंशान्गंधात्मकान्यथा ॥ ५ ॥ गृहीत्वापवनोयातितद्वज्जीवोऽपितान्यतः ॥ ६ ॥ ८ ॥ तान्येवदर्शयन्नाहयदर्थंयातितत्तथा ॥ श्रोत्रा
दिपंचकंचैवप्राणंकर्मेंद्रियाण्यपि ॥ १ ॥ षष्ठंचमनआश्रित्यशब्दस्पर्शादिगोचरान् ॥ अयंदेहेंद्रियस्वामीभुंक्तेभ्रांतिवशाद्यतः ॥ २ ॥ देहें

शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानिसंयातिवायुर्गंधानिवाशयात् ॥ ८ ॥
श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच ॥ अधिष्ठायमनश्चायंविषयानुपसेवते ॥ ९ ॥ उत्क्रामं
तंस्थितंवापिभुंजानंवागुणान्वितम् ॥ विमूढानानुपश्यंतिपश्यंतिज्ञानचक्षुषः ॥ १० ॥

द्रियादिष्वखाध्यासादेवात्मनोमृषा ॥ सुखदुःखादिभोक्तृत्वंनत्वस्यपरमार्थतः ॥ ३ ॥ ९ ॥ एवंदेहगतंजीवंदर्शनार्हमपिस्फुटम् ॥ देहांतरं
चगच्छंतंपूर्वस्माद्देहतस्तथा ॥ १ ॥ तस्मिन्नेवस्थितंवापिदेहेभुंजानमादरात् ॥ शब्दादीन्विषयान्युक्तंसुखदुःखादिभिर्गुणैः ॥ २ ॥ एवंस
र्वास्ववस्थासुदर्शनार्हंहिसाक्षिणम् ॥ विषयाकृष्टचित्तत्वाद्देहाद्यध्यासतोजडाः ॥ ३ ॥ मोहाक्रांतानपश्यंतिस्वात्मानंतद्विलक्षणम् ॥ अहो
कष्टंकिलेत्यज्ञानन्नुक्रोशतिमाधवः ॥ ४ ॥ येतुप्रमाणजज्ञानचक्षुषस्तेविवेकिनः ॥ पश्यंतीत्यतिपुण्याढ्यान्स्तौतिश्रीहरिरुत्तमान् ॥ ५॥१०॥

विवृणोतितदेवेशोविभागेनयथायथम् ॥ ध्यानाद्यैर्यतमानायेतएनंसाक्षिणंपरम् ॥ १ ॥ पश्यंतियोगसंपन्नाःस्वबुद्धौप्रतिबिंबितम् ॥ यतमानाअपिश्रौतैर्यज्ञादिभिरशोधितम् ॥ २ ॥ चित्तंयेषामतस्तेतुनैनंपश्यंतिसाक्षिणम् ॥ यतोविवेकशून्यास्तेमोहाक्रांताःसुरागिणः॥३ ॥११॥ समस्तस्यापिसूर्याद्याःक्षमाःसंतोऽवभासने ॥ यत्तदंनक्षमंतेऽद्धातेऽपिभासयितुंमनाक् ॥ १ ॥ यत्तदंविमलंप्राप्तानावर्तंतेमुमुक्षवः॥ यदज्ञानादमीजीवाःसंसरंतिभवांबुधौ ॥ २ ॥ तस्येदानींपदस्यैवसर्वात्मत्वंविभूतिभिः ॥ सर्वस्मिन्व्यवहारस्याप्यास्पदत्वंसमासतः ॥ ३ ॥ विवरीतुंच

यतंतोयोगिनश्चैनंपश्यंत्यात्मन्यवस्थितम् ॥ यतंतोऽप्यकृतात्मानोनैनंपश्यंत्यचेतसः॥ ११ ॥
यदादित्यगतंतेजोजगद्भासयतेऽखिलम् ॥ यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकम् ॥ १२ ॥

तुर्भिश्चविभूतिंप्राहमापतिः ॥ यदादित्याश्रयंज्योतिश्चैतन्यात्मकमुज्ज्वलम् ॥ ४ ॥ यच्चंद्रेयत्स्थितंचाग्नौतेजोभासयतेऽखिलम् ॥ तत्तेजोवैष्णवंविद्धिमदीयंसर्वभासकम् ॥ ५ ॥ तच्चैतन्यात्मकंज्योतिर्जंगमेषुस्थिरेषुच ॥ समंयद्यपिसर्वेषुतथाप्यर्कादितेजसाम् ॥ ६ ॥ सत्त्वोत्कर्षेणतत्रैवाविस्तरांज्योतिरैश्वरम् ॥ यथातुल्येऽपिकुड्यादौसन्निधानेमुखस्यच ॥ ७ ॥ नाविर्भवतिवक्त्रंतद्दर्पणादौतुनिर्मले ॥ स्वच्छत्वतारतम्येनाविर्भवत्येवमेवतत् ॥ ८ ॥ यदादित्यादिगंतेजःसितभास्वरमेववा ॥ समस्तंरूपवद्वस्तुस्फुटंभासयतेजगत् ॥ ९ ॥ मदीयंवैष्णवंतत्त्वं विद्धिध्येयंमुमुक्षुभिः ॥ विभूतिकथनायैवमर्थोभगवतोमतः ॥ १० ॥ १२ ॥

यद्गत्वाननिवर्तंतइत्ययुक्तंकुतःशृणु ॥ यदिगच्छंत्यवश्यंतेनिवर्ततेस्वरादिवत् ॥१॥ नावर्ततेऽथचेत्तर्हिनगच्छंत्येवकुत्रचित् ॥ गत्वेतिननिवर्ततइत्यन्योन्यविरुद्धता ॥ २ ॥ सर्वेक्षयांतानिचयाःपतनांताःसमुच्छ्रयाः ॥ संयोगाविप्रयोगांतामरणांतंहिजीवितम् ॥ ३ ॥ आगत्यंतागतिःसर्वाप्रसिद्धालोकशास्त्रयोः ॥ अनात्मप्राप्तिरेवास्त्यावृत्तिपर्यवसानिका ॥ ४ ॥ नत्वात्मप्राप्तिरितिचेन्मैवंसुप्तौसतासह ॥ ऐक्यंप्राप्तस्यजीवस्यपुनरावृत्तिदर्शनात् ॥ ५ ॥ सतासौम्यतदेत्यादौश्रुत्यैवंप्रतिपादनात् ॥ अन्यथातुसुषुप्तस्यमुक्तत्वेपुनरुत्थितिः ॥ ६ ॥ नस्यात्तस्यास्वरात्मप्राप्तौगत्वेत्यपिनसंभवेत् ॥ तस्यौपचारिकत्वेऽप्यनिवृत्तिर्नोपपद्यते ॥७॥ इत्येवमत्रशंकायांसमाधानमितीर्यते ॥ गंतुर्जीवस्यगंतव्यब्र

ममैवांशोजीवलोकेजीवभूतःसनातनः ॥

ह्माभिन्नतयैवहि ॥ ८ ॥ नित्यप्राप्ततयातस्माद्गत्वेत्यत्रौपचारिका ॥ अज्ञानमात्रमेवास्यव्यवधानंपरात्मनः ॥ ९ ॥ ज्ञानेनतन्निवृत्त्यैवतत्प्राप्तिर्व्यपदिश्यते ॥ सुप्तावज्ञानसत्वेनपुनरावृत्तिरिष्यते ॥ १० ॥ तद्दृष्टांतेननावृत्तिरत्रशंक्याकदाचन ॥ इत्येवाशयवानाहभगवान्प्रत्यगद्वयः ॥ ११ ॥ ममैवपरमेशस्यशुद्धस्यपरमात्मनः ॥ निरंशस्यापिमायाख्यशक्त्यंशइवकल्पितः॥१२॥ सूर्यस्यैवजलेष्वोम्नइवकुंभेचभेदवान् ॥ मृषैवांशइवांशोऽस्मिन्संसारेप्राणधारणात् ॥१३॥ मृषैवकर्ताभोक्तेतिप्रसिद्धिंसमुपागतः॥ वस्तुनोनित्यएवास्तिपरिच्छेदेऽप्युपाधिना॥१४॥ परमात्मस्वरूपत्वात्तत्रभेदस्तुकल्पितः॥ अतोगंतुर्हिजीवस्यब्रह्माभिन्नतयास्यच ॥१५॥ अज्ञानकल्पिताप्राप्तिर्ज्ञानात्प्राप्तिरिवोच्यते ॥ ज्ञाना

ब्रह्मादिस्थावरांतस्यप्राणिजातस्यसर्वतः ॥ आत्मैवसन्प्रविष्टोऽहंबुद्धौसर्वावभासकः ॥ १ ॥ मत्तआत्मनएवातःप्राणिजातस्यचस्मृतिः ॥ एतज्जन्मनिपूर्वानुभूतार्थविषयाचसा ॥ २ ॥ जन्मांतरानुभूतार्थविषयाप्यस्तियोगिनाम् ॥ विषयेंद्रियसंयोगजन्यंज्ञानंतथात्मनः ॥ ३ ॥ दिक्कालविप्रकृष्टैकविषयंचापियोगिनाम् ॥ मत्तएवतयोःकामक्रोधाद्याकुलचेतसाम् ॥ ४ ॥ पापकर्मानुरोधेनविनाशःस्मृतिबोधयोः ॥ उक्तैवंजीवभावेनप्रविष्टंसर्वमानसे ॥ ५ ॥ आत्मानंब्रह्मरूपेणदर्शयत्यधुनाहरिः ॥ वेदैःसर्वैरपींद्रादिदेवताभासकैरपि ॥ ६ ॥ अहमेवाखिलात्मत्वाद्वेद्यःसर्वेश्वरेश्वरः॥ एषउह्येवसर्ववैदेवाइत्यादिवेदतः॥ ७ ॥ वेदव्यासादिरूपेणवेदांतार्थप्रवर्तकः ॥ संप्रदायात्मनातद्वद्वेदवेत्ताहमेवच ॥८॥ कांडत्रयात्मकंवेदंसरहस्यंसमंत्रकम् ॥ अर्थतःसर्वविच्चाहंसम्यग्वेद्यहमेवच ॥ ९ ॥ ब्रह्मणोहिप्रतिष्ठाहमित्यादीतःसमीरितम् ॥१०॥१५॥

सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंच ॥ वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदविदेवचाहम् ॥ १५ ॥ द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच ॥ क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते ॥ १६ ॥

एवंसोपाधिकंरूपंप्रोक्त्वाश्रीहरिरात्मनः ॥ कार्यकारणरूपेणयावुपाधीक्षराक्षरौ ॥ १ ॥ तद्वियोगेनचात्मानंनिरुपाधिकमद्वयम् ॥ विवक्षुः सर्वशास्त्रार्थंराशीकृत्यत्रिधाधुना ॥ २ ॥ त्रिभिःश्लोकैर्जगन्नाथःप्राहातिकृपयास्फुटम् ॥ पुरुषोपाधिभेदेनपृथग्राशीकृताविमौ ॥३॥ वाच्यौ पुरुषशब्देनद्वौहिसंसारगोचरौ ॥ क्षरतीतिक्षरोनाशीराशिरेकोऽस्तिपूरुषः ॥ ४ ॥ नक्षरत्यक्षरोनाशशून्योविश्वस्यकारणम् ॥ संसारिकामकर्मादिसंस्काराणांसमाश्रयः ॥ ५ ॥ श्रीमद्भगवतोमायाशक्त्याख्यःपुरुषोऽपरः ॥ पुरुषौतौचभगवान्व्याचष्टेस्वयमेवहि ॥ ६ ॥ समस्तं कार्यजातंचक्षरःपुरुषउच्यते ॥ तत्त्वस्याच्छादनेनैवातत्त्ववस्तुप्रकाशनम् ॥ ७ ॥ कूटोमायावंचनंचेत्यनर्थांतरमीरितम् ॥ तेनावरणविक्षेपशक्तिद्वयात्मनास्थितः ॥ ८ ॥ कूटस्थोभगवन्मायाशक्तिरूपोजगज्जनिः ॥ अनंतविश्वबीजत्वादक्षरोऽनादिपूरुषः ॥ ९ ॥ १६ ॥

पृथ्वीमाविश्यनैजेनबलेनाखिलधारिणा ॥ धूलिमुष्टिसमांपृथ्वींदृढीकृत्याहमीश्वरः ॥ १ ॥ पृथ्व्याधेयानिवस्तूनिधारयामिसमंततः ॥ अन्यथासिकतामुष्टिवद्विशीर्येतभूरियम् ॥ २ ॥ अतोमद्बलमाविष्टंपृथिव्यांयेनभूरियम् ॥ गुर्व्यधोनपतत्येवनविदीर्येतखंडशः ॥ ३ ॥ अतोमहींप्रविश्यैवभगवान्देवतात्मना ॥ बिभर्तीत्यत्रमानंहिसदाधारेतिचश्रुतिः ॥ ४ ॥ यवाद्याओषधीःसर्वामह्यांजाताअहंहरिः ॥ रसस्वभावःसोमोऽहंभूत्वापीयूषमंडलः ॥ ५ ॥ रसस्वादुमतीताश्चकरोम्यखिलपालकः ॥ ६ ॥ १३ ॥ जाठरोऽग्निरहंभूत्वासर्वेषांप्राणधारिणाम् ॥ देहमंतःप्रविष्टश्चतद्बुद्दीपकभावतः ॥ १ ॥ प्राणापानाख्यवायुभ्यांसंयुक्तःसंश्चतुर्विधम् ॥ भुक्तंप्राणिभिरन्नंतत्पाकंसंपादयाम्यजः ॥ २ ॥

गामाविश्यचभूतानिधारयाम्यहमोजसा ॥ पुष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्मकः ॥ १३ ॥
अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः ॥ प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधम् ॥ १४ ॥

यद्दंतैरवखंड्यान्नंभक्ष्यतेभक्ष्यमेवतत् ॥ केवलंजिव्हयायत्तुविलोड्यान्नंनिगीर्यते ॥ ३ ॥ सूपौदनादितद्भोज्यंयत्तुनिक्षिप्यजिव्हया ॥ निगीर्यतेद्रवीभूतंरसास्वादेनखांडवम् ॥ ४ ॥ तल्लेह्यंशिखरिण्यादिरसालादितथैवच ॥ यत्तुदंतैःसुनिष्पीड्यरसांशंविनिगीर्यच ॥ ५ ॥ त्यज्यतेप्यवशिष्टंतच्चोष्यंचेतिचतुर्विधम् ॥ भोक्तावैश्वानरोवन्हिर्भोज्यमन्नंचचंद्रमाः ॥ ६ ॥ अग्नीषोमौतदुभयंसर्वमित्येवशास्त्रतः ॥ ध्यायतोऽन्नगतैर्दोषैर्नलेपोभवतीत्यपि ॥ ७ ॥ श्रीमद्भगवतोवाक्याद्द्रष्टव्यमितिमंगलम् ॥ ८ ॥ १४ ॥

नामनिर्वचनज्ञानेयथोक्तेफलमुच्यते ॥ नामनिर्वचनेनैवंयथोक्तंमांमहेश्वरम् ॥ १ ॥ संमोहवर्जितोयोज्ञाजानातिपुरुषोत्तमम् ॥ यथैवपूर्व व्याख्यातंसर्वोत्तमतयासुधीः ॥ २ ॥ सचमांसर्ववित्प्राज्ञःसेवतेसर्ववित्तमः ॥ सर्वभावेनमत्प्रेमलक्षणेननिरंतरम् ॥ ३ ॥ १९ ॥ अध्याया र्थंस्तुवन्नेवमुपसंहरतीश्वरः ॥ अनेनैवप्रकारेणरहस्यतममुत्तमम् ॥ १ ॥ संपूर्णंशास्त्रमेवेदमध्यायेऽस्मिन्समासतः ॥ मयासर्वेश्वरेणोक्तंहेनिर्दो षार्जुनप्रिय ॥ २ ॥ कथंशास्त्रत्वमेतस्मिन्नध्यायइतिचेच्छृणु ॥ हितशासनतःप्रोक्तंशास्त्रत्वंतत्त्वदर्शिभिः॥ ३ ॥ तदस्मिन्नखिलंप्रोक्तमध्यायेहरिणास्वयम् ॥ तत्कथंश्रृणुशास्त्रस्यप्रमेयंसर्वमत्रभोः ॥ ४ ॥ शास्त्रंहिद्विविधंप्रोक्तंहितशासनतत्परम् ॥ प्रवृत्तंचनिवृत्तंचतत्रांतिममिहोच्यते ॥ ५ ॥ जीवोब्रह्मतयोरैक्यंतद्विज्ञानोपयोगिनः ॥ पदार्थायत्रकथ्यंतेतन्निवृत्तमितीर्यते ॥६॥ निष्कामधर्मसंसिद्धबुद्धिशुद्धियुतःसुधीः॥

योमामेवमसंमूढोजानातिपुरुषोत्तमम् ॥ ससर्वविद्भजतिमांसर्वभावेनभारत ॥ १९ ॥
इतिगुह्यतमंशास्त्रमिदमुक्तंमयाऽनघ ॥ एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत ॥ २० ॥
इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो० पुरुषोत्तमयोगोनामपंचदशोऽध्यायः ॥१५॥

अधिकारीनिवृत्तेऽस्मिन्शास्त्रेतत्त्वावबोधके ॥ ७ ॥ वैराग्यंतत्रमुख्यंस्यात्तदादौहरिणेरितम् ॥ संसारवृक्षविच्छेदिसाधनंसुविवेकतः ॥ ८ ॥ अधिष्ठानात्मतत्त्वस्यनित्यत्वमवधेःस्मृतम् ॥ तत्राध्यस्तस्यविश्वस्यबाध्यत्वात्स्यादनित्यता ॥ ९ ॥ अनित्येदोषबाहुल्यवीक्षणादरतिःसुखे ॥ नित्येब्रह्मसुखेमोक्षेरतिर्निर्दोषवस्तुनि ॥ १० ॥ यावदात्मापरिज्ञानंतावत्कर्मादिहेतुका ॥ संसृतिरक्षयानित्यंमृषापिस्यादनर्थदा ॥ ११ ॥ अनादिमध्यनिधनास्वप्नसृष्टिरिवभ्रमात् ॥ वैराग्यात्सविवेकात्स्यादस्याउच्छेदनेक्षमः ॥ १२ ॥ विरक्तःसर्वकर्माणिसंन्यस्यचगृहादिकम् ॥ अनन्यशरणोभूत्वाप्रपद्येतहरिंगुरुम् ॥ १३ ॥ यतःप्रवृत्तिरेतस्याःसंसृतेरद्वयाद्धरेः ॥ तमेवशरणंगच्छेत्तदुच्छेदायसन्मतिः ॥ १४ ॥ तत्प्रसा

दादुदेत्यस्यतत्त्वज्ञानंससाधनम् ॥ येनयांतिपरंधामयतोनावर्ततेपुनः ॥ १५ ॥ श्लोकैःपंचभिरित्युक्तंसामान्याच्छास्त्रमेयकम् ॥ तद्विशेषान्पुनर्विष्णुर्दर्शयामासविस्तरात् ॥ १६ ॥ तत्रगंतव्यमेकेनपदंधामेतिशब्दितम् ॥ स्वप्रकाशमनाभास्यंपुनरावृत्तिवर्जितम् ॥ १७ ॥ उक्त्वास्याज्ञानतोनादिजीवभावोविभोःस्मृतः ॥ अभिन्नोऽपीश्वराज्जीवउपाधेर्भेदवानिव ॥ १८ ॥ यावदज्ञानमेतस्यालिंगाद्यध्यासतोविभोः ॥ संसारचक्रेभ्रमणंसदाजन्मादिलक्षणे ॥ १९ ॥ स्थूलंभोगालयंप्राप्यालिंगदेहैकसाधनः ॥ भुंक्तेभोगान्भ्रमाविष्टःसन्नभोक्ताविलक्षणः॥२०॥ सर्वत्रसाक्षिरूपेणव्यापृतौभासयन्नपि ॥ ज्ञात्रादित्रिपुटींनैनंपश्यंत्यज्ञानमोहिताः ॥ २१ ॥ येतुकृष्णपदांभोजध्याननिर्मलबुद्धयः ॥ तेपश्यंतिपृथक्कृत्यदेहादिभ्यश्चसाक्षिणम् ॥ २२ ॥ अहोमोहस्यमाहात्म्यंयत्स्वरूपमतिस्फुटम् ॥ पश्यंतोऽपिनपश्यंतियतमानाअबुद्धयः ॥ २३ ॥ अहोहरिपदांभोजभक्तेर्माहात्म्यमुत्तमम् ॥ अनिच्छंतोऽपिपश्यंतियत्स्वरूपंमहत्तमाः ॥२४॥ इत्येवंपंचभिःश्लोकैस्वंपदार्थंरमापतिः॥ अभिधायततःश्लोकैश्चतुर्भिस्तत्पदार्थकम् ॥२५॥ विभूतिकथनव्याजाद्दर्शयामाससिद्धये ॥ सर्वत्रातिस्फुटंतेजोऽप्यधिदैवादिगोचरे ॥२६॥ सर्वाधारोनिराधारःसर्वपोषकईश्वरः॥ प्राणादिप्रेरकत्वेनजीवनेहेतुरेवच ॥२७॥ सर्वकर्तातथापाताहर्तासर्वत्रगोहरिः ॥ सर्वानुस्यूतरूपश्चसर्वाधिष्ठानमेवच ॥२८॥ सर्वबुद्धिगतःसाक्षीस्मृतिज्ञानफलप्रदः॥ तन्नाशकोऽप्यलिप्तश्चदेहिनांस्वस्वकर्मभिः॥२९॥ इंद्रचंद्रादिशब्दैश्चप्रतिपाद्यःसआगमे ॥ वेदांतेष्वसएवास्तिवेद्योज्ञातःपुमर्थकः॥३०॥ वेदांतानांचसाफल्यंतस्मिन्ज्ञातेपरेपदे ॥ सर्ववेदगिरांकर्ताशास्त्रयोनितयाहरिः ॥ ३१॥ वेदवेत्तासएवास्तिदैशिकादिस्वरूपधृक् ॥ ज्ञानंज्ञेयंतथाज्ञातासएवननतःपृथक् ॥३२॥ अभिधायहरिःसम्यक्तत्पदार्थंपुनस्त्वयोः॥ उपाधीदर्शयामासबाध्यौतत्त्वंपदार्थयोः॥३३॥ कार्योपाधिःक्षरःप्रोक्तोजीवसंसृतिकारणम् ॥ अक्षरःकारणोपाधिर्मायाविश्वैककारणम् ॥३४॥ कार्यकारणरूपौद्वावुपाधीचक्षराक्षरौ ॥ उक्त्वाखंडार्थमात्मानंपुरुषोत्तमसंज्ञितम् ॥ ३५ ॥ दर्शयामासवेदांतसिद्धांतंहेतुपूर्वकम् ॥ सर्वाधिष्ठानभावेनस्थितोऽप्यच्युतएवयः ॥ ३६ ॥ मायातीतःस्वयंज्योतिरुत्तमःसोऽक्षरात्क्षरात् ॥ पृथक्त्वेनयतोऽध्यस्तंनपृथक्त्वेनकिंचन ॥ ३७ ॥ देहा

दयोऽप्यनात्मानआत्माभासतयाखिलाः॥ भासमानास्ततोभिन्नःपरमात्माद्वयोहरिः ॥३८॥ जीवत्वमीश्वरत्वंचतत्रमायाविजृंभणम् ॥ स्वतः शुद्धोऽद्वयानंदःपुरुषोत्तमईरितः॥३९॥ कार्यकारणभावात्सोऽत्यंतभिन्नोनिरंजनः ॥ सजातीयविजातीयभिदाशून्योऽस्तिनिष्कलः ॥४०॥ अखंडार्थःसएवास्तितत्त्वमस्यादिसद्गिराम् ॥ पुरुषोत्तमशब्देनप्रतिपाद्यःपरःपुमान् ॥४१॥ यःसाक्षीपुरुषःप्रोक्तःसएवोत्तमईरितः॥ तज्ज्ञानात्सर्वविज्ञानसिद्धिरत्रनिराकुला ॥४२॥ वेदेसर्वत्रवेद्यत्वात्सएवप्रथितःपुमान् ॥ लोकेकाव्यपुराणादौप्रतिपाद्यःसएवहि ॥४३॥ यस्तुसंमोहशून्यःसन्वेदसम्यङ्नरोत्तमः॥ सएवसर्ववित्सर्वानुस्यूतात्मावबोधतः॥४४॥ सएवभगवद्भक्तःसदाऽनन्यधियाहरिम् ॥ भजतेसर्वकृत्सर्वभूतानामुत्तमःपुमान् ॥४५॥ नातोगुह्यतमंशास्त्रंपरंस्यात्संमतंसताम् ॥ हितशासनमेवेदंशास्त्रत्वेनात्रकीर्तितम् ॥४६॥ अतोभगवतासम्यगवाद्येतद्धितैषिणा ॥ इतिगुह्यतमंशास्त्रमित्यादिविजयंप्रति ॥४७॥ एतच्छास्त्रंयथोक्तंयःकश्चिद्बुद्धातिपुण्यवान् ॥ आत्मज्ञानान्वितोभूत्वाकृतकृत्योभवेन्नरः॥४८॥ कृतंकृत्यंचयेनासौयस्यकृत्यांतरंमनाक् ॥ नावशिष्टंश्रुतौयद्यत्प्रतिपादितमुत्तमम् ॥४९॥ श्रेष्ठजन्मप्रसूतेनकर्तव्यंब्राह्मणेनवै ॥ तत्सर्वंभगवत्तत्वेविदितेसुकृतंभवेत् ॥५०॥ नत्वन्यथेहकस्यापिकृत्यंपरिसमाप्यते ॥ त्वंतूत्कृष्टकुलेजातःस्वयंव्यसनवर्जितः ॥५१॥ स्वगुणेनकुलौत्कृष्ट्याच्चैतच्छास्त्रंयथार्थतः॥ बुद्ध्वैवंकृतकृत्यस्त्वंभविष्यसिनसंशयः ॥५२॥२०॥ संगृह्यैवागमार्थंविजयरथगतःशास्त्रयोनीरमेशोगीताख्येशास्त्रसारेविततपदपरेविस्तृतंतत्त्वमुक्त्वा ॥ तत्राप्यत्यंतसारंप्रकृतिविकृतितोऽत्यंतभिन्नंरहस्यंस्वीयंप्रोवाचयोंऽतस्तमहमतिमुदासंश्रयेकृष्णमीड्यम् ॥ १ ॥ कृतंकृत्यंतेनश्रुतिशिखरसिद्धांतममलंविविच्यादौबुद्धस्त्रिभुवनगुरुर्येनमधुहा ॥ ससर्वज्ञोमुक्तोभजतिसततंप्रेमकलयामुकुंदंवंद्योऽसौभवतिविबुधानामपिजनः॥ २॥ समस्तवेदेषुतथैवभारतेतथाद्यकाव्येस्मृतिषूत्तमोत्तमः॥ पुराणजालेऽपिहिवास्तवंपदंमुकुंदएवास्तिसतांमतिस्त्रियम् ॥ ३ ॥ चेतःपरित्यज्यविकल्पजालंरमस्वभोकृष्णपदारविंदे ॥ नातःपरंतत्त्वमिहास्तिकिंचित्सद्भिर्विनिर्णीतमिदंमतंसत् ॥ ४ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ संसाराख्यतनूच्छेदीपूर्तिपंचदशोगतः ॥ २५९ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ४२६३ ॥

आभ्यांक्षराक्षराभ्यांयोनिर्विकारोविलक्षणः ॥ तयोर्दोषैरसंस्पृष्टःशुद्धइत्युच्यतेऽधुना ॥ १ ॥ यउत्कृष्टतमस्त्वाभ्यांसचात्यंतविलक्षणः ॥ क्षराक्षराभ्यामुभयभासकत्वाच्तृतीयकः ॥ २ ॥ अविद्याकल्पितेभ्योऽन्नमयादिभ्यस्तथोत्तमः ॥ आत्माचसर्वभूतानांप्रत्यक्चेतनइत्यतः ॥ ३ ॥ परमात्मेतिसंप्रोक्तोवेदांतेषुसदद्वयः ॥ यएवपरमात्मेदंभूर्भुवःस्वरितित्रयम् ॥ ४ ॥ सर्वंजगत्स्वयाशक्त्याधिष्ठायैवबिभर्त्यसौ ॥ सत्तास्फूर्ति प्रदानेनधारयत्यपिपोषकः ॥ ५ ॥ विकारशून्यःसर्वस्यनियंतापरमेश्वरः ॥ सउत्तमोहिपूर्णाख्यःपरमात्मेत्युदाहृतः ॥ ६ ॥ १७ ॥ यथोक्त स्येश्वरस्यैवपुरुषोत्तमइत्यदः ॥ प्रसिद्धंनामतस्यास्यनाम्नोनिर्वचनेनच ॥ १ ॥ ईदृशोवासुदेवोऽस्मिविशुद्धःपरमेश्वरः ॥ अहमेवेतिभगवानात्मा

उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः ॥ योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः ॥ १७ ॥
यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः ॥ अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ॥ १८ ॥

नंदर्शयत्यजः ॥ २ ॥ ब्रह्मणोहिप्रतिष्ठाहंतद्धामपरमंमम ॥ इत्यादिपूर्वनिर्णीतस्वमहिम्नःप्रसिद्धये ॥ ३ ॥ क्षरंमायामयंयस्मात्कार्यत्वेनवि नाशिनम् ॥ संसारवृक्षमश्वत्थमतिक्रांतोऽस्म्यहंहरिः ॥ ४ ॥ अक्षरादपिमायाख्यादव्याकृतपदाभिधात् ॥ संसारवृक्षबीजाच्चसदोत्कृष्टतमो ऽस्म्यहम् ॥ ५ ॥ क्षराक्षराभ्यांपुरुषोपाधिभ्यामुत्तमत्वतः ॥ वेदेसर्वत्रविख्यातःसउत्तमइतिश्रुतेः ॥ ६ ॥ पुरुषोत्तमइत्येवंभवामिपरमेश्वरः ॥ लोकेचकविकाव्यादौपुराणेभारतेतथा ॥ ७ ॥ प्रख्यातोवर्णितोऽहंश्रीपुरुषोत्तमइत्यपि ॥ मद्भक्तामांभजंतीत्थंकवयःकाव्यवर्णने ॥ ८ ॥ योगिनोध्याननिष्ठायांयजंतेपुरुषोत्तमम् ॥ ९ ॥ १८ ॥

यांसुवासनाम् ॥ १३ ॥ दैवीमाहकृपासिंधुर्भगवान्शुभसंपदम् ॥ गुरुशास्त्रोपदिष्टेऽर्थेविनासंदेहमादरात् ॥ १४ ॥ तदनुष्ठाननिष्ठत्वमभयं भयवर्जितम् ॥ अकिंचनोऽहमेकाकीजीविष्याम्यधुनाकथम् ॥ १५ ॥ इतिवास्तुभयंतेनराहित्यमभयंस्मृतम् ॥ सत्वसांतःकरणस्यशुद्धि र्निर्मलतेरिता ॥ १६ ॥ ब्रह्मैक्यस्फूर्तियोग्यत्वंशुद्धौसम्यक्त्वमीरितम् ॥ परवंचनमायादिपरिवर्जनमेववा १७ ॥ व्याजेनैववशीकारःपर स्वपरवंचनम् ॥ हृदयेचान्यथाकृत्वाव्यवहारोऽन्यथाबहिः ॥ १८ ॥ मायानृतंतुकथितमयथादृष्टभाषणम् ॥ एतेषांवर्जनंसत्वसंशुद्धिरथवा स्मृता ॥ १९ ॥ तत्त्वस्यावगमःशास्त्राज्ज्ञानंतस्ययथार्थतः ॥ चित्तैकाग्र्यतयास्वानुभवारूढत्वमेवच ॥ २० ॥ योगस्तत्रैवनिष्ठत्वंज्ञानयोग

दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवम् ॥ १ ॥

व्यवस्थितिः ॥ अत्युत्तमासुकृतिनामियंसंपदुदीरिता ॥ २१ ॥ विनाभगवतोभक्तिंनोदेतीयंकदाचन ॥ अतिश्रेष्ठतयाभक्तेर्नपाठोऽत्राभ यादिषु ॥ २२ ॥ प्रधानांसंपदंदैवीमुक्त्वात्यंतविवेकिनाम् ॥ आहेदानींगृहस्थादेरपिसाधारणांहरिः ॥२३ ॥ दानंस्वत्वास्पदान्नादेर्यथाश क्तियथाविधि ॥ संविभागोदमोबाह्येंद्रियसंयमईरितः ॥ २४ ॥ अनुक्तानांस्वधर्माणांचकारौस्तःसमुच्चये ॥ यज्ञःश्रौतोऽग्निहोत्रादिःस्मार्तो दैवादिकोऽध्वरः ॥ २५ ॥ स्वाध्यायोब्रह्मयज्ञश्चविधिनाध्ययनात्मकः ॥ ऋगादीनांचवेदानांवक्ष्यमाणंतपस्तथा ॥ २६ ॥ त्रिधासप्तदशे ऽध्यायेशरीरादिषुशोधकम् ॥ आर्जवंश्रद्दधानेषुस्वज्ञातार्थप्रकाशनम् ॥ २७ ॥ १ ॥

अहिंसाप्राणिपीडादिवर्जनंसर्वथेरिता ॥ यथाभूतार्थवचनंसत्यंदोषविवर्जितम् ॥ १ ॥ आक्रोशेताडनेवान्यैःकृतेक्रोधोयआगतः ॥ तस्यो
पशमनंसम्यगक्रोधोविक्रियाधियः॥ २ ॥ त्यागःसंन्यासइत्युक्तःशांतिश्चोपशमोधियः॥ अपैशुनंपरस्यैयत्पररंध्राप्रकाशनम् ॥३॥ दुःखितेष्व
नुकंपास्याद्दयालोलुत्वमत्रतु ॥ इंद्रियाणांस्वविषयसन्निधानेऽप्यविक्रिया ॥४॥ मार्दवंमृदुताक्रौर्यंप्रियवाक्यादिशीलता ॥ ह्रीरकार्यप्रवृत्त्या
नौतत्प्रतिबंधिकात्रया ॥ ५ ॥ अचापलंवाक्पाण्यादेर्वृथाचेष्टाविवर्जनम् ॥ एतेसाधारणाधर्माब्राह्मणस्यार्जवादयः ॥ ६ ॥ २ ॥ तेजःप्रा
गल्भ्यमाबालैर्मूढैरनभिभाव्यता ॥ क्षमासत्यपिसामर्थ्येऽन्यापराधसहिष्णुता ॥ १ ॥ धृतिर्देहेंद्रियेष्वेवमवसादंगतेष्वपि ॥ तदुत्तंभकयत्नो

अहिंसासत्यमक्रोधस्त्यागःशांतिरपैशुनम् ॥ दयाभूतेष्वलोलुत्वंमार्दवंह्रीरचापलम् ॥ २ ॥
तेजःक्षमाधृतिःशौचमद्रोहोनातिमानिता ॥ भवंतिसंपदंदैवीमभिजातस्यभारत ॥ ३ ॥

ऽस्त्रियेनदेहेंद्रियाणिच ॥ २ ॥ उत्तंभितानियत्नेननावसीदंतिदेहिनाम् ॥ एतच्चयंक्षत्रियस्यासाधारणमितीरितम् ॥ ३ ॥ मायानृतादिरा
हित्यमर्थेषुशौचमांतरम् ॥ एतन्मुख्यंयतोगौणंबाह्यंतन्मृज्जलादिजम् ॥ ४ ॥ योऽर्थेषुशुचिःसशुचिर्नमृद्वारिशुचिःशुचिः॥ अद्रोहोऽन्यजि
घांसायावर्जनंचेतितद्वयम् ॥ ५ ॥ विशोऽसाधारणंप्रोक्तंशूद्रस्यनातिमानिता ॥ आत्मनोऽतीतपूज्यत्वबुद्ध्यभावइतीर्यते ॥ ६ ॥ शुद्धसत्व
मयीदैवीसंपत्तामभिलक्ष्यहि ॥ पुंसोजातस्यप्राक्पुण्यैरेतेधर्माभवंत्यपि ॥ ७ ॥ तंविद्याकर्मणीएवंपुण्यःपुण्येनकर्मणा ॥ पापःपापेनचेत्या
दिश्रुतिभ्योऽपिविनिश्चितम् ॥ ८ ॥ शुद्धवंशोद्भवत्वेनत्वंधर्मानीदृशान्शुभान् ॥ प्राप्तुंयोग्योऽसिपूतत्वाद्भारतेतिपदध्वनिः ॥ ९ ॥ ३ ॥

आदेयत्वेनदैवींचप्रोच्यसंपदमासुरीम् ॥ हेयत्वेनाहसंक्षिप्यश्लोकेनैकेनमाधवः ॥ १ ॥ आत्मनोधार्मिकत्वेनख्यापनंदंभउच्यते ॥ वित्तादिहेतुकोगर्वोदर्पउत्सेकसंज्ञकः ॥ २ ॥ आत्मन्यत्यंतपूज्यत्वातिशयारोपणंमृषा ॥ अभिमानःपराभूताअसुरायेनसस्मृतः ॥ ३ ॥ क्रोधः स्वपरयोर्दुःखहेतुरत्यंतनिष्फलः ॥ अभिज्वलनरूपोधीवृत्तिभेदोऽतितापदः ॥ ४ ॥ पारुष्यंरूक्षवदनशीलत्वंसंमुखेनृणाम् ॥ चकारोऽनुक्तभावानांकुदोषाणांसमुच्चये ॥ ५ ॥ कार्याकार्यादिविषयेऽविवेकोऽज्ञानमुच्यते ॥ चोऽनुक्तानामभावानांकुत्सितानांसमुच्चये ॥६॥ रजस्तमोमयीदुष्टवासनासंततिर्मलैः॥ शरीरारंभकालेऽभिव्यक्तातामभिलक्ष्यच ॥ ७ ॥ पुंसोजातस्यदंभाद्यादोषाएतेभवंतिवै॥ विशुद्धमात्रकत्वेनत्व

दंभोदर्पोऽभिमानश्चक्रोधःपारुष्यमेवच ॥ अज्ञानंचाभिजातस्यपार्थसंपदमासुरीम् ॥ ४ ॥
दैवीसंपद्विमोक्षायनिबंधायासुरीमता ॥ माशुचःसंपदंदैवीमभिजातोऽसिपांडव ॥ ५ ॥

ख्येतेषांनयोग्यता ॥ ८ ॥ ४ ॥ अनयोःसंपदोराहफलंसम्यग्विभागशः ॥ यस्याश्रमस्यवर्णस्यविहितायाचसात्विकी ॥ १ ॥फलाभिसंधिरहिताक्रियातस्यास्तिसाशुभा ॥ सत्वशुद्धीशभक्त्यात्मज्ञानयोगावसानिका ॥ २ ॥ संसारबंधनान्मोक्षेहेतुर्भवतिसायतः ॥ अतःश्रेयोऽर्थिभिर्दैवीसंपाद्यासंपदुत्तमा ॥ ३ ॥ यस्याःशास्त्रनिषिद्धायाःसाहंकाराफलैषणा ॥ राजसीसाक्रियासर्वाप्यासुरीराक्षसीयुता ॥ ४ ॥ संसारबंधनेहेतुःशास्त्राणांशास्त्रिणांमता ॥ अतःश्रेयोऽर्थिभिर्हेयाराजसीतामसीक्रिया ॥ ५ ॥ कयाहंसंपदायुक्तःसंदिहानमितीश्वरः ॥ आश्वासयतिविजयंमाकार्षीःशोकमर्जुन ॥ ६ ॥ त्वंप्रागर्जितकल्याणोभाविकल्याणसंश्रयः ॥ दैवींयतोऽभिलक्ष्यैवजातोऽसिशुभसंपदम् ॥७॥५॥

श्रीगणेशायनमः ॥ अथषोडशाध्यायव्याख्याप्रारंभः ॥ रताःकेचिद्योगेविजितकरणाःसंयतधियःक्रियाजालेकेचित्सुखलवरसास्वादनप
राः ॥ रताःशास्त्राभ्यासेविशदमतयःकेचिदजडावयंतुश्रीकांताननवचनमास्वाद्यकृतिनः ॥ १ ॥ नविद्यायेषांश्रीर्नशरणमपीषन्नचगुणाः
परित्यक्तालोकैरपिवृजिनयुक्ताःश्रुतिजडाः ॥ शरण्यंयंतेऽपिप्रसृतगुणमाश्रित्यसुजनाविमुक्तास्तंवंदेयदुपतिमहंकृष्णममलम् ॥ २ ॥ अध
श्रमूलानीत्यादिनाध्यायेऽनंतरेनृणाम् ॥ पूर्वकर्मानुसारेणव्यज्यमानाहिवासनाः ॥ ३ ॥ अवांतराणिमूलानिसंसृतेरित्युदीरितम् ॥ दै
व्यासुरीराक्षसीचप्राणिप्रकृतयःपुरा ॥ ४ ॥ बंधमोक्षाधिकारिण्यःसूचितानवमेकिल॥ वेदबोधितकर्मात्मज्ञानोपायाद्यनुष्ठितौ ॥ ५ ॥ प्रवृ

श्रीभगवानुवाच ॥ अभयंसत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥

त्तिहेतुःप्रकृतिर्दैवीसाशुभवासना ॥ निषेधशास्त्रमुल्लंघ्यरागद्वेषानुसारतः ॥ ६ ॥ सर्वानर्थनिबंधिन्यांप्रवृत्तौयाप्रवर्तिनी ॥ राजसीतामसी
साचराक्षसीचासुरीस्मृता ॥ ७ ॥ तत्रापिरागप्राबल्याद्भोगप्राधान्यमाग्रहात् ॥ ययासाऽत्रासुरीज्ञेयाहिंसायाप्राणिनांवृथा ॥ ८ ॥ साभ
वेद्वेषप्राबल्याद्ययासाराक्षसीरिता ॥ इदानींवेदविहितप्रवृत्तिजनकाशुभा ॥ ९ ॥ दैवीसासात्त्विकीसंपन्मोक्षहेतुरिहोच्यते ॥ याशास्त्राति
क्रमेणैवतन्निषिद्धैकगोचरे ॥१०॥ प्रवृत्तिहेतुभूतासाराजसीतामसीनृणाम् ॥ द्वयोश्चराक्षस्यासुर्योरेकीकृत्यैवसंपदोः॥११॥ आसुरीखेनकथनं
क्रियतेहेयसाम्यतः॥ आदानायशुभानांचाशुभानांहानसिद्धये ॥१२॥ हरिणाषोडशोऽध्यायआरभ्यतइहोत्तमः॥ तत्रश्लोकत्रयेणादावुपादे

नन्वस्तिमानंवेदाख्यंधर्माधर्मावबोधकम् ॥ निर्दोषंपरमेशाज्ञारूपंलोकेप्रसिद्धिमत् ॥ १ ॥ तन्मूलकानिसंतीतिहासस्मृतिमुखान्यपि ॥ कथं
प्रवृत्त्याद्यज्ञानंतेषांज्ञानेऽप्यतिक्रमः ॥ २ ॥ तवाज्ञायाःकथंदुष्टशासितुर्हीतिचेच्छृणु ॥ अबाधितार्थविषयंसत्यंतत्त्वावबोधकम् ॥ ३ ॥ वे
दस्मृतीतिहासार्षपुराणादिप्रमाणकम् ॥ नास्तियस्मिन्नसत्यंतद्वेदेसत्यपितैःशठैः ॥ ४ ॥ प्रामाण्येऽस्वीकृतेऽतश्चधर्माधर्मस्वरूपिणि ॥ नप्रति
ष्ठाव्यवस्थायाहेतुर्यस्मचतत्तथा ॥ ५ ॥ नास्त्येवंफलदोऽपीशोनियंतायस्मतत्तथा ॥ तआसुराजगत्प्राहुःपापाधिक्यादिहेतुना ॥६॥ वेदस्या
पिप्रमाखंतेनमन्यंतेनचेश्वरम् ॥ अतोयथेष्टाचरणात्तेयांतिनरकंशठाः ॥ ७ ॥ कथमीशमृतेतैस्तुविश्वोत्पत्तिरिहेष्यते ॥ शृणुस्त्रीपुंसयोर्यो

असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरम् ॥ अपरस्परसंभूतंकिमन्यत्कामहैतुकम् ॥ ८ ॥
एतांदृष्टिमवष्टभ्यनष्टात्मानोऽल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणःक्षयायजगतोऽहिताः ॥ ९ ॥

गादन्योन्यंकामयुक्तयोः ॥ ८ ॥ संभूतंहिजगत्कामहेतुकंतन्नचान्यतः ॥ अदृष्टकारणंचान्यन्नास्त्येवंदृष्टसंभवे ॥ ९ ॥ नादृष्टकल्पनायु
क्ततःस्वाभाविकंजगत् ॥ इतिचार्वाकदुर्दृष्टिर्वेदेशाद्यपलापिनी ॥ १० ॥ सर्वानर्थकरीयस्मात्त्याज्याश्रेयोऽर्थिभिस्ततः ॥ ११ ॥ ८ ॥
एतांदृष्टिंसमालंब्यभ्रष्टामुष्मिकसाधनाः ॥ तुच्छेऽल्पविषयेयेषांमतिर्दृष्टावलंबिनी ॥ १ ॥ हिंस्रास्तेशत्रवःप्राणिजातस्यक्षयहेतवे ॥ व्याघ्रस
र्पादिरूपेणोत्पद्यंतेदुष्टदृष्टयः ॥ २ ॥ हेयेयंदृष्टिरत्यंतदुःखहेतुःसुखेप्सुभिः ॥ ३ ॥ ९ ॥

नन्वस्तुराक्षसीसंपदासुर्यंतर्गतासमा ॥ मानुषीतुतृतीयासाहेयादेयाथवेतिचेत् ॥ १ ॥ संसारमार्गेसर्वस्मिन्द्विप्रकारौनृसर्गकौ ॥ दैवआसुरएवास्तिनतुराक्षसमानुषौ ॥ २ ॥ योमनुष्योयदाशास्त्रसंस्कारप्रबलत्वतः ॥ रागद्वेषौतिरस्कृत्यभवेद्धर्मपरायणः ॥ ३ ॥ सतदादेवइत्युक्तोयदातुद्वेषरागयोः ॥ प्राबल्याच्छास्त्रसंस्कारमभिभूयनिषिद्धकृत् ॥ ४ ॥ सतदासुरइत्येवंद्वैविध्यस्योपपत्तितः ॥ नह्यत्रधर्माधर्माभ्यांतृतीयाकोटिरस्तिवा ॥ ५ ॥ तत्रदैवोमयाहिलाप्रत्युक्तोबहुविस्तरात् ॥ द्वितीयेद्वादशेचैवस्थितधीभक्तलक्षणे ॥ ६ ॥ त्रयोदशेज्ञानहेतौगुणातीतेचतुर्दशे ॥ इहाप्यभयमित्याद्यैर्लक्षणैरीरितोभृशम् ॥ ७ ॥ इदानीमासुरंभूतसर्गमद्वचनैःशृणु ॥ विस्तरेणोच्यमानंसंहानार्थमवधारय

द्वौभूतसर्गौलोकेऽस्मिन्दैवआसुरएवच ॥ दैवोविस्तरशःप्रोक्तआसुरंपार्थमेशृणु ॥ ६ ॥
प्रवृत्तिंचनिवृत्तिंचजनानविदुरासुराः ॥ नशौचंनापिचाचारोनसत्यंतेषुविद्यते ॥ ७ ॥

॥ ८ ॥ सम्यग्ज्ञातस्यशक्योऽस्तिकर्तुंहिपरिवर्जनम् ॥ ९ ॥ ६ ॥ आसुरीसंपदाहेयाद्वादशभिरिहोच्यते ॥ तानहमित्यतःपूर्वतनैःश्लोकैर्मुरारिणा ॥ १ ॥ प्रवृत्तिविषयंधर्मंचेनतद्बोधिकांश्रुतिम् ॥ एवंनिवृत्तिविषयंचेनतद्बोधिकांश्रुतिम् ॥ २ ॥ नैवासुरस्वभावास्तेजानंतिभ्रमशालिनः ॥ अतस्तेषुनशौचंवानाप्याचारःस्मृतेर्मतः ॥ ३ ॥ यथार्थभाषणंसत्यंप्रियंपथ्यंनविद्यते ॥ अशौचाश्चाप्यनाचारास्तथैवानृतवादिनः ॥ ४ ॥ मायाविनःप्रसिद्धाश्चह्यसुरादूषणाकराः ॥ ५ ॥ ७ ॥

ईदृशींधनतृष्णानुवृत्तिंतेषांकुचेतसाम् ॥ विवृणोतिमनोराज्यकथनेनहरिःस्वयम् ॥ १ ॥ इदंधनंमयाऽनेनोपायेनाप्तंचसंप्रति ॥ मनस्तुष्टिकरंचान्यत्प्राप्स्येशीघ्रमिदंपुरा ॥ २ ॥ संचितंमेगृहेचास्तिबहुवित्तमिदंपुनः ॥ भविष्यत्येवसुखदंममागामिनिवत्सरे ॥ ३ ॥ एवंतृष्णाकुलामूढावैतरण्यादिकेऽशुचौ ॥ पतंतिनरकेघोरेनाकल्पंनिःसृतिस्ततः ॥ ४ ॥१३॥ एवंप्रपंच्यतत्तृष्णांतदभिप्रायकीर्तनात् ॥ संप्रपंचयतिक्रोधंतेषांश्रीहरिरव्ययः ॥ १ ॥ मयाऽसौदेवदत्ताख्योहतःशत्रुःसुदुर्जयः ॥ हनिष्याम्यपरान्सर्वानद्यशत्रून्सुखेनच ॥ २ ॥ अपेरर्थस्तुमच्छत्रुःसं

इदमद्यमयालब्धमिमंप्राप्स्येमनोरथम् ॥ इदमस्तीदमपिमेभविष्यतिपुनर्धनम् ॥ १३ ॥
असौमयाहतःशत्रुर्हनिष्येचापरानपि ॥ ईश्वरोऽहमहंभोगीसिद्धोऽहंबलवान्सुखी ॥ १४ ॥

श्रकोजीवनेक्षमः ॥ नकेवलंहनिष्यामिकिंतुतेषांधनादिकम् ॥ ३ ॥ ग्रहीष्यामीत्यभिप्रायश्चकारादत्रगम्यते ॥ कुतस्त्वास्तिसामर्थ्यमीदृशंहियतोऽपरे ॥ ४ ॥ त्वत्तुल्याअधिकाःकिंनशत्रवस्तत्रचोच्यते ॥ नकेवलंमनुष्योऽस्मियेनतुल्योऽधिकोऽथवा ॥ ५ ॥ कश्चित्स्यादतएतेकिंकरिष्यंतिवराककाः ॥ सर्वथानास्तिमत्तुल्यःकश्चिदत्रेश्वरोऽस्म्यहम् ॥ ६ ॥ विवृणोतीश्वरत्वंचतदभिप्रायतोहरिः ॥ यतोऽहंभोगसामग्रीयुतःसिद्धोऽहमित्यतः ॥ ७ ॥ पुत्रभृत्यादिभिर्युक्तःस्वतोऽपिबलवानहम् ॥ सर्वथाहंचनीरोगोऽत्यंतपुण्यैरतोयुतः ॥ ८ ॥ १४ ॥

कश्चिद्धनेनाकिंनस्यात्त्वत्तुल्योऽत्रकुलेनवा ॥ इत्यत्राहधनीयस्मादहमेवनमत्समः ॥ १ ॥ कुलीनोऽप्यहमेवास्मिनकश्चिन्मत्समोऽपरः ॥ यागे
नवाथदानेननकोऽप्यस्तीहमत्समः ॥ २ ॥ अन्यान्यभिभविष्यामियागेनाहंतथापरान् ॥ दानेनस्तावकेभ्योऽहंधनंदास्यामिपुष्कलम् ॥ ३ ॥
हर्षंलप्स्येततोऽहंवैनर्तक्यादिभिरेवच ॥ इत्येवमविवेकेनप्रापिताबहुविभ्रमम् ॥ ४ ॥ १५ ॥ तत्तद्दुष्टैकसंकल्पैरनेकैःप्राग्उदीरितैः ॥ कामिनो
विविधंभ्रांतामोहजालेनवेष्टिताः ॥ १ ॥ हिताहिताविवेकाख्यावरणेनातिवेष्टिताः ॥ मत्स्याइवहिसौत्रेणजालेनविवशीकृताः ॥ २ ॥

आढ्योऽभिजनवानस्मिकोऽन्योऽस्तिसदृशोमया ॥ यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः
॥ १५ ॥ अनेकचित्तविभ्रांतामोहजालसमावृताः ॥ प्रसक्ताःकामभोगेषुपतंतिनरकेऽशुचौ ॥ १६ ॥
आत्मसंभाविताःस्तब्धाधनमानमदान्विताः ॥ यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकम् ॥ १७ ॥

स्वानिष्टसाधनेष्वेवकामभोगेषुतत्पराः ॥ प्रतिक्षणंवर्धमानकल्मषानरकेऽशुचौ ॥ ३ ॥ पतंतिश्लेष्मविण्मूत्रपूर्णेवैतरणीमुखे ॥ ४ ॥ १६ ॥
तेषामपिहिकेषांचिद्वैदिकेशुभकर्मणि ॥ प्रवृत्तिर्यागदानादौदृश्यतेऽतोनसांप्रतम् ॥ १ ॥ नरकेपतनंतेषामित्याशंक्याहतत्रच ॥ सर्वैर्गुणै
र्विशिष्टाःस्मोवयमित्यात्मनैवते ॥ २ ॥ पूज्यतांप्रापितामूढैर्नतुकैश्चित्सुसाधुभिः ॥ अनम्राधनहेतुर्योमानस्तद्धेतुकोमद ॥ ३ ॥ तेनान्वि
तामखैर्नाममात्रैरुक्तांगवर्जितैः ॥ धर्मध्वजितयामूढायजंतेश्रद्धयानतु ॥ ४ ॥ अतोनफलभाजस्तेयागैरविधिपूर्वकैः ॥ किंतुसंसृतिभाजस्ते
क्रूराःक्रूरविचेष्टिताः ॥ ५ ॥ १७ ॥

यक्ष्यइत्यादिसंकल्पैःप्रवृत्तानांविकर्मणि ॥ नास्तिरागादिधीशुद्धिहेतुःकिंपुनरीश्वरे ॥ १ ॥ रतिर्वैराग्यबोधादिनास्तीत्याहजगर्षतिः ॥ आरोपितगुणैःस्वस्यमहत्त्वाभिमतिंश्रिताः ॥ २ ॥ बलंशरीरसामर्थ्यंपराभिभवकारणम् ॥ परावधीरणारूपंदर्पंगुर्वाद्यतिक्रमम् ॥ ३ ॥ काम मिष्टाभिलाषंचक्रोधंद्वेषमनिष्टके ॥ परैश्वर्यासहिष्णुत्वंमात्सर्यंचात्तथापरान् ॥४॥ संश्रितामहतोदोषान्नरकादिभयावहान् ॥ ईदृशाअपिते भक्त्यापूताःसंतोननारकीम् ॥ ५ यातनांतेगमिष्यंतीत्याशंक्याहरमापतिः ॥ मांश्रीनारायणंतेषामासुराणांवपुष्यपि ॥ ६ ॥ परेषांचैवत त्पुत्रभार्यादीनांसुरागिणाम् ॥ प्रेमास्पदेषुदेहेषुतत्तद्धीकर्मसाक्षिणम् ॥७॥ परप्रेमास्पदंश्रीमद्भगवंतमधोक्षजम् ॥ दुर्दैवपरिपाकात्तेप्रद्विषंतो ऽभ्यसूयकाः ॥ ८ ॥ ममानुशासनाद्वेदस्मृतिरूपाखराङ्मुखाः ॥ श्रुतिस्मृतीममैवाज्ञेतेउल्लंघ्यप्रवर्तते ॥ ९ ॥ आज्ञाभंगीममद्वेषीत्यादिस्मृ त्यातथेरितम् ॥ अतःश्रुत्यर्थवैमुख्यंप्रद्वेषोममनापरः ॥ १० ॥ ननुयुर्वादयःशिष्टाःकथंतान्नानुशासति ॥ इत्यत्राहाभ्यसूयांतेकुर्वतःसज्जने

अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः ॥ मामात्मपरदेहेषुप्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥
तानहंद्विषतःक्रूरान्संसारेषुनराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु ॥ १९ ॥

ष्वपि ॥ ११ ॥ वेदमार्गेस्थितानांतेकारुण्यादिगुणेष्वपि ॥ प्रतारणादिदोषाणामारोपणस्वभावकाः ॥१२ ॥ स्वदेहेपरदेहेषुचिदंशेनस्थितं हिमाम् ॥ प्रद्विषंतोयजंतेतेदंभयज्ञेषुहिंसया ॥१३॥ पश्चादेरयथाशास्त्रंसाक्षाच्चिद्द्रोहकारिणः॥ वृथादीक्षादिनापीडांसहंत्यर्थोऽस्तुवोत्तरे॥१४॥ यद्वात्मदेहेभगवल्लीलाविग्रहईश्वरे ॥ वासुदेवसमाख्येऽस्मिन्मनुष्यत्वादिविभ्रमात् ॥ १५ ॥ द्विषंतःपरदेहेषुभक्तदेहेषुमांहरिम् ॥ प्रह्लादादिस माख्येषुसदाविर्भूतमित्यपि ॥१६॥ १८ ॥ तेषांत्वत्कृपयाजातुनिस्तारःस्यादितिचेत् ॥ मैवंसन्मार्गशत्रूंस्तान्मांसाधून्द्विषतःशठान् ॥ १ ॥ हिंस्रान्सुनिंदिताचारान्नित्यंचाशुभकारिणः ॥ अहंसर्वेश्वरःकर्मफलदातायथायथम् ॥ २ ॥ संसारेषुसदादुःखमार्गेषुनरकेषुच ॥ पातयामि ततस्तांश्चव्याघ्रसर्पादियोनिषु ॥ ३ ॥ क्रूरास्वन्यासुरीष्वेवतत्तत्कर्मानुसारतः ॥ एतादृशेष्वदुष्टेषुमत्कृपानास्तिकर्हिचित् ॥ ४ ॥ १९ ॥

केनचित्कर्मणातेचेत्प्राप्नुवंतिनराकृतिम् ॥ तदाभोगाभिलाषंतेऽत्यंताशक्यप्रपूरणम् ॥ १ ॥ आश्रित्याधार्मिकत्वेऽपिधार्मिकत्वभ्रमान्विताः॥ अपूज्यत्वेऽपिपूज्यत्वख्यापनेनमदेनच ॥२॥ उत्कर्षारोपणेनैवयुक्ताश्चाशुभनिश्चयान् ॥ अनेनाराध्यमंत्रेणदेवतामहमादृताम् ॥३॥ आकर्षणं करिष्यामिकामिनीनामथामुना ॥ निधींश्चसाधयिष्यामीत्यादिरूपान्दुराग्रहान् ॥४ ॥ अविवेकाद्गृहीत्वातेनतुशास्त्रात्कथंचन ॥ अशुचीनि श्मशानादिदुष्टदेशाश्रयाणिच ॥ ५ ॥ येषांव्रतान्यशौचादिसापेक्षाण्येवसंतिते ॥ दृष्टेफलेप्रवर्तंतेयत्रकुत्राप्यवैदिके ॥ ६ ॥ क्षुद्रदेवादिसेवा

काममाश्रित्यदुष्पूरंदंभमानमदान्विताः ॥ मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तंतेऽशुचिव्रताः ॥ १० ॥
चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः ॥ कामोपभोगपरमाएतावदितिनिश्चिताः ॥ ११ ॥
आशापाशशतैर्बद्धाःकामक्रोधपरायणाः ॥ ईहंतेकामभोगार्थमन्यायेनार्थसंचयान् ॥ १२ ॥

दौभोगमात्रैकलंपटाः ॥ एतादृशाःपतंत्येवनरकेमलसंयुते ॥ ७ ॥ १० ॥ परिमातुंनशक्यायायोगक्षेमादिगोचरा ॥ चिंतातांमरणांतांचया वज्जीवमुपाश्रिताः ॥ १ ॥ दृष्टाःशब्दादयोभोगाःकाम्यंतेयेऽतिरागिभिः ॥ तेषांतदुपभोगोऽस्तिपुरुषार्थोनचापरः ॥ २ ॥ एतावदृष्टमेवा स्तिसुखंनान्यन्मृतेःपरम् ॥ एतत्कायातिरिक्तस्यह्यभावोभोक्तुरेवहि ॥ ३ ॥ इतिनिश्चयवंतस्तेयेलोकायतिकाःशठाः॥ ४ ॥११॥ अशक्यो पायविषयाआशास्ताएवबंधकाः ॥ पाशास्तेषांशतैर्बद्धाःश्रेयसःप्रच्युताजडाः॥ १ ॥ साभिलाषपरानिष्ठाभिलाषाभ्यांसदावृताः॥ चेष्टंतेका मभोगार्थधर्मार्थंनकथंचन ॥ २ ॥ कर्तुंतेवित्तराशींश्चपरस्वहरणादिना ॥ ३ ॥ १२ ॥

शिष्यतेबोध्यतेऽनेनापूर्वार्थइतिशास्त्रकम् ॥ वेदस्तदुपजीव्येतत्स्मृत्याद्यपितदेवच ॥ १ ॥ तत्संबंधिविधिंयस्तुपरित्यज्यातिनास्तिकः ॥ स्वेच्छामात्रेणविहितंनकरोतिनिषिद्धकृत् ॥ २ ॥ ससिद्धिंचेतसःशुद्धिंपुमर्थप्राप्तियोग्यताम् ॥ नाप्नोतिनैहिकंसौख्यंनस्वर्गंनापवर्गकम् ॥ ३॥ ॥ २३ ॥ यस्माच्छास्त्रबहिर्भूतःकामाधीनप्रवृत्तिभाक् ॥ नैहिकामुष्मिकश्रेयोयोग्यस्तस्मात्तवाधुना ॥ १ ॥ किंकार्यंकिमकार्यंचेत्यत्रशास्त्रं हिबोधकम् ॥ श्रुतिस्मृतिपुराणादिप्रमाणंनात्मकल्पना ॥ २ ॥ इहाधिकारभूमौत्वंज्ञात्वाशास्त्रविधानतः ॥ कुर्यान्नकुर्यादित्येवंनिषिद्धंविहितंतथा ॥ ३ ॥ निषिद्धंवर्जयन्कर्मविहितंक्षत्रियस्ययत् ॥ युद्धादिशुद्धिपर्यंतंकर्तुंयोग्योऽसिसर्वदा ॥ ४ ॥ तदेवमस्मिन्नध्यायेआसुर्याः

यःशास्त्रविधिमुत्सृज्यवर्ततेकामकारतः ॥ नससिद्धिमवाप्नोतिनसुखंनपरांगतिम् ॥ २३ ॥
तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितौ ॥ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्तुमिहार्हसि ॥ २४ ॥
इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मवि० दैवासुरसंपद्विभागयोगोनामषोडशोऽध्यायः ॥ १६ ॥

संपदोऽप्ययम् ॥ मूलभूतांस्त्रीन्कामादींस्त्यक्त्वादैवींसमाश्रयेत् ॥ ५ ॥ तेनापवर्गसिद्धिःस्यान्नान्यथाचेत्युदाहृतम् ॥ ६ ॥ २४ ॥ दैवी संपद्विमोक्षंजनयतिसुधियामासुरीदुःखहेतुर्ह्यासुर्यास्त्यागहेतुर्हरिचरणरतिर्नान्यथातोऽप्यनन्यः ॥ स्वांतेप्रेम्णैवकृष्णंस्मरभजसततंस्वात्मभूतं महेशंमुक्तिस्तेनैवसिद्धाभवतिहरिवचोमानमत्रानवद्यम् ॥ १ ॥ यद्यस्त्यपेक्षातवदैवसंपदिबिभेषिचेदासुरसंपदस्तदा ॥ समाश्रयत्वंवसुदेवनंदनेरतिंमतिंभ्रांतिमपोह्यसर्वतः ॥ २ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ दैवासुरविभागोऽयंषोडशःपूर्णतांगतः ॥ १६८ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ४४३१ ॥

बहूनांजन्मनामंतेह्यासुराणांक्रमादपि ॥ नास्तिश्रेयोऽतिनिंद्यत्वादित्याहभगवान्स्वयम् ॥ १ ॥ येतुज्ञात्वासुरींयोनिमापन्नाःप्रतिजन्मते ॥ मूढास्तमसआधिक्यादविवेकिनएवच ॥ २ ॥ तस्मादप्यधमांयोनिंमामप्राप्यैवयांतिते ॥ अतोमदुपदिष्टंतेवेदमार्गमनागपि ॥ ३ ॥ अप्राप्यनैवमद्भक्तावधिकारंप्रयांत्यपि ॥ तस्माद्यावन्नृदेहेनसंबंधस्तावदेवहि ॥ ४ ॥ परित्यासुरींदुष्टांसंपदंनरकावहाम् ॥ महतापिप्रयत्नेनदैवींसंपदमाश्रितः॥ ५॥ भगवंतंभजेत्प्राज्ञोयावन्मृत्युर्नचापतेत् ॥ तदृतेनकदाप्यस्तिनिस्तारःसंसृतेरिति॥ ६ ॥ स्वचितंहरिणासाक्षात्तदुक्तंच स्मृतावपि ॥ इहैवनरकव्याधेश्चिकित्सांनकरोतियः ॥ ७ ॥ गत्वानिरौषधंस्थानंसरुजःकिंकरिष्यति ॥ ८ ॥ २० ॥ ननुवर्षशतेनापिप

आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि ॥ मामप्राप्यैवकौंतेयततोयांत्यधमांगतिम् ॥ २० ॥
त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः ॥ कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत् ॥ २१ ॥
एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिम् ॥ २२ ॥

रिहर्तुंनचासुरी ॥ शक्यतेऽनंतभेदाढ्येत्याशंक्याहसमासतः ॥ १ ॥ साधनंनरकप्राप्तौत्रिप्रकारमिदंशृणु ॥ आसुर्याःसंपदोमूलंपुरुषार्थैकघातकम् ॥ २ ॥ यस्मादेतत्त्रयंसर्वानर्थमूलमुदीरितम् ॥ तस्मादेतत्त्रयत्यागात्त्यक्तासर्वासुरीभवेत् ॥ ३ ॥ उत्पन्नस्यत्रयस्यास्यविवेकेनविरागतः ॥ कार्यस्यप्रतिबंधोहित्यागोऽनुत्पत्तिरेवच ॥ ४ ॥ २१ ॥ किंस्यादेतत्त्रयत्यागात्पुंसएतच्छृणुस्फुटम् ॥ एतैःकामादिभिर्दोषैस्त्रिभिर्नरकसाधनैः ॥ १ ॥ पुमान्विरहितःश्रेयोयद्धितंवेदबोधितम् ॥ आचरत्यात्मनःसम्यग्धीद्वारैतिपरांगतिम् ॥ २ ॥ कामादिप्रतिबद्धःप्राक्श्रेयोनाचरतिस्वयम् ॥ अश्रेयस्त्वाचरत्येवयेनस्यान्निरयेस्थितिः ॥ ३ ॥ कामादिशून्यःपुरुषोनाश्रेयश्चरतिह्ययम् ॥ श्रेयःसम्यक्करत्येवततोयातिपरांगतिम् ॥ ४ ॥ २२ ॥

प्राग्भवीयमनोनिष्ठवासनानांविचित्रता ॥ निमित्तमस्तिश्रद्धायावैचित्र्येचेत्युदीरितम् ॥ १ ॥ इदानींतद्धुपादानमनोवैचित्र्यतोऽपिच ॥ श्र
द्धावैचित्र्यमाहेशोमहामायानियामकः॥२॥ सत्वंप्रकाशशीलत्वादंतःकरणमुच्यते ॥ क्वचिद्धुद्रिक्तसत्वंतद्यथास्तित्रिदिवौकसाम् ॥३॥ क्वचिद्र
जोऽभिभूतंतद्यक्षादीनांमनोयथा ॥ क्वचित्तमोऽभिभूतंतद्यथाप्रेतादिदेहिनाम् ॥ ४ ॥ मनुष्याणांतुतत्सत्वंव्यामिश्रंप्रायशोभवेत् ॥ तच्चशा
स्त्रीयबोधेनोद्भूतसत्वंरजस्तमः ॥ ५ ॥ क्रियतेचाभिभूयैवतच्छ्रूयस्वतुतच्छृणु ॥ सर्वस्यप्राणिजातस्यश्रद्धासत्वानुसारिणी ॥ ६ ॥ सत्वप्र
धानेमनसिसात्विकीपूर्वपुण्यजा ॥ रजःप्रधानेतस्मिन्साराजसीपूर्वकर्मजा ॥ ७ ॥ तमःप्रधानेतस्मिन्सातामसीतित्रिधास्मृता ॥ कानि

सत्वानुरूपासर्वस्यश्रद्धाभवतिभारत ॥ श्रद्धामयोऽयंपुरुषोयोयच्छ्रद्धःसएवसः ॥ ३ ॥
यजंतेसात्विकादेवान्यक्षरक्षांसिराजसाः ॥ प्रेतान्भूतगणांश्चान्येयजंतेतामसाजनाः ॥ ४ ॥

ष्ठेतित्वयापृष्टंयत्तत्रोत्तरमुच्यते ॥ ८ ॥ शास्त्रीयज्ञानशून्योऽयंकर्मण्यधिकृतःपुमान् ॥ श्रद्धामयोऽस्यनिष्ठापिव्याख्याताश्रद्धयैवहि ॥ ९ ॥
यायस्यसात्विकीश्रद्धाराजसीवाऽथतामसी ॥ श्रद्धानुरूपएवास्तिसपुमानितिनिर्णयः ॥१०॥ ३ ॥ श्रद्धाज्ञातासतीनिष्ठांज्ञापयिष्यतिसापि
तु ॥ ज्ञायतांकथमित्युक्तेऽनुमेयाकार्यलिंगतः ॥ १ ॥ शास्त्रीयज्ञानहीनायेस्वाभाविक्यातयायुताः ॥ श्रद्धयासात्विकान्देवान्यजंतेरुद्रमु
ख्यकान् ॥ २ ॥ तेजनाःसात्विकाज्ञेयायेतुयक्षांश्चराक्षसान् ॥ यजंतेराजसांस्तेऽन्येज्ञातव्याराजसाजनाः ॥ ३ ॥ प्रेतान्पिशाचभेदान्ये
मातृकादींश्चतामसान् ॥ यजंतेभूतसंघांस्तेज्ञातव्यास्तामसाजनाः ॥ ४ ॥ ४ ॥

इत्यनादृतशास्त्राणांनिष्ठोक्तात्रिविधानृणाम् ॥ केचित्पुण्यवशात्संतिसात्विकाःशास्त्रतत्पराः ॥ १ ॥ दुराग्रहेणयेत्वत्रदुर्दैवपरिपाकतः ॥ दुष्टसंगादिदोषेणनमुंचंत्यासुरींमतिम् ॥ २ ॥ तेशास्त्रीयाध्वनोभ्रष्टाअसन्मार्गानुसारतः॥ इहामुत्रचदुःखैकभाजएवेतिकथ्यते ॥ ३ ॥ यन्नश्रुत्यानवास्मृत्याविहितंतपआसुरम् ॥ यद्वाशास्त्रेणबुद्ध्यादिप्रणीतेनैवबोधितम् ॥४ ॥ घोरंस्वस्यपरस्यापिकुर्वंत्यत्यंतदुःखदम् ॥ आत्मनोधार्मिकत्वस्यख्यापनंदंभईरितः॥ ५॥ श्रेष्ठोऽहमेवमित्येवमहंकारोदुराग्रहः ॥ ताभ्यामत्यंतसंयुक्तायोरागःकाम्यगोचरे ॥ ६ ॥ तन्निमित्तंबलंदुःखं सोढुंसामर्थ्यमित्यपि ॥ विषयाभिलाषःकामोरागोऽभिष्वंगउच्यते ॥ ७ ॥ साधयिष्याम्यवश्यंचेत्याग्रहोबलमुच्यते ॥ तैर्युताबलवद्दुःखदर्शनेऽप्यनिवर्तिनः ॥ ८ ॥ ५ ॥ पृथ्व्यादिभूतसंघंयेदेहस्थमविवेकिनः ॥ कृषीकुर्वंतआत्मानंमांचैवांतःशरीरगम् ॥ १ ॥ अंतर्यामितयाभो

अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः ॥ दंभाहंकारसंयुक्ताःकामरागबलान्विताः ॥ ५ ॥
कर्षयंतःशरीरस्थंभूतग्राममचेतसः ॥ मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥
आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः ॥ यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु ॥ ७ ॥

क्तृभावेनसाक्षिभावतः ॥ मदाज्ञालंघनेनैतेमांद्विषंतोनराधमाः ॥ २ ॥ तान्पुमर्थात्परिभ्रष्टानिहामुत्राघभागिनः ॥ आसुरोऽतिविपर्यासो विरुद्धत्वेनचश्रुतेः ॥ ३ ॥ निश्चयोदुर्धियांयेषांतान्मनुष्यत्वरूपतः ॥ प्रतीयमानानासुर्याकांतान्विद्ध्यासुरांश्छठान् ॥ ४ ॥ सर्वथाहेयएवासौदुष्टआसुरनिश्चयः ॥ श्रेयोऽर्थिभिर्विपश्चिद्भिर्हरेरित्येवमाशयः ॥ ५ ॥ ६ ॥ येसात्विकास्तेदेवाःस्यूराजसास्तामसास्तुये ॥ तेऽसुराःसर्वथात्याज्याग्राह्यादेवास्तुसात्विकाः॥ १ ॥ इत्याहारतपोयज्ञदानत्रैविध्यमुच्यते ॥ त्रिविधोक्तायथाश्रद्धातथाहारस्त्रिधाऽस्त्यपि ॥ २ ॥ सर्वस्यप्राणिनोभोक्तुःप्रियोयज्ञस्तपस्तथा ॥ देवतोद्देशतोद्रव्यत्यागोयागउदाहृतः॥ ३ ॥ तपश्चांद्रायणाद्युक्तंशरीरेंद्रियशोषणम् ॥ दानंस्वस्वत्वत्यागोऽन्यस्वापादनमीरितम् ॥ ४ ॥ तेषांचतुर्णांभेदंत्वंप्रोच्यमानंमयाशृणु ॥ ५ ॥ ७ ॥

तत्राहारभिदामाहत्रिभिःश्लोकैर्जगत्पतिः ॥ चिरजीवनमायुःस्यात्सत्त्वंधैर्यंधियःस्मृतम् ॥ १ ॥ बलंशरीरसामर्थ्यंश्रमाभावप्रयोजकम् ॥ आरोग्यंव्याध्यभावःस्यादाल्हादोभोजनात्सुखम् ॥ २ ॥ भोजनावसरेऽत्यंताभिरुचिःप्रीतिरुच्यते ॥ तेषांषण्णांविशेषेणवृद्धिहेतवआदरात् ॥ ३ ॥ आस्वाद्याःस्नेहसंपन्नाःशरीरेस्थायिनश्चिरम् ॥ हृद्याःपूत्यशुचित्वादिशून्याश्चहृदयंगमाः ॥ ४ ॥ आहारालेह्यचोष्याद्याःसात्त्विकानांप्रियाःसदा ॥ एतैर्लिंगैर्हिविज्ञेयाःसात्विकाःसत्त्वमीप्सुभिः॥ ५॥ ८ ॥ कट्वादयस्तुचत्वारःप्रसिद्धानिंबकादयः॥ योजनीयोऽतिशब्दस्तुकट्वादिष्वपिसप्तसु ॥ १ ॥ मरीच्याद्यतितीक्ष्णोऽतिरूक्षःस्नेहविवर्जितः ॥ तापकोऽतिविदाहीस्यादेतेदुःखादिदायिनः ॥ २ ॥ दुःखंता

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः ॥ रस्याःस्निग्धाःस्थिराहृद्याआहाराःसात्विकप्रियाः ॥ ८ ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहाराराजसस्येष्टादुःखशोकामयप्रदाः ॥ ९ ॥ यातयामंगतरसंपूतिपर्युषितंचयत् ॥ उच्छिष्टमपिचामेध्यंभोजनंतामसप्रियम् ॥ १० ॥

त्कालिकीपीडाशोकःपश्चाद्विभाविच ॥ दौर्मनस्यंतथारोगंधातुवैषम्यहेतुकम् ॥ ३ ॥ ददतीतितथाहाराराजसस्यप्रियाःसदा ॥ सात्विकैराजसाएतेउपेक्ष्याःसर्वथायतः ॥ ४ ॥ ९ ॥ अर्धपक्वंविरसतांप्राप्तमाद्यपदद्वये ॥ अर्धोऽथवायत्पक्वंसत्प्रहराद्यंतरालतः ॥ १ ॥ शैत्यंप्राप्तं यातयाममुद्धृतसारमीरितम् ॥ पूतिदुर्गंधमित्युक्तंपर्युषितंनिशांतरम् ॥ २ ॥ भुक्त्वावशिष्टमुच्छिष्टममेध्यमक्रतूचितम् ॥ भोज्यमेतादृशंयत्तत्तामसस्यप्रियंसदा ॥ ३ ॥ उपेक्ष्यंसात्त्विकैर्दूराद्दुःखशोकामयप्रदम् ॥ सात्त्विकान्नविरोधित्वमुभयत्रसमंयतः ॥ ४ ॥ राजसेदृष्टदोषोऽस्ति दृष्टादृष्टस्तुतामसे ॥ ५ ॥ १० ॥

श्रीगणेशायनमः ॥ अथसप्तदशाध्यायव्याख्याप्रारंभः ॥ स्वयंज्योतिर्ब्रह्मश्रुतिशिखरगीतंनिरवधिंजगद्धामाद्वैतंप्रकृतिपुरुषांतर्गतमजम् ॥ महेशाद्याराध्यंव्रजयुवतिभिःस्वाद्यममृतंमहःश्रीकृष्णाख्यंसुखनिधिमहंनौमिसततम् ॥ १ ॥ त्रिविधाःकर्मकर्तारोभवंतिपुरुषाभुवि ॥ केचिच्छास्त्रविधिंज्ञात्वाश्रद्धाहीनाविहायतम् ॥ २ ॥ कामकारेणयत्किंचिदनुतिष्ठंतितेसुराः ॥ केचिच्छास्त्रविधिंज्ञात्वाश्रद्दधानतयोत्तमाः ॥३॥ निषिद्धंवर्जयंतोयेऽनुतिष्ठंतियथाविधि ॥ तेपुरुषार्थयोग्यत्वाद्देवाइत्यपिबोधितम् ॥ ४ ॥ आलस्यादिवशाद्येतूपेक्ष्यशास्त्रविधिंस्वयम् ॥ श्रद्दधानतयावृद्धव्यवहारैकदर्शनात् ॥ ५ ॥ निषिद्धंवर्जयंतश्चकुर्वंतिविहितंसदा ॥ शास्त्रीयोपेक्षणात्तेकिंप्रविष्टाअसुरेषुवा ॥ ६ ॥ श्रद्दधानतयाकिंवादेवेष्वितिवितर्कयन् ॥ अर्जुनःसंदिहानःसन्नुवाचश्रीहरिंप्रति ॥ ७ ॥ श्रुतिस्मृतिविधिंत्यक्त्वायआलस्यादिनाजनाः ॥ देवपू

अर्जुनउवाच ॥ येशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताः ॥ तेषांनिष्ठातुकाकृष्णसत्वमाहोरजस्तमः ॥१॥

श्रीभगवानुवाच ॥ त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा ॥ सात्विकीराजसीचैवतामसीचेतितांशृणु ॥२॥

जादिकंवृद्धव्यवहारानुसारतः ॥ ८ ॥ श्रद्दधानतयानित्यंकुर्वंत्यानंदसागर ॥ देवासुरविभिन्नानांतेषांनिष्ठाऽस्तिकीदृशी ॥ ९ ॥ किंसात्विकीदेवनिष्ठाराजसीवाथतामसी ॥ १० ॥ १ ॥ सात्विक्याश्रद्धयायुक्तादेवाःशास्त्रोक्तसाधने ॥ अधिक्रियंतेयुज्यंतेतत्फलेनचसाधकाः ॥ १ ॥ राजस्यायेतुतामस्याश्रद्धयासंयुताश्चते ॥ नाधिक्रियंतेशास्त्रीयेयुज्यंतेतत्फलेनन ॥ २ ॥ इत्येवंहिविवेकेनस्वभक्तस्यार्जुनस्य च ॥ संदेहोच्छित्तयेश्रद्धाभेदंश्रीशउवाचह ॥ ३ ॥ शास्त्रोक्तविधिमुत्सृज्ययजंतेश्रद्धययया ॥ जन्मांतरीयधर्मादिसंस्कारोऽधुनातने ॥४॥ जन्मन्यारंभकःसोऽयंस्वभावस्त्रिविधोनृणाम् ॥ सात्विकोराजसश्चैवतामसश्चेतितेनसा ॥ ५ ॥ त्रिविधोक्तादिताश्रद्धासात्विक्यादिभिदावती ॥ श्रद्धांतांस्त्वंशृणुश्रुत्वास्वयमेवावधारय ॥ ६ ॥ देवासुरस्वभावेनसायथाभवतित्रिधा ॥ ७ ॥ २ ॥

नकस्यचिदुःखकरंमानमूलमबाधितम् ॥ श्रोतुस्तत्कालसुखदंपरिणामेसुखावहम् ॥ १ ॥ अनुद्वेगकरत्वादिविशेषणचतुष्टयम् ॥ समुच्चित्यैव यद्वाक्यंनैकेनापिविवर्जितम् ॥ २ ॥ यथाभोवत्सशांतस्त्वंभवस्वाध्यायमाचर ॥ योगंतथानुतिष्ठत्वंनिःश्रेयस्तेभविष्यति ॥ ३ ॥ यथाविध्या गमाभ्यासोवाङ्मयंतपउच्यते ॥ ४ ॥ १५ ॥ मनःस्वच्छत्वमक्षोभ्यंसर्वलोकहितैषिता ॥ निदिध्यासनमैकाग्र्यंसमाधौचित्तनिग्रहः ॥ १ ॥ कामादिमलसंशांत्यामायाराहित्यमाशिशोः ॥ भावसंशुद्धिरित्येतत्तपोमानसमुच्यते ॥ २ ॥१६॥ शारीरादिकभेदेनप्रोक्तस्यत्रिविधस्यच ॥ तपसःप्रोच्यतेभूयस्त्रैविध्यंसात्विकादिना ॥ १ ॥ सात्विकेपुरुषेत्रेधापूर्वोक्तंतपउच्यते ॥ राजसेतामसेयस्मात्तत्त्रैविध्यंनसंभवेत् ॥ २ ॥

अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत् ॥ स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते ॥ १५ ॥
मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः॥ भावसंशुद्धिरित्येतत्तपोमानसमुच्यते ॥ १६ ॥
श्रद्धयापरयातप्तंतपस्तत्त्रिविधंनरैः ॥ अफलाकांक्षिभिर्युक्तैःसात्विकंपरिचक्षते ॥ १७ ॥
सत्कारमानपूजार्थंतपोदंभेनचैवयत् ॥ क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवम् ॥ १८ ॥

अतःसात्विकपुंस्युक्तंतपस्त्रिविधंवचः ॥ राजसेतामसेप्रोक्तंतद्विरुद्धंसदायतः॥ ३ ॥ तत्पूर्वोक्तंतपःसम्यक्श्रद्धयाऽस्तिक्यरूपया ॥ बुद्ध्याप्र कृष्टयाशंकाशून्ययाशास्त्रगोचरे ॥ ४ ॥ फलाभिसंधिरहितैःशुद्धचित्तैःसमाहितैः ॥ अनुष्ठितंमुनिश्रेष्ठाःसात्विकंकथयंतितत् ॥ ५ ॥ १७ ॥ तपस्वीब्राह्मणःसाधुरयमित्यविवेकिभिः ॥ क्रियमाणास्तुतिःप्रोक्तःससत्कारस्तदाशये ॥ १ ॥ प्रत्युत्थानप्रणामादिर्मानःपूजार्चनादिकम् ॥ तदर्थधार्मिकत्वादिख्यापनेनैवयत्तपः ॥ २ ॥ क्रियतेराजसंप्रोक्तंतदत्रैवफलप्रदम् ॥ अत्यल्पकालस्थायित्वाच्चलंतद्व्यभिचारिच ॥ ३ ॥ १८ ॥

त्रिविधंयज्ञमाहेशःक्रमप्राप्तमिहाधुना ॥ अनुष्ठेयोद्विधायज्ञःकाम्योनित्यश्चतत्रतु ॥ १ ॥ नित्योयष्टव्यमेवेतिप्रत्यवायजिहासया ॥ मनो निश्चित्यशुद्ध्यर्थतयाकाम्यपराङ्मुखैः ॥ २ ॥ यज्ञोऽनुष्ठीयतेप्राज्ञैर्निश्चितोयोयथाविधि ॥ विज्ञेयःसात्विकोयज्ञोऽनुष्ठितोधीविशुद्धये ॥ ३ ॥ ॥ ११ ॥ स्वर्गादिफलमुद्दिश्यलोकेदंभार्थमेववा ॥ चित्तशुद्धिमनुद्दिश्यदृष्टादृष्टफलेप्सुना ॥ १ ॥ यश्चानुष्ठीयतेशास्त्रात्तंयज्ञंविद्धिराजसम् ॥ हानायभरतश्रेष्ठयोग्योऽसित्वंतुसात्विकम् ॥ २ ॥ काम्योमुमुक्षुभिर्हेयःसर्वथेत्याशयोहरेः ॥ ३ ॥ १२ ॥ विधिहीनंयथाशास्त्रावबोधित विपर्ययम् ॥ अन्नदानविहीनंचस्वरतोवर्णतस्तथा ॥ १ ॥ मंत्रहीनंयथाशास्त्रदक्षिणाहीनमध्वरम् ॥ आस्तिक्यबुद्धिशून्यंतंतामसंकथयंति

अफलाकांक्षिभिर्यज्ञोविधिदृष्टोयइज्यते ॥ यष्टव्यमेवेतिमनःसमाधायससात्विकः ॥११॥
अभिसंधायतुफलंदंभार्थमपिचैवयत् ॥ इज्यतेभरतश्रेष्ठतंयज्ञंविद्धिराजसम् ॥ १२ ॥
विधिहीनमसृष्टान्नंमंत्रहीनमदक्षिणम् ॥ श्रद्धाविरहितंयज्ञंतामसंपरिचक्षते ॥ १३ ॥
देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवम् ॥ ब्रह्मचर्यमहिंसाचशारीरंतपउच्यते ॥ १४ ॥

वै ॥ २ ॥ अयंपंचविधोयज्ञस्त्याज्यःश्रेयोऽर्थिभिःसदा ॥ यथाशास्त्रमनुष्ठानाद्राजसेऽस्तिफलंमनाक् ॥ ३ ॥ तामसेत्वयथाशास्त्रानुष्ठानान्न फलंमनाक् ॥ ४ ॥ १३ ॥ क्रमप्राप्तस्तपस्त्रैविध्यंप्राहमापतिः ॥ देवाब्रह्महरीशाद्याद्विजाश्चब्राह्मणावराः ॥ १ ॥ आचार्यमुख्यागुरवः प्राज्ञावेदविदोबुधाः ॥ तेषांप्रणामशुश्रूषाद्यागमोक्तंहिपूजनम् ॥ २ ॥ शरीरशोधनंशौचंमृज्जलाभ्यांतथार्जवम् ॥ यथाशास्त्रंप्रवृत्त्यादौव क्रत्वाभावउच्यते ॥ ३ ॥ निषिद्धमैथुनाभावोब्रह्मचर्यमहिंसनम् ॥ प्राणिनांपीडनाभावःशारीरंतपउच्यते ॥ ४ ॥ शरीरमुख्यैःकर्त्राद्यैःसा ध्यंतस्यंचहेतुभिः ॥ नकेवलंशरीरेणकृतंशारीरमुच्यते ॥ ५ ॥ यतोवक्ष्यतिभगवान्पंचैतेतस्यहेतवः ॥ ६ ॥ १४ ॥

एवमाहारमुख्यानांत्रैविध्यकथनेनच ॥ ग्राह्याणिसात्विकान्येवत्याज्यान्यन्यानिसर्वथा ॥ १ ॥ इत्युक्तंतत्रभोज्यस्यदृष्टार्थत्वेनकेवलम् ॥ अंगवैगुण्यतोनास्तिफलाभावादिशंकनम् ॥ २ ॥ अदृष्टार्थस्ययज्ञादेरंगवैगुण्यतोभवेत् ॥ अपूर्वस्याप्यनुष्ठातौफलाभावेनकर्मिणाम् ॥ ३ ॥ सात्विकानामपिह्येषामानर्थक्यंसमागतम् ॥ प्रमादबहुलत्वाच्चानुष्ठातृणामतोहरिः ॥ ४ ॥ वैगुण्यपरिहारार्थमोंतत्सदितिचत्रिधा ॥ कीर्तनंभगवन्नाम्नःप्रायश्चित्ततयाधुना ॥ ५ ॥ अतिकारुणिकत्वेनसाक्षाद्उपदिशत्यजः ॥ ओंतत्सदितिरूपोऽयंब्रह्मणःपरमात्मनः ॥ ६ ॥ नामनिर्देशआत्मज्ञैश्चितस्त्रिविधःश्रुतौ ॥ यस्मादेवमतःसर्वैःस्मर्तव्यमधुनातनैः ॥ ७ ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ ८ ॥ स्तूयतेब्रह्मनिर्देशःकर्मवैगुण्यनाशकृत् ॥ त्रिधानिर्देशतोविष्णोःकर्तारोब्राह्मणादयः ॥ ९ ॥ वेदाःसृष्टाः

ओंतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः ॥ ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहिताःपुरा ॥ २३ ॥
तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः ॥ प्रवर्तंतेविधानोक्ताःसततंब्रह्मवादिनाम् ॥ २४ ॥

साधनाख्यायज्ञाःकर्मात्मकाःपुरा ॥ तस्माद्यज्ञादिसृष्टेश्चहेतुत्वेनहरेरयम् ॥ १० ॥ निर्देशःकर्मवैगुण्यपरिहारक्षमोऽस्त्यपि ॥ ११ ॥ २३ ॥ अथोंकारादिनामास्यश्रीमद्भगवतोहरेः ॥ व्याख्यातुंवेदनिर्णीतनिर्देशस्तुतयेपुनः ॥ १ ॥ आरभतेऽत्रभगवानोमित्यादौवदत्यजः ॥ ओमितिब्रह्मणोनामप्रसिद्धंयतआगमे ॥ २ ॥ तस्मादोमित्युदाहृत्यविधिशास्त्रेणबोधिताः ॥ प्रकृष्टत्वेनवर्तंतेयज्ञदानतपःक्रियाः ॥ ३ ॥ अंगवैगुण्यराहित्यात्सततंवेदवादिनाम् ॥ यस्यैकावयवोच्चार्यमाणेवैगुण्यसंक्षयः ॥ ४ ॥ किंपुनस्तस्यसर्वस्योच्चारणादितिसंस्तुतिः ॥ ५ ॥ अहोहरेर्नाममहत्फलंश्रुतौश्रुतंसदोंकारइतिस्मृतंह्यदि ॥ पुनातियज्ञादिकृतंह्यलक्षणंलुनातिपापौघमुदीरणात्सकृत् ॥ ६ ॥ २४ ॥

तदितिब्रह्मणोनामप्रसिद्धंतत्त्वमादिके ॥ वेदवाक्येसमुच्चार्यानभिसंधायतत्फलम् ॥ १ ॥ अंतःकरणशुद्ध्यर्थंयज्ञदानतपःक्रियाः ॥ क्रियंते मोक्षमिच्छद्भिःप्रशस्तमतमेवतत् ॥ २ ॥ श्रुतौतदित्येवमुकुंदनामतत्प्रोक्षरीत्यापरिवर्णितंपरम् ॥ मुमुक्षुभिर्ध्येयमनन्यचेतसातथैववेद्यंभवमुक्तयेधिया ॥ ३ ॥ २५ ॥ सदेवेतिश्रुतौनामसदितिब्रह्मणोहरेः ॥ तदसत्यवशंकायांसद्भावेसत्प्रयुज्यते ॥ १ ॥ तथासाधुवशंकायांसाधुभावेप्रयुज्यते ॥ वैगुण्यपरिहारेणयज्ञादेःसाधुतांक्षमम् ॥ २ ॥ प्रकर्तुंतत्फलस्यापिविद्यमानत्वमेवसत् ॥ प्रशस्तेचविवाहादौसच्छब्दोऽतःप्रयुज्यते ॥ ३ ॥ सर्वमंगलहेतुत्वाद्यतोमांगलिकेऽखिले ॥ तस्मादप्रतिबंधेनसुखहेतुतयाऽसकृत् ॥ ४ ॥ उच्चार्यमाणमाधत्तेफलंसन्नामतद्धरेः ॥ अहोश्रीमद्धरेर्नाममहिमायंनिरंकुशः ॥ ५ ॥ सदेवसौम्येदमितिश्रुतौश्रुतंविनाहरिंनैवविकारनामनी ॥ सदित्युदीर्यैवहरिंसुधीर्भजेदसत्सुस

तदित्यनभिसंधायफलंयज्ञतपःक्रियाः ॥ दानक्रियाश्चविविधाःक्रियंतेमोक्षकांक्षिभिः ॥ २५ ॥
सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते ॥ प्रशस्तेकर्मणितथासच्छब्दःपार्थयुज्यते ॥ २६ ॥
यज्ञेतपसिदानेचस्थितिःसदितिचोच्यते ॥ कर्मचैवतदर्थीयंसदित्येवाभिधीयते ॥ २७ ॥

त्तामदमध्वरादिषु ॥ ६ ॥ २६ ॥ यज्ञेतपसिदानेचयानिष्ठातत्पराह्मिका ॥ सासदित्युच्यतेऽभिज्ञैस्तेष्वर्थेषुमखादिषु ॥ १ ॥ भवंतदनुकूलंचकर्मसच्चाभिधीयते ॥ अथवायस्यनामेदंब्रह्मणःप्रस्तुतंपरम् ॥ २ ॥ तदर्थोविषयोयस्यब्रह्मज्ञानस्यतत्तथा ॥ ब्रह्मार्पणधियाकर्मक्रियमाणंविशुद्धये ॥ ३ ॥ तदर्थीयंसदित्येवंप्रशस्तमभिधीयते ॥ यस्यैकैकोऽप्यवयवःप्रशस्तोहीदृशोमतः ॥ ४ ॥ किंपुनस्तस्यसर्वस्यवाच्यंमाहात्म्यमद्भुतम् ॥ ५ ॥ यज्ञादौसमुदीरणाद्भगवतोनामोंतदित्यादिकंसाद्रुण्यंकुरुतेयदंगविकलंध्येयंसदोपासकैः ॥ ज्ञेयंवेदविदांरहस्यमखिलंनामार्थतोयस्यंतच्छ्रीकृष्णमहोभिधंममतौभूयाद्वचःस्वार्थतः ॥ ६ ॥ २७ ॥

एवंयज्ञादिकंकर्मविगुणंह्यपिसात्विकम् ॥ सच्छ्रद्धापूर्वकंब्रह्मनामत्रयप्रयोगतः ॥ १ ॥ सद्गुणंभवतीत्येवंहरिणासमुदीरितम् ॥ इदानींश्रद्धयाहीनंसर्वंयागादिनिष्फलम् ॥ २ ॥ भवतीत्यतएवादौश्रीमद्भगवतास्वयम् ॥ प्रधानत्वेनसच्छ्रद्धायज्ञदानादिकर्मसु ॥ ३ ॥ स्तूयते निंद्यतेसर्वंश्रद्धाहीनंमखादिकम् ॥ यत्कृतंहवनंवन्हौदत्तंपात्रेभ्यएवयत् ॥ ४ ॥ अनुष्ठितंतपोयच्चकृतंस्तुत्यादिकर्मयत् ॥ अश्रद्धयाचतत्सर्वमसाध्वित्युच्यतेकृतम् ॥ ५ ॥ तदश्रद्धाकृतंयस्मान्नामुत्रेहफलत्यपि ॥ अंगवैगुण्यतोऽपूर्वाजनकत्वेनहेतुना ॥ ६ ॥ नापीहास्तियशोलोकेनिंदितत्वाच्चसाधुभिः ॥ अतोमुमुक्षुभिःश्रद्धासंपाद्यासात्विकीतया ॥ ७ ॥ यज्ञादिकर्मकर्तव्यंचित्तशुद्ध्यात्मलब्धये ॥ ८ ॥ २८ ॥ श्र

अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत् ॥ असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह ॥ २८ ॥

इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायां० त्रिविधश्रद्धायोगोनामसप्तदशोऽध्यायः ॥१७॥

द्धात्रैविध्यमादौसकलमखतपोदानसाद्गुण्यहेतोरौंतत्सन्नामचोक्तंश्रुतिविततफलंब्रह्मविद्याप्तिहेतुः ॥ श्रद्धाहीनंविनिंद्यंसकलमपिकृतंयेनसंप्रोक्तमित्थंतंश्रीकृष्णंगुरूणामपिपरमगुरुंभूरिभावैर्नतोऽस्मि ॥ १ ॥ रजस्तमोदुःखनिदानमाराच्यक्त्वासमाश्रित्यगुणंविशुद्धम् ॥ हरेःपदांभोजयुगंसदैवध्यात्वैवमोक्षोभवपाशबंधात् ॥ २ ॥ तत्राप्यसामर्थ्यवतांजनानांयज्ञादिसाद्गुण्यकरंहिविष्णोः ॥ नामत्रयंदोषगणापहंतत्प्रोक्तंमुमुक्षुःसततंभजेत ॥ ३ ॥ अनादिनिर्णीतमिदंमतंयत्सर्वेषुयज्ञादिषुनामविष्णोः ॥ प्रधानमस्तीत्यतएतदेवस्मृत्वाविमुच्येतविकल्पजालात् ॥ ४ ॥ इतिभावप्रकाशेश्रीसदानंदविदाकृते ॥ श्रद्धात्रैविध्यबोधोऽयंपूर्तिंसप्तदशोगतः ॥ १३९ ॥ आदितआरभ्यटीकाश्लोकसंख्या ॥ ४५७० ॥

मौढ्याद्दुराग्रहेणैवदेहाद्यत्यंतपीडया ॥ यत्तपःक्रियतेऽन्यस्यविनाशायाभिचारिकम् ॥ १ ॥ तत्तपस्तामसंशिष्टैःप्रोक्तंहेयंमुमुक्षुभिः ॥ २ ॥
॥ १९ ॥ क्रमप्राप्तस्यदानस्यत्रैविध्यंदर्शयत्यजः ॥ दातव्यमेवशास्त्रोक्तमित्येवंनिश्चयेनवै ॥ १ ॥ नतुफलाभिलाषेणयत्तुलापुरुषादिकम् ॥
प्रत्युपकारशून्यायकुरुक्षेत्रादिपावने ॥ २ ॥ देशेसूर्योपरागादौकालेपुण्येऽन्हिपर्वणि ॥ विद्यातपोभ्यांयुक्तायपात्रायचयथाविधि ॥ ३ ॥

मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः ॥ परस्योत्सादनार्थंवातत्तामसमुदाहृतम् ॥१९॥
दातव्यमितियद्दानंदीयतेऽनुपकारिणे ॥ देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतम् ॥ २०॥
यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः ॥ दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतम् ॥ २१ ॥
अदेशकालेयद्दानमपात्रेभ्यश्चदीयते ॥ असत्कृतमवज्ञातंतत्तामसमुदाहृतम् ॥ २२ ॥

दीयतेश्रद्धयाभक्त्याविष्णुप्रीत्यर्थमेवयत् ॥ तदेवंसात्विकंदानंप्रोक्तंसम्यक्फलप्रदम् ॥ ४ ॥ २० ॥ कालांतरेहिविप्रोऽयंमामित्युपकरिष्यति ॥ इत्येवंदीयतेयद्वास्वर्गाद्युद्दिश्ययत्पुनः ॥ १ ॥ पश्चात्तापयुतंदानंतच्छिष्टैराजसंस्मृतम् ॥ २ ॥२१॥ स्वतोवादुष्टसंसर्गादशुचिस्थान एवहि ॥ अशौचकालेऽपात्रेभ्योनटादिभ्यःप्रदीयते ॥ १ ॥ देशकालादिसंपत्तावपिसत्कारवर्जितम् ॥ पात्रेष्ववज्ञयायुक्तंतद्दानंतामसं स्मृतम् ॥ २ ॥ २२ ॥

सूचीकटाहनीत्यादौतत्रांत्यस्योत्तरंहरिः ॥ उवाचशृणुकाम्यानांचोदितानांफलेप्सया ॥ १ ॥ शुद्धावनुपयुक्तानांपशुसोमादिरूपिणाम् ॥ त्यागंजानंतिसंन्यासंकवयःसूक्ष्मदर्शिनः॥ २ ॥ अन्येऽनुष्ठीयमानानांसर्वेषामेवकर्मणाम् ॥ धीशुद्ध्यर्थंफलत्यागंप्राहुस्त्यागंविदांवराः ॥३॥ संयोगस्यपृथक्त्वेनसर्वेषामपिकर्मणाम् ॥ तमेतमितिवाक्येनबुभुत्सायांनियोगतः ॥ ४ ॥ वेदानुवचनादीनामैकात्म्यज्ञानजन्मने ॥ तमेतमितिवाक्येननित्यानांवक्ष्यतेविधिः ॥ ५ ॥ यद्वाविविदिषार्थत्वंसर्वेषामपिकर्मणाम् ॥ तमेतमितिवाक्येनसंयोगस्यपृथक्त्वतः ॥६॥ इत्युक्तं

श्रीभगवानुवाच ॥ काम्यानांकर्मणांन्यासंसंन्यासंकवयोविदुः ॥ सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाः ॥ २ ॥ त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः ॥ यज्ञदानतपःकर्मनत्याज्यमितिचापरे ॥ ३ ॥

वार्तिकेतस्मादेवंसिद्धंविभागशः ॥ काम्यकर्मपरित्यागःसंन्यासइतिशब्दितः ॥ ७ ॥ फलाभिसंधिसंत्यागस्त्यागशब्दार्थकोमतः॥ धीशुद्ध्यर्थमनुष्ठानेकर्मणांफलवर्जनम् ॥८॥ उभयोरेकएवार्थःसंन्यासत्यागशब्दयोः॥९॥ २ ॥ अथद्वितीयप्रश्नस्यपरिहारायकेशवः ॥ संन्यासत्यागयोस्तत्त्वंवक्तुंत्रैविध्यमेवहि ॥ १ ॥ विप्रतिपत्तिमाहादौत्याज्यमित्यादिनास्फुटम् ॥ बंधहेतुतयासर्वंकर्मदुष्टमतोबुधैः ॥ २ ॥ त्याज्यमेकेबुधाःप्राहुःकर्मण्यधिकृतैरपि ॥ इत्येकंमतमत्रोक्तंद्वितीयंप्राहकेशवः ॥ ३ ॥ कर्माधिकारिभिःपुंभिर्धींशुद्ध्याबोधलब्धये ॥ यज्ञदानतपःकर्मनत्याज्यमितिचापरे ॥ ४ ॥ ३ ॥

तत्रत्यागेत्वयापृष्टेकर्माधिकृतकर्तृके ॥ संन्यासत्यागशब्दाभ्यामृषिभिःप्रतिपादिते ॥ १ ॥ निश्चयंमद्वचोभिस्त्वंपूर्वाचार्यैःकृतंशृणु ॥
कर्माधिकारिणोयस्मात्त्यागःसफलकर्मणः ॥ २ ॥ तामसादिकभेदेनत्रिःप्रकारउदाहृतः ॥ फलाभिसंधिसंत्यागोविद्यमानेऽपिकर्मणि॥३॥
सात्विकोऽयंपरित्यागउपादेयोमुमुक्षुभिः ॥ फलाभिसंधौसत्येवकर्मत्यागस्तुराजसः ॥ ४ ॥ अज्ञानतोद्वयोरेवप्रमादादिभिरेवयः ॥ त्यागः
फलाभिसंधेश्चकर्मणश्चसतामसः ॥ ५ ॥ हेयत्वेनमतावेतौत्यागौराजसतामसौ ॥ मुख्योयःकर्मसंन्यासोनिस्त्रैगुण्यःसनेहवै ॥ ६ ॥ अर्जुन

निश्चयंशृणुमेतत्रत्यागेभरतसत्तम ॥ त्यागोहिपुरुषव्याघ्रत्रिविधःसंप्रकीर्तितः ॥ ४ ॥
यज्ञदानतपःकर्मनत्याज्यंकार्यमेवतत् ॥ यज्ञोदानंतपश्चैवपावनानिमनीषिणाम् ॥ ५ ॥

प्रश्नविषयोनवातस्यविवेचनम् ॥ यतस्त्यागस्यदुर्बोधंतत्त्वंतस्मान्ममेशितुः ॥ ७ ॥ वाक्याद्विद्धीत्यभिप्रायःसंबोधनद्वयेनतु ॥ कुलौत्कर्ष्या
त्स्वकौत्कर्ष्याद्योग्यत्वंस्वच्यतेऽर्जुने ॥ ८ ॥ ४ ॥ कश्चासौनिश्चयस्तत्रद्वाभ्यामाहरमापतिः ॥ फलाभिसंधिहीनानांयज्ञदानतपांसिहि॥१॥
शोधकान्यात्मविज्ञानप्रतिबंधमलक्षयात् ॥ तस्माच्चित्तविशुद्ध्यात्मविज्ञानायाधिकारिभिः ॥ २ ॥ फलाभिसंधिहीनंयत्कर्मत्याज्यंनतद्बुधैः ॥
यस्माद्यज्ञादिकंकर्मकर्तव्यत्वेनचोदितम् ॥ ३ ॥ तस्मान्नत्याज्यमेवेतिकिंतुकार्यंप्रयत्नतः ॥ ४ ॥ ५ ॥

धीशोधनेऽस्तिसामर्थ्यंयदियज्ञादिकर्मणाम् ॥ शोधकान्येवतर्हिस्युःकृतान्यपिफलेप्सुना ॥ १ ॥ कृतंफलाभिसंध्येकत्यागेनेत्येवचेच्छृणु ॥ धर्मस्वाभाव्यतःशुद्धिःकाम्यानामपिसंभवेत् ॥ २ ॥ तथापिकामिनांसातत्फलभोगोपयोगिनी ॥ ज्ञानोपयोगिनीनास्तितदुक्तंवार्तिकेस्फुटम् ॥ ३ ॥ काम्येऽपिशुद्धिरस्त्येवभोगसिद्ध्यर्थमेवसा ॥ विड्वराहादिदेहेननह्यैंद्रंभुज्यतेफलम् ॥ ४ ॥ ज्ञानोपयोगिनींशुद्धिमादधत्यत्रयानितु ॥ यज्ञादीन्येवकर्माणिबंधकान्यपिकामिनाम् ॥ ५ ॥ मुमुक्षुभिःपरित्यज्यकर्तृत्वाभिमातिंतथा ॥ अभिसंधीयमानानित्यक्त्वाकर्मफलानिच ॥ ६ ॥ कर्तव्यानिधियःशुद्ध्यैइतिमेनिश्चितंमतम् ॥ अतएवहिहेपार्थनत्याज्यानिमुमुक्षुभिः ॥ ७ ॥ कर्माधिकारिभिर्धीरैःकर्मा

एतान्यपितुकर्माणिसंगंत्यक्त्वाफलानिच ॥ कर्तव्यानीतिमेपार्थनिश्चितंमतमुत्तमम् ॥ ६ ॥
नियतस्यतुसंन्यासःकर्मणोनोपपद्यते ॥ मोहात्तस्यपरित्यागस्तामसःपरिकीर्तितः ॥ ७ ॥

णीत्युत्तमंमतम् ॥ ८ ॥ ६ ॥ तदेवंकर्मनत्याज्यंस्वात्मनःस्थापितंमतम् ॥ त्याज्यंदोषवदित्यादिपरपक्षनिराकृतिम् ॥ १ ॥ कर्तुमारभतेत्यागत्रैविध्यमधुनाहरिः ॥ काम्यस्यदोषवत्त्वात्स्यात्त्यागःशुद्ध्यर्थिनांनृणाम् ॥ २ ॥ नित्यस्यकर्मणःशुद्धिहेतुत्वेनानघस्यतु ॥ चित्तशुद्ध्यर्थिनस्त्यागोमुमुक्षोर्नोपपद्यते ॥ ३ ॥ धीशुद्ध्यैशास्त्रयुक्तिभ्यामनुष्ठेयंमुमुक्षुणा ॥ काम्यस्येवास्यनित्यस्यदोषवत्त्वंनसंभवेत् ॥ ४ ॥ पावनत्वापरिज्ञानात्त्यागोनित्यस्यकर्मणः ॥ अवश्यमेवकर्तव्यंयत्तन्नित्यमितीर्यते ॥ ५ ॥ अज्ञानात्तत्परित्यागस्तामसःपरिकीर्तितः ॥ ६ ॥ ७ ॥

श्रीगणेशायनमः ॥ अथाष्टादशाध्यायव्याख्याप्रारंभः ॥ अखंडानंदाब्धिनिगमशिरसांभावविषयंमुनींद्रैराराध्यंपरमपदमीशानमकलम् ॥ विशुद्ध्यासद्भक्त्यासपदिसुजनैःप्राप्यममृतंमुकुंदंवंदेऽहंभ्रमतिमिरविध्वंसिचरणम् ॥ १ ॥ शरण्यंसुस्वाद्यंसनकमुखसद्धृद्दिदृक्षितंमहायोगेशानंसुरनरजगद्धेतुममलम् ॥ चिदानंदाकारंसकलरससारंहरिपदंसदास्वारंस्वारंभवजलधिपारंसुकलये ॥ २ ॥ प्राग्विक्षिप्ततयाप्रोक्तंविस्तरेणयतस्ततः ॥ शास्त्रार्थमुपसंहृत्याधुनासंक्षेपतोऽखिलम् ॥ ३ ॥ अनायासेनबोधार्थमभिधातुमुपक्रमः ॥ गीताशास्त्रस्यसर्वस्याध्यायेऽस्मिन्नर्थसंग्रहः ॥ ४ ॥ वेदार्थस्यचसर्वस्यवक्तव्योऽस्तीत्यतोऽर्जुनः ॥ श्रद्धात्रैविध्यतःपूर्वाध्यायेयज्ञादिकर्मणाम् ॥ ५ ॥ त्रैविध्यमुक्तमाकर्ण्यसंन्या

अर्जुनउवाच ॥ संन्यासस्यमहाबाहोतत्त्वमिच्छामि
वेदितुम् ॥ त्यागस्यचहृषीकेशपृथक्केशिनिषूदन ॥ १ ॥

सेऽप्यस्तिसंभवः ॥ त्रैविध्यस्येतिजिज्ञासुरुवाचश्रीहरिंप्रति ॥ ६ ॥ कर्माऽधिकारिणामेवकिंचित्कर्मपरिग्रहात् ॥ किंचित्कर्मपरित्यागस्त्यागांशगुणयोगतः ॥ ७ ॥ संन्यासशब्दतःप्रोक्तस्यचित्तविशुद्धये ॥ अविद्वत्कर्तृकस्यापिसंन्यासस्ययथार्थतः ॥ ८ ॥ पृथक्स्वरूपमिच्छामि वेदितुंगुणभेदतः ॥ त्यागस्यापिस्वरूपंचसम्यगिच्छामिवेदितुम् ॥ ९ ॥ संन्यासत्यागशब्दौकिंभिन्नार्थौवैकवाचकौ ॥ आद्यपक्षेतर्हिसंन्यासात्तत्त्वंत्यागस्यवैपृथक् ॥ १० ॥ इच्छामिबोद्धुमन्यश्चेदेकेनोभयनिर्णयम् ॥ द्वाभ्यांसंबोधनाभ्यांचबाह्योपद्रववारणे ॥ ११ ॥ सामर्थ्यदर्शयित्वांतर्गतदोषनिवारणे ॥ हृषीकेशेतिसामर्थ्यभक्तानामितिदर्शितम् ॥ १२ ॥ हरावत्यनुरागाद्वाज्ञेयंसंबोधनत्रयम् ॥ १३ ॥ १ ॥

सात्विकस्त्यागआदेयःसत्वशुद्ध्यात्मलब्धये ॥ इत्युक्तंतत्फलंज्ञाननिष्ठामाहाधुनाहरिः ॥ १ ॥ यस्त्यागीसात्विकेनैवत्यागेनयुतउत्तमः ॥
त्यक्त्वाफलाभिसंधिंचकर्तृत्वाभिनिवेशनम् ॥ २ ॥ धीशुद्ध्यैविहितंकर्मकुर्वन्भगवदर्पणम् ॥ तत्प्रसादात्प्रधीशुद्धिस्तयाप्राप्याधिकारिताम् ॥३॥
सत्वेनतत्त्वविज्ञानहेतुभूतेनसंयुतः ॥ वैराग्यसद्विवेकादियोग्यतापूर्वकेणच ॥ ४ ॥ असंदिग्धाविपर्यस्तवेदांतवचसांसदा ॥ विचारेणसुनि
ष्पन्नाहंब्रह्मास्मीतियामतिः ॥ ५ ॥ सामेधायस्तयानित्ययुक्तोमेधाव्युदारधीः ॥ मेधावित्त्वेनसंछिन्नःसंशयोयस्यमोहजः ॥ ६ ॥ स्वात्मावस्था
नमेवास्तिपरंमोक्षैकसाधनम् ॥ नैवान्यत्किंचिदित्येवंनिश्चयेनप्रमात्मना ॥ ७ ॥ तदैवक्षीणकर्मत्वात्काम्यकर्माद्यशोभनम् ॥ प्रतिकूलतयाना
यंमन्यतेस्वात्मनिस्थितः ॥ ८ ॥ कुशलेशोभनेनित्येनकरोतिरतिंसुधीः ॥ कृतकृत्यतयातृप्तस्त्यक्तकर्तृत्वधीर्यतः ॥ ९ ॥ भिद्यतेहृदयग्रंथिश्छि

नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते ॥ त्यागीसत्वसमाविष्टोमेधावीछिन्नसंशयः ॥ १० ॥
नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः ॥ यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ॥ ११ ॥

द्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ॥१०॥ त्यागस्यसात्विकस्यास्तियस्मादेवंफलंततः ॥ महतापिप्रयत्नेनसआदेयोमुमु
क्षुणा ॥११॥ १०॥ एवमात्मविदःसर्वकर्मत्यागोऽपिसंभवेत् ॥ कर्मप्रवृत्तिहेत्वोश्चासंभवाद्वेषरागयोः ॥१ ॥ अज्ञस्यकर्मणांत्यागासंभवेहेतुरु
च्यते ॥ ब्राह्मणोऽहंमनुष्योऽहमित्याद्याध्यासिकेनच ॥२॥ अबाधिताभिमानेनदेहंवर्णाश्रमाश्रयम् ॥ कर्तृत्वाद्याश्रयंस्थूलसूक्ष्मसंघातमाग्र
हात् ॥३॥ बिभर्त्यनाद्यविद्यादिवशादात्मतयासच ॥ देहभृत्तेनकर्माणिकर्मण्येवाधिकारिणा ॥ ४ ॥ विवेकज्ञानशून्येनरागद्वेषवतासदा ॥
त्यक्तुंनिःशेषतोयस्मान्नशक्यानिकथंचन ॥५॥ सत्यांकारणसामग्र्यांकार्यत्यागोऽतिदुष्करः ॥ तस्मादज्ञोऽधिकारीयःकुर्वन्कर्माणिशुद्धये ॥६॥
फलाभिसंधिसंत्यागीतुशब्देनातिदुर्लभः ॥ सत्यागीत्युच्यतेगौण्यावृत्त्यामुख्यस्तुतत्त्ववित् ॥ ७ ॥ ईश्वरानुग्रहात्कर्मफलत्यागितयासुधीः ॥
युज्यतेतत्त्वबोधेननान्यथेत्याशयोहरेः ॥ ८ ॥ ११ ॥

नन्वकर्मफलत्यागितयादेहाभिमानिनः ॥ गौणसंन्यासिनोज्ञानशून्यस्यापिचकर्मिणः॥ १ ॥ देहाभिमानशून्यस्यमुख्यसंन्यासिनस्तथा ॥
त्यागित्वमुभयत्रापितुल्यमस्तीतिगम्यते ॥ २ ॥ तयोःफलेविशेषःकोयदलाभेनगौणता ॥ एकस्यान्यस्ययल्लाभेमुख्यत्वमितिचेच्छृणु ॥३॥
कर्मानुष्ठायिनांकर्मफलत्यागितयापिच ॥ गौणसंन्यासिनांचित्तशुद्धेःप्रागेवकालतः ॥ ४ ॥ मृतानांप्राक्कृतस्यास्तिशरीरग्रहणंफलम् ॥
मायिकंफल्गुभावेनादर्शनंलयमेतियत् ॥ ५ ॥ एकत्वंकर्मणश्चेतिजात्यभिप्रायतःस्मृतम् ॥ अन्यथात्रिविधंतत्स्यात्कथमेकस्यकर्मणः ॥६॥
कर्मणस्त्रिविधत्वात्तत्त्रिविधंफलमीरितम् ॥ पापस्यानिष्टमात्रंचतिर्यगादिकलक्षणम् ॥ ७ ॥ देवादिलक्षणंचेष्टंपुण्यस्यफलमीरितम् ॥ मिश्र
स्यपापपुण्यात्मयुगलस्यतूलक्षणम् ॥ ८ ॥ इष्टानिष्टयुतंप्रोक्तंफलंहेयतयाखिलम् ॥ गौणसंन्यासिनामेवंदेहपातादनंतरम् ॥ ९ ॥ देहांतर

अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलम् ॥

स्यग्रहणमावश्यकमितीरितम् ॥ मुख्यसंन्यासिनांब्रह्मसाक्षात्कारेणतद्विदाम् ॥ १० ॥ अविद्यादिनिवृत्तौसात्कैवल्यात्मकनिर्वृतिः ॥
नदेहग्रहणंतेषांकचित्कालेऽथवादिशि ॥ ११ ॥ अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलम् ॥ ज्ञानेनाज्ञानबाधेहितत्कार्याणांचकर्मणाम् ॥१२॥
उच्छिन्नत्वात्पुनर्देहग्रहणंसंभवेत्कथम् ॥ क्षीयंतेचास्यकर्माणीत्येवंश्रुत्याप्युदीरितम् ॥ १३ ॥ गौणसंन्यासिनांतेनसंसारोहरिणेरितः ॥ मु
ख्यसंन्यासिनांमोक्षोविशेषोऽयंफलेतयोः ॥ १४ ॥ अयमत्रास्तिनिष्कर्षःपूर्वोक्तस्यविवेचनात् ॥ नित्यशुद्धपरानंदप्रत्यगद्वैतवस्तुनः॥१५॥
साक्षात्कारेणवेदांतवाक्यजन्येनभास्वता ॥ सुनिश्चितप्रमात्वेनतत्त्वज्ञानेनसर्वथा ॥ १६ ॥ अज्ञानध्वांतबाधेतत्कार्यकर्तृत्वबाधनात् ॥ यः

परमार्थसंन्यासीकर्मोच्छेदात्सनिर्मलः ॥ १७ ॥ नाविद्याकामकर्मादिनिमित्तंत्रिविधंफलम् ॥ शरीरग्रहणंभूयोऽनुभवत्येवसर्वथा ॥ १८ ॥ कारणोच्छेदतःसर्वभ्रमाणांविनिवृत्तितः ॥ यस्त्वज्ञोदेहभृत्सोऽयंत्रिविधोभवतिक्षितौ ॥ १९ ॥ रागादिदोषप्राबल्याद्यथेष्टाचारसंमुखः ॥ कर्मकाम्यनिषिद्धादिसमाचरतिमूढधीः ॥ २० ॥ एकोऽयंमोक्षशास्त्रेयोऽनधिकार्यतिपामरः ॥ अपरःप्राक्कृतैःपुण्यैःकिंचित्क्षीणमलःपुमान् ॥ २१ ॥ त्यक्त्वाकाम्यंनिषिद्धंचनित्यंनैमित्तिकंशुभम् ॥ फलाभिसंधिसंत्यागात्सत्वशुद्ध्यर्थमाचरन् ॥ २२ ॥ सचायंगौणसंन्यासीमोक्ष शास्त्रेऽधिकारवान् ॥ अन्योधीशुद्धिमासाद्यश्रवणादिपरायणः ॥ २३ ॥ विवेकीब्रह्मविन्मार्गेप्रवृत्तोऽयंतृतीयकः ॥ तत्राद्यस्यमहानर्थभा

भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनाक्वचित् ॥ १२ ॥

ङ्कंप्रत्यक्षमेवहि ॥ २४ ॥ द्वितीयस्याप्यनिष्टादिफलंतच्चित्रिधंस्मृतम् ॥ तृतीयस्यपुराषष्ठेऽध्यायेसंनिर्णयःकृतः ॥ २५ ॥ द्वितीयस्यापिसत्कर्मतारतम्याद्गतेरपि ॥ तारतम्यंस्मृतौवेदेनिर्णीतंचमनीषिभिः ॥ २६ ॥ संसारित्वंध्रुवंदेहाद्यभिमानिनिपूरुषे ॥ अविद्याकामकर्मादिसाम ग्र्याःसंभवादिति ॥ २७ ॥ साचसंसारिताज्ञानानुगुणाकस्यचिद्भवेत् ॥ कस्यचिन्नतथेत्येवंविशेषस्तत्रशोधितः ॥ २८ ॥ तत्त्वज्ञस्यतुसंसा रकारणाभावतःस्वतः ॥ सिद्धंकैवल्यमेवास्तीत्यत्रार्थौस्पृचितावुभौ ॥ २९ ॥ तावत्कर्मफलंनृणामविरतंसंसारवारांनिधाविष्टानिष्टविमिश्रज न्मनिबिडंभ्रांत्याकुलानांभवेत् ॥ यावत्सज्जनचंचरीकनिवहस्वाद्यैरसैकास्पदेश्रीमत्कृष्णपदांबुजेनमनसोवृत्तीरताषङ्कदी ॥ ३० ॥ १२ ॥

चित्तशुद्धिंविनायस्तुकर्मण्यधिकृतःपुमान् ॥ दुःखमित्येवदेहादावतिरागितयाजडः ॥ १ ॥ मत्वाकर्मत्यजेत्कायक्लेशभीत्यागमोदितम् ॥
पूर्वोक्तमोहशून्योऽपिराजसःसचपूरुषः ॥२॥ तादृशंराजसंत्यागंकृत्वात्मज्ञानयोग्यताम् ॥ चित्तशुद्ध्यानचाप्नोतिसात्विकत्यागजंफलम्॥३॥
प्रत्युतत्यागतोऽवश्यंकर्तव्यस्यैवकर्मणः॥ प्रत्यवैतिततोमूढःसंसृतिंनरकंव्रजेत् ॥ ४ ॥ अतोमुमुक्षुभिर्नित्यंनत्याज्यंधीविशोधकम् ॥ किंतु
कार्यंस्वकर्मेतिश्रीहरेरयमाशयः ॥ ५ ॥ ८ ॥ तामसोराजसोहेयःकर्मत्यागश्चदर्शितः ॥ कीदृशःपुनरादेयःसात्विकस्त्यागउच्यते ॥ १ ॥
अवश्यंकार्यमेवेतिबुद्ध्याशास्त्रविधेर्वशात् ॥ कर्तृत्वाभिनिवेशाख्यंसंगंत्यक्त्वाफलंतथा ॥ २ ॥ नित्यंनैमित्तिकंकर्मक्रियतेसत्वशुद्धये ॥ आदे
यत्वेनशिष्टानांसत्यागःसात्विकोमतः ॥ ३ ॥ ननुनास्त्येवनित्यानांफलंत्यक्त्वेतितत्कथम् ॥ उक्तमित्यत्रचब्रूमःश्रीमद्भगवतोहरेः ॥ ४ ॥

दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत् ॥ सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत् ॥ ८ ॥
कार्यमित्येवयत्कर्मनियतंक्रियतेऽर्जुन ॥ संगंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतः॥ ९ ॥

वाक्यादेवफलंतेषामस्तीत्येवंहिगम्यते ॥ यतोननिष्फलस्यास्तिबुद्धिपूर्वमनुष्ठितिः ॥ ५ ॥ कर्मणापितृलोकःस्यादित्यादिश्रुतिवाक्यतः ॥
अवश्यंफलमस्त्येवानुनिष्पादिचकर्मणाम् ॥ ६ ॥ नित्यानामननुष्ठानेप्रत्यवायस्मृतिस्तथा ॥ प्रत्यवायक्षयंतेषांफलंस्वंदर्शयत्यतः॥ ७ ॥ धर्मे
णपापमित्यादिश्रुतयोदर्शयंत्यपि ॥ साक्षात्फलंधियःशुद्धिर्नित्यानामानुषंगिकम् ॥ ८॥ पितृलोकादिसंप्राप्तिःप्रत्यवायक्षयस्तथा ॥ मोहा
द्वाक्लेशभीत्यावाफलासंगेचसत्यपि ॥ ९ ॥ नित्यकर्मपरित्यागःक्रियतेयोविपश्चिता ॥ सत्यागस्तामसत्वेनराजसत्वेननिंदितः ॥ १० ॥
फलाभिसंधिसंत्यागोयस्तुकर्मणिसत्यपि ॥ स्तूयतेसात्विकत्वेनसत्यागःसत्वशोधकः ॥ ११ ॥ ९ ॥

कानितानीत्यपेक्षायांतत्स्वरूपमिहोच्यते ॥ इच्छाद्वेषाद्यभिव्यक्तेरधिष्ठानंशरीरकम् ॥ १ ॥ दृष्टांतार्थस्तथाशब्दोविज्ञेयोऽत्रमनीषिभिः ॥ यथाधिष्ठानमध्यस्तंशरीरंभौतिकंजडम् ॥ २ ॥ तथैवाहंकरोमीतिकर्ताहंकारआत्मनि ॥ कल्पितोमायया सूक्ष्मभूतकार्यतयाजडः ॥ ३ ॥ यथास्थूलशरीरस्यचार्वाकैरात्मताधिया ॥ गृहीतस्यापिवेदज्ञैरनात्मत्वेननिश्चयात् ॥ ४ ॥ तद्दृष्टांतेनकर्तुश्चतार्किकैरात्मताधिया ॥ गृहीत स्याप्यनात्मत्वनिश्चयःसुकरोभवेत् ॥ ५ ॥ श्रोत्रादिकरणंचैवशब्दादिज्ञानसाधनम् ॥ दशेंद्रियमनोबुद्धिरूपेणास्तिपृथग्विधम् ॥ ६ ॥ वृत्ति भेदेमनोबुद्धीअहंकारस्तुवृत्तिमान् ॥ क्रियाशक्तिप्रधानाश्चप्राणानानाविधाःक्रियाः॥७॥ दशधापंचधावापिप्राणापानादिरूपतः॥ असंकी र्णाःक्रियारूपाभौतिकाःकल्पिताःपरे॥८॥ अनुग्राहकमर्कादिदैवंचक्षुर्मुखस्यच ॥ अत्रकारणवर्गेतत्पंचसंख्याप्रपूरकम्॥९॥ तथेत्यनुकर्षणार्थ

अधिष्ठानंतथाकर्ताकरणंचपृथग्विधम् ॥ विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमम् ॥ १४ ॥
शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः ॥ न्याय्यंवाविपरीतंवापंचैतेतस्यहेतवः ॥ १५ ॥

श्चशब्दोऽस्तिस्थलत्रये ॥ तेनाध्यस्तत्वमेतेषांभौतिकत्वमनात्मनाम् ॥१०॥ प्रत्यगात्मन्यसंगेऽस्मिन्पंचानामीश्वरोजगौ ॥११॥ १४ ॥ उक्तास्वरू पंपंचानामेतेषांकर्महेतुताम् ॥ आहेदानींजगन्नाथोभगवान्करुणानिधिः॥ १॥ देहेनमनसावाचानिर्वर्तयतिकर्मयत् ॥ शास्त्रीयंवाप्यशास्त्रीयं धर्माधर्मात्मकंनरः॥२॥ निमेषोन्मेषचेष्टादिनिमित्तंजीवनेऽस्तियत् ॥ धर्माधर्मफलत्वेनैवांतर्भूतंतयोर्द्वयोः॥३॥ न्यायाद्वाविपरीताद्वाभिन्नंकर्म नकिंचन ॥ सर्वस्यकर्मणश्चैतेयथोक्ताःपंचहेतवः॥४॥ अधिष्ठानादयोनैभ्योभिन्नःकर्तास्तिकश्चन ॥ एभ्योविलक्षणःसाक्षीनिष्क्रियोनिर्विक ल्पकः॥५॥ कूटस्थःप्रत्यगात्मैवज्ञेयोब्रह्माद्वयात्मकः॥ तेनैवसुमतिर्विद्वानन्यथादुर्मतिर्नरः॥ ६ ॥ यदज्ञानाल्लोकोऽचलवपुषिकूटस्थचिदणौमृषा हंकर्तास्मीत्यपितनुयुगाध्याससचिवात् ॥ प्रकल्प्यानर्थाब्धौभ्रमतिसततंभ्रांतिगहनेविमुक्तोयज्ज्ञानाद्भवतिसुमतिर्नौमितमजम् ॥ ७ ॥१५॥

तत्रात्मज्ञानशून्यस्यसंसारिखेऽस्तिकारणम् ॥ प्रोक्तंस्वकर्मणांत्यागासंभवोहरिणास्वयम् ॥ १ ॥ नहिदेहभृतेत्यत्रेदानींतस्यैवदेहिनः ॥ उच्य
तेकर्मणांत्यागासंभवेसंसृतौतथा ॥ २ ॥ तादात्म्याध्यासकोहेतुरधिष्ठानादिपंचके ॥ इमंप्रपंचयत्यर्थंश्लोकैश्चतुर्भिरीश्वरः ॥ ३ ॥ इमानि
वक्ष्यमाणानिपंचनिर्वर्तकानिच ॥ सर्वेषांकर्मणांचैवनिष्पत्यर्थंमहाभुज ॥ ४ ॥ ममेश्वरस्यवचनाद्बोद्धुंभवसमाहितः ॥ समाधानंविनाज्ञातुं
नशक्यंतइमान्यपि ॥ ५ ॥ सर्वानर्थनिवृत्त्यर्थंज्ञातव्यानिप्रमाणतः ॥ जीवब्रह्मतयोरैक्यंतद्विज्ञानोपयोगिनः ॥ ६ ॥ श्रवणाद्याःपदार्थाश्च
व्युत्पाद्यंतेऽत्रशास्त्रके ॥ तत्सांख्यंनामवेदांतशास्त्रंतस्मिन्कृतक्षये ॥ ७ ॥ कृतमित्युच्यतेकर्मतस्यांतस्तत्त्वबोधतः ॥ सबोधोजायतेयेनसकृतां

पंचैतानिमाहाबाहोकारणानिनिबोधमे ॥ सांख्येकृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणाम् ॥ १३ ॥

तोऽस्तितत्रच ॥ ८ ॥ प्रोक्तान्यनात्मभूतानिभ्रांत्यात्मत्वेनलौकिकैः ॥ गृहीतान्यात्मबोधेनबाधसिद्ध्यर्थमेवहि ॥ ९ ॥ यतोहेयतयोक्ता
निज्ञातव्यानीत्यतोधिया ॥ अन्यधर्मोऽस्तिकर्मैतन्माययाप्रत्यगात्मनि ॥ १० ॥ आरोपितमतोबोधात्कर्मणोंऽतःकृतोभवेत् ॥ अतएवात्म
नःकर्मासंबंधज्ञानसिद्धये ॥ ११ ॥ अविद्यारोपिताएवहेतवःपंचकर्मणाम् ॥ अनूदितास्तेवेदांतशास्त्रेह्यद्वैतबोधके ॥ १२ ॥ अद्वैतमात्रता
त्पर्यहानिर्नैवास्त्यतोयतः ॥ तदंगत्वेनतेषांचप्रतिपादनमागमे ॥ १३ ॥ फलवत्संनिधौयत्तत्तदंगमफलंश्रुतम् ॥ इतिन्यायेनचैतेषामंगत्वं
ब्रह्मबोधने ॥ १४ ॥ १३ ॥

तदेवंचतुर्भिःश्लोकैर्गौणसंन्यासिनांफलम् ॥ अनिष्टादित्रिपाद्योक्तंव्याख्यातंहेतुभिःसह ॥ १ ॥ इदानींतुर्यपादंतद्व्याचष्टेमुख्यतत्परम् ॥ पूर्वोक्तविपरीतस्ययस्यब्रह्मविदःसतः ॥ २ ॥ शास्त्राचार्योपदेशाभ्यांसंस्कृतात्मैक्यसन्मतेः॥ स्वप्रकाशचिदानंदाकर्त्रभोक्त्रात्मवेदिनः॥३॥ सकार्येबाधितेऽज्ञानेनास्त्येवाहंकृतामतिः॥ अहंकर्तेतिरूपोयःप्रत्ययस्तस्यनास्तिता ॥४॥ नास्त्यहंकारतादात्म्यंयस्यशुद्धात्मदर्शिनः॥ अधिष्ठानादयःपंचमाययामयिकल्पिताः ॥५॥ कर्तारःकर्मणांनाहंकर्तोदासीनभावतः ॥ किंतुसाक्षितयातेषांव्यापृतेरवभासकः॥ ६ ॥ इत्येवंयस्यशुद्धात्ममतेर्नाहंकृतिर्जडे ॥ यस्यांतःकरणंबुद्धिर्नैवानुशयिनीफले ॥७॥ अकार्षमिदमत्राहंभोक्ष्यएतत्फलंत्विति ॥ कर्तृत्ववासनाहेतुर्लेपोनानुशयात्मकः ॥८ ॥ सपरमार्थदर्शीत्थंपश्यन्नात्मानमक्रियम् ॥ हिंसित्वाप्यखिलाँल्लोकान्प्राणिनःकालधर्मिणः॥ ९ ॥ हननक्रियायाःकर्तानभवत्यनहंकृतिः॥ नचाधर्मफलेनासौसंबध्यतउदारधीः ॥१०॥ अत्रनाहंकृतोभावोनहंतीत्यस्तितत्फलम् ॥ बुद्धिर्नलिप्यतेत्वस्यननिबध्यतइत्यपि ॥११॥ अनेना

यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते ॥ हत्वापिसइमाँल्लोकान्नहंतिननिबद्ध्यते ॥ १७ ॥

तिशयोक्तेनकर्मालेपःप्रदर्शितः॥हत्वापीतितुलौकिक्यादृष्ट्याबाधितयेरितम्॥१२॥शास्त्रीययानहंतीतिनविरोधोमनागपि ॥ एवंमायाकृतंसर्वंबुद्ध्याकर्तृमुखंजगत् ॥१३॥ मुख्यसंन्यासिनांनास्तित्रिविधंकर्मणःफलम् ॥ सपरमार्थसंन्यासोब्रह्मबोधोनचापरः॥१४॥ब्रह्मात्मैक्येपरिज्ञातेनष्टेऽज्ञानेसकार्यके ॥ स्वतःसिद्धोऽस्तिसंन्यासःसर्वेषामेवकर्मणाम् ॥१५॥ संन्यासित्वेऽपिपूर्वेषांजनकादिमहीक्षिताम् ॥ प्रारब्धकर्मणातेषांलोकदृष्ट्याक्रियावताम् ॥१६॥स्वदृष्ट्यानक्रियाकाचिन्नकर्ताकर्मवाक्वचित् ॥ भिक्षाटनादिकंकर्मयथासंन्यासिनांधिया ॥१७॥ बाधितंसन्नबंधस्यकारणंसर्वथाभवेत् ॥ तथातत्त्वविदांसर्वंकर्मश्रौतंचलौकिकम्॥१८॥गृहस्थानामपिस्वीयदृष्ट्याबाधितमेवसत् ॥ नबंधकंयतस्तेषांप्रत्यगात्मनिकेवले ॥१९॥सदास्थितिर्नदेहादौजडवर्गेविनश्वरे ॥ अतोनिरंकुशातृप्तिःकृतकृत्यतयाविदाम् ॥२०॥यत्पादांबुजषट्पदीमतिरियंत्यक्त्वाखिलाहंकृतिंस्वात्मानंदमृतेनकुत्रविषयेरंतुंमनागीप्सति ॥ यद्बोधामृतपूरपूरितधियंकाचित्क्रियानस्पृशेत्तंश्रीकांतमनर्थधामविधुरंनित्यंमुकुंदंभजे ॥२१॥१७॥

क्रियाहेतुतयाप्रोक्तमधिष्ठानादिपंचकम् ॥ कर्मासंस्पर्शितातद्वदात्मनस्तद्विदस्तथा ॥ १ ॥ प्रोच्येदानींतमेवार्थंज्ञानज्ञेयादिभेदतः ॥ त्रैगुण्य भेदाद्व्याख्यातुंसमुपक्रमतेहरिः ॥ २ ॥ वस्तुभानक्रियाज्ञानंज्ञेयंतस्यास्तिकर्मच ॥ तस्याश्रयःपरिज्ञाताभोक्ताबुद्ध्याद्युपाधिकः॥ ३ ॥ त्रया णांसन्निपातेनप्रारंभःसर्वकर्मणाम् ॥ अतएतत्त्रयंप्राहसर्वकर्मप्रवर्तकम् ॥ ४ ॥ चोदनेतिक्रियायाश्चप्राहुरत्रप्रवर्तकम् ॥ चोदनाचोपदेशश्च विधिश्चैकार्थवाचिनः ॥ ५ ॥ इत्येवंशाबरेभाष्येचोदनानिर्णयःकृतः ॥ एवंचप्रेरणीयत्वंप्रेरकत्वमनात्मनः ॥ ६ ॥ नात्मनश्चेत्यभिप्रायस्त्रिवि धेत्युक्तितोहरेः ॥ बाह्यंश्रोत्रादिकरणंतत्साधकतमंस्मृतम् ॥ ७ ॥ अंतःस्थंतच्चबुद्ध्यादिकरणंद्विविधंस्मृतम् ॥ क्रिययाव्याप्यमानंयत्कर्तुर

ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना ॥ करणंकर्मकर्तेतित्रिविधःकर्मसंग्रहः ॥ १८ ॥

त्यंतमीप्सितम् ॥ ८ ॥ तत्कर्मात्रोच्यतेतच्चोत्पाद्याप्यादिचतुर्विधम् ॥ स्वतंत्रःकारकैरन्यैरप्रयोज्यःस्वयंहियः ॥ ९ ॥ समस्तकारकाणांच कर्तासस्यात्प्रयोजकः ॥ निर्वर्तकःक्रियायाश्चिदचिद्ग्रंथिरूपधृक् ॥ १० ॥ कर्मसंगृह्यतेचास्मिन्समवैतीतिसंग्रहः ॥ कर्माश्रयोऽस्तित्रिवि धश्चार्थादितिप्रयोगतः ॥ ११ ॥ संप्रदानमपादानमाधारश्चत्रयंत्रिषु ॥ अंतर्भूतमनेनोक्तंकारकषट्कगाक्रिया ॥ १२ ॥ नत्वात्मनिक्रियातीतेसकूटस्थोयतस्थिति ॥ कर्माश्रयस्यकर्मानुप्रेरकस्यचसर्वतः ॥ १३ ॥ कारकात्मतयातद्वत्त्रैगुण्यात्मतयातथा ॥ अकारकस्वभावोऽयंगुणा तीतोऽक्रियोऽचलः ॥ १४ ॥ सर्वकर्माद्यसंस्पर्शीत्यभिप्रायोहरेर्विभोः ॥ १५ ॥ १८ ॥

ज्ञानादिकत्रिकस्याथकरणादित्रिकस्यच ॥ वक्तव्यंत्रिगुणात्मत्वमित्युपक्रमतेहरिः ॥ १ ॥ ज्ञानंप्रागेवव्याख्यातंज्ञेयमंतर्गतंत्विह ॥ ज्ञानोपाधिकतायस्माज्ज्ञेयत्वस्यततस्तथा ॥ २ ॥ कर्मशब्दात्क्रियाग्राह्याचकाराद्उभयोरपि ॥ अंतर्भावःक्रियायांस्यात्करणस्यचकर्मणः ॥ ३ ॥ क्रियोपाधिकतायस्मात्कारकत्वस्यसर्वथा ॥ निर्वर्तकक्रियायाश्चकर्ताज्ञाताचचात्तथा ॥ ४ ॥ गुणाःसत्वादयःसम्यक्ख्यायंतेऽस्मिन्हिकापिले ॥ शास्त्रेत्रिधैवभेदेनसत्वादेःप्रोच्यतेयतः ॥ ५ ॥ यथाशास्त्रंश्रृणुश्रोतुंसावधानोभवेतिच ॥ यद्यपिकापिलंशास्त्रंब्रह्मैकत्वनिरूपणे ॥ ६ ॥ अप्रमाणंतथाप्यत्रगुणगौणनिरूपणे ॥ व्यावहारिकप्रामाण्यंभजतेचेत्यदोषकृत् ॥ ७ ॥१९॥ हेयोपादेयरूपेणपुराध्यायत्रयेगुणाः ॥ निरू

ज्ञानंकर्मचकर्ताचत्रिधैवगुणभेदतः ॥ प्रोच्यतेगुणसंख्यानेयथावच्छृणुतान्यपि ॥ १९ ॥
सर्वभूतेषुयेनैकंभावमव्ययमीक्षते ॥ अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकम् ॥ २० ॥

पिताइहेदानीमात्मनस्त्रैरसंगिनः ॥ १ ॥ गुणातीतस्यसंबंधःस्वाभाव्यान्नास्तिकारकैः ॥ इतितेषांगुणात्मत्वंपुनरत्रनिरूप्यते ॥ २ ॥ ज्ञानत्रैविध्यमेवादौत्रिभिःश्लोकैरिहोच्यते ॥ अद्वैतवादिनांज्ञानंसात्विकंहरिणेर्यते ॥ ३ ॥ आब्रह्मस्थावरांतेषुसर्वभूतेष्वनेकधा ॥ दृश्यवर्गेषुचान्योन्यव्यावृत्तेषुविनाशिषु ॥ ४ ॥ जन्मादिविक्रियाशून्यमव्यावृत्तमदृश्यकम् ॥ अधिष्ठानतयाबाधावधिमात्मानमक्षरम् ॥ ५ ॥ स्वप्रकाशं परानंदंयेनज्ञानेनपश्यति ॥ तन्मिथ्यादृश्यबाधेनचिदद्वैतात्मदर्शनम् ॥ ६ ॥ सात्विकंसर्वसंसारोच्छित्तिहेतुमवेहिभोः ॥ राजसंतामसंद्वैत दर्शनंबंधकारणम् ॥ ७ ॥ हेयंग्राह्यंतुसत्वोत्थंज्ञानंमोक्षैकसाधनम् ॥ ८ ॥ २० ॥

एतेषामेवकर्तृत्वंसर्वस्यापीहकर्मणः ॥ आत्मनोनास्तिकर्तृत्वमित्याहभगवान्हरिः ॥ १ ॥ तत्रकर्मणिपूर्वोक्तेसर्वस्मिन्पंचहेतुभिः ॥ निर्वर्त्यमानेसतियआत्मानंसर्वसाक्षिणम् ॥ २ ॥ स्वप्रकाशपरानंदमबाध्यंकेवलंपरम् ॥ उदासीनमकर्तारमद्वितीयमविक्रियम् ॥ ३ ॥ वस्तुतोऽसंगिनंसंतमधिष्ठानादिकर्मणः॥ कर्ताहमितिचाध्यासात्कर्तारंहिक्रियाश्रयम् ॥ ४ ॥ पश्यत्यविद्ययारज्जुंभुजंगमिवमूढधीः॥ महामोहावृतत्वेनपश्यन्नप्यन्यथामतिः ॥ ५ ॥ शास्त्राचार्योपदेशाभ्यामसंस्कृतमतिःक्रुधीः ॥ प्रतिबंधकपापेनदुष्टायस्यमतिःसच ॥ ६ ॥ नपश्यत्येवविभ्रांतोह्यन्यत्रान्यावभासतः॥ अतोऽशुद्धमनस्कत्वादविवेक्यतिरागवान् ॥ ७ ॥ ज्ञानायोग्यतयासंतमकर्तारमविक्रियम् ॥ कर्तारंविक्रियावंतं

तत्रैवंसतिकर्तारमात्मानंकेवलंतुयः ॥ पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः ॥ १६ ॥

कल्पयन्मायायापरम् ॥ ८ ॥ संसारीदेहभृत्कर्माधिकारीकर्मकर्तृषु ॥ तादात्म्याध्यासतःकर्मप्रकुर्वन्संसरत्यधः ॥ ९ ॥ एतेनतार्किकोयस्तुदेहादिभ्योविलक्षणम् ॥ आत्मानंकेवलंयुक्त्याकर्तारंपश्यतीतरः ॥ १० ॥ अकृतधीतयासोऽपिव्याख्यातोऽनात्मदर्शतः ॥ कर्तृत्वंकल्पितेसिद्धंदेहादिजडपंचके ॥११॥ प्रत्यगात्माऽक्रियःसिद्धोवाक्याद्भगवतोहरेः ॥१२॥ सकलजडविकाराध्यासतश्चिद्धनेऽच्छेकुमतिरकृतबुद्धिःकल्पयन्कर्तृभावम् ॥ भ्रमतिभवजलाब्धौतर्कविद्योऽप्युपेक्ष्यस्खितिवदतिहरिर्यस्तंप्रपद्येमुकुंदम् ॥ १३ ॥ १६ ॥

अद्वैतदर्शिनांज्ञानमुपादेयमुदीरितम् ॥ तार्किकाणांतथाहेयंभेदज्ञानमनर्थदम् ॥ १ ॥ तामसंदुष्टमत्यंतंहेयंसंसृतिकारणम् ॥ इत्युक्तंत्रिविधं कर्मप्रोच्यतेहरिणाऽधुना ॥ २ ॥ नित्यमावश्यकंकर्मगर्वासक्तिविवर्जितम् ॥ अनेनाहमिदंलप्स्येरागइत्याशयःस्मृतः ॥ ३ ॥ अनेनारिंपराजेष्येद्वेषइत्याशयस्तथा ॥ ताभ्यांनकृतमित्युक्तमरागद्वेषतःकृतम् ॥ ४ ॥ फलाभिलाषशून्येनकर्त्राकर्मेहयत्कृतम् ॥ यागदानादिशास्त्रीयं तत्सात्विकमुदाहृतम् ॥ ५ ॥ २३ ॥ फलकामेनकर्त्रायद्वर्वयुक्तेनवाकृतम् ॥ यावत्तत्कामनाकाम्यावृत्तेरनियतंपुनः ॥ १ ॥ सकलांगो पसंहारात्क्लेशदंकाम्यमध्रुवम् ॥ क्रियतेकर्मयत्तद्धुराजससमुदाहृतम् ॥ २ ॥ सर्वैर्विशेषणैरत्रसात्विकादर्शिताभिदा ॥ ३ ॥ २४ ॥ पश्चा

नियतंसंगरहितमरागद्वेषतःकृतम् ॥ अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते ॥ २३ ॥ यत्तु कामेप्सुनाकर्मसाहंकारेणवापुनः ॥ क्रियतेबहुलायासंतद्राजसमुदाहृतम् ॥ २४ ॥ अनुबंधंक्षयंहिंसामनपेक्ष्यचपौरुषम् ॥ मोहादारभ्यतेकर्मयत्तत्तामसमुच्यते ॥ २५ ॥ मुक्तसंगोऽनहंवादीधृत्युत्साहसमन्वितः ॥ सिद्ध्यसिद्ध्योर्निर्विकारःकर्तासात्विकउच्यते ॥ २६ ॥

द्रव्यशुभंदेहसामर्थ्यंस्वधनस्यच ॥ विनाशंप्राणिनांपीडामात्मसामर्थ्यमेवच ॥ १ ॥ अपर्यालोच्यमोहाद्यत्केवलादविवेकतः ॥ आरभ्य तेजडैःकर्मतत्तामसमुदाहृतम् ॥ २ ॥ २५ ॥ इदानींत्रिविधःकर्तांप्रोच्यतेहरिणात्रिभिः ॥ फलाभिसंधिशून्योयोऽहंकर्तेतिमतिंविना ॥ १ ॥ संयक्तस्वगुणश्लाघोऽनहंवादीतिवेरितः ॥ विघ्नाद्युपस्थितौसत्यांप्रारब्धात्त्यागकारणम् ॥ २ ॥ चित्तवृत्तिविशेषोहिधृतिर्धैर्यमितीर्यते ॥ अवश्यंसाधयिष्यामीत्येवंधीर्निश्चयात्मिका ॥३॥ धृतिकारणमुत्साहस्ताभ्यांसंयुक्तउत्तमः ॥ कर्मणःक्रियमाणस्यसिद्ध्यसिद्ध्योःफलस्यचः ॥४॥ विकारोहर्षशोकाभ्यांविकासाद्यात्मकोमुखे ॥ तेनशून्यश्चशास्त्रेणप्रयुक्तोनतुरागवान् ॥५॥ एवंभूतोमहाभाग्यःकर्तासात्विकउच्यते ॥६॥२६॥

तुशब्दःसात्विकज्ञानाद्विनत्तीदंहिराजसम् ॥ भेदेनसर्वभूतेषुस्थितेषुदेहनामसु ॥ १ ॥ प्रतिदेहंविभिन्नांश्चप्रत्यगात्मानआंतरान् ॥ सुखित्वा
दिकरूपेणपरस्परविलक्षणान् ॥ २ ॥ येनज्ञानेनजानातितज्ज्ञानंविद्धिराजसम् ॥ ज्ञानंवेत्तीतिकरणेकर्तृत्वंह्यौपचारिकम् ॥ ३ ॥ यथैधां
सिपचंतीतिप्रयोगोऽस्तितथैवतत् ॥ अन्योन्यमात्मनांभेदस्तेषांभेदस्तथेश्वरात् ॥ ४ ॥ भेदोऽचेतनवर्गस्यतेभ्यईशात्तथामिथः॥ इत्यनौपाधि
कोभेदस्तार्किकाणांचपंचधा ॥ ५ ॥ संमतोराजसत्वेनतज्ज्ञानंहेयमेवहि ॥ ६ ॥ २१ ॥ भूतकार्येषुबहुषुविद्यमानेष्वनेकधा ॥ एकस्मि

पृथक्त्वेनतुयज्ज्ञानंनानाभावान्पृथग्विधान् ॥ वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसम् ॥ २१ ॥
यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकम् ॥ अतत्त्वार्थवदल्पंचतत्तामसमुदाहृतम् ॥ २२ ॥

न्भौतिकेदेहेप्रतिमादौविकारके ॥ १ ॥ अन्येषांभूतकार्याणामात्मलाभावतःकथम् ॥ एकस्यतादृशस्यात्मभावइत्यविचारतः ॥ २ ॥ परि
पूर्णवदासक्तमेतावानीश्वरोऽल्पकः ॥ आत्मावातःपरंनास्तीत्येवंचाभिनिवेशतः ॥ ३ ॥ दिगंबरमतेयद्वत्सावयवतयामतः ॥ आत्मादेहप
रीमाणश्चार्वाकाणांयथावपुः ॥ ४ ॥ एवंपाषाणदार्वादिमात्रईशोऽपिसंमतः ॥ इत्येकस्मिंस्तदासक्तमहेतुकतयैवच ॥ ५ ॥ तत्त्वार्थालंबनं
नास्तिविभुत्वाद्यग्रहात्तथा ॥ अल्पंचाल्पविषयत्वादत्यंताल्पफलत्वतः ॥ ६ ॥ एवंयन्नास्तिकादीनांज्ञानंतत्तामसंबुधैः ॥ प्राकृतानांविमूढा
नांहेयत्वेनह्युद्दातम् ॥ ७ ॥ २२ ॥

तत्रादौभगवानाहबुद्धेस्त्रैविध्यमादरात् ॥ प्रवृत्तिंकर्ममार्गंचबंधहेतुतयामतम् ॥ १ ॥ निवृत्तिंकर्मसंन्यासमार्गंमोक्षैकसाधनम् ॥ प्रवृत्तिमार्गेकरणंकर्मणामधिकारिणः ॥ २ ॥ निवृत्तौकर्मणांत्यागःप्रवृत्तौभयमामृतम् ॥ निवृत्तावभयंबंधंप्रवृत्तौभ्रांतिजंनृणाम् ॥ ३ ॥ मोक्षंनिवृत्तिमार्गेवैतत्त्वज्ञानप्रसादजम् ॥ वेत्तिबुद्धिर्यथावद्यासात्विकीसामतिःस्मृता ॥ ४ ॥ यावेत्तीत्यत्रकरणेकर्तृत्वमुपचारतः ॥ ययावेत्तिप्रमाणोत्थबुद्ध्याकर्तेतिचार्थतः ॥ ५ ॥ प्रवृत्तावस्तिकर्तव्यंविधिकिंकरतायतः ॥ तत्रास्तिभयमत्यंतंबंधस्तत्रदृढोभवेत् ॥ ६ ॥ निवृत्तौनास्तिकर्तव्यंविध्यादेरप्यभावतः ॥ अभयंतत्रशांतस्यमोक्षःस्यादात्मनिस्थितिः ॥ ७ ॥ ३० ॥ शास्त्रेणविहितंधर्मंचाधर्मंशास्त्रनिंदितम् ॥ दृष्टार्थंवाप्यदृष्टार्थंकरणाकरणेतथा ॥ १ ॥ यथावन्नविजानातीदमित्थंवानवेतिच ॥ अनिश्चयंसंशयंवाययाबुद्ध्याभजत्यसौ ॥ २ ॥ बुद्धिःसाराजसीयत्नाच्छोधनीयामुमुक्षुभिः ॥ ३ ॥ ३१ ॥ तमसादोषरूपेणमतिर्याच्छादितासती ॥ अधर्मंधर्ममित्येवंमन्यतेविपरीतगा ॥ १ ॥ विपर्यस्यतिसर्वत्रविशेषादर्शनाद्यया ॥ दृष्टप्रयोजनान्सर्वान्पदार्थान्मन्यतेऽन्यथा ॥ २ ॥ विपर्ययवतीबुद्धिस्तामसीसात्यनर्थदा ॥ ३ ॥ ३२ ॥

प्रवृत्तिंचनिवृत्तिंचकार्याकार्येभयाभये ॥ बंधंमोक्षंचयावेत्तिबुद्धिःसापार्थसात्विकी ॥ ३० ॥
ययाधर्ममधर्मंचकार्यंचाकार्यमेवच ॥ अयथावत्प्रजानातिबुद्धिःसापार्थराजसी ॥ ३१ ॥
अधर्मंधर्ममितियामन्यतेतमसावृता ॥ सर्वार्थान्विपरीतांश्चबुद्धिःसापार्थतामसी ॥ ३२ ॥

धृतेरिदानींत्रैविध्यंप्राहोदारधियांगतिः ॥ समाधिनाविनाभूतरूपयातत्रलभ्यया ॥ १ ॥ यया धृत्याप्रयत्नेनप्राणस्यमनसःक्रियाः ॥ इंद्रियाणांतथाचेष्टानिरुणद्धिक्रमार्गतः ॥ २ ॥ यस्यांसत्यामवश्यंहिसमाधिर्जायतेसताम् ॥ धार्यमाणायया धृत्यामनःप्राणेंद्रियक्रियाः ॥ ३ ॥ नैवशास्त्रमतिक्रम्यावगाहंतेऽन्यगोचरम् ॥ साधृतिःसात्विकीपार्थमहत्पुण्यवतांभवेत् ॥ ४ ॥ ३३ ॥ कर्तृत्वाभिनिवेशेनफलाकांक्षीचसन्नयया ॥ धर्ममर्थंतथाकामंनित्यंकार्यतयाजनः ॥ १ ॥ धृत्यावधारयत्यच्छंनतुमोक्षंकदाचन ॥ साधृतीराजसीपार्थसंसारैकफलप्रदा ॥ २ ॥

धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः॥ योगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकी ॥ ३३ ॥
ययातुधर्मकामार्थान्धृत्याधारयतेऽर्जुन ॥ प्रसंगेनफलाकांक्षीधृतिःसापार्थराजसी ॥ ३४ ॥
ययास्वप्नंभयंशोकंविषादंमदमेवच ॥ नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी ॥ ३५ ॥
सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ ॥ अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति ॥ ३६ ॥

॥ ३४ ॥ निद्रांत्रासंचसंतापंस्वकीयेष्टवियोगजम् ॥ इंद्रियाद्यवसादंचभोगासक्तिकरंमदम् ॥ १ ॥ नविमुंचतिकिंखेतत्कर्तव्यखेनमन्यते ॥ निर्विवेकोययाधृत्यासाधृतिःपार्थतामसी ॥ २ ॥ ३५ ॥ क्रियाणांकारकाणांचगुणात्रैविध्यमीरितम् ॥ त्रैविध्यंप्रतिजानीतेतत्फलेऽप्यधुनासुखे ॥ १ ॥ हेयादेयेविवेकायवचनान्मेशृणुस्फुटम् ॥ सुखंत्रिविधमत्यंतंसावधानेनचेतसा ॥ २ ॥ सार्धेनसात्विकंप्राहसुखमानंदवारिधिः ॥ सावधानःसुखेयत्राभ्यासात्परिचयाद्रतिम् ॥ ३ ॥ प्रपद्यतेतथायत्ररममाणोऽनुभूतितः ॥ सर्वदुःखोपशमनंनितरांगच्छतिस्वयम् ॥ ४ ॥ ३६ ॥

तदेवविवृणोतीशःसुखब्रह्मप्रसादजम् ॥ ज्ञानवैराग्यसद्ध्यानसमाध्यारंभएवयत् ॥ १ ॥ अत्यंतायाससाध्यत्वाद्विषवद्वेषकृद्भवेत् ॥ ज्ञानादि परिपाकेतुप्रीतेरतिशयास्पदम् ॥ २ ॥ निद्रालस्यादिराहित्याद्बुद्धिर्यास्वच्छतांगता ॥ तस्याआत्मावलंबिन्याःप्रसादाज्जातमांतरम् ॥ ३ ॥ तत्समाधिसुखंप्रोक्तंसात्त्विकंयोगवित्तमैः ॥ ४ ॥३७॥ विषयेंद्रियसंबंधाद्यदत्यंतप्रसिद्धिमत् ॥ स्रक्चंदनस्त्रीसंगादिसुखंस्यात्प्रथमेक्षणे ॥ १॥ धीसंयमादिसंक्लेशाभावादमृतवन्नृणाम् ॥ परिणामेतुदुःखानामाकरत्वाद्विषोपमम् ॥ २ ॥ इहामुत्रातिसंस्कारजननद्वारतःसदा ॥ संसृति श्रमदंतच्चसुखंराजसमीरितम् ॥ ३ ॥ ३८ ॥ आद्यक्षणेतथापश्चात्परिणामेऽपियत्सुखम् ॥ अविवेककरंस्वप्ननिद्रादिभ्यःसमुत्थितम् ॥ १ ॥

यत्तदग्रेविषमिवपरिणामेऽमृतोपमम् ॥ तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥
विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ॥ परिणामेविषमिवतत्सुखंराजसंस्मृतम् ॥ ३८ ॥
यदग्रेचानुबंधेचसुखंमोहनमात्मनः ॥ निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतम् ॥ ३९ ॥
नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः ॥ सत्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः ॥ ४० ॥

अत्यंतानर्थहेतुत्वात्तत्सुखंतामसंस्मृतम् ॥ २ ॥ ३९ ॥ अनुक्तमपिसंगृह्णन्नर्थंप्रकृतमीश्वरः ॥ उपसंहरतीदानींगुणातीतोजगत्पतिः ॥ १ ॥ प्रकृतिर्यैश्वरीमायातयैवपरिकल्पितैः ॥ सत्वादिभिर्गुणैरेभिस्त्रिभिर्बंधनहेतुभिः ॥ २ ॥ हीनंसत्वंप्राणिजातंस्यादप्राण्यथवेहयत् ॥ मनुष्यादि ष्वभूमौवादेवेषुत्रिदिवेऽथवा ॥ ३ ॥ पातालेवाथकुत्रापिनास्त्येवेतिविनिश्चितम् ॥ गुणत्रयविहीनंहिनास्त्यनात्ममयंजगत् ॥ ४ ॥ यतोमा याकृतंविश्वंत्रिगुणात्मकमेवहि ॥ ५ ॥ ४० ॥

कामाद्याकुलचित्तोयःफलार्थीकर्मणःसदा ॥ परद्रव्याभिलाषीस्वंतीर्थेऽपित्यक्तुमक्षमः ॥ १ ॥ स्वाशयोद्घाटनेनान्यवृत्तिच्छेदनशीलवान् ॥ शास्त्रोक्तशौचरहितःसिद्ध्यसिद्ध्योःफलस्यच ॥ २ ॥ हर्षशोकान्वितःकर्ताराजसःपरिकीर्तितः ॥ ३ ॥ २७ ॥ विषयाकृष्टचित्तत्वात्कर्तव्येष्वसमाहितः ॥ शास्त्रासंस्कृतबुद्धित्वाद्बालतुल्योऽतिपामरः ॥ १ ॥ अनम्रोगुरुदेवादौपरवंचनतत्परः ॥ स्वस्मिन्नौत्कृष्ट्यमुत्पाद्यपरवृत्तिविघातकः ॥ २ ॥ अवश्यमेवकर्तव्येऽप्यप्रवृत्तिस्वभावकः ॥ सदासंतुष्टशीलत्वादनुशोचनतत्परः ॥ ३ ॥ सदाशंकासहस्रेणग्रस्तचित्ततयालसः ॥

रागीकर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोऽशुचिः ॥ हर्षशोकान्वितःकर्ताराजसःपरिकीर्तितः ॥ २७ ॥
अयुक्तःप्राकृतःस्तब्धःशठोनैकृतिकोऽलसः ॥ विषादीदीर्घसूत्रीचकर्तातामसउच्यते ॥ २८ ॥
बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधंशृणु ॥ प्रोच्यमानमशेषेणपृथक्त्वेनधनंजय ॥ २९ ॥

अतिमंदप्रवृत्तिःश्वोवाद्यकार्यंकरोतिन ॥ ४ ॥ मासेनापियएवंस्यात्कर्ताप्रोक्तःसतामसः ॥ ५ ॥ २८ ॥ ज्ञानंकर्मचकर्ताचतदेवंत्रयमीरितम् ॥ इदानींप्रतिजानीतेत्रैविध्यंबुद्धिधैर्ययोः ॥ १ ॥ बुद्धेरद्ध्यवसायादिवृत्तिमत्याधृतेस्तथा ॥ सत्वादिगुणतोभेदंत्रिविधंतांप्रतिस्फुटम् ॥ २ ॥ प्रोच्यमानंमयास्तेनहेयादेयविवेकतः ॥ सावधानोभवश्रोतुंसाल्कयेनधनंजय ॥ ३ ॥ बुद्ध्युपाधिश्चिदाभासःकर्ताप्रोक्तःपुरात्रतु ॥ करणत्वेननिष्कृष्योपाधिमात्रंविवक्षितम् ॥ ४ ॥ २९ ॥

तत्रब्राह्मणकर्माणिस्वाभाविकगुणेनवै ॥ कृतान्याहकृपासिंधुःसर्वकर्मफलप्रदः ॥ १ ॥ शमोंऽतःकरणेशांतिर्बाह्येंद्रियशमोदमः ॥ तपःस्वधर्मवर्तित्वंप्रागुक्तंवात्रिधातपः ॥ २ ॥ बाह्याभ्यंतरभेदेनशौचंद्विविधमीरितम् ॥ क्षांतिर्द्वंद्वसहिष्णुत्वमार्जवंसमचित्तता ॥ ३ ॥ ज्ञानंस्यात्सांगवेदार्थविषयंसत्वभागजम् ॥ विज्ञानंकर्मकांडेस्यात्कौशलंयज्ञकर्मसु ॥ ४ ॥ ब्रह्मकांडेऽपिवेदांतनिर्णयेऽतिप्रगल्भता ॥ ज्ञानंवेदांतविषयंप्रोक्तंचैवमहर्षिभिः ॥ ५ ॥ यत्पुनर्वैदिकीनांचलौकिकीनांचसर्वशः ॥ धारणंसर्वविद्यानांविज्ञानमितिकीर्त्यते ॥ ६ ॥ इत्यर्थंऋषिभिःप्रोक्तःकर्मप्रस्तावएतयोः ॥ आस्तिक्यंसात्विकीश्रद्धाब्रह्मात्मैक्यादिदर्शने ॥ ७ ॥ एतच्छमादिनवकंशुद्धसत्वगुणोद्भवम् ॥ कर्मब्राह्मणजातेस्तत्सत्वोद्रेकवशेनवै ॥८॥ चतुर्णामपिवर्णानांसत्वोद्रेकेणयद्यपि ॥ संभवंतिगुणाएतेतथापिब्राह्मणेत्वमी ॥९॥ शुद्धसत्वस्वभावत्वाद्बाहुल्येनभवंतिते ॥ साधारणतयाप्युक्ताधर्माएतेयतोनृणाम् ॥१०॥ क्षमासत्यंदमःशौचंदानमिंद्रियसंयमः ॥ अहिंसागुरुशुश्रूषाशास्त्रानुसरणंदया ११॥

शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ॥ ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजम् ॥ ४२ ॥
शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनम् ॥ दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजम् ॥ ४३ ॥

आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनम् ॥ अनभ्यसूयाचतथाधर्मःसामान्यउच्यते ॥१२॥ तथापिब्राह्मणानांतुस्वभावात्संपदीरिता ॥ आगंतुकीतरेषांस्याद्विशेषोऽयंविचार्यताम् ॥ १३ ॥ शमदमतपआदिब्रह्मकर्माणुमात्रंनहिशरणमिहास्तिब्रह्मबंधोर्ममाद्धा ॥ अशरणशरणंश्रीकृष्णएवास्तुनित्यंशरणमिहभवाब्धौमज्जतोभ्रांत्यगाधे ॥ १४ ॥ ४२ ॥ क्षत्रियस्यस्वभावोत्थकर्माण्याहाधुनाहरिः ॥ शौर्यंपराक्रमस्तेजःप्रागल्भ्यंचान्यदुःसहम् ॥ १ ॥ धृतिर्महत्यांविपदिदेहाद्यनवसादनम् ॥ उपस्थितेषुकार्येषुदाक्ष्यंसम्यक्प्रवृत्तिता ॥ २ ॥ युद्धेऽपराङ्मुखीभावोदानंपात्रेषुशास्त्रतः॥ असंकोचेनवित्तेषुस्वस्वत्वत्यागपूर्वकम् ॥ ३ ॥ परस्वत्वापादनंस्यादीश्वरेभावदर्शनम् ॥ प्रजारक्षार्थमैश्वर्यादीशितव्येषुजंतुषु ॥ ४ ॥ उद्घाटनंप्रभोःशक्तेःक्षत्रियस्यस्वभावजम् ॥ विहितंक्षत्रियाख्यायाजातेःकर्मगुणानुगम् ॥ ५ ॥ ४३ ॥

तदेवंसर्वसंसारोमिथ्याज्ञानप्रकल्पितः ॥ गुणत्रयात्मकोऽनर्थःक्रियाकारकलक्षणः ॥ १ ॥ उक्तश्चतुर्दशाध्यायेपुनस्तत्रोपसंहृतः ॥ तथापं चदशेवृक्षरूपकेणापिवर्णितः ॥ २ ॥ शितेनासंगशस्त्रेणभोगवैराग्यरूपिणा ॥ तस्यसंछेदनंकृत्वान्वेष्टव्यंपदमीरितम् ॥ ३ ॥ सर्वस्यत्रिगुणा त्मत्वेसंसाराख्यतरोःकथम् ॥ छेदोऽप्यसंगशस्त्रेणसंभवेत्त्रिगुणात्मनः ॥ ४ ॥ असंगशस्त्रंवैराग्यंतस्याप्यनुपपत्तितः ॥ एवंप्राप्तेहरिःप्राहसाध नंश्रुतिसंमतम् ॥ ५ ॥ स्वस्वाधिकारविहितैर्धर्मैर्वर्णाश्रमोदितैः ॥ परितोष्यमाणादीशाद्वैराग्यप्राप्तिरंजसा ॥६॥ ततोवेदांतवाक्योत्थसम्य ग्धीजन्ममात्रतः ॥ सकार्याज्ञानमाबाध्यकृतकृत्योऽभिजायते ॥ ७ ॥ एतावान्सर्ववेदार्थोऽप्यनुष्ठेयोमुमुक्षुभिः॥ तथैवगीताशास्त्रार्थउपसंहार मर्हति ॥ ८ ॥ इत्येवमर्थमारंभसंदर्भस्योत्तरस्यच ॥ त्रयाणांहिद्विजत्वेनस्वाध्यायाध्ययनादिना ॥ ९ ॥ तुल्यधर्मत्वबोधार्थसमासकरणंकृ

ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप ॥ कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः ॥ ४१ ॥

तम् ॥ शूद्राणामेकजातित्वात्स्वाध्यायानधिकारिता ॥ १० ॥ अस्तीतिज्ञापनार्थायययत्पृथक्करणंकृतम् ॥ तेषांचतुर्णांवर्णानांपरस्परविभा गतः ॥ ११ ॥ व्यवस्थितानिकर्माणिस्वभावप्रभवैर्गुणैः ॥ तत्रसत्वगुणोविप्रस्वभावस्यास्तिकारणम् ॥ १२ ॥ प्रशांतत्वात्तथाभूपस्वभा वस्यरजोगुणः ॥ सत्वोपसर्जनोयस्मादीश्वरत्वंनृपेभवेत् ॥ १३ ॥ तमोगौणरजोवैश्यस्वभावस्यास्तिकारणम् ॥ तस्यापीहास्वभावत्वाद्र जोमुख्यत्वमस्त्यतः ॥ १४ ॥ रजोगौणतमःशूद्रस्वभावस्यास्तिकारणम् ॥ तस्यमूढस्वभावत्वादित्येवंगुणनिर्णयः ॥ १५ ॥ मायाख्याप्रकृ तिर्यद्वास्वभावःसर्वगःस्मृतः ॥ ततएवास्त्युपादानाद्येषांप्रभवइत्यपि ॥ १६ ॥ प्राग्भवीयोऽपिसंस्कारोवर्तमानभवेऽथवा ॥ स्वफलाभिमुख त्वेनाभिव्यक्तःप्रभवःसच ॥ १७ ॥ स्वभावःकारणंयेषांतैर्विभक्तानिवागुणैः ॥ आगमेनैवकर्माणिप्रविभक्तानियद्यपि ॥ १८ ॥ तथाप्य स्त्येवशास्त्रस्यतत्स्वभावाद्यपेक्षता ॥ १९ ॥ ४१ ॥

मायोपाधिकचैतन्यानंदैकघनरूपतः ॥ सर्वज्ञात्सर्वशक्तेःश्रीपरमेश्वरतोयतः ॥ १ ॥ उपादानान्निमित्ताच्चसर्वांतर्यामिणःसतः ॥ मायाम
यीसमुत्पत्तिर्भूतानांजनिधर्मिणाम् ॥ २ ॥ खादीनांभौतिकानांचकल्पितानांमृषात्मनाम् ॥ सत्तास्फुरणरूपेणयेनचैकेनसर्वथा ॥ ३ ॥
दृश्यजातमिदंसर्वंसदाव्याप्तमसंगिना ॥ नातिरेकोऽस्त्यधिष्ठानात्कल्पितस्यमनागपि ॥ ४ ॥ यतोवेत्यादिवाक्योक्तोदर्शितोऽर्थइहस्फुटम् ॥
तमंतर्यामिणंविष्णुंस्ववर्णाश्रमकर्मणा ॥ ५ ॥ तोषयित्वात्मविज्ञानोत्पत्तियोग्यलक्षणाम् ॥ तत्प्रसादाद्धियःशुद्धिसिद्धिंतांलभतेनरः॥६॥
वर्णाश्रमंयमधिकृत्यधियोविशुद्ध्यैधर्मःश्रुतौविहितईशसमर्चनाख्यः ॥ तेनेश्वरंयमधिकारिजनःसमर्च्यप्राप्नोतिसिद्धिमनिशंतमहंप्रपद्ये ॥ ७ ॥

यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततम् ॥ स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः ॥ ४६ ॥
श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् ॥ स्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषम् ॥४७॥

॥ ४६ ॥ यतःस्वधर्मएवास्तिभगवत्तोषकारणम् ॥ अतोवरेण्यःस्वोधर्मोऽसम्यक्त्वेनाप्यनुष्ठितः॥१॥ परधर्मादविहितात्सम्यक्त्वेनाप्यनुष्ठितात्॥
क्षत्रियेणसतातस्मात्स्वधर्मोभवताधुना ॥ २ ॥ संग्रामादिरनुष्ठेयोनतुभिक्षादिरन्यगः॥ ननुयुद्धंस्वधर्मोऽपिबंधुहिंसादिपापकृत् ॥ ३ ॥ कथं
मयास्त्यनुष्ठेयइत्याशंक्याहमापतिः ॥ पूर्वोक्तंशौर्यमुख्यंयत्क्षत्रियस्यस्वभावजम् ॥ ४ ॥ युद्धादिकर्मकुर्वन्नपापंहिंसादिदोषजम् ॥ शास्त्रप्रा
प्ततयाप्नोतिवैधीहिंसानपापदा ॥ ५ ॥ ज्योतिष्टोमांगपश्वादिहिंसायाइवशास्त्रतः ॥ युद्धांगबंधुहिंसायाःप्रत्यवायेनहेतुता ॥ ६ ॥ ४७ ॥

यतोविहितहिंसादेःप्रत्यवायेनहेतुता ॥ भीतिदःपरधर्मश्चसर्वकर्मकलंकवत् ॥ १ ॥ तस्मादज्ञोऽधिकारीयोवर्णाश्रममतिःपुमान् ॥ स्वभाव
जंत्यजेन्नैवकर्मदोषान्वितंह्यपि ॥ २ ॥ ज्योतिष्टोमादिकंयद्वत्तथायुद्धादिकर्मच ॥ अंतःकरणशुद्धेःप्राग्भवान्वान्योऽथवाजनः ॥ ३ ॥ ना
न्यःकश्चित्क्षणंजातुविनाकर्मेहतिष्ठति ॥ समुत्पन्नंयतःकर्मसर्वेषांजन्मनासह ॥ ४ ॥ नचान्यधर्मानुष्ठायीदोषान्मुच्यतआग्रही ॥ स्वधर्माःप
रधर्माश्चसर्वारंभपदेरिताः ॥ ५ ॥ यस्माच्चैगुण्यदोषेणसामान्येनावृताःकिल ॥ विकारतापसंस्कारैर्गुणवृत्तिविरोधतः ॥ ६ ॥ दुःखमेवजग

सहजंकर्मकौंतेयसदोषमपिनत्यजेत् ॥ सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः ॥ ४८ ॥

त्सर्वंकर्मजन्यंविवेकिनः ॥ केवलंमूढबुद्धीनांसुखवद्भासतेजगत् ॥ ७ ॥ तस्मादगत्यानात्मज्ञःकुर्वन्कर्माणिशास्त्रतः ॥ तिष्ठेत्त्यागासमर्थश्चय
तोऽसौसर्वकर्मणाम् ॥ ८ ॥ कर्मत्यागसमर्थस्तुशुद्धांतःकरणःपुमान् ॥ सवेदांतविचारार्थंसर्वविक्षेपकंत्यजेत् ॥ ९ ॥ करोतुकर्माणिसमाकरो
तुवामुकुंदपादाब्जरसग्रहःसुधीः ॥ गृहेवनेवानिवसन्भ्रमोज्झितोमुकुंदएवास्तिसयोहितद्रतिः ॥ १० ॥ ४८ ॥

योविवेकादिसामग्र्यासंपन्नःसन्विशुद्धधीः ॥ सत्त्वाशुद्धिक्षयद्वारामुमुक्षुःसंयतेंद्रियः ॥ १ ॥ शुद्धब्रह्मैक्यजिज्ञासांप्राप्तोवेदांतसद्गिराम् ॥ श्रवणाद्यादरात्कर्तुंनिर्विक्षेपतयासदा ॥ २ ॥ तच्छेषभूतंसंन्यासंश्रुत्यादिविहितंचरेत् ॥ सकीदृशोऽस्तिजिज्ञासुरित्यत्राहजगद्गुरुः ॥ ३ ॥ सर्वत्रपुत्रदारादौममेत्यासंगकारणे ॥ अहमेषांममैतेचेत्यभिष्वंगविवर्जिता ॥ ४ ॥ बुद्धिर्यस्यतस्तेनस्ववशेस्थापितंमनः ॥ विषयेभ्योऽपि सर्वेभ्यःप्रत्याहृत्यविवेकतः ॥ ५ ॥ सतिरागेकथंचेतःप्रत्याहरणमाचरेत् ॥ तत्राहसर्वदृश्येषुभोगजालेषुसर्वशः ॥ ६ ॥ दोषदृष्ट्याविरक्तः

असक्तबुद्धिःसर्वत्रजितात्माविगतस्पृहः ॥ नैष्कर्म्यसिद्धिंपरमांसंन्यासेनाधिगच्छति ॥ ४९ ॥

सञ्जातोयोविगतस्पृहः ॥ नित्यबोधपरानंदरूपेमोक्षेचतत्परः ॥ ७ ॥ सएवंपुरुषश्रेष्ठोविचारैकपरायणः ॥ निष्कर्मब्रह्मतज्ज्ञानंनैष्कर्म्यं तत्स्वरूपिणीम् ॥ ८ ॥ सिद्धिंसाधनसंपत्त्याप्रकृष्टांफललक्षणाम् ॥ संन्यासेनैवतत्पूर्वविचारेणाधिगच्छति ॥ ९ ॥ यद्वासंन्यासरूपांतां सिद्धिंनैर्गुण्यलक्षणाम् ॥ उत्कृष्टांपूर्वसात्विक्याःसिद्धेःफलस्वरूपिणीम् ॥ १० ॥ ब्रह्मात्मैक्यपरानंदसाक्षात्कारैकयोग्यताम् ॥ प्राप्नोती त्यर्थएवास्तुचेत्थंभावेतृतीयया ॥ ११ ॥ ४९ ॥

भूमेर्विलेखनंसस्यनिष्पत्यर्थंकृषिःस्मृता ॥ गोरक्ष्यंपाशुपाल्यंस्याद्वाणिज्यंक्रयविक्रयौ ॥ १ ॥ वैश्यजातेरिदंकर्मगुणनिष्ठस्वभावजम् ॥ द्विज
शुश्रूषणंकर्मशूद्रस्यापिस्वभावजम् ॥ २ ॥ ४४ ॥ तदेवंस्वस्ववर्णेयोविहितंकर्मशास्त्रतः ॥ अनुतिष्ठतितस्यास्तिसम्यक्सिद्धिर्महात्मनः ॥ १ ॥
अवांतरफलंचैवस्वस्वकर्मानुतिष्ठताम् ॥ स्वर्गादिभवतीत्येवंपुराणेवैष्णवेस्मृतम् ॥ २ ॥ प्राजापत्यंब्राह्मणानांस्मृतंस्थानंक्रियावताम् ॥
स्थानमैंद्रंक्षत्रियाणांसंग्रामेष्वनुवर्तिनाम् ॥ ३ ॥ वैश्यानांमारुतंस्थानंस्वधर्ममनुवर्तिनाम् ॥ गांधर्वंशूद्रजातीनांपरिचर्यानुवर्तिनाम् ॥ ४ ॥
एवंधीशुद्ध्यभावेतत्फलंधर्मानुसारिणाम् ॥ फलाभिसंधिसंत्यागादीशार्पणधियाकृतम् ॥ ५ ॥ चित्तशुद्ध्यात्मबोधेनमोक्षहेतुःस्वकर्मतत् ॥
अतस्त्यक्त्वाफलासक्तिमीश्वरार्पणचेतसा ॥ ६ ॥ कर्मकर्तव्यमित्याहस्वयंश्रीपरमेश्वरः ॥ यथोक्तलक्षणेस्वेस्वेतत्तद्वर्णेतथाश्रमे ॥ ७ ॥ विहि

कृषिगोरक्षवाणिज्यंवैश्यकर्मस्वभावजम् ॥ परिचर्यात्मकंकर्मशूद्रस्यापिस्वभावजम् ॥ ४४ ॥
स्वेस्वेकर्मण्यभिरतःसंसिद्धिंलभतेनरः ॥ स्वकर्मनिरतःसिद्धिंयथाविंदतितच्छृणु ॥ ४५ ॥

तेवैदिकेस्मार्तेकर्मण्यभिरतःपुमान् ॥ यथाशास्त्रमनुष्ठानपरोऽहंकारवर्जितः ॥ ८ ॥ कर्मानुष्ठानतःसिद्धिंचित्ताशुद्धिपरिक्षयात् ॥ विज्ञानो
त्पत्तियोग्यतांलभतेऽधिकृतोनरः ॥ ९ ॥ वर्णाश्रमाभिमानित्वान्मनुष्योऽत्राधिकारवान् ॥ नदेवादिर्यतस्तेषांदेवादीनांनचास्त्यसौ ॥ १० ॥
वर्णाश्रमाभिमानोऽतोनास्तिकर्माधिकारता ॥ वर्णाश्रमाभिमानानपेक्षेब्रह्मावबोधने ॥११॥ तेषामप्यधिकारोऽस्तीत्युक्तंशारीरकेस्फुटम् ॥
नन्वेषांबंधहेतूनांमोक्षकारणताकथम् ॥ १२ ॥ कर्मणामितिचेदित्थमुपायांतरतःशृणु ॥ यथोक्तलक्षणांसिद्धिंयेनोपायेनविंदति ॥ १३ ॥
तच्छृणुत्वंतमाकर्ण्यप्रकारमवधारय ॥ १४ ॥ ४५ ॥

महाकुलप्रसूतोऽहंविरक्तोऽन्योनमत्समः ॥ इत्येवमभिमानंचबलमत्राऽसदाग्रहम् ॥ १ ॥ नशारीरंयतस्तस्यस्वाभाविकतयाजनैः ॥ त्यागः कर्तुमशक्योऽस्तिदर्पहर्षंचदुर्मदम् ॥ २ ॥ धर्मातिक्रमणेहेतुंतदुक्तंचस्मृतौस्फुटम् ॥ हृष्टोदृप्यतिदृप्तःसन्नतिक्रामतिधर्मतः ॥ ३ ॥ कामंभोगाभिलाषंचक्रोधंद्वेषंपरिग्रहम् ॥ बाह्योपकरणंसर्वंयद्यद्विक्षेपकारणम् ॥ ४ ॥ परित्यज्याखिलानेतान्देहधारणमात्रके ॥ ममत्वरहितःशांतश्चित्तविक्षेपवर्जितः ॥ ५ ॥ ज्ञानसाधनसामग्रीपरिपाकक्रमेणच ॥ ब्रह्मभावाययतिराट्समर्थोभवतिस्वयम् ॥ ६ ॥ अहंकारादिषट्कंचसम्यग्वैराग्यवैभवात् ॥ तथाविवेकसामग्र्यावेदांतानांविचारणात् ॥ ७ ॥ नैरंतर्येणसत्संगद्वाराभ्यासादिवैभवात् ॥ त्यक्तुंशक्यंभवेद्यस्मा

अहंकारंबलंदर्पंकामंक्रोधंपरिग्रहम् ॥ विमुच्यनिर्ममःशांतोब्रह्मभूयायकल्पते ॥ ५३ ॥
ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति ॥ समःसर्वेषुभूतेषुमद्भक्तिंलभतेपराम् ॥ ५४ ॥

न्नान्यथातोविवेकवान् ॥ ८ ॥ भगवत्पदमालंब्यसतांसंगेनसर्वदा ॥ अभ्यसेद्ब्रह्मवस्त्वैक्यंश्रीहरेरयमाशयः ॥ ९ ॥ ५३ ॥ येनक्रमेणब्रह्मात्मभावयोग्योभवेन्मुनिः ॥ तदाहब्रह्मभूतश्चब्रह्मास्मीतिसुनिश्चितः ॥ १ ॥ श्रवणादेःसदाभ्यासात्प्रसन्नात्माविशुद्धधीः ॥ शमाद्यभ्यासतोनष्टमिष्टंवस्तुनशोचति ॥ २ ॥ नाप्राप्तंकांक्षतिस्वस्थःसर्वभूतेष्वयःसमः॥ आत्मौपम्येनसर्वत्रसुखंदुःखंचपश्यति ॥ ३ ॥ ज्ञाननिष्ठःपुमानेवंमयिशुद्धेपरात्मनि ॥ उपासनांमदाकारधीवृत्त्यावृत्तिरूपिणीम् ॥ ४ ॥ श्रवणादेःसदाभ्यासफलभूतामनुत्तमाम् ॥ निदिध्यासनसंसिद्धांसाक्षात्कारफलांपराम् ॥ ५ ॥ मद्भक्तिंलभतेधीरश्चतुर्थींज्ञानलक्षणाम् ॥ ६ ॥ ५४ ॥

पूर्वोक्तसाधनैःसर्वैःसंपन्नस्यविवेकिनः॥ मुमुक्षोर्ब्रह्मविज्ञानसाधनक्रमउच्यते ॥१॥ स्वकर्मणेशमाराध्यसिद्धिंतस्यप्रसादजाम् ॥ चित्तशुद्धिंपरिप्राप्तोविज्ञानोत्पत्तियोग्यताम् ॥२॥ ब्रह्मयेनप्रकारेणप्रत्यगद्वयचिद्घनम् ॥ साक्षात्करोतिसंशुद्धमात्मानंपरमंसुखम् ॥३॥ ममवाक्यात्प्रकारंतंकर्तुंत्वमवधारय ॥ संक्षेपेणैवकौंतेयनतुविस्तरशःपुनः॥ ४ ॥ तस्यावधारणेयत्स्यात्तच्छृणुत्वंसमाहितः ॥ निष्पन्नस्यविचारेणज्ञानस्याज्ञानघातिनः ॥ ५ ॥ निष्ठापरिसमाप्तिर्यांप्राप्यकार्यंनकिंचन ॥ साक्षान्मोक्षैकहेतुत्वात्सर्वांत्यायापरास्मृता ॥ ६ ॥ तांत्वंसंक्षेपतःश्रुत्वातत्परोभवसर्वदा ॥ ७ ॥ ५० ॥ सप्रकारोच्यतेसेयंज्ञाननिष्ठामहाफला ॥ ब्रह्मैवास्मीतिवेदांतवाक्यनिष्पन्नयाधिया ॥ १ ॥ सर्वसंदेहविभ्रांतिशू

सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिनिबोधमे ॥ समासेनैवकौंतेयनिष्ठाज्ञानस्ययापरा ॥ ५० ॥ बुद्ध्या
विशुद्धयायुक्तोधृत्यात्मानंनियम्यच ॥ शब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच ॥ ५१ ॥
विविक्तसेवीलघ्वाशीयतवाक्कायमानसः ॥ ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः ॥ ५२ ॥

न्ययातिविशुद्धया ॥ युक्तोधैर्येणदेहादिसंघातंविनियम्यच ॥ २ ॥ निवार्योन्मार्गतोब्रह्मतत्त्वेऽवस्थाप्यचिद्घने ॥ ज्ञाननिष्ठाविरुद्धांश्चत्यक्त्वाशब्दादिगोचरान् ॥ ३ ॥ शरीरस्थितिमात्रार्थेरागद्वेषौविहायच ॥ ज्ञानविक्षेपकंसर्वंसंत्यज्येतिचकारतः ॥ ४ ॥ ५१ ॥ विविक्तंजनसंदोहशून्यंगिरिगुहादिकम् ॥ पवित्रंसेवितुंशीलंयस्यलघ्वशितंतथा ॥ १ ॥ यतानियस्यवाक्कायमानसानिसमंततः॥ विक्षेपलयसामग्रीशून्योयुक्तोयमादिभिः ॥ २ ॥ ब्रह्मात्मप्रत्ययावृत्तिर्ध्यानंयोगस्तथात्मनि ॥ एकाग्रीकरणंवृत्तेस्तयोरेवपरःसदा ॥ ३ ॥ नतुमंत्रजपादौयस्तत्परःसन्कदाचन ॥ दृष्टादृष्टेषुभोगेषुवैतृष्ण्यंनित्यमाश्रितः ॥ ४ ॥ ५२ ॥

देहादिस्थितिसिद्ध्यर्थंनिर्वाह्यंतत्कथंचन ॥ आभासमात्रदेहादावहंकारोऽपितादृशः॥ १५ ॥ नहितेनविनातज्ज्ञदेहादिस्थितिसंभवः ॥ नवा
तेनाप्यहंकाराभासेनात्मविदःक्षतिः ॥ १६ ॥ तदुक्तंजानकीनाथंराघवंप्रतिसद्वचः ॥ वसिष्ठेनापिनिर्वाणेपाषाणाख्यायिकास्थले ॥ १७ ॥
अहंभावंविनादेहस्थितिस्तज्ज्ञाज्ञयोरिह ॥ आधेयस्यनिराधारानसंस्थेहोपपद्यते ॥१८ ॥ अहंभावपिशाचोऽयमज्ञानशिशुनाविना ॥ अवि
द्यमानएवांतःकल्पितस्तेनसुस्थितः ॥१९॥ अज्ञानमपिनास्त्येवप्रेक्षितंयन्नलभ्यते ॥ विचारिणादीपवतास्वरूपंतमसोयथा ॥ २० ॥ किल

ततोमांतत्त्वतोज्ञात्वाविशतेतदनंतरम् ॥ ५५ ॥

सत्यामविद्यायामज्ञतोदेतिशाश्वती ॥ बुद्धिमोहात्मिकायक्षीनिर्देहैवयथानिशि ॥ २१ ॥ एवंस्थितेकुतःसर्गःकुतोविद्याक्वचाज्ञता ॥ ब्रह्मशां
तंघनंसर्वंकाहंकारादयःस्थिताः ॥ २२ ॥ अहंभावस्यसंशांतिरेषासौकथितातव ॥ अहंभावःपरिज्ञातःपिशाचइवशाम्यति ॥२३ ॥ चित्रा
ग्निदाहोविज्ञातोयथादाह्येषुनिष्फलः ॥ तथाहंभावसर्गादिज्ञातंनिष्फलतामियात् ॥ २४ ॥ एवंतत्त्वविदांदृष्ट्यानास्त्यहंकारएवच ॥ अतो
नित्यविमुक्तःसन्मुच्यतेसन्निवर्तते ॥ २५ ॥ इत्येवंश्रीहरेर्भावोगम्यतेवेदवाक्यतः ॥ २६ ॥ ५५ ॥

अज्ञोधीशुद्धिपर्यंतंसहजंकर्मनत्यजेत् ॥ शुद्धांतःकरणोयस्तुनैष्कर्म्यंसोऽधिगच्छति ॥ १ ॥ संन्यासेनेतिपूर्वोक्तंसंन्यासोब्राह्मणेनवै ॥ कर्तव्योनान्यवर्णेनेत्युक्तंभगवतापुरा ॥ २ ॥ कर्मणैवहिसंसिद्धिमास्थिताजनकादयः ॥ चित्तशुद्धिमतस्तत्रकिंकर्मकरणंवरम् ॥ ३ ॥ नृपादेर्वाथसंन्यासइत्यत्राहजगत्पतिः ॥ पूर्वोक्तैःकर्मभिर्यस्तुशुद्धांतःकरणःपुमान् ॥ ४ ॥ सोवऽश्यंभगवत्कृष्णपादैकशरणोभवेत् ॥ श्रीमद्भगवतःपादसरोजेभक्तिरुत्तमा ॥ ५ ॥ चित्तशुद्धेःफलंश्रेष्ठंततोज्ञानाद्विमुक्तता ॥ ईदृशोब्राह्मणश्चेत्स्यात्परवैराग्यसंयुतः ॥ ६ ॥ ससर्वकर्मसंन्यस्यभगवच्छरणंव्रजेत् ॥ तस्यसंसारतोमोक्षःस्याद्भगवत्प्रसादतः ॥ ७ ॥ ईदृशःक्षत्रियादिश्चेत्संन्यासेऽधिकृतोनसः ॥ स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ॥ ८ ॥ इतिब्राह्मणधर्मस्यसंन्यासस्यचकर्मणाम् ॥ क्षत्रियादिंप्रतिश्रीमद्विष्णुनैवनिषेधतः ॥ ९ ॥ संन्यासानधिकारात्सकुर्वाणः

सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोतिशाश्वतंपदमव्ययम् ॥ ५६ ॥
चेतसासर्वकर्माणिमयिसंन्यस्यमत्परः ॥ बुद्धियोगमुपाश्रित्यमच्चित्तःसततंभव ॥ ५७ ॥

सन्सदैवच ॥ सर्वकर्माणिवर्णादिधर्मरूपाणिमत्परः ॥ १० ॥ भगवान्वासुदेवोऽहंकृष्णएवव्यपाश्रयः ॥ शरणंयस्यनित्यंसमदेकशरणोमहान् ॥ ११ ॥ मय्येवार्पितसर्वात्मभावोऽसौमदनुग्रहात् ॥ हिरण्यगर्भवत्सम्यङ्निर्द्विज्ञानजनेस्ततः ॥ १२ ॥ नित्यकूटस्थंस्वंज्योतिःपदंप्राप्नोतिवैष्णवम् ॥ १३ ॥ ५६ ॥ यस्मान्मदेकशरणभावोमोक्षस्यसाधनम् ॥ नकर्मकरणंनापिकर्मसंन्यासएववा ॥ १ ॥ तस्माद्विवेकबुद्ध्यालंदृष्टादृष्टार्थकान्यपि ॥ सर्वकर्माणिमय्याद्येवासुदेवेसमर्प्यच ॥ २ ॥ यत्करोषियदश्नासीत्युक्तन्यायेनमत्परः ॥ भगवान्वासुदेवोऽहंयस्यप्रियतमःपरः ॥ ३ ॥ समत्परस्त्वंपूर्वोक्तंसमताबुद्धिलक्षणम् ॥ योगंह्यनन्यशरणतयास्वीकृत्यसर्वदा ॥ ४ ॥ वासुदेवेभगवतियस्यचित्तंमयीश्वरे ॥ नान्यत्रराजनिरुद्यादौसमच्चित्तःसदाभव ॥ ५ ॥ हृत्खेरूढमनाविलंरसपदंहासप्रकाशोज्ज्वलंकारुण्यादिगुणौघशैत्यशरणंशांत्यान्वितंछायया ॥ अज्ञानार्कजतापघर्मशमनंसच्चातकैरर्थितंब्रह्मानंदसुवर्षणोन्मुखमहंकृष्णाख्यमेघंश्रये ॥ ६ ॥ ५७ ॥

मच्चित्तस्त्वंहिसर्वाणिदुस्तराणिसमुद्रवत् ॥ संसारदुःखदायीनिकामक्रोधादिकान्यपि ॥१॥ मत्प्रसादात्सुखेनैवसव्यापारंविनापिच ॥ अति
क्रमिष्यसिप्रत्यग्ब्रह्मज्ञानमुखेनच ॥ २ ॥ यदितुत्वंमदुक्तेऽर्थेनिःसंदिग्धेऽपिमौढ्यतः ॥ अविश्वासादहंकारात्खंडितोऽसीतिगर्वतः ॥ ३ ॥
नश्रोष्यसिवचोमत्तःश्रुत्वापिनकरिष्यसि ॥ विनंक्ष्यसितदासम्यक्पुरुषार्थात्परिच्युतः ॥ ४ ॥ कामकारेणयत्किंचित्कुर्वन्नाप्नोतिशोभनम्
॥ ५ ॥ अज्ञानार्कसुतापितंभवमरौधावंतमर्थोज्झितंतृष्णातृट्परितापितेंद्रियगणंभोगांबुकामाकुलम् ॥ व्यर्थक्रोधमरुप्रतप्तसिकतादग्धाग
माध्वांघ्रिकंदीनंत्वांशरणागतंयदुपतेमामामुपेक्षस्वभोः ॥ ६ ॥ ५८ ॥ धार्मिकोऽहंनचक्रूरंकर्महिंसादिलक्षणम् ॥ करिष्यामीतिमिथ्याभि

मच्चित्तःसर्वदुर्गाणिमत्प्रसादात्तरिष्यसि ॥ अथचेत्त्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि ॥ ५८ ॥
यदहंकारमाश्रित्यनयोत्स्यइतिमन्यसे ॥ मिथ्यैषव्यवसायस्तेप्रकृतिस्त्वांनियोक्ष्यति ॥ ५९ ॥
स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा ॥ कर्तुंनेच्छसियन्मोहात्करिष्यस्यवशोऽपितत् ॥ ६० ॥

मानमाश्रित्यकेवलम् ॥ १ ॥ युद्धंनैवकरिष्यामीत्येवंलंयदिमन्यसे ॥ एषतेनिश्चयोमिथ्यानिष्फलःसर्वथायतः ॥ २ ॥ रजोगुणस्वभाव
स्त्वांक्षत्रियत्वनिबंधनः ॥ अत्यंतधार्मिकंक्रूरेप्रेरयिष्यतिसंगरे ॥ ३ ॥ अतोमिथ्याग्रहंत्यक्त्वामद्वचःशरणंकुरु ॥ ४ ॥ ५९ ॥ प्रकृतिं
विवृणोतीशःसर्वतोऽपिबलीयसीम् ॥ यस्माच्छौर्यादिनास्वेनयथोक्तेनात्मकर्मणा ॥ १ ॥ वशीकृतस्त्वंकौंतेयक्षत्रियत्वैकहेतुना ॥ य
द्युद्धंबंधुहिंसादिनिमित्तमविवेकतः ॥ २ ॥ स्वतंत्रोऽहंयथेच्छामिकरिष्यामितथेतिच ॥ भ्रमान्नेच्छसिकर्तुंत्वमनिच्छन्नपिकर्मतत् ॥ ३ ॥
स्वभावपरतंत्रःसन्नीश्वराधीनएवच ॥ करिष्यस्येवतस्मात्त्वंमाकार्षीराग्रहंवृथा ॥४॥ त्यक्त्वाग्रहंकृष्णपदारविंदभक्तिंपुरस्कृत्यसदास्वकर्म ॥
कुर्वन्जनोनैतिपराभवंश्रीमुकुंदधामैतिनसंशयोऽत्र ॥ ५ ॥ ६० ॥

निदिध्यासनरूपिण्याभक्त्यात्मज्ञाननिष्ठया ॥ मामद्वितीयमात्मानंसम्यक्साक्षात्करोतिसः ॥ १ ॥ यावान्विभुश्चनित्यश्चयश्चानंदघनोऽद्वयः॥ सत्यज्ञानवपुःसर्वोपाधिशून्यःसदामलः ॥ २ ॥ अखंडैकरसःशुद्धस्तावंतंमांचतत्त्वतः ॥ अभिजानातिसर्वज्ञस्ततोमांसयथार्थतः ॥३॥ ज्ञात्वाहमस्म्यखंडैकानंदब्रह्मेतिसद्धिया ॥ साक्षात्कृत्यनिवृत्त्याज्ञानस्यसकलस्यच ॥ ४ ॥ सर्वोपाधिविनिर्मुक्तोमद्रूपःकेवलोभवेत् ॥ प्रारब्धकर्मभोगेनदेहपातादनंतरम् ॥ ५ ॥ कैवल्याख्यंपरंधाममामेवविशतेमुनिः ॥ यद्यपिज्ञानसंप्राप्तिसमयेभगवद्वपुः ॥ ६ ॥ ज्ञानीतथापिप्रारब्धकर्माभासेनतद्वपुः ॥ नराकारतयाभातिव्यवहारेऽज्ञदेहवत् ॥७॥ प्रारब्धकर्मणिक्षीणेत्यक्त्वामायामयंवपुः ॥ चिदानंदपदेस्वात्मत

भक्त्यामामभिजानातियावान्यश्चास्मितत्त्वतः ॥

त्स्वेतद्रूपएवसन् ॥ ८ ॥ तिष्ठतीतिहरेरेवंतात्पर्यमिहगम्यते ॥ यद्यपिब्रह्मबोधेनाज्ञानंसर्वंनिवर्तितम् ॥ ९ ॥ दीपेनेवतमस्तस्यतद्विरोधिस्वभावतः ॥ तथापितदुपादेयंदेहादिब्रह्मवेदिनः ॥ १० ॥ निरुपादानमेवानुवर्ततेनिजकर्मणा ॥ दृष्ट्वादेवदृष्टेनानुपपन्नंमनागपि ॥ ११ ॥ तार्किकैरपिहेतोश्चविनाशात्समवायिनः ॥ निरुपादानकंद्रव्यंक्षणमात्रंहितिष्ठति ॥ १२ ॥ इत्येवंस्वीकृतंतद्वदस्माकमपिसंभवेत् ॥ तत्रापिकल्पनानादितयायोग्यःक्षणःकिल ॥ १३ ॥ शरीरादिस्थितेरेवमिष्यतेऽतोऽप्यदोषता ॥ यैरप्यज्ञानलेशोऽत्रस्वीकृतस्तैरपिस्फुटम् ॥१४॥

ईश्वरःसर्वभूतानिपरतंत्राणिमायया ॥ प्रेरयत्येवचेत्प्राप्तमानर्थक्यंश्रुतेःस्मृतेः ॥ १ ॥ विध्यादिप्रतिपादिन्याःपौरुषस्यतथैवच ॥ इत्यत्राहत
मेवेशंशरणंगच्छसर्वथा ॥ २ ॥ संसारजलधेःपारोत्तरणार्थंतमाश्रय ॥ मनसाकर्मणावाचासर्वभावेनभारत ॥ ३ ॥ तस्येश्वरस्यश्रीविष्णोः
कल्याणगुणवारिधेः॥ अनुग्रहात्परब्रह्मज्ञानोत्पत्यवधेःपराम् ॥ ४ ॥ सकार्याज्ञानबाधाख्यांशांतिंस्थानंपरंपदम् ॥ स्वप्रकाशपरानंदात्मनाव
स्थानमक्षरम् ॥ ५ ॥ नित्यकूटस्थमद्वैतंनिर्मलंप्राप्स्यसिस्वयम् ॥ अतोविध्यादिशास्त्रस्यपौरुषस्यचसर्वथा ॥ ६ ॥ इदमेवहिसार्थक्यंयदीश

तमेवशरणंगच्छसर्वभावेनभारत ॥ तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतम् ॥ ६२ ॥

शरणंव्रजेत् ॥ नस्वातंत्र्यात्कचित्किंचित्प्राप्नोतीहफलंनरः ॥ ७ ॥ ईश्वरानुग्रहादेवसर्वंसर्वस्यजायते ॥ ईश्वरानुग्रहेतस्माद्यतितव्यंमुमुक्षुभिः
॥ ८ ॥ यथाप्रसन्नोभगवान्पश्येदेनंकटाक्षतः ॥ सर्ववेदेषुशास्त्रेषुपुराणेभारतेतथा ॥ ९ ॥ सर्वंविहायकर्तव्यमिदमेवसुनिश्चितम् ॥ वासुदेवै
कशरणःसर्वंप्राप्नोतिशोभनम् ॥ १० ॥ अतस्त्वमेवशरणंगच्छेत्याहरमापतिः ॥ ११ ॥ ईशत्वेनहरिंभजस्वनिगमप्रोक्तेनमार्गेणभोदास्यंतस्य
समाश्रयस्वसुमनोभक्त्याभयेनादरात् ॥ सख्यंसौहृदमाश्रयस्वनृहरेःप्रेम्णागुरुत्वेनचस्वात्मानंप्रकटीकरोतिभजतामेवंसबुद्धौहरिः॥१२॥६२॥

स्वभावाधीनतामुक्तेश्वराधीनत्वमुच्यते ॥ हरिरीशनशीलोयोनारायणपदाभिधः॥१॥ सर्वांतर्यामितायस्यप्रसिद्धाबहुधाश्रुतौ ॥ तिष्ठन्पृथिव्यां यस्तस्याआंतरोऽयंनवेदसा ॥२॥यस्यपृथ्वीशरीरंयस्तामंतर्यमयत्यजः॥यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेऽपिवा ॥३॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः॥ इत्यादिश्रुतिवाक्यानिसंतिश्रीपरमेश्वरे ॥४॥ ससर्वव्यापकोऽपीशःसर्वेषांप्राणिनांविभुः॥ अंतःकरणदेशेऽतिनिर्मलेतिष्ठतीत्यसौ ॥ ५ ॥ सार्वभौमोयथारामोमहाराजोरघूत्तमः ॥ उत्तराकोसलायांवैतिष्ठतीतितथैवच ॥ ६ ॥ व्यापकोऽपिपरेशानोहृद्यभिव्यज्यतेविभुः॥ शुद्धांतःकरणत्वात्त्वमीदृशंपरमेश्वरम् ॥ ७ ॥ ज्ञातुंयोग्यइतिस्पष्टंसूच्यतेऽर्जुनशब्दतः ॥ किंकुर्वंस्तिष्ठतीशानइत्यत्राहस्वयंविभुः ॥ ८ ॥ भ्रामयंश्चालयन्सर्वभूतानीशइतस्ततः ॥ दारुनिर्मितपुंरुष्यादीन्यवशानियथानरः॥९॥ यंत्रारूढानिमायावीभ्रामयंस्तिष्ठतीतरः ॥ माययाछद्मनातद्वत्सर्वभूतानिसर्वतः ॥ १० ॥ सयंत्राधिष्ठितानीवभ्रामयंस्तिष्ठतीश्वरः ॥ यद्वामायामयंयंत्रंशरीरद्वितयंजडम् ॥ ११ ॥ तत्रारुह्याभिमानेनप्रा

ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति ॥ भ्रामयन्सर्वभूतानियंत्रारूढानिमायया ॥ ६१ ॥

णिजातंहितिष्ठति ॥ तत्सर्वंभगवानीशोमायया भ्रामयन्जगत् ॥ १२ ॥ तिष्ठतीतिस्वतंत्रःसन्निर्लेपोनिरुपद्रवः ॥ तदुक्तंसर्वविद्यानांपारगैरपियोगिभिः॥ १३ ॥ देहादिपंजरंयंत्रंतदारोहोऽभिमानता ॥ विहितप्रतिषिद्धेषुप्रवृत्तिर्भ्रमणंभवेत् ॥१४॥ अविद्याकामकर्मादिसामग्रीसकलाजडा ॥ जीवोऽप्यज्ञतयाभ्रांत्यापरतंत्रोजडानुगः॥१५॥ नकिंचित्कर्तुमस्त्यस्यसामर्थ्यंचस्वतंत्रतः॥ अतःश्रीभगवानेवालुप्तशक्तिर्महेश्वरः ॥१६॥ समस्तंस्ववशेकृत्वालोकंलोकेश्वरैःसह ॥ माययाभ्रामयन्स्वामीतिष्ठतिप्राणिनांहृदि ॥१७॥समस्तानुपपत्तीनांपरिहारायसर्वथा ॥माययेतिस्वयंप्रोक्तंश्रीमद्भगवतेत्यपि ॥१८॥ हृदिगतममलाभंसर्वलाभादिलाभंरविशशिनयनाभंश्याममेघोज्ज्वलाभम् ॥ श्रुतिविषयरसाभंपद्मनाभंसुनाभंसकलमुनिमताभंनौमिकृष्णंरमाभम् ॥१९॥ समस्तलोककर्तारंगोप्तारंसर्वदेहिनाम् ॥ सर्वविश्वनियंतारंमुकुंदंहृदिगंश्रये ॥२०॥६१॥

अतिगंभीरभावस्यगीताशास्त्रस्यसर्वतः ॥ पूर्वापरपरामर्शबुद्धिक्लेशनिवृत्तये ॥ १ ॥ कृपयास्वयमेवेशःसारंसंक्षिप्यतस्यच ॥ कथयत्यात्मसिद्धांतंभगवान्करुणानिधिः ॥ २ ॥ कर्मयोगात्पुरागुह्याज्ज्ञानंगुह्यतरंस्मृतम् ॥ इदानींकर्मयोगाच्चतत्फलात्तत्त्वबोधतः ॥३ ॥ सर्वस्मादपिसंगोप्याद्रहस्यमतिदुर्लभम् ॥ प्रकृष्टंसर्वतोवाक्यंममाप्तस्येश्वरस्यच ॥४ ॥ तत्रतत्रोक्तमप्येतत्पुनस्तेप्रीतिकाम्यया ॥ वक्ष्यमाणंशृणुत्वंभोःकिमर्थंतेब्रवीम्यहम् ॥ ५ ॥ नलाभपूजाख्यात्यादिसिद्धयेकिंतुमेहरेः ॥ प्रियोऽस्यतिशयेनेतियस्मात्तेनैवहेतुना ॥ ६ ॥ कथयिष्याम्यपृष्टोऽपिश्रेयस्तेपरमंह्यहम् ॥ ७ ॥ भक्तिर्हरौप्रेमघनातिदुर्लभानगुह्यसिद्धांतइतःपरंनृणाम् ॥ आश्रित्यतांमोक्षपदंकरेस्थितंनतांविनाश्रेयउपैतिकश्चन ॥ ८ ॥ ॥६४॥ तदेवाहकृपासिंधुःस्वभक्तायार्जुनायच ॥ वासुदेवेभगवतिमययस्यमनःसच ॥ १ ॥ सदामांचिंतयात्यर्थमद्भक्तोभवसर्वदा ॥ प्रेम्णा मय्यनुरक्तःसन्मद्विषयंमनःकुरु ॥ २ ॥ मामेवश्रीपतिंयष्टुंशीलंयस्यतथाभव ॥ मय्येवात्यनुरागेणमत्पूजातत्परोभव ॥ ३ ॥ पूजोपकरणाभावे

सर्वगुह्यतमंभूयःशृणुमेपरमंवचः ॥ इष्टोऽसिमेदृढमितिततोवक्ष्यामितेहितम् ॥ ६४ ॥
मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु ॥ मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोऽसिमे ॥ ६५ ॥

मामेवत्वंनमस्कुरु ॥ कायेनमनसावाचाप्रव्हीभावेनमांभज ॥४ ॥एवंचभगवद्धर्मानुष्ठानेनमयीश्वरे ॥ अनुरागोद्भवेनैवभवेद्भागवतोत्तमः ॥५॥ एवंभागवतोभूत्वाभगवंतंसमांहरिम् ॥ प्राप्स्यसिश्रुतिगीर्जन्यबोधेनात्मानमद्वयम् ॥ ६ ॥ त्वमत्रसंशयंदुष्टंमाकार्षीर्मद्वचस्यतः ॥ सत्यामेवप्रतिज्ञांतेह्यस्मिन्नर्थंकरोम्यहम् ॥७॥ यतःप्रियोऽसिमेतस्मान्नप्रियस्यप्रतारणा ॥ उचितातोऽतिविश्वासंमदुक्तेऽर्थेसदाकुरु ॥ ८ ॥ यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततम् ॥ स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः ॥ ९ ॥ इत्यत्रोक्तस्ययच्छब्दप्रतिपाद्यस्यवस्तुनः ॥ मच्छब्देनात्रकथनंकृतंभगवतास्वयम् ॥ १० ॥ सएवभगवान्कृष्णोवासुदेवाभिधोविभुः ॥ अर्च्योध्येयस्तथाज्ञेयःशरण्यइतिनिश्चितम् ॥ ११ ॥ नातःपरतरंकिंचिच्छ्रेयःसाधनमिष्यते ॥ समस्तेषुचवेदेषुपुराणादिषुवास्मृतौ ॥ १२ ॥ ६५ ॥

पूर्वोक्तभक्तियोगस्यप्रारंभस्यविरोधिनः ॥ पापाख्यप्रतिबंधायेऽनेकजन्मार्जितामलाः ॥ १ ॥ तद्विनिर्मुक्तपुंसःस्याद्भक्तियोगेऽधिकारिता ॥
आनंत्याच्चैवपापानांभक्त्यारंभविरोधिनाम् ॥ २ ॥ तत्प्रायश्चित्तरूपैस्तुधर्मैर्नानाविधैरपि ॥ अल्पकालकृतैस्तेषांपापानांदुस्तरत्वतः ॥ ३ ॥
इत्येवमात्मनोभक्तियोगारंभेऽप्ययोग्यताम् ॥ आलोच्यशोचतोजिष्णोःशोकंचापनुदन्हरिः ॥ ४ ॥ आहानुग्रहवात्सल्यवारिधिःपार्थसार
थिः ॥ सर्वधर्मान्श्रुतिप्रोक्तप्रायश्चित्तात्मकान्बहून् ॥ ५ ॥ कृच्छ्रचांद्रायणेष्ट्यादींस्तत्तत्पापानुरूपिणः ॥ नानाविधांस्त्वयाधर्मान्स्वल्पकाला
नुयायिनः ॥ ६ ॥ दुरनुष्ठानरूपांश्चपरित्यज्यैवसर्वशः ॥ निर्विघ्नभक्तियोगस्यसम्यगारंभसिद्धये ॥ ७ ॥ मामेकमीश्वरंसर्वासाधारणगुणाश्र
यम् ॥ शरण्यंकरुणासिंधुंशरणागतवत्सलम् ॥ ८ ॥ तवास्मीतिधियाशुद्ध्याप्रपद्यस्वसुखास्पदम् ॥ शरणंहेहरेकृष्णमांगृहाणस्वसेवकम् ॥९॥
अनन्यशरणत्वान्मेत्वमेवशरणंभव ॥ इत्येवमनुसंधायसर्वकृत्यंविहायमाम् ॥ १० ॥ आश्रयस्वततोऽहंत्वापापेभ्योऽत्यंतशोकिनम् ॥ भक्त्या

सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज ॥ अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचः ॥ ६६ ॥

रंभविरोधिभ्योमोक्षयिष्यामिमाशुचः ॥ ११ ॥ सकलमपिविहायभ्रांतिजालंश्रमाढ्यंव्रजहरिशरणंश्रीब्रह्मविद्याप्तिहेतुम् ॥ भजनमपिहरेः
श्रीकृष्णचंद्रप्रसादात्स्वयमिहसुजनस्यप्रेमयुक्तंसुसिद्ध्येत् ॥ १२ ॥ यद्वाश्लोकद्वयस्याहतात्पर्यंभगवान्हरिः ॥ ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनति
ष्ठति ॥ १३ ॥ तमेवशरणंगच्छेत्येवंप्रागीरितस्यच ॥ धर्माःकेचनवर्णानांकेचिदाश्रमवासिनाम् ॥ १४ ॥ केचित्सामान्यधर्माश्चवेदस्मृति
गिरेरिताः ॥ विद्यमानांश्चतान्धर्मान्समस्तान्सफलानपि ॥ १५ ॥ अविद्यमानान्वाशास्त्रविहितानपिसर्वशः ॥ संसारेऽस्मिन्हियेपूर्वंशरण
त्वेनसंमताः ॥ १६ ॥ आसंस्तांस्त्वमनादृत्यमामीश्वरमजंविभुम् ॥ आनंदंसर्वधर्माणामधिष्ठातारमक्षरम् ॥ १७ ॥ धर्माणांफलदातारमुदा
रंशरणंव्रज ॥ धर्माःसंतुनवासंतुकिमेतैःपरतंत्रकैः ॥ १८ ॥ भगवद्वासुदेवस्यानुग्रहादेवसर्वथा ॥ कृतार्थोऽहंभविष्यामीत्येवंनिश्चित्यचेत

सा ॥ १९ ॥ वासुदेवमनंतंश्रीपरमानंदविग्रहम् ॥ करुणासागरंसर्वकल्याणगुणसंश्रयम् ॥ २० ॥ कृतज्ञंदीनबंधुंमांभगवंतमनुक्षणम् ॥ भक्तिभावनयासारंभजस्वसततंहरिम् ॥ २१ ॥ इदमेवपरंतत्त्वंनातोऽधिकमितिस्वयम् ॥ विचारपूर्वकेणैवंप्रेमाधिक्येनसर्वथा ॥ २२ ॥ चिंतयत्वंमनोवृत्त्यासंत्यक्तानात्मचिंतया ॥ तैलधारावदच्छिन्नरूपयात्यंतशुद्धया ॥ २३ ॥ मदेकशरणस्यास्यनास्तिधर्माद्यपेक्षणम् ॥ सर्वेषामपिशास्त्राणांरहस्यंपरमंत्विदम् ॥ २४ ॥ यदीशशरणत्वंस्यात्पुण्यसंततिहेतुकम् ॥ अत्रैवगीताशास्त्रस्यसमाप्तिर्हरिणाकृता ॥ २५ ॥ भगवच्छरणत्वेनविनासर्वस्यकर्मणः ॥ संन्यासस्यफलेनास्तिस्वतःपर्यवसायिता ॥ २६ ॥ मदेकशरणोयस्मात्त्वंधर्मानप्युपेक्ष्यतान् ॥ मच्चिंतनपरोनित्यंतिष्ठस्यनन्यमानसः ॥ २७ ॥ अतोऽहंसर्वधर्माणांकार्यकारितयेश्वरः॥ संसारानर्थहेतुभ्यःसर्वपापेभ्यएवच ॥ २८ ॥ बंधुहिंसादिजन्येभ्योमोक्षयिष्यामिमाशुचः ॥ ममयुद्धेप्रवृत्तस्यस्वकुलाचार्यघातिनः ॥ २९ ॥ निस्तारोऽतःकथंमेस्यान्माकार्षीरितिशोचनम् ॥ प्रायश्चित्तंविनैवाहंधर्मस्थानीयईश्वरः ॥ ३० ॥ पापांधतमसस्त्वांवैमोक्षयिष्यामिभास्करः ॥ संदेहोनात्रकर्तव्योमानमौलौवचस्यतः ॥ ३१ ॥ निगमविहितधर्मांस्तद्विरुद्धानधर्माञ्जनिमृतिभयमूलांस्तज्जभोगानुपेक्ष्य ॥ भवमृतिभयसिंधौपोतभूतंशरण्यंहरिपदमकरंदंचित्तमित्राश्रयस्व ॥ ३२ ॥ सर्वधर्मान्परित्यज्येत्यत्रभाष्यकृतांमतम् ॥ समस्तकर्मसंन्यासानुवादेनैवयुक्तिभिः ॥ ३३ ॥ मामेकंशरणंचेतिज्ञाननिष्ठोपसंहृता ॥ श्रीमद्भगवतेत्येवंसंमतंसाधुसंमतम् ॥ ३४ ॥ अत्रायमाशयोभातिश्रीमद्भाष्यकृतांसताम् ॥ गीतासुसर्ववेदार्थसंगृह्यकरुणानिधिः॥ ॥ ३५ ॥ प्रोक्तवाञ्छ्रीरमानाथोबोधसौकर्यसिद्धये ॥ उक्तमष्टादशाध्यायैरुपसंहृतवान्मतम् ॥ ३६ ॥ सर्वधर्मान्परित्यज्येत्यत्रश्लोकेरमापतिः ॥ ज्ञाननिष्ठाह्युपक्रांतामुख्यागमविदांमता ॥ ३७ ॥ तत्राधिकारसिद्ध्यर्थंकर्मनिष्ठेरितापरा ॥ तयाधिकारेसिद्धेऽपिभगवद्भक्तिरुत्तमा ॥ ३८ ॥ अंतरंगतयाप्रोक्तात्तृतीयाज्ञानसाधनम् ॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ ॥ ३९ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः ॥ इतिब्रह्मैक्यजिज्ञासोर्भक्तिःस्यात्साधनंपरम् ॥ ४० ॥ प्रधानानुगुणंन्याय्यमित्यतोऽतेहरिःस्वयम् ॥ उपसंहृतवान्ज्ञाननिष्ठामेवससाध

इदानींसर्वगीतार्थमाहेदमुपसंहरन् ॥ इत्यनेनप्रकारेणतुभ्यंप्रेमास्पदायच ॥ १ ॥ ज्ञानमात्मैक्यविषयंमोक्षसाधनमांतरम् ॥ यदेवात्यंतसंगोप्यादपिगोप्यतरंमहत् ॥ २ ॥ कर्मसंन्यासपर्यंतात्कर्मयोगादपीरितात् ॥ रहस्यतरमस्तीदंतत्फलत्वादनुत्तमम् ॥ ३ ॥ सर्वज्ञेनेश्वरेणाप्ततमेनागमहेतुना ॥ आसमंतान्मयासाक्षात्कथितंपरमेष्ठिना ॥ ४ ॥ एतन्मयोपदिष्टंत्वांगीताशास्त्रमशेषतः ॥ पर्यालोच्यधियाशुद्ध्यासाकल्येनविवेकतः ॥ ५ ॥ एकवाक्यतयाज्ञात्वास्वाधिकारानुरूपतः ॥ श्रेयोमार्गंविनिश्चित्ययथेच्छसितथाकुरु ॥ ६ ॥ एतदुक्तंभवत्यत्रगीताशास्त्रार्थसंग्रहे ॥ नरस्याशुद्धचित्तस्यमुमुक्षोर्मोक्षसाधनम् ॥ ७ ॥ कर्मयोगोयथाशास्त्रंफलासंगविवर्जितः ॥ ईशार्पणधियासम्यक्कृतःसत्त्वविशुद्धिकृत् ॥ ८ ॥ ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणः ॥ कषायेकर्मभिःपक्केततोज्ञानंप्रवर्तते ॥ ९ ॥ इतिस्मृत्यातथाश्रुत्यातमेतमितिवाक्यतः ॥ निष्कामःकर्मयोगोऽसौप्रथमंसाधनंमतम् ॥१०॥ ततःशुद्धधियःसम्यग्वैराग्यादियुतस्यच ॥ सम्यग्विविदिषोत्पत्तावाचार्यमुपसृत्यच ॥११॥

इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया ॥ विमृश्यैतदशेषेणयथेच्छसितथाकुरु ॥ ६३ ॥

ज्ञानसाधनवेदांतगीर्विचारायशास्त्रतः ॥ समस्तकर्मसंन्यासोब्राह्मणस्यविधीयते ॥१२ ॥ ततःकृष्णैकशरणतयापूर्वोक्तसाधनैः ॥ अमानित्वादिभिर्नित्यंश्रवणादिपरस्यच ॥ १३ ॥ ब्रह्मात्मैक्यावबोधस्यसाक्षात्कारस्यसन्मतेः ॥ प्रादुर्भावेनमोक्षोऽस्तिसिद्धइत्येवनिर्णयः ॥१४ ॥ क्षत्रियादेस्तुसंन्यासानधिकारितयातथा ॥ मुमुक्षोश्चेतसःशुद्धौजातायांतदनंतरम् ॥१५॥ ईशाज्ञापालनार्थंचलोकसंग्रहसिद्धये ॥ यथाकथंचित्कर्माणिकुर्वतोऽपिविरागिणः ॥१६ ॥ कृष्णैकशरणत्वेनपूर्वजन्मकृतादपि ॥ संन्यासादेःपरब्रह्मज्ञानंकृष्णप्रसादतः ॥ १७ ॥ जायतेतेनसिद्धःस्यान्मोक्षस्तस्येतिनिर्णयः ॥ एवंविचारितेशास्त्रेपौर्वापर्यानुरोधतः ॥ १८ ॥ नास्तिमोहावकाशोऽणुमात्रमित्याशयोहरेः ॥१९॥ सकलनिगमसारंमोक्षदानेऽत्युदारंभ्रमतिमिरविदारंसंसृतिद्रोःकुठारम् ॥ दृढमतिसवितारंब्रह्मविद्याविहारंनिखिलगुणविचारंनौमिलक्ष्म्यैकदारम् ॥२०॥६३॥

समाप्तःसर्वशास्त्रार्थःशास्त्रस्यैवाधुनाहरिः ॥ संप्रदायविधिंप्राहसर्वज्ञोभगवानिति ॥ १ ॥ इदंसमस्तशास्त्रार्थरहस्यंब्रह्मसंमितम् ॥ गीताख्यंत वसंसारबंधविच्छित्तयेमया ॥ २ ॥ सर्वज्ञेनेरितंसम्यग्ज्ञानसाधनमुत्तम् ॥ नासंयतेंद्रियायोक्तंतपःशून्यायकर्हिचित् ॥ ३ ॥ वाच्यंयस्मात्त पोहीनेनिष्फलंस्याद्दुदीरितम् ॥ तपस्विनेऽपिनोवाच्यंभक्तिहीनायकेशवे ॥ ४ ॥ सद्गुरौभक्तिहीनायनवाच्यंकर्हिचित्तथा ॥ कस्यांचिद प्यवस्थायांभक्तायापितपस्विने ॥५॥ नचाशुश्रूषवेवाच्यंपरिचर्यामकुर्वते ॥ योमांश्रीवासुदेवंहिभगवंतमधोक्षजम् ॥ ६॥ स्वप्रशंसादिदोषा ध्यारोपणेनममेशताम् ॥ अजानन्प्रत्युतद्वेष्टिमंदभाग्यतयाधमः ॥ ७ ॥ शुश्रूषवेऽपिभक्तायगुरावपितपस्विने ॥ नतस्मैजातुवाच्यंश्रीकृष्णो

इदंतेनातपस्कायनाभक्तायकदाचन ॥ नचाशुश्रूषवेवाच्यंनचमांयोऽभ्यसूयति ॥ ६७ ॥

त्कर्षासहिष्णवे ॥ ८ ॥ सर्वेधर्माअतिक्रांतानकुर्युस्तादृशंमहत् ॥ अनर्थजालंयद्वच्छ्रीकृष्णास्त्रयाकरोत्यघम् ॥ ९ ॥ यतोवेदांतसिद्धांतरह स्यंमुनिसंमतम् ॥ श्रीकृष्णाख्यंपरंधामसदानंदघनंपरम् ॥ १० ॥ अतोयस्यहृषीकेशेकृष्णेभगवतीश्वरे ॥ अवज्ञास्तिनसोऽत्यज्ञःसंभाष्यो ऽपिकदाचन ॥ ११ ॥ कृष्णंकमलपत्राक्षंनार्चयिष्यंतियेनराः ॥ जीवन्मृतास्तुतेज्ञेयानसंभाष्याःकदाचन ॥१२ ॥ किंपुनर्ब्रह्मविद्यायाज नन्योभवद्भिरः ॥ तस्मैवाच्यासुधीमद्भिर्निरपेक्षैरितीरितम् ॥ १३ ॥ तपस्विनेचभक्तायगुरुशुश्रूषवेसते ॥ श्रीकृष्णेचानुरक्तायवाच्यंशास्त्रमि दंपरम् ॥ १४ ॥ विशेषणानांसर्वेषामस्त्यपेक्षेतिसिद्धये ॥ चत्वारोऽत्रनकाराःश्रीहरिणासंप्रयोजिताः ॥ १५ ॥ एकस्यापिह्यभावेनयोग्य ताप्रतिबद्ध्यते ॥ अतोविचार्यगीताख्यंशास्त्रंश्राव्यंमुमुक्षवे ॥ १६ ॥ ६७ ॥

नाम् ॥ ४१ ॥ तत्रापिप्रथमेपादेसर्वधर्मपदेनच ॥ धर्माधर्मद्वयंप्रोक्तंत्याज्यत्वेनात्रसंमतम् ॥ ४२ ॥ तेनोपसंहृतःकर्मसंन्यासोज्ञानसाधन
मे् ॥ चित्तशुद्धिंविनानासौसानकर्मविनाभवेत् ॥४३॥ तेनोपसंहृताकर्मनिष्ठापिसफलापरा ॥ पादेद्वितीयेभगवत्तत्त्वधीरुपसंहृता ॥४४॥
भगवद्भक्तिसहितापुरुषार्थैकजन्मभूः ॥ उत्तरार्धेनमुख्यायानिष्ठायाःफलमीरितम् ॥ ४५ ॥ अविद्यायाःसकार्यायानिवृत्तिश्चेत्यतोहरिः ॥
प्रतिश्रुत्यजगादेमंश्लोकंगुह्यतमंपरम् ॥ ४६ ॥ इत्येवंगूढतात्पर्यमविदित्वान्यथान्यथा ॥ कल्पयित्वामतंस्वीयंदूषणोद्भाटनंकृतम् ॥ ४७ ॥
कैश्चिद्यत्तन्नसाधूक्तमित्यलंबहुनाधुना ॥ तत्त्वज्ञानैकसूर्याणांश्रीमद्भाष्यकृतांपुरः ॥ ४८ ॥ अस्मदादिजनःस्वल्पःसखद्योतायतेनकिम् ॥
अन्येत्वेवंव्यवस्थांचप्राहुरत्रोपसंहृतौ ॥४९॥ साध्यसाधनभावेनगीताशास्त्रेविवक्षितम् ॥ निष्ठात्रयंभगवताध्यायेऽस्मिन्नुपसंहृतम् ॥ ५०॥
तत्रसंन्यासपर्यंताकर्मनिष्ठोपसंहृता ॥ स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः ॥ ५१ ॥ इत्यत्रसफलासांगाश्रीमद्भगवतास्वयम् ॥ संन्या
सपूर्ववेदांतश्रवणादिनिरंतरा ॥ ५२ ॥ सफलाचसहोपायैर्ज्ञाननिष्ठोपसंहृता ॥ ततोमांतत्त्वतोज्ञात्वाविशतेऽत्रेतिविष्णुना ॥ ५३ ॥ भग
वद्भक्तिनिष्ठातुमद्भीभूताद्वयोरपि ॥ सैवांतेवासुदेवेनसम्यगेवोपसंहृता ॥ ५४ ॥ सर्वधर्मान्परित्यज्येत्यत्रैवात्यंतपावनी ॥ यस्यदेवेपराभक्ति
रितिश्रुत्याहरेर्विभोः ॥ ५५ ॥ पराभक्तिःपरब्रह्मज्ञानेमुख्यतयेरिता ॥ सर्वोपायेनभगवान्शरण्योभक्तवत्सलः ॥ ५६ ॥ आराध्यइतितात्प
र्यंसर्ववेदविदांसताम् ॥ आराधितेहरौमोक्षहेतुर्ज्ञानमवांतरम् ॥ ५७ ॥ भवत्येवफलंतस्मादाराध्योहरिरीश्वरः॥ इत्यस्मामपिनिर्णीतव्यवस्था
यांमनागपि ॥ ५८ ॥ विरोधोनास्तिभगवद्भाष्यकारानुयायिनाम् ॥ निर्विवादाहरेर्भक्तिर्ज्ञानमोक्षप्रदायिनी ॥ ५९ ॥ सर्वोपरिवरीवर्ति
सिद्धमित्येवमंगलम् ॥ क्वचनिगमशिरोवाग्वेद्यवैकुण्ठवाणीक्वचपरिमितबुद्धिर्मादृशःकर्मवश्यः ॥ हरिपदशरणायेदुर्लभंनास्तितेषांकिमपि
जगतिकृत्यंज्ञेयमाप्यंविचार्यम् ॥ ६० ॥ विषयविषयिभावभ्रांतिशून्यंविशुद्धंसकलनिगमवाणीभावगम्यंह्यगम्यम् ॥ हृदिसकलजनानामी
शितारंनिविष्टंयदुपतिमभिवंदेसर्वविज्ञानसारम् ॥ ६१ ॥ ६६ ॥

फलमध्यापकस्योक्ताफलमध्येतुरुच्यते ॥ यआवयोरिमंग्रंथंसंवादात्मकमादरात् ॥ १ ॥ स्वधर्मादनपेतंचपठिष्यतिजपान्मना ॥ ज्ञानात्मके नयज्ञेनतुर्याध्यायेरितेनवै ॥ २ ॥ द्रव्ययज्ञादिश्रेष्ठेनसर्वयज्ञेश्वरोह्यहम् ॥ तेनाध्येत्रातिपुण्येनपूजितःस्यामितीशितुः ॥ ३ ॥ ममास्तिनिश्च यस्तेनकृतकृत्योऽस्तिमत्प्रियः ॥ यद्यप्यसौजपत्येवाबुद्ध्यमानोऽर्थमाशयम् ॥ ४ ॥ तच्छृण्वतस्तथापीतिभवत्येवंमतिर्मम ॥ प्रकाशयतिमामे वाध्येतायमितिधीपतेः ॥ ५ ॥ ज्ञानयज्ञफलंतस्माज्जपमात्रादपीरितम् ॥ चित्तशुद्ध्यात्मविज्ञानद्वारामोक्षमुदारधीः ॥ ६ ॥ प्राप्नोतिभगवद्गी ताशास्त्राध्येतानसंशयः ॥ पठतोऽर्थानुसंधानपूर्वकंपुरुषस्यतु ॥ ७ ॥ साक्षादेवभवेन्मोक्षइतिकिंवाच्यमित्ययम् ॥ साक्षात्फलविधेरेवोद्देशो

अध्येष्यतेचयइमंधर्म्यंसंवादमावयोः ॥ ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमेमतिः ॥ ७० ॥
श्रद्धावाननसूयश्चशृणुयादपियोनरः ॥ सोऽपिमुक्तःशुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥

नास्यार्थवादता ॥ ८ ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतप ॥ इत्येवंपूर्वमेवोक्तमतोनित्यंमुमुक्षुभिः ॥ ९ ॥ अत्यादरेणगीताख्यंशास्त्र मध्येयमित्यलम् ॥ १० ॥ ७० ॥ फलंप्रवक्तुरध्येतुश्रोक्ताश्रोतुःफलंहरिः ॥ इदानींकथयत्यद्धाकरुणारससागरः ॥ १ ॥ यःकश्चनमनुष्यो ऽपिजपतोऽन्यस्यकस्यचित् ॥ उच्चैर्दयानिधेःपुंसःसकाशाच्छ्रद्धयान्वितः ॥ २ ॥ उच्चैर्जपत्यबद्धंवाकिमर्थमितिदोषदृक् ॥ असूयातद्विहीनःसन्केवलंश्रृणुयादिमम् ॥ ३ ॥ ग्रंथमत्रापिशब्दात्तुकिमुतार्थावबोधवान् ॥ केवलाक्षरमात्रस्यश्रोतापित्यक्तकिल्बिषः ॥ ४ ॥ लोकान्प्र शस्तानाप्नोतिसोऽश्वमेधादियाजिनाम् ॥ किंवाच्यंभगवद्गीताशास्त्रार्थविदइत्यलम् ॥ ५ ॥ ७१ ॥

विज्ञानोत्पत्तिपर्यंतंशिष्यस्यानुगतस्यच ॥ सम्यक्प्रयासःकर्तव्योगुरुणाकरुणाब्धिना ॥ १ ॥ इतिशिक्षयितुंसम्यग्गुरोर्धर्मंकृपानिधिः ॥ सर्वज्ञोऽपिस्वयंशिष्यंपृच्छतिस्मानुगंजयम् ॥ २ ॥ एतन्मयोक्तंगीताख्यंशास्त्रंहेपार्थचेतसा ॥ व्यासंगांतरशून्येनकिंत्वयाश्रुतमर्थतः ॥ ३॥ अवधारितमेतत्किंमोहोऽज्ञाननिमित्तकः ॥ अज्ञाननाशतोनष्टःप्रकर्षेणैवकिंतव ॥ ४ ॥ यदर्थोऽयंममायासउपदेष्टृतयातथा ॥ तवापिश्रवणायासःसकिंनष्टोधनंजय ॥ ५ ॥ यदिस्यादुपदेशंतेकरिष्यामिपुनर्ह्यहम् ॥ ६ ॥७२॥ एवंपृष्टःकृतार्थत्वादुपदेशानपेक्षताम् ॥ आत्मनोमन्यमानःसन्नुवाचेदंवचोऽर्जुनः ॥ १ ॥ मोहोज्ञाननिमित्तोयःसउच्छिन्नोविपर्ययः ॥ आत्मतत्त्वैक्यविषयास्मृतिश्चत्वदनुग्रहात् ॥ २ ॥ लब्धंमयाच्युताश्रीमत्पदांभोजाश्रयेणवै ॥ यल्लाभात्सर्वग्रंथीनांविप्रमोक्षःस्वयंभवेत् ॥ ३ ॥ अनेनसर्वशास्त्रार्थविज्ञानफलमुत्तमम् ॥ एतावदेवहरिणा

कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेणचेतसा ॥ कच्चिदज्ञानसंमोहःप्रनष्टस्तेधनंजय ॥७२॥ अर्जुनउवा

च ॥ नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत ॥ स्थितोऽस्मिगतसंदेहःकरिष्येवचनंतव ॥७३ ॥

दर्शितंचार्जुनेनच ॥ ४ ॥ यदज्ञानजसंमोहनाशआत्मावबोधनात् ॥ निवृत्तसंशयोयुद्धकर्तव्यादिस्वकर्मणि ॥ ५ ॥ स्वच्छासनेस्थितश्चास्मि यावज्जीवमहंतव ॥ भगवद्वासुदेवस्यसद्गुरोर्वचनंसदा ॥ ६ ॥ करिष्येश्रीमदाज्ञांचपालयिष्यामिसर्वदा ॥ पार्थःप्रयाससाफल्यकथनेनैवमाधवम् ॥ ७ ॥ सम्यक्तोषयामासशिष्यवृत्तिंप्रदर्शयन् ॥ अनेनगीताशास्त्रस्याध्येतुर्भगवतोहरेः॥ ८ ॥ प्रसादान्मोक्षपर्यंतंज्ञानंस्यादित्युदीरितम्॥ अंतेशास्त्रफलंसम्यग्ज्ञानजंचोपसंहृतम् ॥ ९ ॥ तत्त्वज्ञानेसमुत्पन्नेनष्टेऽज्ञानेसकार्यके ॥ स्वरूपेऽवस्थितिंलब्ध्वाकृतकृत्योभवेद्बुधः॥१०॥ ततःपरंनतस्यास्तिकृत्यंश्रौतंचलौकिकम् ॥ कृत्यहेतोरविद्यायाविनष्टत्वात्तथापितु ॥ ११ ॥ श्रीहरेःश्रीगुरोर्वेदमौलेश्चाज्ञानुपालनम् ॥ स्वभावादेवतज्ज्ञानांभवतीत्यपिस्मचितम् ॥ १२ ॥ यावदायुस्त्रयोवंद्यावेदांतोगुरुरीश्वरः ॥ भावाद्वैतंसदाकुर्याक्रियाद्वैतंनकर्हिचित् ॥ १३ ॥ अद्वैतंत्रिषुलोकेषुनाद्वैतंगुरुणासह ॥ इत्यादिवाक्यसिद्धोऽर्थोदर्शितोऽत्रार्जुनेनवै ॥ १४ ॥ ७३ ॥

शास्त्रार्थोऽयंसमाप्तोऽथकथासंबंधमुत्तमम् ॥ इदानींसंजयःप्राहधृतराष्ट्रनृपंप्रति ॥ १ ॥ इतिशब्दःसमाप्तौस्याच्छास्त्रार्थस्येरितस्यच ॥ रोमांच
नकरंबुद्धेर्विस्मापकतयाद्भुतम् ॥ २ ॥ लोकेसंभाव्यमानत्वात्स्पष्टमन्यत्तथार्थतः ॥ ३ ॥ ७४ ॥ दूरदेशस्थितस्यापिसंवादस्यतयोर्द्वयोः ॥
श्रवणेयोग्यतामाहस्वात्मनःसंजयोऽधुना ॥ १ ॥ चक्षुःश्रोत्रादिकरणंदिव्यंव्यासेनवेधसा ॥ प्रदत्तंसंजयायादौयुद्धारंभेयतस्ततः ॥ २ ॥
व्यासप्रसादतोयुह्यंसंवादंयोगसाधनम् ॥ स्वयंस्वेनेश्वरेणैवरूपेणात्यंततेजसा ॥ ३ ॥ साक्षात्कथयतोऽहंवैश्रुतवानस्मिनान्यतः ॥ इतिहर्षतमं
प्राप्तःस्वभाग्यमभिनंदति ॥ ४ ॥ संजयइत्यहोभाग्यंमदीयंयत्परेश्वरात् ॥ योगेश्वराद्भगवतःश्रीकृष्णाच्छ्रुतवानहम् ॥ ५ ॥७५॥ पुण्यंश्रवणमा

संजयउवाच ॥ इत्यहंवासुदेवस्यपार्थस्यचमहात्मनः॥ संवादमिममश्रौषमद्भुतंरोमहर्षणम् ॥ ७४॥
व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहंपरम् ॥ योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतःस्वयम् ॥ ७५ ॥
राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतम् ॥ केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः ॥ ७६ ॥

त्रेणसर्वपापहरंशुभम् ॥ कश्चप्रजापतिःप्रोक्तईशःश्रीशंकरःस्मृतः ॥ १ ॥ तयोरपिपिताचार्यःस्वामीचात्मेतिकेशवः॥ तदुक्तंहरिवंशेश्रीशंभु
नाकेशवंप्रति ॥ २ ॥ कइतिब्रह्मणोनामईशोऽहंसर्वदेहिनाम् ॥ आवांतवांगसंभूतौतस्मात्केशवनामवान् ॥ ३ ॥ शुद्धसंपत्समायुक्तःस
द्विद्याधिकृतोऽर्जुनः॥ संवादोयस्तयोःसाक्षात्तमिमंपरमाद्भुतम् ॥ ४ ॥ नकेवलमहंसम्यक्श्रुतवानस्मिविस्मयात् ॥ किंतुसंस्मृत्यसंस्मृत्यद्विरु
क्तिरितिसंभ्रमे ॥ ५ ॥ वारंवारंपरंहर्षमवाप्नोमिप्रतिक्षणम् ॥ रोमांचितोभवामीहप्राप्तोऽहंविस्मयावधिम् ॥ ६ ॥ ७६ ॥

संप्रदायविधिंप्रोच्यतत्कर्तुःफलमुच्यते ॥ यआवयोरिमंग्रंथंसंवादात्मकमद्भुतम् ॥ १ ॥ रहस्यार्थतयागुह्यंसत्पुरुषार्थसाधनम् ॥ वक्तुंयोग्यंनस
र्वत्रमद्भक्तेष्वभिधास्यति ॥ २ ॥ मांश्रीमद्वासुदेवाख्यंभगवंतंजगद्गुरुम् ॥ हरिंप्रत्यनुरक्तेषुयोऽभितोग्रंथतोऽर्थतः ॥ ३ ॥ स्थापयिष्यतिमद्भ
क्त्यासंप्रदायप्रवर्तकः ॥ भगवद्वासुदेवस्यसमस्तजगतांगुरोः ॥ ४ ॥ शुश्रूषैवमयापीयंक्रियतेमनसागिरा ॥ इत्येवंनिश्चयाकारांभक्तिंकृत्वाम
यीश्वरे ॥ ५ ॥ योऽभिधास्यतिसोऽत्यंतप्रियंमामेवचिद्धनम् ॥ भगवंतंजगन्नाथंवासुदेवमधोक्षजम् ॥ ६ ॥ एष्यत्येवाशुसंसारान्मुच्यते

यइदंपरमंगुह्यंमद्भक्तेष्वभिधास्यति ॥ भक्तिंमयिपरांकृत्वाममैवैष्यत्यसंशयः ॥ ६८ ॥
नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः ॥ भवितानचमेतस्मादन्यःप्रियतरोभुवि ॥६९॥

नात्रसंशयः ॥ भगवद्भक्तिमात्रेणपात्रतांयातिमानवः ॥ ७ ॥ इतिसूचयितुंभक्तेरुपादानंपुनःकृतम् ॥ ८ ॥ ६८ ॥ तस्मान्मय्यनुरक्तेषुसं
प्रदायप्रवर्तकात् ॥ पुरुषादपरःकश्चित्तेषुमध्येममेशितुः ॥ १ ॥ नचैवातिशयेनास्तिप्रियकृत्सांप्रतंकचित् ॥ नापिकश्चित्पुरातादृगासीद्वा
पुरुषोत्तमः ॥ २ ॥ नचकालांतरेकश्चिद्भविष्यतिनरोत्तमः ॥ तस्मात्कश्चिन्ममाप्यन्योनासीत्प्रियतरोभुवि ॥ ३ ॥ वर्तमानेऽधुनानास्ति
नवाप्यग्रेभविष्यति ॥ ४ ॥ ६९ ॥

म् ॥१४॥ नैवास्तिदुर्लभंकिंचित्तत्कटाक्षैकभागिनाम् ॥ सिद्धमित्येवशास्त्रीयंरहस्यंसर्वमंगलम् ॥१५॥ ७८ ॥ स्वाभाविकानवधिकातिशये शनौजस्तेजोऽवबोधबलधैर्यगुणैकवार्धिः ॥ वेदांतवाक्यपरिशीलनतत्त्वनिष्ठैर्ध्येयांघ्रिरक्षरपदोऽवतुनोमुकुंदः ॥ १ ॥ शुद्धोबुद्धोविमुक्तःश्रुति शिखरगिरांमुख्यतात्पर्यभूमिर्यस्माज्जातंसमस्तंजगदिदममृताद्वाप्यसर्वंस्थितोयः ॥ यस्यांशांशावतारैःसुरनरवनजैरक्षितंसर्वमेतत्तंभूमानंमु कुंदंहृदिगतममलंकृष्णमेवप्रपद्ये ॥ २ ॥ अत्यंतगंभीरमतीवविस्तृतंनिर्मथ्यवेदाब्धिमिदंविनिर्मितम् ॥ सुधारसंशास्त्रमगाधगोचरंसुबोधनि ष्ठंकिलयेनतंश्रये ॥ ३ ॥ यदुपतिमभिरामंसर्वविश्रामधामाभयपददमकामंवामदेवादिरामम् ॥ सकलसुरललामंश्याममाराममूर्तिभवजल धिविरामंनौमिकृष्णंसरामम् ॥ ४ ॥ कशास्त्रंगीताख्यंहरिमुखसरोजाद्विगलितंकचास्माकंबुद्धिर्विषयविषपंकेनिपतिता ॥ तथापिश्रीकांत प्रचुरगुणलक्ष्मीविरचितंकटाक्षंस्वच्छाच्छंह्यनुसृतवतांकिंनसुलभम् ॥ ५ ॥ इदंगीताशास्त्रंपरमपुरुषार्थैकनिलयंत्रिकांडंवेदार्थंसकलमिहसंगृ ह्यकथितम् ॥ स्वयंश्रीकृष्णेनश्रुतिविशदतत्त्वेनविभुनाजपाद्ध्यानाज्ज्ञानाच्छ्रुतमपिफलत्येवसुधियाम् ॥६॥ कृतिभिरपिकृतंयन्नप्रशंसंतिलो केकिमुमितमतिनेहाहंप्रवृत्तस्तथापि ॥ ममभवतुकथंचित्कृष्णपादेऽनुरागस्त्वितिमनसिनिधायक्षंतुमर्हंतिसंतः ॥ ७ ॥ नरत्वमापद्यसपद्यना मयंविरम्यभोगेभ्यइदंविलोक्यताम् ॥ तदाशयंकृष्णमशेषसाक्षिणंस्वयंविदित्वाकृतिनःकृतैरलम् ॥ ८ ॥ गीताशास्त्रमगाधमच्छहृदयश्रीम न्मुकुंदाननांभोजान्निःसृतमाप्ततत्त्वमतिभिर्व्याख्यातमत्यादरात् ॥ गद्यैस्तद्धृदयंविलोड्यसुगमैःपद्यैःसदानंदविच्चकेतद्विवृतिंस्वमंगलकृतेभा वप्रकाशाभिधाम् ॥ ९ ॥ गीताभावप्रकाशःश्रीसदानंदेननिर्मितः ॥ श्रीमत्कृष्णपदांभोजसेवामुद्दिश्यकेवलम् ॥१०॥ दीनबंधुःकृपासिंधुः सुखाराध्योजगत्पतिः ॥ प्रीयतांतेनभगवान्श्रीकृष्णोभक्तवत्सलः॥११॥ मुनियुणवसुचंद्रेविक्रमादित्यराज्याच्छुभफलवतिवर्षेमाघमासेसितें ऽशे॥ पशुपतितिथिसंधौचंद्रवारेसुलग्नेविवृतइतिनिबंधःसिद्धईशप्रसादात् ॥१२॥ ६८९॥ इतिश्रीमद्भगवद्गीताभावप्रकाशेसारस्वतवंशावतंस श्रीसदानंदविदुषाविरचितेगीतार्थनिष्ठात्रयोपसंहारवर्णनंनामाष्टादशोऽध्यायःसमाप्तः॥१८॥ आदितआरभ्यटीकाश्लोकसंख्या॥ ५२५९॥

यत्पूर्वंविश्वरूपाख्यंसयुणंरूपमद्भुतम् ॥ अर्जुनायहरिःसाक्षाद्दर्शयामाससर्ववित् ॥ १ ॥ आहानुसंदधानःसन्निदानींध्येयमैश्वरम् ॥ तच्चेति विश्वरूपंभोराजन्संस्मृत्यचेतसा ॥ २ ॥ स्मारंस्मारंमहानस्तिविस्मयोमेपुनःपुनः ॥ अतएवमहाभाग्यफलंहर्षंगतोऽस्म्यहम् ॥ ३ ॥ ७७ ॥ एवंचसतिपुत्रेस्वेजयस्याशांबलीयसीम् ॥ त्यजत्वंसर्वथाराजन्भगवंतंहरिंस्मर ॥ १ ॥ यस्मिन्योधिष्ठिरेपक्षेयोगमायेश्वरोहरिः ॥ समस्तयोग सिद्धीनांयोगस्याप्यथयोगिनाम् ॥ २ ॥ ईश्वरोभगवान्कृष्णःसर्वज्ञःसर्वशक्तिमान् ॥ भक्तदुःखहरःश्रीशोविभुर्नारायणोऽच्युतः॥ ३ ॥ तिष्ठ त्यात्मीयरूपेणगृहीत्वापांडुनंदनान् ॥ यत्रगांडीवधन्वाचतिष्ठत्येषोऽर्जुनोनरः॥ ४ ॥ तस्मिन्योधिष्ठिरेपक्षेनरनारायणाश्रिते ॥ श्रीराज्यलक्ष्मी र्विजयःशत्रुहानिनिमित्तकः ॥ ५ ॥ समुत्कर्षस्तथाभूतिःश्रीविशेषोऽतिविस्तरः ॥ राज्यलक्ष्म्याविवृद्धिश्चेत्यवश्यंभाविनीध्रुवा ॥ ६ ॥ ध्रुवे

तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः ॥ विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः ॥ ७७ ॥ यत्रयोगे श्वरःकृष्णोयत्रपार्थोधनुर्धरः॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥ ७८ ॥ इतिश्रीमद्भगवद्गीतासूप निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेमोक्षसंन्यासयोगोनामाष्टादशोऽध्यायः ॥ १८ ॥

त्यस्यान्वयोज्ञेयःसर्वत्रैवाविशेषतः॥ नीतिर्नयोयथाशास्त्रमेवंमेनिश्चयोनृप ॥ ७ ॥ तस्मात्त्वंसर्वथाराजन्वृथापुत्रजयाशिषम् ॥ त्यक्त्वाश्रीभ गवत्कृष्णानुगृहीतैश्चपांडवैः॥ ८ ॥ लक्ष्म्यादिभागिभिःसाकंसंधिरेवविधीयताम् ॥ इत्यभिप्रायएवास्यसंजयस्यात्रगम्यते ॥ ९ ॥ यतोधर्मस्त तःकृष्णोयतःकृष्णस्ततोजयः॥ इत्युक्तरीत्याधर्माद्यासंपद्यस्माद्बलीयसी ॥१०॥ तस्याएवजयस्तस्मादासुर्यास्तुपराजयः ॥ महामोहोद्भवासंप न्नाश्यादैव्यासुसंपदा ॥११॥ साधर्ममूलिकायस्मात्कृष्णपक्षावलंबिनी ॥ आसुरीकृष्णविमुखाबलहीनतयाधमा ॥१२॥ अतोधर्मंसमाश्रित्यकृ ष्णपादरतोभवेत् ॥ तेनैवसंसृतेःपुंसोनिस्तारःसुलभःस्वयम् ॥१३॥ इत्येवंरूपकस्योपसंहारोमुनिनाकृतः॥ अतःसर्वंसुसंपन्नंकृष्णपादानुरागिणा

॥ इतिश्रीमद्भगवद्गीताभावप्रकाशटीकायामष्टादशः समाप्तः ॥

INSTITUTE OF ADVANCED STUDY
Acc. No. 25118
Date 13.8.68

9-242